श्री तपोगच्छनायक-परमभट्टारक-सहस्त्रावधानधारि-मारिनिवारक-
श्रीमुनिसुन्दरसूरिनिर्मितः

# श्रीअध्यात्मकल्पद्रुमः




: पुनः संपादक :

प. पू. मुनिश्री तत्त्वप्रभविजयजी गणिवर

सकलशास्त्रारविन्दप्रद्योतनमहोपाध्याय-श्री**कल्याणविजय**-
गणिशिष्योपाध्याय-श्री**धनविजय**गणिविरचितया
**अधिरोहण्याख्यया,** तथा-**अकब्बर**शाहीहृदयालवालस्थितकृपा-
कल्पवल्ली-पोषणव्रताल**कृपारसकोश**करणादिवृत्तान्त-विश्रुतश्री-
**शान्तिचन्द्र**गणि-शिष्यरत्नोपाध्याय-श्री**रत्नचन्द्र**गणिविरचितया
**अध्यात्मकल्पलताख्यया** वृत्त्या युतः ।

**श्रीतपागच्छनायक-परमभट्टारक-सहस्रावधानधारि-मारिनिवारक-**
**श्रीमुनिसुन्दरसूरिनिर्मितः**

# श्रीअध्यात्मकल्पद्रुमः



❖ पुनः संपादक ❖

**प. पू. मुनिराजश्री तत्त्वप्रभविजयजी गणिवर**

श्रीतपोगच्छनायक-परमभट्टारक-सहस्त्रावधानधारि-मारिनिवारक-
श्रीमुनिसुन्दरसूरिनिर्मितः

# श्रीअध्यात्मकल्पद्रुमः


| | | |
|---|---|---|
| પુનઃ સંપાદક | : | પ. પૂ. મુનિરાજશ્રી તત્ત્વપ્રભવિજયજી ગણિવર |
| સહ સંપાદક | : | અમૃત પટેલ |
| પ્રકાશક | : | પ. પૂ. આ.ભ.શ્રી જિનપ્રભસૂરિ ગ્રંથમાલા |
| આવૃત્તિ | : | પ્રથમા, |
| નકલ | : | ૭૦૦ |
| વિ.સં. | : | ૨૦૭૨, ફા.વ.૩૦ |
| કિંમત | : | ૪૫૦-૦૦ |

**प्राप्तिस्थान**

પ. પૂ. આ. ભ. શ્રી જિનપ્રભસૂરિ ગ્રંથમાલા

A/૮ ધવલગિરી ફ્લેટ, ૮મા માળે,
નમિનાથ જૈન દેરાસર પાસે,
ખાનપુર, બ્હાઈ સેન્ટર, અમદાવાદ

C/o રસીકભાઈ - મો. ૯૯૦૪૫૦૧૨૨૧
C/o કૌશિકભાઈ - મો. ૯૨૨૭૨૦૦૦૭૩

श्रीतपोगच्छनायक-परमभट्टारक-सहस्रावधानधारि-मारिनिवारक-
श्रीमुनिसुन्दरसूरिनिर्मितः

# श्रीअध्यात्मकल्पद्रुमः

❖ *धर्मप्रभावक साम्राज्य* ❖

दीक्षायुग प्रवर्तक सुविशाल गच्छाधिपति
प. पू. आचार्यदेवेश श्रीमद् विजय
**रामचन्द्रसूरीश्वरजी महाराजा**

❖ *दिव्यकृपा साम्राज्य* ❖

सुविशाल गच्छाधिपति गुरु समर्पित
**प. पू. आ. भ. श्रीमद् विजय महोदयसूरीश्वरजी महाराजा**
परमश्रद्धेय गच्छाधिपति
**प. पू. आ. भ. श्रीमद् विजय हेमभूषणसूरीश्वरजी महाराजा**
अध्यात्मयोगी प. पू. पं. प्रवरश्री
**भद्रंकरविजयजी गणिवर्य**
प्रशान्तमूर्ति भवोदधितारक गुरुदेवश्री
**प. पू. आ. भ. श्री जिनप्रभसूरीश्वरजी महाराजा**

❖ *आशीर्वाद प्रदाता* ❖

वर्तमान गच्छाधिपति प. पू. आ. भ.
**श्रीमद् विजय पुण्यपालसूरीश्वरजी महाराजा**

❖ *पुनः संपादक* ❖

**प. पू. मुनिराजश्री तत्त्वप्रभविजयजी गणिवर**

# સમર્પણ



શ્રી તપાગચ્છના વિશાળ અને મઘમઘાયમાન બગીચાનું સુવાસ ફેલાવતું એક પુષ્પ... એટલે

સૂરિ "રામચન્દ્ર" - પં. ભદ્રંકર વિ. ગણિવરના શિષ્યરત્ન...

**સુવિશુદ્ધસંયમી... મારા ભવોદધિતારક પરમશ્રદ્ધેય ગુરૂદેવ પરમ પૂજ્ય આચાર્ય ભગવંત શ્રીમદ્ વિજય જિનપ્રભસૂરીશ્વરજી મહારાજા...**

જેઓશ્રીએ અનેક ગ્રંથો કંઠસ્થ કરીને જીવનની છેલ્લી પળો સુધી સ્વાધ્યાય દ્વારા ટકાવી રાખીને હૃદસ્થ બનાવીને સ્વ-પર ઉપકારને કર્યો હતો ? તેમાંનો આ અધ્યાત્મકલ્પદ્રુમ નામનો ગ્રંથ જેઓશ્રીને અત્યંત પ્રિય હતો.

આ ગ્રંથનું પુનઃ સંપાદન કરીને તેઓશ્રીને સવિનય સમર્પણ.

કૃપાકાંક્ષી

મુનિ તત્ત્વપ્રભવિજય



# શ્રુતભક્તિની અનુમોદના

પ. પૂ. પ્રશાન્તમૂર્તિ સુવિશુદ્ધસંયમી પૂજ્ય આચાર્ય ભગવત

શ્રીમદ્ વિજય જિનપ્રભસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન

## પ. પૂ. મુ. શ્રી તત્ત્વપ્રભવિ. ગણિવરના

## સદુપદેશથી શ્રી શંખેશ્વર પાર્શ્વનાથ આરાધક

# પુખરાજ રાયચંદ

# આરાધના ભવન ટ્રસ્ટે

જ્ઞાનખાતાની રકમમાંથી સુંદર લાભ લીધો છે

તેમની શ્રુતભક્તિની ભૂરિ ભૂરિ અનુમોદના

## પ્રસ્તાવના

# કંઈક પ્રાક્

અમૃત પટેલ

તપા૦ સોમસુંદરસૂરિજી (સં. ૧૪૩૦-૧૪૯૯)નાં પટ્ટધર સિદ્ધસારસ્વત આધ્યાત્મિક કવિ આચાર્યશ્રી મુનિસુંદરસૂરિએ અનેક ગ્રંથો - ત્રૈવિદ્યગોષ્ઠી-ગુર્વાવલી વગેરેની રચના કરી છે - તેમાં શાન્તરસની પ્રતિષ્ઠા કરતો ગ્રંથ અધ્યાત્મકલ્પદ્રુમ - શાંતરસ ભાવના વાસ્તવમાં અધ્યાત્મવિદ્યા માટેનો શ્રેષ્ઠ ગ્રન્થ છે.

સોળ અધિકારમાં વિભક્ત આ ગ્રન્થ ઉપર **ધનવિજયગણિકૃત અધિરોહિણી** ટીકા તથા **રત્નચન્દ્રગણિકૃતઅધ્યાત્મકલ્પલતા** ટીકા સાથે પૂર્વે દેવચંદ લાલભાઇ પુસ્તકોદ્ધાર ફંડ તરફથી બન્ને ટીકાઓ પ્રતાકારે છપાયેલ.

ઘણા સમયથી દુર્લભપ્રાયઃ થતી તે બન્ને ટીકાઓનું પુનઃ સંપાદન કરીને અત્રે પ્રકાશિત કરીએ છીએ. કોબાથી બન્ને ટીકાની હસ્તપ્રતની ઝેરોક્ષ પ્રાપ્ત થઇ છે તેમાંથી સંશોધનપૂર્વક પુનઃ સંપાદન કરેલ છે. રત્નચંદ્ર ગણિની ટીકાની હ.પ્ર. તો ખુદ રત્નચંદ્ર ગણિએ લખી છે જે ખૂબ આનંદની વાત છે. જેનાથી સંપાદનમાં કંઈક ચોક્કસાઇ આવી છે આ સાથે બે પરિશિષ્ટો અમે આપ્યા છે તે અધ્યાત્મકલ્પદ્રુમના વિદ્વાન ગુજરાતી વિવેચક શ્રીયુત મોતીલાલ ગિરધરલાલનાં મહાવીરજૈનવિદ્યાલય પ્રકાશિત ગ્રંથમાંથી આભાર સાથે ઉદ્ધૃત કર્યાં છે. **એમાં અમે શ્લોકનાં અકારાદિક્રમમાં જ જે તે છંદોના નામ આપ્યા છે.**

**અમે પ્રસ્તુત સંપાદનમાં -**

તદ્ સર્વનામ કે તેનાં તદ્ધિત શબ્દોની પૂર્વે કે ઇતિ અવ્યયની પૂર્વે સંધિ નથી રાખી તથા ર્ કે સ્ જેવી સંયુક્ત અક્ષરની જોડણી કરી છે, તે અંગે આપ પાઠક ગણ ને વિનંતી કે - 'સંધિઃ-ઉચ્ચારણ પરિવર્ત્તન અને લિપિ' - વિષે સ્વતંત્ર લખાણ છે. તે મનનપૂર્વક વાંચશો -

# સંધિ :- ઉચ્ચારણ - પરિવર્તન અને લિપિ

બોલનારનાં મુખથી જ્યારે કંઇ પણ બોલાય છે ત્યારે જે બે કે વધુ સ્વર + ધ્વનિઓ વચ્ચે નિયતસમય = માત્રાનું અંતર રાખવું પડે છે. કુદરતી રીતે એ અંતર જળવાય પણ છે. જેથી સાંભળનારને સ્પષ્ટ સંભળાય છે અને સ્પષ્ટ સમજાય છે.

હવે આ બોલવાની પ્રક્રિયા દરમિયાન, જો બે ધ્વનિઓ વચ્ચે નિયતસમયમાત્રામાં ઘટાડો થાય - બોલનારને વાતની સમજ પડી ના હોય, કે બોલનાર અશક્ત, બિમાર કે શ્રમિત હોય - તો બોલતાં બોલતાં સમયમાત્રામાં ઘટાડો શક્ય છે. ત્યારે તે ધ્વનિઓ સંકળાઇને બોલાય છે. તેવી જ રીતે સંકળાઇને જ સંભળાય છે - ત્યારે અર્થ સ્પષ્ટ થતો નથી આ અશુદ્ધ ઉચ્ચારણ છે, પરંતુ બોલનાર વ્યક્તિ ધ્વનિઓ વચ્ચે નિયત સમયનું અંતર સમજણ પૂર્વક ન રાખે તો ધ્વનિઓ સંકળાઇને સંભળાય છે છતાં અર્થ સ્પષ્ટ સમજાય છે - ત્યારે શાસ્ત્રીય પરિભાષામાં 'સંધિ' કહે છે - સંધિ શબ્દ સંસ્કૃતભાષામાં 'सम् + धा ધાતુને [क् +] इ પ્રત્યય લાગીને બનેલ છે. જેનો અર્થ 'સંધાન' સાંધો જોડાણ થાય છે.

આવા ધ્વનિસંધિ સાર્થક હોય અને શિષ્ટમાન્ય બને ત્યારે તેનો નિયમરૂપે સંગ્રહ થાય છે તેને સંધિનાં નિયમો કહે છે. શબ્દોમાં સ્વર અને વ્યંજન એ ધ્વનિઓ બે પ્રકારે છે. એટલે પરસ્પર સંધિ ચાર રીતે થાય છે.

૧. સ્વર + પૂર્ણ કે અપૂર્ણ વ્યંજન. ત્યારે કોઇ ઉચ્ચારણ ન બદલાય.

૨. સ્વર + સ્વર. ત્યારે સ્વરને કારણે પૂર્વસ્વરનું ઉચ્ચારણ બદલાય

૩. પૂર્ણ કે અપૂર્ણ વ્યંજન + સ્વર. ત્યારે સ્વરને કારણે અપૂર્ણવ્યંજન પૂર્ણ બોલાય.

૪. પૂર્ણ કે અપૂર્ણ વ્યંજન + પૂર્ણ કે અપૂર્ણવ્યંજન. ત્યારે પૂર્ણ કે અપૂર્ણ વ્યંજનનું ઉચ્ચારણ બદલાય.

(૧) સ્વર + પૂર્ણ કે અપૂર્ણ વ્યંજનનાં ધ્વનિક્રમમાં શાસ્ત્રીય રીતે ઉચ્ચારણ બદલાતું નથી.

અજિત + શાન્તિ, અજિત + મ્ ..... પરંતુ બોલનાર નિયતસમયનું ધ્યાન રાખે નહી તો પૂર્વવ્યંજનનો અન્ત્યસ્વર બોલાતો નથી.- સંભળાતો નથી. સંસ્કૃત જેવી ક્લાસિકલ લેંગ્વેજ માં અર્થ બદલાઇ જાય છે - સમ + રાજ - સમાન રાજા અર્થ થાય. પણ - સમ્ + રાજ્ = સમ્રાજ્ ઉચ્ચારણ થાય, સમાન રાજા કહેવું હતું - પરંતુ મોટો રાજા એવો અર્થ બદલાઇ ગયો.

ગુજરાતી વગેરે પ્રાદેશિક ભાષામાં પૂર્વશબ્દનો સ્વર લોપ સાર્વત્રિક છે, છતાં અર્થભેદ નથી. 'જિનદેવ'-ગુજરાતી ભાષક આ સંસ્કૃત ભાષાનાં શબ્દને પણ ગુજરાતી ભાષાની લઢણ-શૈલી મુજબ જિન્દેવ બોલ્શે (નહી કે બોલશે) જો કે લખાશે શબ્દની મૂળભાષાની ઉચ્ચારણ પદ્ધતિ પ્રમાણે 'જિનદેવ' વગેરે...

(૨) સ્વર + સ્વર. અહી બે સ્વરોનાં ઉચ્ચારણમાં નિયત સમયમાત્રા ઘટે તો તે સ્વરમિશ્રણથી બનતું 'સ્વરધ્વનિનું નવું ઉચ્ચારણ સ્વરૂપ' સર્જાય છે જેના નિયમો સં./પ્રા. વગેરે ભાષામાં પ્રસિદ્ધ છે. અ / આ + અ / આ = આ, અ / આ = ઇ / ઈ = એ....

પ્રાકૃત વગેરે ભાષાઓમાં તો સ્વરનું ઉચ્ચારણ ન પણ થાય = સ્વરલોપ થાય છે.

દેવ + કુલ = દેવઉલ - દેઉલ । પાદજાલ = પાયજાલ - પાયલ ।

(૩) પૂર્ણ કે અપૂર્ણ વ્યંજન + સ્વર. અહી પૂર્ણવ્યંજન પછી સ્વર આવે તો વ્યંજનનાં અન્ત્યસ્વર સાથે પરવર્તિસ્વરની સંધિ થાય જિન + ઇન્દ્ર = જિનેન્દ્ર

પરંતુ અપૂર્ણવ્યંજનમાં પરવર્તિસ્વર ભળી જાય છે જેથી અપૂર્ણવ્યંજન પૂર્ણ બને છે - અર્હન્તમ્ + અજિતમ્ = અર્હન્તમજિતમ્.

(૪) પૂર્ણ કે અપૂર્ણ વ્યંજન + પૂર્ણ કે અપૂર્ણવ્યંજન પૂર્ણવ્યંજન પછી પૂર્ણ કે અપૂર્ણવ્યંજન આવે તો ઉચ્ચારણમાં કોઇ પરિવર્તન થતું નથી.

વીર + જિન, કે વીર + મ્ .....

❖ પરન્તુ અપૂર્ણ વ્યંજન + પૂર્ણવ્યંજન - નો ક્રમ હોય ત્યાં **ઉચ્ચારણ બદલાય પણ છે** - આ વ્યંજન સંધિનું સંસ્કૃત ભાષામાં ખુબ મહત્વ છે.

શબ્દો કે ધાતુઓનાં રૂપો, સમાસ, તદ્ધિત કે બે વાક્યની મધ્યમાં આ વ્યંજનસંધિથી થતાં અપૂર્ણ વ્યંજનનાં, પૂર્ણવ્યંજનનાં કે બન્ને વ્યંજનોના 'ઉચ્ચારણ ફેર'નો બુદ્ધિપૂર્વક અભ્યાસ કરીને વ્યાકરણમાં નિયમો રજૂ કરવામાં આવ્યા છે.

ભાષક 'બોલતી વખતે' બે પૂર્ણ વ્યંજન વચ્ચે યોગ્ય સમયમાત્રા ન જાળવે તો સંસ્કૃત સિવાયની ભાષાઓમાં અપૂર્ણવ્યંજન + પૂર્ણવ્યંજનની પરિસ્થિતિ સર્જાય છે. ત્યારે 'સંસ્કૃત વ્યાકરણ' માં આપેલા નિયમો જે ભાષાશાસ્ત્રીય-અધ્યયનનાં ફલસ્વરૂપ તર્કબદ્ધ રીતે સમજાવાયા છે તે પ્રમાણે વ્યંજન પરિવર્તન પણ થાય છે - લિપિમાં એ બદલાતું ઉચ્ચારણ સંસ્કૃત ભાષા માં જ લખાય છે, અન્ય ભાષાઓમાં ઉચ્ચારણ બદલાય પણ લિપિ ના પણ બદલાય.

થોડા ઉદા. જોઈએ.—

સં. - जगत् + देव = जगद्देव. जगत् + हानि = जगद्हानि के जगद्धानि।

जगत् + नाथ = जगन्नाथ વગેરે. - શબ્દરૂપો - ધાતુરૂપો વગેરેમાં સ્વયં વિચારવું.

ક્યારેક ઉચ્ચારણ બદલાય પણ લિપિ ન બદલાય. 'તમે જ છો' - અહીં 'તમે ચ્ છો' એવું બોલાય છે = 'જ' નો ઉચ્ચારણ 'ચ' થાય છે - પણ તેવું લખાતું નથી.

S.M.S. લખાય છે. પણ 'એસેમેસ' આવું લોકો બોલે છે.

આમ 'બોલ જ છે' 'બોલે ચ્છે.' વગેરે ઉચ્ચારણમાં પરિવર્તન ને પકડવા કાન સરવા રાખવા પડે.

**આ તો સ્વરધ્વનિ અને વ્યંજનધ્વનિનાં ઉચ્ચારણ બાબતે સ્પષ્ટતા થઈ. હવે લિપિ સ્વરૂપ વિષે વિચારીએ -**

❖ સ્વર + સ્વરની પરિસ્થિતિમાં તો સંસ્કૃત-પ્રાકૃત-ગુજરાતી વગેરેમાં સંહિત

= સંમીલિત રૂપે લખાય છે જિનેન્દ્ર વગેરે.

❖ પ્રાકૃતમાં સ્વરસંધિ જ વૈકલ્પિક છે એટલે જિણેન્દુ, જિણિન્દુ - કે જિણઇન્દુ વગેરે બોલાય-લખાય છે.

❖ અપૂર્ણ વ્યંજન + પૂર્ણવ્યંજનની પરિસ્થિતિમાં 'વ્યંજન સંધિ થાય છે - ત્યાં હવે અપૂર્ણ + પૂર્ણવ્યંજનનાં - એટલે કે જોડાક્ષર-સંયુક્તાક્ષરનાં લખાણ વિષે વિચારીએ.

સંસ્કૃતભાષામાં વ્યાકરણનાં નિયમ પ્રમાણે સંધિ સહિત લખાણ થવું જોઈએ. આ નિયમ છે. છન્દઃ શાસ્ત્રમાં પણ છંદના દરેક પાદની અંદર અને પ્રથમપાદનાં અન્ત્ય વર્ણ સાથે બીજા પાદનાં આદિ વર્ણ સાથે સંધિ કરવી જ પડે તેવી જ રીતે ૩ અને ૪ પાદનાં અન્ત્ય અને આદ્યવર્ણમાં સંધિ કરવી જ પડે.

❖ શબ્દરૂપોની ધાતુરૂપોની સાધનિકામાં, તદ્ધિતપ્રક્રિયામાં કે સમાસમાં સંધિ કરવી જ પડે છે. એટલે સંસ્કૃતભાષાનો અભ્યાસકરનારને સંધિની સમજૂતીનાં નિયમોને વિશેષ સભાનતાથી યાદ રાખવા પડે છે. પરંતુ સંસ્કૃત ભાષામાં નવા વિદ્યાર્થીને સંધિ વિષે સરળતાથી સમજણ પડે, અર્થ કરવો સહેલો પડે એ દૃષ્ટિકોણથી કંઈક આવું વિચારી શકાય.

**સંયુક્તવ્યંજનનું લિપીકરણ-જોડાક્ષરની જોડણી.**

૧. મધ્યકાલીન હસ્તપ્રતોમાં સંયુક્ત અક્ષરમાં અપૂર્ણવ્યંજન ઉપર લખાતો અને પૂર્ણવ્યંજન નીચે લખાતો - મુક્ + ત = મુક્ત, ઉચ્છ્વાસ. સંયુક્તવ્યંજનની આવી લેખન પદ્ધતિ - 'લિપિપ્રથા' હતી. આમાં ધ્વનિપરિવર્ત્તન નિયમનું કોઇ કાર્ય નથી - કેમકે મુચ્ + ત ની પરિસ્થિતિમાં ચ્ નો ક્ ભાષાનાં નિયમ પ્રમાણે થાય છે. એટલે મુક્ત આવું જે ઉચ્ચારણ થાય છે તેને મુક્ત કે મુક્ત આમ ગમે તે રીતે લખો - તો વ્યાકરણ શાસ્ત્રનો કોઇ બાધ નથી. - હા, એ વાત ચોક્કસ છે કે આપણી આંખ 'મુક્ત' આવું દેખવા ટેવાઇ નથી - એટલે થોડું અતડું લાગશે પણ અર્થફેર નહી થાય.

૨. જ્યાં અપૂર્ણ અને પૂર્ણ એમ બન્ને વ્યંજનો એક જ સરખા હોય ત્યાં ક્ક

વગેરે ઉપરનીચેની જોડણીને બદલે क्क વગેરે આગળ-પાછળના જોડણી વધુ ઉચિત લાગે છે.

૩. દંડ વિનાના વ્યંજનો અપૂર્ણ હોય તો ખોડા-હલંત લખવા ઉચિત છે. छ्, ट्, ठ्, ड्, ढ्, द्, ल्, ह् - જેમકે મુટ્ઠી ને બદલે 'મુટ્ઠી... બુદ્ધિ ને બદલે બુદ્ધિ, उद्गम, उच्छ्वास, વગેરે...

**હવે નિયમાનુસાર સંધિ થતી જ હોય ત્યાં - સંધિ કે જોડણીની વાત -**

❖ જ્યાં વાક્યો આવે ત્યાં વચ્ચે વિરામ આવે એટલે સંધિ માટે વિકલ્પ છે (વિરામ લો) એટલે સંધિ ન કરીએ તો પણ ચાલે.

❖ જ્યાં સંધિ વિકલ્પે છે ત્યાં પણ સંધિ ન કરીએ - जिनः सर्वज्ञः, (स श-से-श-ष-सं वा) પરંતુ આપણા લખાણમાં આવું ત્રીજી ચોથી વાર આવે તો સંધિ કરવી હિતાવહ છે. જેથી નવા વિદ્યાર્થીને અર્થ સુગમ પણ થાય અને 'સંધિસહિત લખાણ'ની ટેવ પણ પડે.

❖ इति एवं, इत्थं જેવા અવ્યયો, કે જે બે વાક્યો વચ્ચેનાં 'સંયોજક' છે ત્યાં વિરામ આવે છે. માટે સંધિ ન કરવી વધુ ઉચિત છે. પરંતુ - इति-इत्थं,-एवं' આ રીતે અર્ધરેખા (હાઈફન) પૂર્વક લખવું साधुः-इति स वन्द्यः, વગેરે...

❖ ટીકાઓમાં ટીકાકારશ્રીએ - મૂળગ્રંથનાં સ્વતન્ત્ર કે સામાસિક શબ્દને પ્રથમા વિભક્તિથી સિદ્ધ કર્યો હોય પછી तत् સર્વનામનાં રૂપો કે तदा - तत्र વગેરે तद्सર્વનામનાં અવ્યયો સાથે સંધિ કરી હોય ત્યાં સંધિ ન કરવી, અથવા प्रायः स् + त કારાદિ રૂપો હોય છે. એટલે 'स्त' આવી જોડણી ઉચિત છે. પરંતુ 'स्त' જોડણી અર્થભ્રમ કરે એમ છે. આત્મના समः-आत्मसमः, तम्, અથવા 'आत्मसमस्, तं' જોડણી કરવી - પરંતુ 'आत्मसमस्तं' આવી જોડણી ન કરવી.

આટલું અલ્પમતિ પ્રમાણે વિચાર્યું છે વિશેષ તો વિશેષજ્ઞો જાણે.



# अनुक्रम


ग्रन्थपीठिका ..... १
१. मङ्गलाचरणम् ..... ११
२. ललना-ममत्वमोचनाधिकारः ..... ४८
३. अपत्यममतामोचनाधिकारः ..... ५९
४. धनममतामोचनाधिकारः ..... ६४
५. देहममतामोचनाधिकारः ..... ७३
६. विषयनिग्रहाधिकारः ..... ८३
७. कषायनिग्रहाधिकारः ..... ९५
८. शास्त्रगुणाधिकारः ..... १२०
अथ चतुगर्तिमाश्रित्य-द्वितीयं प्रतिद्वारम् ..... १३१
९. चित्तदमनाधिकारः ..... १४०
१०. वैराग्योपदेशाधिकारः ..... १५८
११. धर्मशुद्ध्युपदेशाधिकारः ..... १९६
१२. देव-गुरु-धर्मशुद्ध्यधिकारः ..... २१०
१३. यतिशिक्षोपदेशाधिकारः ..... २२७
१४. मिथ्यात्वादिसंवरोपदेशाधिकारः ..... २८७
१५. शुभप्रवृत्तिशिक्षोपदेशाधिकारः ..... ३१७
१६. साम्यसर्वस्वाधिकारः ..... ३३१
धनविजयटीकाप्रशस्तिः ..... ३४०
रत्नचन्द्रटीका प्रतपुष्पिका ..... ३४०
रत्नचन्द्रगणिटीकाप्रशस्तिः ..... ३४१
परिशिष्ट-१ (મૂળ શ્લોકોની ભાષામાં ચોપાઇ) ..... ३४४
परिशिष्ट-२ (મૂળ શ્લોકોનો અકારાદિક્રમ + છંદના નામ) ..... ३७४

सकलशास्त्रारविन्दप्रद्योतनमहोपाध्याय-श्री**कल्याणविजय**-गणिशिष्योपाध्याय-
श्री**धनविजय**गणिविरचितया **अधिरोहण्याख्यया, तथा-**
**अकब्बर**शाहीहृदयालवालस्थितकृपाकल्पवल्लीपोषणव्रताल**कृपारसकोश**करणादिवृत्तान्त-
विश्रुतश्री**शान्तिचन्द्र**गणि-शिष्यरत्नोपाध्याय-श्री**रत्नचन्द्र**गणिविरचितया
**अध्यात्मकल्पलताख्यया** च वृत्त्या युतः ।

**श्रीतपोगच्छनायक-परमभट्टारक-सहस्रावधानधारि-मारिनिवारक-**
**श्रीमुनिसुन्दरसूरिनिर्मितः**

# श्रीअध्यात्मकल्पद्रुमः

## । ग्रन्थपीठिका ।

**धनवि.**—ऐं नमः । श्रीगुरुभ्यो नमः । टीकाकृन्मङ्गलम् —

**[१]** ॐनमः परमाप्ताय, परमार्हन्त्यशालिने ।
परब्रह्मस्वरूपाय, सर्वानन्दाय तायिने ।।१।।

**[२]** भारति ! त्रिपुरे ! कामरूपे ! निरूपमाकृते ! ।
चान्द्रीकलेव मच्चेतस्तमःस्तोमभिदे भव ।।२।।

**[३]** उपासिताः स्तुता ध्याताः, कामिते कल्पपादपाः ।
सर्वागमज्ञा गुरवः, सुप्रसन्ना भवन्तु मे ।।३।।

**[४]** सकलागममाणिक्यपरीक्षादक्षचेतसः ।
शब्दार्थनिष्कनिकषाः, सन्तु सन्तोऽत्र वत्सलाः ।।४।।

**[५]** कीटिका किं करीन्द्रेण ?, मक्षिका किं गरुत्मता ? ।
तथा मन्दमनीषोऽपि, हस्यते किं बुधैरहम् ? ।।५।।

[६] इति निश्चित्य चेतोऽन्तर्यत्यतेऽत्यल्पबुद्धिना ।
मयाऽस्मिन् प्रस्तूते कार्ये, स्वपरोद्बोधहेतवे ।।६।।

[७] **अध्यात्मकल्पद्रुम**शास्त्रभावफलाप्तयेऽसा**वधिरोहणीव** ।
व्याख्या पदस्थानसुखाधिगम्या विधीयते स्वीयगुरुप्रसादात् ।।७।।

[८] पण्डिता अपि पश्यन्ति, बालक्रीडां चमत्कृताः ।
तद्वत् पश्यन्तु तत्प्रायां, ते व्याख्यां मत्कृतामिमाम् ।।८।।

**धनवि.–टीकारम्भः –**

इह हि प्रेक्षावत्प्रवृत्तिहेतवो धर्मा-ऽर्थ-काम-मोक्षाख्याश्चत्वारः पुरुषार्था भवन्ति, तत्रार्थ-कामौ परस्परं कार्य-कारणभावापन्नौ पुरुषार्थौ संसाराधिकारिणां भवतः, मोक्षाधिकारिणां तु धर्म-मोक्षौ पुरुषार्थौ भवतः, तत्रापि धर्म-मोक्षयोः कार्य-कारणभावात् कार्यस्य मोक्षस्यैव प्राधान्येन परमपुरुषार्थत्वम्,

अत एव च तदधिकारिभिः सहस्रावधानधारिभिः साक्षात्सरस्वत्यनुकारिभिः **श्रीसोमसुन्दरसूरि**पट्टालङ्कारिभिः श्रीतपागच्छनायक-युगप्रधानसमान-**श्रीमुनिसुन्दर-सूरिगणधारि**भिर्मोक्षस्यासाधारणोपायभूतं स्वयमनुभूतं शान्तरसमुपदेशद्वारेण [1]परेषु प्रकाशयद्भिः शान्तरसभावनात्मा, **अध्यात्माकल्पद्रुमा**भिधानग्रन्थो ग्रथित इति, मयाऽपि शान्तरसार्थिना तद्व्याख्या प्रस्तूयत[2] इति ।

ननु शास्त्रारम्भे निर्विघ्नतया शास्त्रसमाप्त्यर्थं प्रेक्षावतां प्रवृत्त्यर्थं च मङ्गल-विषय-प्रयोजन-संबन्धाधिकारिणो वक्तव्याः, उपोद्घात-प्रसङ्गा-ऽनवसराभिधास्तिस्रः सङ्गतयोऽपि दर्शनीयाश्च भवन्ति-इत्येतच्छास्त्रारम्भे के मङ्गल-विषय-प्रयोजन-संबन्धाधिकारिणः ? का च सङ्गतिः ?, इत्याकाङ्क्षायाम्, **'अथायम्' इत्या**दिना **भाव्यते** इत्यन्तेन वाक्येन ग्रन्थकारो मङ्गल-विषय-प्रयोजन-संबन्धाधिकारिणो-ऽवसरसङ्गतिं च दर्शयन् **ग्रन्थपीठिकां** रचयंश्चाह[3]–

**अथायं श्रीमान् शान्तनामा रसाधिराजः सकलागमादिसुशास्त्रार्णवोपनिषद्भूतः**

१. परेषां० । २. ०यते० । ३. - 'अथेति' को० ।

**सुधारसायमान, ऐहिका-ऽऽमुष्मिकानन्तानन्दसन्दोहसाधनतया, पारमार्थिकोपदेश्यतया सर्वरससारभूतत्वाच्च शान्तरसभावनात्माऽध्यात्मकल्पद्रुमाभिधानग्रन्थान्तरग्रथननिपुणेन पद्यसंदर्भेण भाव्यते, तद्यथा —**

**अथ'**इति **'पद्यसन्दर्भेण भाव्यते'**-इति सङ्क्षेपेणान्वयः, तत्र अथशब्द आनन्तर्यार्थो मङ्गलार्थो वा, आनन्तर्यं च **उपदेशरत्नाकरा**द्यनेकग्रन्थग्रथनेन सकल[1]श्रोतॄणां मोक्षाभिमुखीकरणात्, आनन्तर्यप्रतिपादनेन च, **उपदेशरत्नाकरादि**ग्रन्थग्रथनानन्तरं तदुपनिषद्भूतमवसरायातमध्यात्मशास्त्रं ग्रथनीयमित्यवसरसङ्गतिरपि दर्शितेति। मङ्गलार्थता च —

"ॐकारश्चाथशब्दश्च, द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ, तेन माङ्गलिकावुभौ" ।। [ ] इतिवचनात्;

मङ्गलार्थतया च प्रारिप्सितप्रतिबन्धकदुरितनिवारणार्थं शिष्य[2]शिक्षार्थं च ग्रन्थारम्भे मङ्गलं विधेयमिति शिष्टाचारोऽपि सत्यापितो भवति-इति मङ्गलमपि च दर्शितं भवति ।

**'अयम्'**-इति ग्रन्थकर्तुर्मानसप्रत्यक्षः, 'इदमः प्रत्यक्षगते' इति [ ] वचनात्, प्रत्यक्षेण स्वयमनुभूतः अस्मिन् ग्रन्थेऽनुभाव्यमानो वा,

**रसविचारः —**

**'श्रीमान्'**इति सकलदर्शनसाम्मत्येन शोभावान्, महानन्दपदप्रापणप्रवणशक्ति-सम्पत्तिमान् वा;

**'शान्तनामा'**इति शम्यते स्म शान्तः, 'णौ दान्त-शान्त-पूर्ण-दस्त-स्पष्ट-च्छन्त-ज्ञक्तम् (सि० ४-४-७७) इत्यादिना साधुः, शान्त इति नाम-अभिधानं यस्य स तथा, अत्र शान्तशब्दः पुल्लिङ्गे, मतान्तरेण नपुंसकलिङ्गे, यत उक्तम् —

"हास्यादयस्तु पुंल्लिङ्गाः" ।

**[९]** गौडस्तु—"शृङ्गार-वीरौ बीभत्सं, रौद्रं हास्यं भयानकम् ।
करुणा चाद्भुतं शान्तं, वात्सल्यं च रसा दश" ।। [ ]

१. ०ल श्री श्रो० । २. ०ष्यप्रशिष्यशि० ।

इति लिङ्गनिर्णयमाहेति **नाममालावृत्तौ** । [ ]

अथ **'शान्तनामा'**इत्यस्य विशेष्यमाह-**रसाधिराज** इति, रसेषु शृङ्गारादिषु **काव्यप्रकाश**मतेनाष्टसु, त्रिकोटीग्रन्थकारक-कलिकालसर्वज्ञश्री**हेमचन्द्रसूरीश्वरोपज्ञ-काव्यानुशासन**मतेन शान्तसमन्वितेषु नवसु, **गौडमतेन** वात्सल्यसहितेषु दशस् । अधिको राजा अधिराजः चक्रवर्ती, 'राजन्सखेः' (सि. ७-३-१०६) इत्यनेन'अट्' समासान्तः, अत्र राज्ञ इव नरत्वे सति नरेन्द्रतावत्, शान्तस्य रसत्वे सति रसाधिराजता भवति इति । शान्तस्य च स्वसंवेद्याऽलौकिकचमत्कारकारितया परब्रह्माऽऽस्वादसोदरत्वेनाद्धोन्मीलितनयनैर्योगीश्वरैः कवि-सहृदयैर्वा रस्यमानत्वात्-चर्व्यमाणत्वात् रसत्वम्;

**अत्र** शान्तरसे च रसतास्वरूपनिरूपणाय विभावादयस्त्रयो भावा भावनीया इति, वैराग्य-संसारभीरुता-तत्त्वज्ञान-वीतरागपरिशीलन-परमेश्वरानुग्रहादीनां **विभावत्वम्,** यम-नियमा-ऽध्यात्मशास्त्रचिन्तनादीनाम् **अनुभावत्वम्,** धृति-स्मृति-निर्वेद-मत्यादीनां **व्यभिचारित्वम्,** एतैस्त्रिभिर्भावैर्व्यक्तस्य तृष्णाक्षयरूपस्य शमस्य **स्थायिभावत्वम्** भवति, अस्यैव चर्वणाप्राप्तस्य शान्तरसत्वं भवति, यथा– [भर्तृहरिवैराग्यशतके-४१]

**[१०]** "गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य,
ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ।
किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशङ्काः,
संप्रा[२]प्स्यन्ते जरठहरिणाः शृङ्गकण्डूविनोदम् ? ।।

अत एवाहुः **श्रीहेम(चन्द्र)सूरिचरणा अलङ्कारचूडामणौ –**

"वैराग्य-संसारभीरुता-तत्त्वज्ञान-वीतरागपरिशीलन-परमेश्वरानुग्रहादिः-**विभावः,** यम-नियमा-ऽध्यात्मशास्त्रचिन्तनादिः-**अनुभावः,** धृति-स्मृति-निर्वेद-मत्यादिः-**व्यभिचारी,** तृष्णाक्षयरूपः **शमः स्थायिभाव**श्चर्वणाप्राप्तः शान्तो रस इति"

१. अत्रे 'ग्रन्थ' शब्दः श्लोकार्थः इति ज्ञेयम् । २. 'कण्डूयन्ते जरठहरिणाः शृङ्गमङ्गे मदीये' इत्यपि पाठः ।

[काव्यानु० अ० २ सू० १८] । न चास्य विषयजुगुप्सारूपत्वाद् बीभत्सेऽन्तर्भावोऽपि युक्तः, जुगुप्सा हि व्यभिचारिणी भवति, न तु स्थायितामेति, पर्यन्तनिर्वाहे तस्या मूलत एवोच्छेदात्, न च **धर्मवीरे**ऽन्तर्भावः, तस्याभिमानमयत्वात्, अस्य चाभिमान-प्रशमैकरूपत्वात्, तथापि तयोर्धर्मवीर-शान्तयोरेकत्वकल्पने वीर-रौद्रयोरपि तथात्वप्रसङ्गः, धर्मवीरादीनां चित्तवृत्तिविशेषाणां सर्वथाऽहङ्काररहितत्वे शान्तरसप्रभेदत्वम्, अहङ्कारसहितत्वे तु वीररसप्रभेदत्वम्, इति व्यवस्थाप्यमाने न कश्चिद् विरोध इति । न चास्य **शृङ्गारा**दिष्वन्तर्भावः, तेषां रागादिमयत्वाद्, अस्य च रागादिराहित्यस्वरूपनिरूपणात् । अतः स शान्तरसः सर्वेभ्यो रसेभ्योऽतिरिक्तो नवमो रसोऽभ्युपगन्तव्यः ।

न च स्थायिभावचर्व्यमाणरूपयोः शम-शान्तयोः पर्यायत्वमाशङ्कनीयम्, हास्य-हासयोरिव सिद्ध-साध्यतया लौकिका-ऽलौकिकतया साधारणा-ऽसाधारणतया वा वैलक्षण्यात्, किमुक्तं भवति ? - **अत्र विषयाद्यभिलाषाभावे केवलात्मस्वभावः शमः स्थायी भावः** समवायिकारणस्थानीयो, यम-नियमा-ऽध्यात्मशास्त्रचिन्तनादिः-**अनुभावो**ऽसमवायिकारण-स्थानीयः, इति शान्तरसस्वरूपं प्रसङ्गतो दर्शितम्, अत्र विशेषार्थिना [1]**काव्यानुशासनापरनामालङ्कारचूडामणिविवेकाद्यलङ्कारशास्त्रं** विलोक्यमिति ।

**रसाधिराजत्वं** च वक्ष्यमाणेन ऐहिक'इत्यादिना हेतुत्रयेण व्यक्तं भविष्यतीति नात्र दर्शितम् ।

अथ तमेव शान्तरसाधिराजं विशिनष्टि–**'सकलागमादिसुशास्त्रार्णवोपनिषद्-भूतसुधारसायमानः'** सकलाः-समस्ताश्च ते आगमाश्च-आचाराङ्गादयः, ते आदौ येषां, तानि च तानि सुशास्त्राणि च, आदिपदात् पूर्वाचार्यविरचितानि योगमार्गा-ऽध्यात्ममार्गप्रतिपादकान्युपाङ्ग-प्रकीर्णक-प्रकरणादीनि धर्मशास्त्राणि, तान्येवार्णवाः-समुद्राः, तेषामुपनिषद्-रहस्यं, [2]तद्भूतः-तत्सदृशो यः सुधारसः-अमृतरसः, स

---

१. अत्रे काव्यानुशासनम् इति ग्रन्थनाम, तत्र स्वोपज्ञे 'अलङ्कारचूडामणिः इति लघ्वी तथा 'विवेक इति बृहती-इति द्वे वृत्तीस्त' इति बोध्यम् -

२. 'अत्र' भूतशब्दः सादृश्यार्थकः तुलना... भुवन भूषणभूतनाथ-(भक्तामरस्तोत्र-१०) ।

इवाचरतीति तथा, अयमाशयो-यथा सकलसमुद्ररहस्यं सुधारसो भवति तथा सकलधर्मशास्त्ररहस्यं शान्तरसो भवतीति, अनेन विषयसूचा ।

अथान्यरसभावनपरिहारेण शान्तरसस्यैव भावनायां रसाधिराजत्वे च परम्परया हेतुत्रये प्रथमं हेतुमाह –

**"ऐहिका-ऽऽमुष्मिका-ऽनन्ताऽऽनन्दसन्दोहसाधनतया"** ऐहिकश्च-इहलोकसंबन्धी, आमुष्मिकश्च-परलोकसंबन्धी, स चासौ अनन्तश्च-अविनाशी स चासौ-आनन्दश्च-सुखानुभवः, तस्य सन्दोहः-समूहः, तस्य साधनतया-हेतुत्वेन, ऐहिकाऽनन्ता-ऽऽनन्दसाधनत्वं च शान्तरसवतामनुभवसिद्धम् ।

यदाहुः-**उमास्वाति-वाचकपादाः प्रशमरतिप्रकरणे** –

**[११]** "नैवास्ति राजराजस्य तत् सुखं नैव देवराजस्य ।
यत् सुखमिहैव साधोर्लोकव्यापाररहितस्य ।।[१२८]।।" इति

आमुष्मिकाऽनन्ताऽऽनन्दसाधनत्वं चाऽऽगमगम्यमिति, अनेन **प्रयोजनसूचा** ।

तत एव द्वितीयं हेतुमाह –

**"पारमार्थिकोपदेश्यतया"**–परमार्थः-तत्त्वं, तत्संबन्धी पारमार्थिकः, तात्त्विक इत्यर्थः, स चासौ उपदेश्यश्च-परहितहेतुतया कथनार्हः, स तथा[तद्भावस्तत्ता]तया, यद् वा परमार्थं-परमपुरुषार्थं मोक्षं स्वाधिकारतया विदन्तीति पारमार्थिका-निःस्पृहाः-तेषामुपदेश्यतयेत्यनेन, **अधिकारिसूचा,** पारमार्थिकोपदेश्यत्वमपि सदा सुभगस्य शान्तरसस्यैव, [1]शान्तादिषु विरसानां शृङ्गारादीनां तत्त्वतोऽनुपदेश्य-त्वादित्यर्थः।

यदाहु**र्वाचकपादाः प्रशमरतिप्रकरणे** –

**[१२]** "आदावभ्युदयकरा मध्ये शृङ्गार-हास्य-दीप्तरसाः ।
निकषे विषया बीभत्स-करुण-लज्जा-भयप्रायाः" ।।१०६।। इति

निकषे इति विशिष्टसंयोगोत्तरकालमित्यर्थः, यद् वा शृङ्गारादीनां भोजनवत् प्रवृत्तिरूपत्वेन स्वतः सिद्धत्वात्, तत्त्वतोऽनुपदेश्यत्वम्, शान्तरसस्य तु निवृत्तिरूपत्वे-नोपायसाध्यत्वात् पारमार्थिकोपदेश्यत्वम् ।

१. प्रान्तादि० ।

तत एव तृतीयं पञ्चम्यन्तं हेतुमाह –

**"सर्वरससारभूतत्वात्[1]"**–सर्वरसेषु शृङ्गारादिषु सारभूतत्वात्-प्रधानभूतत्वात् सर्वरसप्रधानत्वात्, सर्वरसप्रधानता च शाश्वताऽनन्ताऽऽनन्दहेतुत्वेन सर्वदा सरसत्वेन[2] वेति ।

अत्र हेतुत्रये पौर्वापर्येण हेतुहेतुमद्भावो यथा-यतः शान्तरस ऐहिकामुष्मिकानन्तानन्दसाधनं, तत एव पारमार्थिकोपदेश्यः, यतः पारमार्थिकोपदेश्यस्तत एव सर्वरससारभूतः । यद् वा **चः** समुच्चयार्थोऽन्त्यहेतुद्वये योज्यः, तेनैहिकामुष्मिकानन्तानन्दसंदोहसाधनतया पारमार्थिकोपदेश्यतया च सर्वरससारभूतत्वाच्चेति, अनेनान्यरसभावनपरिहारेण शान्तरसस्यैव भावनयोग्यता रसाधिराजता च दर्शितेति।

अथ **'पद्यसंदर्भेण'**इति विशेष्यं विशिनष्टि –

**"शान्तरसभावनात्माऽध्यात्म-कल्पद्रुमाभिधानग्रन्थान्तरग्रथननिपुणेन"**–तत्र शान्तरसस्य भावनं-व्यक्तीकरणं, तदेवात्मा-स्वरूपं यस्य, स चासौ **अध्यात्मकल्पद्रुमश्च,** स एव नाम-अभिधानं यस्य, तदेव ग्रन्थान्तरं-शास्त्रान्तरं प्रकरणमित्यर्थः, तस्य ग्रथनं-विरचनं, तत्र निपुणो-दक्षोऽर्थाद् योग्यः, तेन । अत्राध्यात्ममिति च आत्मानमधिष्ठितमध्यात्मम्-आत्मन्येव मनोव्यापारः, कथमयमात्मा बध्यते ? कथं वा मुच्यते ? इति, ग्रन्थान्तरत्वं च चिरन्तनाध्यात्मशास्त्रान्तरपेक्षया, एकस्माद् ग्रन्थादन्यो ग्रन्थो ग्रन्थान्तरमिति व्युत्पत्तेः।

अथ विशेष्यमाह-**"पद्यसन्दर्भेण"** पद्यं-छन्दः, तस्य सन्दर्भेण-नानाछन्दोरचनया, **भाव्यते**-भावनाविषयीक्रियते इति, अनेन शान्तरस पद्यसन्दर्भयोः प्रतिपाद्यप्रतिपादकभावः संबन्धोऽपि दर्शित इति पीठिकाया अक्षरार्थः । भावार्थस्त्वयम्-**उपदेशरत्नाकरादि**-ग्रन्थग्रथनानन्तरं तत्फलभूतसकलधर्मशास्त्ररहस्यं शाश्वतानन्दकारणं पारमार्थिकोपदेश्यः सर्वरसप्रधानः शान्तरसो वक्ष्यमाणेन पद्यबद्धा-**ऽध्यात्मकल्पद्रुमाभिधानेन** ग्रन्थेनोपदेशविषयः क्रियते[3] इति । अत्र'अथ'इत्यनेन मङ्गलं दर्शितं अवसरसंगतिश्च दर्शिता, **'शान्तरसाधिराज'** इत्यनेन प्रतिपाद्योऽर्थो दर्शितः; **'ऐहिकामुष्मिक'**-इत्यादिना प्रयोजनं दर्शितम्; **'शान्तरसाधिराजः**

१. त् 'इति, सर्वत० । २. न चेति । ३. ०यते इ० ।

**पद्यसन्दर्भेण भाव्यते'** इत्यनेन प्रतिपाद्य-प्रतिपादकभावः संबन्धो दर्शितः, परमार्थिकोपदेश्यतया' इत्यनेन निःस्पृहोऽधिकारी दर्शितः इति पीठिकाव्याख्या।

अथ शान्तरसभावना कथं भवतीत्याकाङ्क्षायामाह - **तद्यथा**-तद् यथा भवति तथाऽनन्तरमेव दर्श्यत इत्यर्थः।

**रत्नचन्द्रगणिकृता वृत्तिः—**

श्रीगुरुभ्यो नमः। परमगुरु-गच्छाधिराज-श्रीविजय**देवसूरि**चरणकमलेभ्यो नमः। महोपाध्यायश्री**शान्तिचन्द्र**गणिगुरुभ्यो नमः।।

**[१३]** प्रणतसुरासुरकोटी-कोटीरमणोमयूखमहितपदम्।
श्रीमत्सु**पार्श्व**सार्वं **मण्डप**दुर्गावनीरत्नम् ।।१।।

**[१४]** नत्वाऽध्यात्मसुरद्रुम-विवृतिमहं स्वल्पबुद्धिबोधार्थम्।
श्री**विजयदेवसूरि**-प्राप्तादेशस्तनोमि मुदा ।।२।। युग्मम्।

तत्रोपन्याससूत्रमिदम्-**अथाय**म्-इति, व्याख्या-**अथ**शब्दो मङ्गलार्थ आनन्तर्यार्थश्च, आनन्तर्यार्थ कथमिति ? पूर्वं श्री**मुनिसुन्दर**सूरिणा **गुर्वावल्यपरपर्यायः-त्रिदश-तरङ्गिणीनामा** गुरुपट्टक्रमो वर्णितः, तेन'अथेति-तदनन्तरं मया श्री**मुनिसुन्दरसूरिणा,** रसेष्वधिराजो **रसाधिराजः, पद्यसन्दर्भेण**-पद्यगुम्फेन, **भाव्यते**-मनसि चिन्तितो वाग्विषयीक्रियत इत्यन्वयलेशः। तत्र रसाधिराजत्वं पारदस्यापि भवतीति-शान्त इति नाम यस्य स **शान्तनामा**, रसेषु १-शृङ्गार, २-हास्य, ३-करुण, ४-रौद्र, ५-वीर, ६-भयानक, ७-बीभत्सा, ८-ऽद्भुत, ९-शान्तेषु अधिराजत्वमस्यैव वर्त्तते इति,

मदादिषु जैनसाधुषु साक्षादुपलभ्यमानत्वात् **अयम्**-इति। किंलक्षणः ? - ज्ञान-दर्शन-चरणरूपा श्रीः-सम्पद्विद्यतेऽस्माद्, अनन्ता सुखरूपा श्रीः-सम्पद् विद्यते वाऽस्मात्, स **श्रीमान्** भवतीति। पुनः कीदृक् ? - सकलान्यागमादि-सुशास्त्राण्येवार्णवः, तस्योपनिषद्भूतः-सारभूतः, अत एव सुधारसः-अमृतरसः,

१. णि मु०। २. र्थी मु० कार्यः - सं.। ३. रसः स्वादे... पारदेऽपि च (हैम. अनेका. ५७३-५७४) ४. शृङ्गार... चेत्यष्टौ नाट्ये रसः स्मृताः (का.प.४.२३) मां मम्मटे 'रस' जणाव्या पछी स्वतंत्र (कारिका ३५मां) रूपे शान्त ने नवमा रसरूपे स्वीकार्यो छे. ५. अहं आदौ येषां ते इति विग्रहः

तद् वदाचरन् सुधारसायमानः, [सकलागमादिसुशास्त्रार्णवोपनिषद्भूत-सुधारसायमानः] अपरोऽपि सुधारसोऽर्णवोपनिषद्भूत इति सान्वर्थं विशेषणम् ।

अन्यान् शृङ्गारादिरसान् विहाय शान्तनामरसाधिराजस्य भावनं कुतः ? इति हेतुत्रयमाह-[1]तृतीयान्तं पञ्चम्यन्तं लिङ्गत्वप्रतिपादकं वचनं हेतुः'[ ]इति, प्रथमं तृतीयान्तं हेतुद्वयं दर्शयति –

प्रथमं हेतुमाह-ऐहिकः-इहलोकसंबन्धी आमुष्मिकः-परलोकसंबन्धी योऽनन्तानन्दसन्दोहः, तस्य साधनम्[1], तस्य भाव **ऐहिकामुष्मिकानन्तानन्द-सन्दोहसाधनता तया** । शृङ्गारादयो हि कियदैहिकानन्दसन्दोहसाधनं, न तूक्तविशेषणावच्छिन्नानन्तानन्दसन्दोहसाधनम्, ऐहिकामुष्मिकानन्तानन्द-सन्दोहस्यास्मादेव जायमानत्वात्, यत उक्तम् – [प्रशमरतिग्रन्थे]

**[१५]** "नैवास्ति राजराजस्य तत् सुखं नैव देवराजस्य ।
यत् सुखमिहैव साधोर लोकव्यापाररहितस्य ।।१२८।।" इति।

द्वितीयं हेतुमाह-परमश्चासावर्थश्च परमार्थः, तं विदन्तीति पारमार्थिकाः, उपदेशार्ह उपदेश्यः पारमार्थिकैरुपदेश्यस्तस्य भावः, तत्ता तया । पारमार्थिका हि एनमेवोपदिशन्तीति ।

तृतीयं हेतुमाह-सर्वेषु रसेषु सारभूतस्तस्य भावस्तत्त्वं तस्मात् । यत एवायमैहिकामुष्मिकानन्तानदसन्दोहसाधनम् (१) तत एव पारमार्थिकैरुपदेश्यः (२) तत एवायं सर्वरससारभूतः (३) इति, अत्र हेतुहेतुमद्भावः सूचितः ।

**पद्यसन्दर्भेण** कीदृशेन ? - शान्तरसस्य भावना-वासना, सैवात्मा-स्वरूपं यस्य तद्, आत्मानमधि-आश्रित्य भवतीत्यध्यात्मम्, शान्तरसभावनात्मा च तदध्यात्मं च शान्तरसभावना-ऽत्माध्यात्मं, तस्य कल्पद्रुम इव शान्तरसभावनाऽत्माध्यात्मकल्पद्रुमः, शान्तरसभावनात्मा-ऽध्यात्मकल्पद्रुम इत्यभिधानं यस्य [तत्-शान्तरसभावनात्माध्यात्म-कल्पद्रुमाभिधानम्-] तद् ग्रन्थान्तरं च शान्तरसभावनात्मा-

१. '(हेतुः)' इत्यधिकः पाठः मु० ।

ध्यात्मकल्पद्रुमाभिधान-ग्रन्थान्तरम्, तस्य ग्रथनं-गुम्फः, तस्मिन् निपुणो-दक्षस्तेन [शान्तरसभावनात्मऽध्यात्मकल्पद्रुमाभिधानग्रन्थान्तरग्रथननिपुणेन]। स्वकृतानेक-ग्रन्थापेक्षया ग्रन्थान्तरत्वमस्य ज्ञेयम्, निपुणपुरुषप्रणीतत्वेन लक्षणया पद्यसन्दर्भस्यापि निपुणत्वम्, ग्रन्थान्तरग्रथनेनानेकग्रन्थरचनाचातुर्यं सूचितं, तेन स्वस्यापि निपुणत्वमागतं चिन्तिताध्यात्मप्रदायित्वादस्य कल्पद्रुमत्वमपीति सर्वं समञ्जसम्। अथवा शान्त... निपुणेन मया...इतिपदवाच्यस्य ग्रन्थकर्तुर्विशेषणम् ।

## मङ्गलाचरणम्

**[१६] जयश्रीरान्तरारीणां,**
**लेभे येन प्रशान्तितः ।**
**तं श्रीवीरजिनं नत्वा,**
**रसः शान्तो विभाव्यते ।। पीठिका-१ ।।**

**धनवि.**—ननु शास्त्रादौ प्रेक्षावतां प्रवृत्तिहेतवो मङ्गला-ऽभिधेय-प्रयोजन-संबन्धाधिकारिणोऽवश्यं वक्तव्याः, इह च ते के ? कथं वा उक्ता ? इत्याकाङ्क्षायां पूर्वं पीठिकायां गद्यबन्धेन दर्शितानपि विशेषतः शिष्यशिक्षार्थं ग्रन्थकारो ग्रन्थादौ पद्यबन्धेन तान् **दर्शयन्नाह —**

**जयश्रीः** इति, जयः-परेषामसहमानानामभिभवः, तस्य तद्रूपा वा श्रीः-सम्पद् **जयश्रीः, आन्तरारीणां**-काम-क्रोध-मान-मद-हर्ष-लोभ-लक्षणवैरिणाम्, **येन** भगवता, **प्रशान्तितः**-प्रकृष्टोपशमात्, **लेभे**-प्राप्ता, श्रिया-अष्टमहाप्रातिहार्यरूपया चतुस्त्रिंशदतिशयरूपया वोपलक्षितः, विशेषेण ईरयति-क्षपणाय प्रेरयत्यष्ट कर्माणि-इति **वीरः**, यदुक्तम् —

**[१७]** "विदारयति यत् कर्म, तपसा च विराजते ।
तपोवीर्येण युक्तश्च, तस्माद् वीर इति स्मृतः" ।।[ ]।। इति,

स चासौ **जिन**श्च-तीर्थकरः, तं **नत्वा शान्तो रसः** पूर्वव्यावर्णितस्वरूपः, **विभाव्यते**-उपदेशादिना परिशीलनालक्षणविभावनविषयीक्रियते।

अत्र श्रीवीरजिननमस्कारो जयश्रीरितिपदं वा **मङ्गलम्**,

**[१८]** "शास्त्रादौ श्रीश्च लक्ष्मीश्च, कल्याणं विजयोऽथ च ।
अस्ति-स्वस्ति-नमस्कारा, एते मङ्गलवाचकाः ।।[ ]।।" इतिवचनात्

शान्तरसश्च **विषयः**, आन्तरारिजयश्रीप्राप्तिश्च **प्रयोजनम्**, शान्तरस-शास्त्रयोर्विभाव्य-विभावनभावः संबन्धः, अर्थात् आन्तरारिजयश्रीस्पृहालुश्चाधिकारी,

इति मङ्गल-विषय-प्रयोजन-संबन्धाधिकारिणो दर्शिताः ।

**पुनरुक्तिरपि न दोष :–**

**ननु** पीठिकायां दर्शिता अपि मङ्गल-विषय-प्रयोजन-संबन्धाधिकारिणः पुनरपि प्रथमश्लोके कथं दर्शिताः ?, पौनरुक्त्यदोषोत्पत्तेरिति चेत् ? - न, एतस्य प्रकरणस्योपदेशमयत्वेन पौनरुक्त्यस्यादोषत्वाद्, यत उक्तम् –

**[१९]** "सज्झाय-झाण-तव-ओसहेसु उवएस-थुइ-पयाणेसु ।
संतगुणकित्तणेसु अ न हुंति पुणरुत्तदोसा उ" ।।[ ]।।

अस्यैवार्थस्य संवादमाहु**र्वाचकपादाः प्रशमरतिप्रकरणे** –

**[२०]** "यद्वद्विषघातार्थं मन्त्रपदे न पुनरुक्तदोषोऽस्ति ।
तद्वद्रागविषघ्नं पुनरुक्तमदुष्टमर्थपदम् ।।[१३]।।

**[२१]** "यद्वदुपयुक्तपूर्वमपि भैषजं सेव्यतेऽऽर्तिनाशाय ।
तद्वद्रागार्त्तिहरं बहुशोऽप्यनुयोज्यमर्थपदम्" ।।[१४]।।

**[२२]** वृत्त्यर्थं कर्म यथा तदेव लोकः पुनः पुनः कुरुते ।
तद्वद्विरागवार्त्ताहेतुरपि पुनः पुनर्योज्यः" ।।[१५]।। इति ।

किञ्च-आन्तरारीणां जयश्रीरित्यनेनापायापगमातिशयः, श्रीवीरजिनमित्यत्र श्रीपदेन पूजातिशयः, जिनपदेन च ज्ञानातिशयः, 'जिनः सामान्यकेवली'इति [ ] वचनात् । वाणीगुणस्य च चतुस्त्रिंशदतिशयलक्षणश्रीपदान्तःपातित्वात् श्रीपदेनैव च वचनातिशयोऽपि सूचित इति चत्वारोऽपि मूलातिशया दर्शिताः, **अतिशययुक्तो हि नमस्कृतः स्वेष्टसिद्धये भवति**-इति । किञ्च-जयश्रीरित्यनेन ग्रन्थकारो ग्रन्थस्य जयश्र्यङ्कितत्वमादौ दर्शयन् निजाभिधानं सूचयति, यत आराधितसुप्रसन्न-सरस्वतीवदनप्राप्तजयश्रीपदेनाङ्किताः सर्वे ग्रन्थाः **श्रीमुनिसुन्दर-सूरिभिः** कृता इत्यैतिह्यम् । किञ्च-अत्रोपशमाज्जयश्रीप्राप्तिर्हि विरोधालङ्कारे बीजम्, नीतिशास्त्रापेक्षया जयश्रियाः क्रोधादिसाध्यत्वाद्, धर्मशास्त्रापेक्षया विरोधपरिहारस्तु स्पष्ट एवेति ।

**रत्न.**—अथ निर्विघ्नपरिसमाप्तिकामो ग्रन्थादौ मङ्गलसूचकमादिपद्यमाह—

**'जयश्रीरान्तरीणाम्'** इति, व्याख्या-मया श्री**मुनिसुन्दर**सूरिणा, **तं श्रीवीरजिनं नत्वा** नवमः **शान्तो रसो विभाव्यते,** मनसि चिन्तितो वाग्द्वारा प्रकटीक्रियत इत्यर्थः । तं कम् ? - **येन** श्री**वीर**जिनेन, **प्रशान्तितः** शान्तरसतः, **आन्तराः**-मनोगता **अरयः**-क्रोध-मान-माया-लोभ-राग-द्वेषाख्याः षट्, तेषां **जयश्रीः**-जयलक्ष्मीः **लेभे**-प्राप्ता इत्यन्वयदिग् । तथा शास्त्रादौ त्रिविधानां देवतानां स्तुतिः कर्त्तव्या सम्भवति—समुचितायाः १, इष्टायाः २, समुचितेष्टायाः ३ । तत्र १. समुचितायाः स्तुतिः-नीतिशास्त्रारम्भे राजादेः, कामशास्त्रारम्भे स्मरादेः, २. इष्टायाः स्तुतिः [१]रघुकाव्ये उमेशयोः, ३. समुचितेष्टायाः स्तुतिः-योगशास्त्रारम्भे श्रीवीरजिनस्येति-तेनात्रापि योगशास्त्रत्वात् समुचितेष्टाया देवतायाः श्रीवीरजिनस्य स्तुतिं चक्रे श्रीमुनिसुन्दरसूरिः, तेन तं श्रीवीरजिनं नत्वेति कथनेन **मङ्गलं** चक्रे ।

ननु नमस्कारस्य विघ्नध्वंसे कथं सामर्थ्यम् ?, उच्यते—नमस्कारेण शुभाऽदृष्टमुपजायते, तेन च विघ्नध्वंस इति । यत्रापि च[२] नमस्कारं विनैव निर्विघ्नशास्त्रसमाप्तिर्दृश्यते, तत्रापि च मानसिकनमस्कारः कल्प्य एव, अत्रार्थे बहु वक्तव्यं परं विस्तरभयादन्यत्र शास्त्रेषूपलभ्यमानत्वाच्च न प्रतन्यते इति । **रसः शान्तो विभाव्यते** इत्यनेन वाच्य-वाचकभावसंबन्धः सूचितः । शान्तरसो वाच्यो, ग्रन्थोऽयं वाचकः । उपायोपेयभावो वाऽत्र संबन्धः—वचनरूपापन्नमिदं शास्त्रमुपायः तत्परिज्ञानं चोपेयमिति । अभिधेयं चात्र शास्त्रे अध्यात्ममार्गः । प्रयोजनं तु-अन्तरं शिष्याणां सर्वरसेभ्यः शान्तरसस्य सर्वोत्कृष्टतापरिज्ञानम्, परम्परं तु निःश्रेयसाधिगमः। गुरोस्त्वनन्तरं प्रयोजनं शिष्यानुग्रहः, परम्परं तु निःश्रेयसाधिगम एवेत्यलं विस्तरेण ।।१।।

## शान्तरसमाहात्म्यम्

**[२३] सर्वमङ्गलनिधौ हृदि यस्मिन्,**
**सङ्गते निरुपमं सुखमेति ।**

१. रघुवंशका० मु.—उमा पार्वती तथा ईशः शङ्करः-तयोर्द्वन्द्वः-उमेशौ, तयोः-इति विग्रहः। २. 'च' नास्ति मु० ।

**मुक्तिशर्म च वशीभवति द्राग्,**
**तं बुधा ! भजत शान्तरसेन्द्रम् ।।पीठिका-२।।**

**धनवि.**—नन्वन्तरं पीठिकायामैहिकामुष्मिकानन्तानन्दसन्दोहसाधनता शान्तरसस्योक्ता, सा च कथं भवति ? - इत्याकाङ्क्षायामाह —

सर्वमङ्गल-**सर्वाणि**-समस्तानि च तानि **मङ्गलानि** च-कल्याणानि, तेषां **निधौ**-निधाने, **यस्मिन्** शान्तरसेन्द्रे इति, शान्तरसस्य विशेषणम् । **हृदि**-मनसि **सङ्गते**-व्याप्ते सति **निरुपमं सुखमेति**-आगच्छति, **च** पुनः-**मुक्तिशर्म**-मोक्षसुखम् **द्राग्**-शीघ्रम् **वशीभवति**-स्वायत्तं भवतीत्यर्थः, भो **बुधाः ! तं** यच्छब्देनाक्षिप्तं **शान्तरसेन्द्रं भजत**-सेवध्वम्।

अत्र पण्डितानामेवोपदेशयोग्यतेति बुधा इति संबोधनपदं साभिप्रायम्, यदाहु**र्लोकतत्त्वनिर्णये श्रीहरिभद्रसूरयः**- —

**[२४]** "किं वा करोत्यनार्याणामुपदेष्टा सुवागपि ? ।
तक्षा तीक्ष्णकुठारोऽपि, दुर्दारुणि विहन्यते ।।[ ]।।"

**अत्र निधिस्वरूपं** (त्रि.श.पु.चरितान्तर्गतम् १/४/५७०)

**[२५]** "नैसर्पः पाण्डुकश्चापि, पिङ्गलः सर्वरत्नकः ।
महापद्मः काल-महाकालौ माणव-शङ्खकौ ।।५७०।।

**[२६]** तेऽष्टचक्रप्रतिष्ठाना, उत्सेधे चाष्टयोजनाः ।
नवयोजनविस्तीर्णा, दैर्घ्ये द्वादशयोजनाः ।।५७१।।

**[२७]** वैडूर्यमणिकपाटस्थगितवदनाः समाः ।
काञ्चनाः रत्नसम्पूर्णाश्चक्र-चन्द्रार्क-लाञ्छनाः ।।५७२।।

**[२८]** तेषामेवाभिधानैस्तु, तदधिष्ठायकाः सुराः ।
पल्योपमायुषो नागकुमारा भूमिवासिनः ।।५७३।।

[२९] ऊचुस्ते च वयं गङ्गामुखमागधवासिनः ।
आगतास्त्वां महाभाग !, भवद्भाग्यैर्वशीकृताः ।।५८३।।

इत्यादि वाच्यमिति ।।२।।

**रत्न.**—अथान्यान् रसान् विहाय केवलं शान्तरसस्य भावनं कुतः ? आधिक्यादिति, अत आह —

**सर्वमङ्गलनिधौ**-इति, - हे **बुधाः! तं शान्तरसेन्द्रं भजत**-श्रयत, शान्तरसेन्द्रमिति कथनेन सर्वरसाधिपत्वं सूचितम्, तेन तेभ्योऽतिशायित्वमपीति । तं कमित्याह- **यस्मिन् हृदि**-हृदये, **सङ्गते** सति-मिलिते सति, निर्गता उपमा यस्य तत् **निरुपमं सुखं एति**-आगच्छति । यस्मिन् किंलक्षणे ? - सर्वेषां मङ्गलानां निधिः द्रव्यस्य निधिः स्थानमिव, तस्मिन् सर्वाणि मङ्गलानि सन्तीति भावः ।। निरुपममिति सांसारिकसुखापेक्षया विवक्षितम्, अतोऽग्रेतनवाक्यमाह-च पुनर् **यस्मिन्** शान्तरसेन्द्रे हृदि सङ्गते सति **मुक्तेः शर्म**-सुखं **द्राक्**-शीघ्रं **वशीभवति**-आयत्तं भवतीत्यर्थः ।।२।।

**अधिकारद्वाराणि —**

**[३०] समतैकलीनचित्तो ललना-**
**ऽपत्य-स्व-देहममतामक्[१] ।**
**विषय-कषायाद्यवशः**
**शास्त्रगुणैर्दमितचेतस्कः ।। पीठिका-४ ।।**

**[३१] वैराग्यशुद्धधर्मा देवादि-**
**सतत्त्वविद् विरतिधारी ।**
**संवरवान् शुभवृत्तिः साम्य-**
**रहस्यं भज शिवार्थिन् ! ।। पीठिका-५ ।।**

१. मुग् को० ।

**धनवि.**—नन्वस्य ग्रन्थस्य महापुरस्येव कियन्त्यधिकारद्वाराणि ? इत्याकाङ्क्षायामुपदेश-व्यपदेशेन षोडश द्वाराणि सन्तीत्यार्याद्वयेनाह—समतै-..इति **समतायां**-रागद्वेषराहित्यरूपायामेव, एकम्-अद्वितीयं, **लीनं**-लयं प्राप्तम्, **चित्तं**-मनो यस्य स तथा, पुनः किंविशिष्टः ? - **ललना-इति, ललना** च कामिनी, **अपत्यं** च-पुत्र-पुत्र्यादिरूपं संतानम्, **स्वं** च हिरण्यादि द्रव्यम्, **देहं** च शरीरम्, तेषां तेषु वा 'ममेदं ममेदम्'-इत्याकारा बुद्धिः', तां मुञ्चति-त्यजतीति **ललना-ऽपत्य-स्व-देहममतामुग्,** पुनः किं विशिष्टः ? - **विषय-इति, विषया**श्च शब्द-रूप-रस-गन्ध-स्पर्शाख्याः **कषाया**श्च क्रोध-मान-माया-लोभाख्याः, **आदि**पदात् मद-मत्सराद्याः तेषाम्-**अवशः**-अनायत्तः, पुनः किंविशिष्टः ? - **शास्त्रगुणैः**-इत्यादि, **शास्त्राणि**-धर्मशास्त्राणि तान्येव **गुणा**-रज्जवः, **तैर्दमितं**-बन्धनविषयीकृतं **चेतो**-मनो यस्य स तथा ।।३।।

पुनः किंविशिष्टः ?-**वैराग्य..इति वैराग्येण**-विरागतया **शुद्धो**-निष्कलङ्को **धर्मः** —

**[३२]** "खंती अज्जव[1] मद्दव मुत्ती तव संजमे अ बोद्धव्वे ।
सच्चं सोअं आकिंचणं च बंभं च जइधम्मो" ।।[ ]।।

इति गाथोक्तो दशविधो यस्येति स तथा "द्विपदाद् धर्मादन्" [सि.हे. ७।३।४१] इत्यनेन'अन्प्रत्यये "अवर्णेवर्णस्य" [सि.हे. ७।४।६८] इत्यनेनाकारलोपे साधुः, पुनः किंविशिष्टः ? - **देवादिसतत्त्वविद्** देवानाम्, आदिपदात् गुरूणां धर्माणां च, **सतत्त्वं**-स्वरूपं **वेत्ति**-जानातीति तथा, पुनः किंविशिष्टः ? - **विरतिधारी,** विरतिं-सर्वसावद्ययोगनिवृत्तिं **धरति**-इति तथा, पुनः किंविशिष्टः ? - **संवरान्** (संवरः) **'समिती[2] गुत्तिपरीसह'**इत्यादि-(२)गाथोक्तः सप्तपञ्चाशद् भेदोऽस्यास्तीति तथा, पुनः किंविशिष्टः ? - **शुभवृत्तिः**-शुभा-पुण्यानुबन्धिनी वृत्तिः-आवश्यकादिषु प्रवृत्तिर्यस्येति सः, तथा सन् **साम्यरहस्यं**-समतारूपं रहस्यं-वस्तु, हे मोक्षार्थिन् ! **भज**-श्रयेत्यक्षरार्थः । भावार्थस्तूपदेशरूपः स्पष्ट एव, द्वाररूपस्तु —

---

१. 'मद्दव अज्जव' इति क्रमः प्रसिद्धः । २. समई - को० ।

१-**समतैकलीनचित्त** इत्यनेनाध्यात्मशास्त्रे शान्तरसे च समतैव मूलमिति चतुस्त्रिंशद्वृत्तैः **समताद्वारं** प्रथमम् ।

२-**ललना-ऽपत्य-स्व-देहममतामुग्,** इत्यनेन समता च ललनाममतामोचने एव भवतीति तदनन्तरमष्टभिर्वृत्तैः **ललनाममतामोचनद्वारं** द्वितीयम् ।

३-ललनाममतामोचनं **चा(त्व)पत्यममतामोचने** एव भवतीति तदनंतरं चतुर्भिर्वृत्तैः-**अपत्यममतामोचनद्वारं** तृतीयम् ।

४-अपत्यममतामोचनं च **द्रव्यममतामोचने** एव भवतीति तदनन्तरं सप्तभिर्वृत्तै**र्द्रव्य-ममतामोचनद्वारं** चतुर्थम् ।

५-द्रव्यममतामोचनं च **देहममतामोचने** एव भवतीति तदनन्तरमष्ट-भिर्वृत्तै-**र्देहममतामोचनद्वारं** पञ्चमम् ।

६-**विषय-कषायाद्यवश** इत्यनेन **देहममतामोचनं** च विषयनिग्रहे एव भवतीति तदनन्तरं नवभिर्वृत्तै**र्विषयनिग्रहद्वारं** षष्ठम् ।

७-विषयनिग्रहश्च **कषायनिग्रहे एव** भवतीति तदनन्तरमेकविंशतिवृत्तैः **कषायनिग्रहद्वारं** सप्तमम् ।

८-**शास्त्रगुणैः**'इत्यनेन कषायनिग्रहश्च **शास्त्रैरेव भवती**ति तदनन्तरं षोडशभिर्वृत्तैः **शास्त्रद्वार**मष्टमम् ।

९-**दमितचेतस्क** इत्यनेन शास्त्राणि च **दान्तचित्तानामेव** भवन्ति-इति तदनन्तरं सप्तदशभिर्वृत्तै**श्चित्तदमनद्वारं** नवमम् ।

१०-**वैराग्य**..इत्यनेन चित्तदमनं च वैराग्ये सत्येव भवतीति तदनन्तरं षड्विंशतिवृत्तै**र्वैराग्यद्वारं** दशमम् ।

११-**शुद्धधर्मा** इत्यनेन वैराग्यं शुद्धधर्मप्राप्तावेव भवतीति तदनन्तरं चतुर्दशवृत्तैः **शुद्धधर्मद्वार**मेकादशम् ।

१२-**देवादिसतत्त्वविद्**'इत्यनेन शुद्धधर्मप्राप्तिश्च देव-गुरु-धर्मस्वरूपज्ञाने एव भवतीति तदनन्तरं सप्तदशभिर्वृत्तैर्देवादिस्वरूपज्ञानद्वारं द्वादशमम् ।

१३-**विरतिधारी**'इत्यनेन सम्यग्देवादिस्वरूपज्ञानं च विरतिमत्येव भवतीति तदनन्तरं सप्तपञ्चाशद्वृत्तै**र्विरतिधारी**-इतिद्वारं त्रयोदशमम् ।

१४-**संवरवान्**'इत्यनेन विरतिश्च संवरधारिण्येव भवतीति तदनन्तरं द्वाविंशतिवृत्तैः **संवरद्वार** चतुर्दशमम् ।

१५-**शुभवृत्तिः**'इत्यनेन संवरवान् शुभवृत्तावेव भवतीति तदनन्तरं दशभिर्वृत्तैः **शुभवृत्तिद्वारं** पञ्चदशमम् ।

१६-**साम्यरहस्यम्**'इत्यनेन शुभप्रवृत्तिश्च साम्यरूपे रहस्ये परिणते एव भवतीति तदनन्तरमष्टभिर्वृत्तैः साम्यरहस्यद्वारं षोडशमुक्तमिति ।।४।।

**रत्न.**—अथास्मिन् शास्त्रे षोडशाधिकारानभिधित्सुर्ग्रन्थकृत् साम्योपदेशयोग्यं पुरुषमाह-**समतैकलीनचित्त** इति, **वैराग्यशुद्धधर्मा**'इति च युग्मम्,

व्याख्या-**हे शिवार्थिन्**-हे मोक्षाभिलाषिन् ! त्वं-**साम्यरहस्यं** समतोपनिषदं **भज**-श्रय । त्वं किंलक्षणः ? - समतायामेकम्-अद्वितीयं लीनं चित्तं यस्य सः, पुनः कीदृक् ? - ललना-स्त्री अपत्यं-पुत्रादि स्वं-धनम् देहः-कायः, तेषां ममतां मुञ्चतीति **ललना-ऽपत्य-स्व-ममतामुक्,** पुनः कीदृशः ? - **विषयाः**-शब्द-रूप-गन्ध-रस-स्पर्शाः पञ्च, **कषायाः**-क्रोध-मान-माया-लोभाश्चत्वारः, विषयाश्च कषायाश्च विषय-कषायाः, ते आदौ येषां ते, विषय-कषायादयः, तेषाम्-**अवशः**-न पराधीनः **स विषय-कषायाद्यवशः,** आदिशब्देन राग-द्वेष-मत्सर-प्रमादादीनां[1] ग्रहणम् । पुनः किं लक्षणः ? - शास्त्राणां जिनागमानां, गुणाः-पाप-पुण्ययोर्निवृत्त्युपादेयलक्षणाः, तैर्दमितं-वशीकृतं चेतो येन सः - **शास्त्रगुणैर्दमितचेतस्कः** ।।३।।

पुनः किंलक्षणः ? - वैराग्येण भवविरक्ततालक्षणेन[2] शुद्धो धर्मो यस्य स **वैराग्यशुद्धधर्मा,** द्विपदाद्धर्मशब्दाद्'अनि प्रत्यये धर्मा'इति जातम् । पुनः कीदृशः ? देवादीनां[3]-सतत्त्वं-वेत्तीति **देवादिसतत्त्ववित्,** आदिशब्दाद् गुरु-धर्मयोर्ग्रहणम् । पुनः कीदृशः ? - विरतिं-पञ्चाश्रवाद् विरमणं धरतीत्वेवंशीलो **विरतिधारी** ।

१. प्रमादानां–मु० । २. वैराग्येण उक्तलक्षणेन भवति शुद्धः-मु० । ३. ...दीनां देव-गुरुधर्माणां स० मु० ।

पुनः कीदृशः-संवरः-समित्यादिसप्तपञ्चाशद् भेदः सोऽस्यास्तीति **संवरवान्** । पुनः कीदृशः ? - शुभा वृत्तिः-वर्त्तनं यस्य स **शुभवृत्तिः** । ईदृशस्त्वं **साम्यस्य रहस्यं**-तत्त्वं **भजत्यन्वयलेशः** इति ।।४।।

**धनवि.**—नन्वेतानि कियन्ति द्वाराणि जातानीत्याकाङ्क्षायां सूत्रकार एव तानि व्यक्त्या गद्यबन्धेन दर्शयन्नाह – **इति षोडशाधिकारैः शास्त्रोपदेश्यपदसंग्रहः-**

**इति**-अमुना प्रकारेणोक्तैः **षोडशाधिकारैः**-षोडशद्वारैः **शास्त्रोपदेश्यपदसङ्ग्रहो** भवतीत्यर्थः । इति षोडशाधिकारैः शास्त्रोपदेश्यपदसङ्ग्रहः ।

**रत्न.**—इति षोडशभिः अधिकारैः-अर्थपदैः शास्त्र उपदेश्यपदस्य-उपदेशार्ह-पदार्थस्य संग्रहः ।

**[३३] चित्तबालक ! मा त्याक्षी-**
**रजस्रं भावनौषधीः ।**
**यत् त्वां दुर्ध्यानभूता न,**
**च्छलयन्ति च्छलान्विषः ।।१.१।।**

**धनवि.**—अथ च ते कथं भवन्तीत्याकाङ्क्षायामाह –

**यथा'**इति, यथा-येन प्रकारेण षोडश द्वाराणि भवन्ति, तथाऽनन्तरमग्रे दर्श्यते इत्यर्थः ।

तत्र च प्रथमं **समताद्वारं,** समता च चित्ताधीनेति चित्तस्यैव प्रथममुपदिशन्नाह-अत्र यत्-तदोर्नित्याभिसंबन्धात् तच्छब्दोऽहार्यः, तेन हे **चित्तबालक**-हे मनःशिशा ! तत्-तस्मात् त्वं **अजस्रं**-निरन्तरं **भावनौषधीर्मा त्याक्षीः** - मा त्यज'इत्यन्वयः, अत्र भाव्यते-वास्यते वैराग्येणात्मा याभिस्ता **भावनाः** ।

**[३४]** "साम्यं स्यान्निर्म्ममत्वेन, तत्कृते भावनाः श्रयेत्
अनित्यतामशरणं, भवमेकत्वमन्यताम् ।। [योगशास्त्र-३८१]।।

**[३५]** अशौचमाश्रवविधिं, संवरं कर्मनिर्जराम् ।
धर्मस्वाख्याततां लोकं, द्वादशीं बोधिभावनाम्" [यो.शा.३८२]।।

इति श्लोकप्रतिपादिताः, ता एव-**ओषधयो**-दुष्टदृष्टिरक्षादक्षवृक्षमूलिकाविशेषाः, ताः, भावनौषधीरित्यर्थः । अथ भावनौषधीधरणे फलमाह-**यद्**-यस्मात् कारणात्, **त्वां**-भवन्तं, **छलान्विषो दुर्ध्यानभूता न छलयन्ति**-वचनच्छलवेलाच्छलादिना न गृह्णन्तीत्यन्वयः, अत्र **कदाऽयं शुभभावनौषधीरहित** इति छलं मिषमन्वेषयन्तीति **छलान्विषः**, तथा **दुर्ध्यानानि** - आर्त्त-रौद्रध्यानानि तान्येव **भूता**-दुष्टव्यन्तरविशेषा इत्यक्षरार्थः । भावार्थस्तु चित्तस्य गम्याऽगम्य-कार्याऽकार्य-हेयोपादेय-परिज्ञान-विकलत्वेन बालकरूपता, भावनायाश्च स्थैर्य-धैर्याद्यापादकत्वेनौषधीरूपता दुर्ध्यानानां च पारवश्यापादकत्वेन दौर्गत्योत्पादकत्वेनोन्मादादिजनकत्वेन च भूतरूपतेति ।।१.१।।

**रत्न.**—षोडशपदार्थैः[1] उपदेशपदस्य-उपदेशार्हपदार्थ संग्रहः, तत्र पूर्वं साम्योपदेशः **यथा**-तत्र **यशोद्देशं निर्देश** इति प्रथमं साम्योपदेशः —

यथा-**चित्तबालक मा त्याक्षीः**' इति, व्याख्या हे **चित्तबालक !** त्वम् **अजस्रं**-निरन्तरं, **भावनाः**-शुभाध्यवसायाः, ता एव**ौषधयः**, ताः **मा त्याक्षीः** - मा त्यज। तदत्यागे को गुण इत्याह- **यद्**-यस्मात् कारणात् **त्वां दुर्ध्यानानि** एव **भूताः**-दुष्टव्यन्तरजातीया देवा **न छलयन्ति** । किंलक्षणाः ? - छलमन्विच्छन्तीति **छलान्विषः**-छलविलोककाः । अणुत्वाच्चपलत्वाच्च चित्तस्य बालकोपमानं; **बालकस्य तु भूत-शाकिन्यादिग्रसन-निवारणार्थं गले ओषधयो बध्यन्ते**, तेन चित्तबालकस्यापि दुर्ध्यानभूतग्रसननिवारणार्थं भावनाः शुभाध्यवसायलक्षणा अनित्यत्वादिद्वादश वा युक्ताः । भूता अपि नग्नत्वैकाकित्व-सन्ध्यासमयादिच्छलविलोककाः दुर्ध्यानान्यपि प्रमत्तत्त्वादिच्छलग्राहीणि भवन्ति, ततोऽयमुपदेश इति ।।१.१।।

**[३६] यदिन्द्रियार्थैः सकलैः सुखं स्यान्-**
**नरेन्द्र-चक्रि-त्रिदशाधिपानाम् ।**
**तद् बिन्दवत्येव पुरो हि साम्य-**
**सुधाम्बुधेस्तेन तमाद्रियस्व ।।१.२।।**

---

१. षोडशभिः अधिकारैः-अर्थपदैः शास्त्र उपदेश्यपदस्य उपदेशार्हपदार्थसङ्ग्रहः - मु० ।

**धनवि.**—अथोपदेष्टुमुद्दिष्टस्य साम्यसुखस्य सांसारिकसर्वसुखापेक्षयाऽतिशायित्वं दर्शयन्नाह-**यदिन्द्रियार्थैः** इति-**हि**-यतो नृपति-चक्रवर्त्ति-देवेन्द्राणां समस्तैरिन्द्रियार्थैः-अनुकूल-शब्द-रस-रूप-गन्ध-स्पर्शै[1] वीणा स्त्रीमुख-चम्पक-शितोपला-चन्दनरसादिभिः-इन्द्रियार्थकारणैः यत् सुखं भवति तद् अनन्तरोक्तं सुखं समतासुखसमुद्रस्य **पुरः-अग्रे एव** निश्चयेन **बिन्दवति**-बिन्दुरिवाचरतीति ।

अत्र च सांसारिकसुखस्याल्पकालीनत्वेन विनाशित्वेनेष्टवियोगादिबहु-दुःखमिश्रितत्वेन च बिन्दूपमानता, साम्यसुखस्य च बहुकालीनत्वेनाविनाशित्वेन केवलानन्दमयत्वेन च समुद्रोपमानतेति, यदुक्तम् —

**[३७]** "जं च कामसुहं लोए, जं च दिव्वं महासुहं ।
वीयरायसुहस्से हि, णंतभागं पि नऽग्घइ ।।[ ]।।"

**[३८]** दो तुंबडाइं हत्थे वयणे धम्मक्खराइं चत्तारि ।
विउलं च भरहवासं को अम्ह पहुत्तणं हरई[2] ? ।।[ ]।।

अत्रैवकारस्य त्रिधा व्याख्याने अन्त्यव्याख्यानं ग्राह्यं, न त्वन्यत् किंचित्, उच्यते यथा—

**[३९]** "अयोगं योगमपरैरत्यन्तायोगमेव च ।
व्यवच्छिनत्ति धर्मस्य, निपातो व्यतिरेकतः ।।[ ]।।

**[४०]** विशेषण-विशेष्याभ्यां, क्रियया च सहोदितः ।
विवक्षातोऽप्रयोगेऽपि, तस्यार्थोऽयं प्रतीयते ।।[ ]।।

**[४१]** व्यवच्छेदकफलं वाक्यं, यतश्चैत्रो धनुर्धरः ।
पार्थो धनुर्धरो नीलं, सरोजमिति वा यथा ।।[ ]।।" इतिवचनाद्।

विशेषणसङ्गत एवकारोऽयोगं व्यवच्छिनत्ति, यथा शङ्खः पाण्डुर एव, विशेष्यसङ्गत एवकारोऽन्ययोगं व्यवच्छिनत्ति, यथा पार्थ एव धनुर्धरः, क्रियासङ्गत एवकारोऽत्यन्तायोगं व्यवच्छिनत्ति, यथा नीलं सरोजं भवत्येवेति, **तेना**नन्तरोक्तेन

१. 'वीणा....कारणैः' - इति अवतरिका को. प्रतौ । २. को प्रतौ. ।

हेतुना **तं** समतासुखसमुद्रम् **आद्रियस्व-आदर**पूर्वं भजस्वेति ।।१.२।।

**रत्न.**–अथ शुभाभावनास्तु साम्येन भवन्तीत्यत आह –

[१]यदिन्द्रियाद्यैः-इति व्याख्या इन्द्रियाणि आद्यानि येषु तानि **इन्द्रियाद्यानि**, तैः सकलैर्यत् सुखं स्यात्, आदिशब्दात्-इन्द्रियार्थैः शब्द-रूप-गन्ध-रस-स्पर्शैर्-वीणा-मुख-चम्पक-सितोपला-चन्दनरसादिभिरिन्द्रियार्थकारणैश्च, केषां ? - नरेन्द्रा-राजानः, चक्रिणः-सार्वभौमाः, त्रिदशाधिपा इन्द्राः, तेषामिति । [२]इभ्य-त्रिदशादीनां तु पारवश्यात् सुखागणनं, सुखं तु स्वातन्त्र्यजम्, तस्मात् तेषाम-स्वातन्त्र्यान्न किंचित् सुखमिति, नरेन्द्रेभ्यश्चक्रिणां सुखमधिकम्, चक्रिभ्यस्त्रि-दशाधिपानां सुखमधिकम्, यथा यथा स्वातन्त्र्यमधिकम् तथा तथा सुखमधिकमिति। हि यस्मात् कारणात् तत् सुखं सुधाया अम्बुधिः सुधाम्बुधिः साम्यमेव सुधाम्बुधिः साम्यसुधाम्बुधिः, तस्य पुरः-अग्रे बिन्दवति, एवेति निश्चये, बिन्दुरिवाचरतीति बिन्दवति । "कर्तुः क्विप् गल्भ-क्लीब-होडात् तु ङित्" (सि.हे. ३/४/२५) इतिसूत्रेणाचारार्थे क्विपि बिन्दवतीति सिद्धम् । सर्वेषां नरेन्द्र-चक्रि-त्रिदशाधिपानां स्वातन्त्र्यात् साम्यवतः साधोः स्वातन्त्र्यमधिकम् । यतस्त्रयाणामपि प्रत्युतापाय-मरणादिभयवतां धिक् स्वातन्त्र्यम्। एतस्य तदभावतः स्वातन्त्र्यमतिप्रशस्यं, यत उक्तम् –

**[४२]** दो तुंबडाइं हत्थे वयणे धम्मक्खराइं चत्तारि ।
विउलं च भरहवासं को अम्ह पहुत्तणं हरइ ? ।।[ ]।।

हे **शिवार्थिन्** ! तेन कारणेन साम्यसुधाम्बुधिमाद्रियस्व-अङ्गीकुरुष्व । क्वचित्-**इन्द्रियार्थैरिति** पाठः ।।१.२।।

**[४३] अदृष्टवैचित्र्यवशाज्जगज्जने,**
**विचित्रकर्माशयवाग्विसंस्थुले ।**
**उदासवृत्तिस्थितचित्तवृत्तयः,**
**सुखं श्रयन्ते यतयः क्षतार्त्तयः ।।१.३।।**

१. मु. प्रतौ अवतरणिका नास्ति, तथा मूलत्वेन स्वीकृतोऽयं पाठः । २. 'अत्र-त्रि० मु० ।

**धनवि.**—नन्वनन्तरं सांसारिकसुखस्याणुतोक्ता समतासुखस्य च गुरुतोक्ता, सा च कथं भवति ? - इत्याकाङ्क्षायामाह —

अदृष्ट. इति - **अदृष्टं**-पुण्य-पापरूपं, तस्य **वैचित्र्यं**-न्यून-न्यूनतरा-ऽधिका-ऽधिकतररूपं-नानात्वं, **तद् वशात्**-तदायत्तत्वात्, **जगज्जने**-त्रिजगज्जन्तुजाते, कथंभूते ? इत्याह-विचित्रं इति-**विचित्राणि**-नानाप्रकाराणि च तानि **कर्माणि** च-कायव्यापाराः, **आशयाश्च**-मनोव्यापारा, **वाचश्च**-वाग्व्यापाराः तै**र्विसंस्थुले**-अस्वस्थे सति, **उदासवृत्तिः**-माध्यस्थ्यवृत्तिः, तस्यां **स्थिता**-श्रिता **चित्तवृत्तिः** - मनोव्यापारो येषां ते एवंविधाः **क्षतार्तयो**-गतमनःपीडा **यतयः सुखं श्रयन्ते**-भजन्ते ।।१.३।।

**रत्न.**—अथ साम्याश्रयणे फलमाह —

अदृष्ट० इति, व्याख्या-यतयः सुखं श्रयन्ते - भजन्ते । किंलक्षणाः ? - उदासा चासौ वृत्तिश्च उदासवृत्तिः, तस्यां स्थिता चित्तवृत्तिर्येषां ते, उदासवृत्तिस्थितचित्तवृत्तयः, अत एव किंलक्षणाः ? - [१]क्षिताः-क्षयं प्राप्ता अर्त्तयो येषां ते, क्षितार्तयः कस्मिन् सति ? - जगतां जनो **जगज्जनः**, तस्मिन्, किंलक्षणे ? - **विचित्राणि कर्माणि** विचित्रा **आशया**-जीवाभिप्राया विचित्रा **वाचः**, ताभि**र्विसंस्थुलो**-नानास्वभावः, तस्मिन् । कस्मात् ? - **अदृष्टस्य**-पूर्वकृतकर्मणो **वैचित्र्यं** विचित्रत्वं तस्य **वशः**, तस्मात् । [२]**लाभाऽलाभे सुखे दुःखे प्रियाऽप्रिये समानं वर्त्तनमुदासवृत्तिः** ।।१.३।।

**[४४] विश्वजन्तुषु यदि क्षणमेकं,**
**साम्यतो भजसि मानस ! मैत्रीम् ।**
**तत् सुखं परममत्र परत्राप्यश्नुषे,**
**न यदभूत् तव जातु ।।१.४।।**

**धनवि.**—नन्वनन्तरं सर्वसांसारिकसुखेभ्यः समतासुखस्य गुरुतोक्ता, सा च कथमनुभूयत ? इत्याकाङ्क्षायामुपदिशति —

---

१. क्षिताः इति मूलत्त्वेनापि पाठः, मुद्रिते तु 'क्षता०' इति पाठ । २. लाभेऽलाभे... प्रियेऽप्रिये इति मु०।

'विश्वजन्तुषु' इति **हे मानस !** - चित्त ! **यदि**-चेत् त्वं **विश्वजन्तुषु**-सर्वप्राणिषु जगज्जनेषु वा, **एकं क्षणं समताभावतो मैत्रीं**-परहितचिन्तास्वरूपां, **भजसि**-सेवसे, तदा [त्वं] **अत्र**-इह भवे **परत्र**-परभवे **तद्** अनिर्दिष्टं **परमम्**-उत्कृष्टं **सुखमश्नुषे**-लभसे, यत् सुखं **तव जातु**-कदाचित्, **नाभूत्**-नासीदिति ।।१.४।।

**रत्न.**—अथ साम्याश्रयणे किं सुखं स्यात् ? - इति प्रवर्त्तकं लोभयन्नाह—

विश्वजन्तुषु-इति, व्याख्या हे **मानस** ! हे मनः ! **त्वं साम्यतः**-समभावतः **एकं क्षणं विश्वजन्तुषु मैत्रीं भजसि, तदा त्वमत्र**-इह लोके, **परत्र**-परलोके **परमम्**-उत्कृष्टं तत् **सुखमश्नुषे**-प्राप्नोषि यत् सुखं **जातु**-कदाचिदनन्तभवभ्रमिदशायां **नाभूत्**-न जातमिति । अथवा हे आत्मन् ! यदि त्वं मानसस्य-मनसः सम्बन्धिनीं, न तु केवलां काय-वाङ्मयीं, मैत्रीं भजसीति व्याख्या ।।१.४।।

**[४५] न यस्य मित्रं[१] न च कोऽपि शत्रुर्-**
**निजःपरो वाऽपि न कश्चनाऽऽस्ते ।**
**न चेन्द्रियार्थेषु रमेत चेतः,**
**कषायमुक्तं परमः स योगी ।।१.५।।**

**धनवि.**—ननु समतायां कः कीदृशश्चाधिकारी ? - इत्याकाङ्क्षायां समताधिकारिणं दर्शयन्नाह —

'न यस्य' इति **यस्य** पुरुषस्य **कोऽपि मित्रम्**-सुहद्, **नास्ते**-न वर्त्तते, यस्य च **कोऽपि शत्रुः**-वैरी **नास्ते,** यस्य च स्वकीयः परकीयश्च **कश्चन नास्ते, च**शब्दः पुनरर्थे **अपि**शब्दः समुच्चये, **यस्य** च **चेतः** - चित्तम्, **इन्द्रियार्थेषु**-शब्दादिषु विषयेषु **न रमेत**-न क्रीडति, यस्य च चेतः **कषायमुक्तं स** पुरुषः **परमो योगी**त्युच्यते ।।१.५।।

**रत्न.**—[१]अथ साम्याश्रयणे जीवः कीदृक् स्यात् ? - इत्याह —

**'न यस्य'** इति, व्याख्या-यस्य कोऽपि [२]न मित्रमास्ते । आस्ते इति सर्वत्र

१. श्री विजयदेवसूरिगुरुभ्यो नमः - इति पाठः मूल पद्यान्तरम्-सं. । २. ०जनो न - मु० ।

योज्यम् । न च कोऽपि शत्रुः । कश्चन निजः स्वः परो वा-अप्यन्यः । तथा यस्य चेतः कषायैः-क्रोध-मान-माया-लोभैर्मुक्तं सद्, इन्द्रियार्थेषुशब्द-रूप-गन्ध-रसस्पर्शेषु न रमेत-नासक्तं भवेत्, स पुमान् परम-उत्कृष्टो योगी अष्टाङ्गयोगवान् भवेत् ।।१.५।।

**[४६] भजस्व मैत्रीं जगदङ्गिराशिषु,**
**प्रमोदमात्मन् ! गुणिषु त्वशेषतः ।**
**भवार्त्तिदीनेषु कृपारसं सदा**
**ऽप्युदासवृत्तिं खलु निर्गुणेष्वपि ।।१.६।।**

**धनवि.**—ननु समता केन समाचरणेन समायाति ?, कानि वा समताऽङ्गानि? - इति दर्शयन्नाह —

'भजस्व' इति- **हे आत्मन् !** त्वं **जगदङ्गिराशिषु**-सर्वजगज्जन्तुसमूहेषु **मैत्रीम्**-परहितचिन्तनरूपां **भजस्व**-प्रतिपद्यस्व, **तु** पुनः **अशेषतः** सर्वेषु **गुणिषु**-गुणवत्सु जनेषु **प्रमोदम्**-संतोषं भजस्व, तथाऽशेषु **भवार्त्तिदीनेषु**-संसारपीडापीडितेषु जनेषु **कृपारसम्**-कारुण्यं **सदाऽपि**-सर्वकालमपि भजस्व, तथा **निर्गुणेष्वपि**-गुणरहितेष्वपि जनेषु **खलु**-निश्चितम्, **उदासवृत्तिम्**-माध्यस्थ्यं भजस्व-इति ।।१.६।।

**रत्न.**—अथ जीवस्य साम्यागमे कारणानि आह —

**'भजस्व'** इति, व्याख्या— हे आत्मन् ! जगतामङ्गिनस्तेषां राशिषु-समूहेषु वक्ष्यमाणस्वरूपां मैत्रीं भजस्व । तथा गुणिषु ज्ञान-दर्शन-चारित्रादिगुणवत्सु प्रमोदं-हर्षं भजस्व, गुणिनो जनान् दृष्ट्वा हर्षं प्राप्नुहीत्यर्थः । अथवा अग्रेतनकाव्ये वक्ष्यमाणलक्षणं प्रमोदं भजेस्वेत्यपि । कुतः ? - अशेषतः-समस्तप्रकारेण, मनसा वचसा कायेनेत्यर्थः । अथवा[1] पदार्थेषु,-अशेषेषु, तसिप्रत्यये सप्तम्यन्तं पदं । तथा भवस्य-संसारस्यार्त्तिः-पीडा, तया दीनेषु कृपारसं भजस्व, भवार्त्तेः प्रतिकर्तुमीहालक्षणमित्यर्थः । खलुः-निश्चितं निर्गुणेष्वपि-गुणरहितेष्वपि पुंस्सु सदाऽप्युदासवृत्तिं भजस्वेत्यन्वयलेशः ।।१.६।।

१. वा अशेषतः - मु० ।

**[४७] मैत्री परस्मिन् हितधीः समग्रे,**
**भवेत् प्रमोदो [१]गुणिपक्षपातः ।**
**कृपा भवार्त्ते प्रतिकर्तुमीहो-**
**पेक्षा च माध्यस्थ्यमवार्यदोषे ।।१.७।।**

**धनवि.**—नन्वनन्तरमुक्तानि समताऽङ्गानि मैत्री-प्रमोद-कारुण्य-माध्यस्थ्यानि किंस्वरूपाणि भवन्ति ? - इत्याकाङ्क्षायामाह —

मैत्र्यादिस्वरूपं चैवं-एवं प्रकारेण ज्ञेयमित्यर्थः । मैत्री इति, **समग्रे**-सकले **परस्मिन्**-अन्यस्मिन् **हितधीः**-हितबुद्धिः **मैत्री** समताङ्गम् **भवेत्,** (१) तथा **गुणिपक्षपातो**-गुणवज्जनप्रशंसने क्रियमाणे हर्षप्रकर्षः **प्रमोद** इति समताङ्गम् भवेत्, (२) तथा **भवार्ते**-सांसारिक-दुःखपीडिते जने **प्रतिकर्तुम्**-प्रतीकारं कर्तुम्, **ईहा**-वाञ्छा **कृपा**-कारुण्यं यथा → [२]'असौ पापं कृत्वा मा संसारगहने पततु' इति धर्मोपदेशेन पापान्निवर्त्तयामि इति कृपेत्यर्थः, यथा वीरस्वामिनः शूलपाणियक्षं प्रति, कौशिकं सर्पं प्रति च ← समताङ्गम् भवेत्, (३) तथा-**अवार्यदोषे**-अनिवारणीयापगुणे क्रूरकर्मणि जने **उपेक्षा**-औदासीन्यं **माध्यस्थ्यं** समताङ्गम् भवेत् (४) ।।१.७।।

**रत्न.**—[३]मैत्र्यादिस्वरूपं चेदं —

**'मैत्री परस्मिन्'** इति, व्याख्या समग्रे-समस्ते परस्मिन्-आत्मव्यतिरिक्ते जने या हिता चासौ धीश्च सा हितधीः-हितबुद्धिः सा मैत्री भवेत् । तथा यो **गुणानां**-धर्मग्रहणे धर्मिग्रहणम्' इति न्यायाद्, [४]गुणिनां पक्षे सहाये पार्श्वे वा पतनं **गुणपक्षपातः** स प्रमोदो भवेत् । तथा या भवस्यार्त्तेः-संसारस्य चिन्तायाः प्रतिकर्तुमीहा वाञ्छा सा कृपा भवेत्, 'असौ पापं कृत्वा मा संसारगहने पतत्'इत्येनं धर्मोपदेशेन पापान्निवर्त्तयामीति वाञ्छा कृपेत्यर्थः, यथा वीरस्वामिनः शूलपाणियक्षं प्रति कौशिकं च सर्पं प्रति । च पुनर्, अवार्यश्चासौ दोषश्चावार्यदोषः,

१. गुणप० मूले । टीकायामपि को. २. ।। → ← चिह्नान्तर्गतः पाठः को० प्रतितः पूरितः ।
३. अथ मैत्रीस्वरूपमाह - मु० । ४. गुणिनां पक्षपातः - मु० ।

तस्मिन् यन्माध्यस्थ्यं राग-द्वेषयोरचिन्तनं सा उपेक्षा भवेत् । अत्रापि धर्मग्रहणे धर्मिग्रहणाद् दोषवति पुरुषे इति ज्ञेयम् । क्वचिदादर्शे **'गुणी'**इति पाठो दृश्यते, तदा तु न्यायस्य प्रयोजनं नास्ति । तथा **अवार्या दोषा** यस्य स तस्मिन् पुंसि, इति व्याख्यायामत्रापि न्यायस्य प्रयोजनं नास्तीति ।।१.७।।

**[४८] परहितचिन्ता मैत्री,**
**परदुःख-विनाशिनी तथा करुणा।**
**परसुखतुष्टिर्मुदिता,**
**परदोषोपेक्षणमुपेक्षा ।।१.८।।** [इतितुर्यषोडशके]

**धनवि.**—अनन्तरोक्तेऽर्थे पूर्वाचार्यश्री**हरिभद्र**सूरिसम्मतिं दर्शयति-**तथा चोक्तमिति** स्पष्टं, तदेव दर्शयति —

'परहित' इति - **'परहितचिन्ता'** परेषाम्-आत्मव्यतिरिक्तानां हितचिन्तनं मैत्रीत्युच्यते, **तथा**-पुनरर्थे, **परदुःखविनाशिनी** परेषां दुःखप्रध्वंसिनी चिन्ता-वाञ्छा वा **करुणेति, परसुखतुष्टिः**-परेषां सुखे सति सन्तोषः मुदितेति, **परदोषोपेक्षणं**-परदोषे दृष्टे सत्युपेक्षणमुपेक्षेति, अत्र विशेषव्याख्यानं श्री**हरिभद्र**सूरिविरचिततुर्य-षोडशकवृत्तितोऽवसेयम् ।।१.८।। इदं कुत्रोक्तम् ? इत्याकाङ्क्षायामाह-**तुर्यषोडशके** ।। इति ।।

**[४९] मा कार्षीत् कोऽपि पापानि,**
**मा च भूत् कोऽपि दुःखितः ।**
**मुच्यतां जगदप्येषा,**
**मतिर्मैत्री निगद्यते ।।१.९।।**

**[५०] अपास्ताशेषदोषाणां,**
**वस्तुतत्त्वावलोकिनाम् ।**
**गुणेषु पक्षपातो यः,**
**स प्रमोदः प्रकीर्त्तितः ।।१.१०।।**

**[५०] दीनेष्वार्त्तेषु भीतेषु,**
**याचमानेषु जीवितम् ।**
**प्रतीकारपरा बुद्धिः,**
**कारुण्यमभिधीयते ।।१.११।।**

**[५१] क्रूरकर्मसु निःशङ्कं,**
**देवता-गुरुनिन्दिषु ।**
**आत्मशंसिषु योपेक्षा,**
**तन्माध्यस्थ्यमुदीरितम् ।।१.१२।। इति श्रीयोगशास्त्रे ।।**

**धनवि.**–पुनर्ग्रन्थान्तरसंमतिं दर्शयन्नाह 'तथा च' इति – मा कार्षीदित्यादि-श्लोक-चतुष्टयं योगशास्त्र ४४४-४४७ गतं, तेन तद्व्याख्यानमपि योगशास्त्रवृत्तितोऽवसेयं, ग्रन्थविस्तर-भयान्नेह प्रतन्यते । नन्वेतच्छ्लोकचतुष्टयं कुत्रोक्तमित्याकाङ्क्षायामाह-**इति श्रीयोगशास्त्र** इति स्पष्टम् ।

**रत्न.**–तथा चोक्तं – तुर्यषोडशके । तथा च योगशास्त्रेऽपि "परिहितचिन्ता मैत्री" ति सुगमत्वान्न व्याख्यायते । "मा कार्षीत्'इत्यादिश्लोकचतुष्टयं योगशास्त्रवृत्तौ व्याख्यातत्वाद् विस्तरभयाच्च नात्र प्रतन्यत इति ।।१.१२।।

**[५२] चेतनेतरगतेष्वखिलेषु,**
**स्पर्श-रूप-रव-गन्ध-रसेषु ।**
**साम्यमेष्यति तदा तव चेतः,**
**पाणिगं शिवसुखं हि तदाऽऽत्मन् ! ।।१.१३।।**

**धनवि.**–ननु समतायाः किं फलम् ? - इत्याकाङ्क्षायामाह –

चेतनेति, **चेतना**श्च-चेतनावन्तः स्त्री-सर्पादयः, → ललना-ललनामुख-कोकिलरव-कस्तूरी-पशुमांसादयश्चेतनाः, अर्कतूल-मयूरपिच्छ-कर्पूर-वीणा-शर्करादय[१]ः

१. → ← चिह्नान्तर्गतः पाठः हस्तप्रतितः पूरितः ।

← अचेतनाश्च-काञ्चन-कण्टकादयः **तद्, गतेषु**-तदन्तर्वर्तिषु **अखिलेषु**-सर्वेष्विष्टानिष्टेषु **स्पर्श-रूप-रव-गन्ध-रसेषु**-स्पर्शाश्च कोमलत्व-कर्कशत्वादयो, रूपाणि च गौरत्व-श्यामत्वादीनि, रवाश्च सुस्वरत्व-दुःस्वरत्वादयो, गन्धाश्च सुरभित्व-दुरभित्वादयो, रसाश्च मधुरत्व-कटुकत्वादयः, तेषु हे **आत्मन् ! तव** चित्तं **साम्यं**-रागद्वेषराहित्यस्वरूपं **यदा एष्यति**-यास्यति **तदा हि**-निश्चितं **शिवसुखं**-मोक्षसुखं **पाणिगं**-हस्तप्राप्तं भवतीति ।।१.१३।।

**रत्न.**—[१]पुनः साम्याश्रयणे सुप्रापशाश्चतसुखेनात्मानं लोभयन्नाह —

**'चेतनेतरगतेषु'** इति, व्याख्या हे आत्मन् ! स्पर्श-रूप-रव-गन्ध-रसेषु इन्द्रियार्थेषु यदा तव चेतः-चित्तं साम्यं प्रत्येष्यति, प्राप्स्यतीत्यर्थः, किंलक्षणेष? चेतना ललनामुख-कोकिल-वनीखण्ड-कस्तूरीमृग-नाभिमद-पशुमांसादयः, तेषु गताः, इतरे-अचेतनास्त्वर्कतूल-तादृग्[?]मयूर-पिच्छचन्द्रक-घुसृण-कर्पूर-वीणा-वेणु-शर्करा-मध्वादयः, तेषु गताः स्पर्श-रूप-रव-गन्ध-रसाः तेषु, किंलक्षणेषु-अखिलेषु, तदा शिवस्य मोक्षस्य सुखं पाणिगं-हस्तगतं वर्त्तत इति ।।१.१३।।

**[५३] के गुणास्तव ? यतः स्तुतिमिच्छ-**
**-स्यद्भुतं किमकृथा ? मदवान् यत् ।**
**कैर्गता नरकभीः सुकृतैरस्ते ?,**
**किं जितः पितृपतिर्यदचिन्तः ? ।।१.१४।।**

**धनवि.**—ननु समताऽऽत्मशिक्षापूर्विका भवति-इति कथमात्मा शिक्षणीयः ? - इत्याकाङ्क्षायामाह —

'के गुणा' इति – **जम्बूस्वाम्यादीनामिव** तव तपः-शीलादयः **के गुणाः सन्ति ? यतो**-येभ्यो गुणेभ्यः, तव **स्तुतिं**-गीतगानादिना श्लाघामिच्छसि, पुनस्त्वं **विष्णुकुमार-वज्रस्वाम्यादिवत्** सङ्घसाहाय्यकरणादिकं, **स्थूलभद्रादिवत् कोशा**गृह-स्थितावप्यखण्डशीलपालनादिकं → वा[२] यतिजनापेक्षया राजप्रतिबोधता,

१. अथ - मु० । २. → ← चिह्नान्तर्गतः पाठः हस्तप्रतेः गृहीतः ।

तादृग्महर्द्धिकप्रतिबोधैः, सर्वशास्त्रपारीणता, विकृष्टतपःकरणता तादृक्जिन-प्रवचनोपदेशादिकं, श्राद्धापेक्षया पतत्प्रासादोद्धरणं, बिम्बप्रतिष्ठा नवीनप्रासाद-निर्माणं, सङ्घपतितिलकधरण-जिनशासनोन्नतिकरणप्रभृतिकं ← **वा अद्भुतम्**-आश्चर्यकारि **किमकृथा**-अकार्षीः ? **यद्-यस्मात्** त्वं **मदवान्**-जात्यादिना सर्वोत्कृष्टोऽहं, मत्तोऽन्ये-ऽपकृष्टा इत्यहङ्कारवान् वर्त्तसे; पुनस्ते-तव कैस्तपश्चरणा-दिभिर्देशविरति-प्रतिष्ठा-तीर्थयात्रा-दानादिभिः **सुकृतैर्नरकभीः**-नरकगतिभीतिर्गता; पुनस्त्वया किमिति प्रश्ने **पितृपतिः**-यमो **जितः**-पराजयं प्रापितो **यद्**-यस्मात् त्वम्, **अचिन्तः**-पुण्यं विना परभवे किं करिष्यामीति चिन्तारहितोऽसीति ।।१.१४।।

**रत्न.**—अथात्मनः स्तुतीच्छा—मदादिनिवारणमाह —

**के गुणाः** इति, व्याख्या हे आत्मन् ! तव के गुणाः-औदार्य-धैर्य-गाम्भीर्य-दान-शील-तप-उपशमादयः सन्ति ?, यतः कारणात् त्वं स्तुतिमिच्छसि-वाञ्छसि, तथा त्वमद्भुतं कार्यं यतिजनापेक्षया राजप्रतिबोध-तादृग्महर्द्धिकप्रतिबोध-सर्वशास्त्रपारीणता-विकृष्टतपःकरण-तादृग्जिन-प्रवचनोन्नति-करणोपदेशादिकम् श्राद्धापेक्षया पतत्प्रासादोद्धरण-बिम्बप्रतिष्ठा-नवीन-प्रासादनिर्माण-संघपतितिलकधरण-जिनशासनोन्नतिकरणप्रभृतिकं किमकृथाः-अकरोः?, यत् त्वं मदवानसि, तथा ते-तव कैः सुकृतैः-महत् तपःकरण-लोचनाग्रहण-दान-मुख्यैः कारणभूतैर्नरकस्य भीः-भयं गता, तथा त्वं - न विद्यते चिन्ता मरणादिका यस्य सः अचिन्तोऽसि तत् किं पितृपतिः-यमो जितः इति काकूक्त्याऽऽत्मानं प्रति प्रश्नः ।।१.१४।।

**[५४] गुणस्तवैर्यो गुणिनां परेषा-**
**माक्रोशनिन्दादिभिरात्मनश्च ।**
**मनः समं शीलति मोदते वा,**
**खिद्येत च व्यत्ययतः स वेत्ता ।।१.१५।।**

**धनवि.**—नन्वनन्तरोपदिष्टेन स्वस्तुत्यभिलाषाभावेन साम्ये कृते को गुणः ? - इत्याशङ्कायां वेत्तृत्वलक्षणगुणमाह —

'गुणस्तवैः' इति– **यः** पुमान् **परेषाम्**-आत्मव्यतिरिक्तानां **गुणिनां**-गुणवतां जनानां **गुणस्तवैः**-दान-ज्ञानादिगुणस्तुतिभिः च पुनर्-**आत्मनः**-स्वस्य **आक्रोश-निन्दादिभिः**-गालिप्रदान-दोषोद्भावनप्रमुखै**र्मनः**-चित्तं **समं**-रागद्वेषरहितं **शीलति-करोति**, **वा**-अथवा परेषां गुणिनां गुणस्तवैरात्मनश्चाक्रोश-निन्दादिभि**र्मोदते**-हृष्यति, **च** पुनः, परेषां गुणिनामाक्रोशनिन्दादिभिः स्वस्य च गुणस्तवैरिति **व्यत्ययतो**-विपर्यासतः **खिद्येत**-खेदं प्राप्नुयात् **स** पुमान् **वेत्ता**-ज्ञाता भवतीति ।।१.१५।।

**रत्न.**–अथात्मनः शान्तरसकारणं वेत्तृत्वं, तेन तदाह –

**'गुणस्तवैः'** इति, व्याख्या–स आत्मा वेत्ता-विदुरो भवति । सः कः ? - यः परकृतैः परेषां गुणिनां गुणस्तवैः-गुणस्तुतिभिः, च पुनरात्मनः-स्वस्य परकृतैराक्रोश-निन्दादिभिः कारणैः यः प्रतिसमयं तुल्यं **शीलति-रक्षति**, अमर्षणो न भवतीत्यर्थः । वा-अथवा मोदते एते गुणिनस्तत एतेषां गुणस्तवा न्याय्याः, अहं चागुण्यस्मि तेनाक्रोश-निन्दादिकरणमेव युक्तम् इति चित्ताह्लादवान् भवतीत्यर्थः । तथा च पुनरर्थे आत्मनो गुणस्तवैः परेषां गुणिनामाक्रोश-निन्दादिभिरिति व्यत्ययतो-विप्र्यासतः खिद्यते-खेदं गच्छेद्-'अहो मूढोऽसौ स्वार्थनिष्ठः परेषां गुणिनामाक्रोश-निन्दादीनि ममागुणिनो गुण-स्तुतीर्विधाय मां सन्तुष्टं करोति'इति, अत एव यथार्थविद् वेत्तेत्यर्थः ।।१.१५।।

**[५५] न वेत्सि शत्रून् सुहृदश्च नैव,**
**हिताहिते स्वं न परं च जन्तो ! ।**
**दुःखं द्विषन् वाञ्छसि शर्म चैतन्-**
**निदानमूढः कथमाप्स्यसीष्टम् ? ।।१.१६।।**

**धनवि.**–ननु परेषु साक्षादहितं समाचरत्सु कथं समता अनन्तरोक्ता समाचरणीया ? - इत्याशङ्काकुलान् शिष्यान् प्रति गुरुराह –

'न वेत्सि' इति– हे **जन्तो** ! हे प्राणिन् ! त्वं **शत्रून्**-वैरिणो **न वेत्सि**-न जानाति, च पुनः **सुहृदो**-मित्राणि **नैव** वेत्सि, पुनस्त्वं **'हिताहिते' हितं** च-

आयतिसुखदायि, **अहितं** च-आयतिदुःखदायि, ते **न** वेत्सि, पुनः **स्वं**-स्वकीयं, **परं च**-परकीयं **न** वेत्सि, एवं सत्यपि च त्वं **दुःखं**-प्रतिकूलवेदनीयं **द्विषन्**-द्वेषविषयीकुर्वन्, **शर्म**-सुखं वाञ्छसि, **एतन्निदानमूढः**-एतयोः सुख-दुःखयोर्निदानं-कारणं हेयोपादेयवस्तुपरिज्ञानं, तत्र मूढः-अज्ञानोपहतः **कथं**-केन प्रकारेण, **इष्टमाप्स्य**सि-लप्स्यसे इति ?, यत **इष्टोपायज्ञो हीष्टं साधयति, न ह्युपायाज्ञाने उपेयसिद्धिः,** - इति ।।१.१६।।

**रत्न.**—अथाऽयथार्थज्ञानेनाऽवेत्तारमाह —

**'न वेत्सि शत्रून्'** इति, व्याख्या-हे जन्तो! त्वं राग-द्वेष-क्रोध-मान-माया-लोभादीन् शत्रून् न वेत्सि-न जानासि, न वेत्सीति सर्वत्र योज्यं, च पुनरुपशम-विवेक-संवरादीन् सुहृदो-मित्राणि नैव, तथा हितं च अहितं च हिताऽ-हिते, डमरुक-मणिन्यायेन नैवेत्यत्रापि योज्यं, तथा ज्ञान-दर्शन-चारित्रादि प्रति स्वम्-आत्मीयं न, च पुनः प्राणातिपाताद्यष्टादश पापस्थानानि परम्-आत्मनोऽन्यत् नेति । तथा चारित्रादिजनितं दुःखं प्रति द्विषन्-द्वेषं कुर्वन्नसि, च पुनरैहिकं पारत्रिकं च-स्वर्गादिजनितं शर्म-सुखं वाञ्छसि, परमेतस्य शर्मणो निदानं-कारणं देशविरति-सर्वविरत्यादि कष्टं, तत्र मूढः-अज्ञानवान् सन् त्वमिष्टं-वाञ्छितं शर्म कथमाप्स्यसि ?, काकूक्त्याऽऽत्मानं प्रति प्रश्नः, अपि तु न प्राप्स्यतीति सूचाऽपि ।।१.१६।।

**[५६] कृती हि सर्वं परिणामरम्यं,**
**विचार्य गृह्णाति चिरस्थितीह ।**
**भवान्तरेऽनन्तसुखाप्तये त-**
**दात्मन् ! किमाचारमिमं जहासि ? ।।१.१७।।**

**धनवि.**—ननु पूर्वपद्योक्ता निदानमूढता कथं भवति ? - इत्याकाङ्क्षायां तामेव दर्शयन्नुपदिशति —

**'कृती हि'** इति **हि** यत **इह**-संसारे **कृती**-पण्डितः **सर्वं** स्वीकार्यं वस्तु

**विचार्य**-पौर्वापर्येणालोच्य **परिणामरम्यम्**-आयतिसुन्दरं **चिरस्थिति** च-चिरकालावस्थायि **गृह्णाति**-स्वीकरोति, **तत्**-तस्माद् हे **आत्मन् ! भवान्तरे**-परभवे, **अनन्तसुखाप्तये** य आचारो भवति तम्, **इममाचारं** पञ्चविधाचाररूपमप्रमत्ततया समाचरणेनार्थाद् भगवता प्रकाशितं, (किं)कथं-केन कारणेन **जहासि ?**, त्यजसीत्यर्थः ।।१.१७।।

**रत्न.**—अथ वेत्तृत्वफलमाह —

**'कृती हि'** इति, व्याख्या। हि-निश्चितं कृती-विद्वान्, इह लोके यत् परिणामेन-परिपाकेन रम्यं-मनोरमं तथा चिरं स्थितिर्यस्य तत् चिरस्थिति, एवंविधं सर्वं वस्तु विचार्य गृह्णाति, तद् भवान्तरे-अन्यस्मिन् भवेऽनन्तसुखाप्तये-अगणितसुखप्राप्तये इत्यर्थः भवति, तत्-तस्माद्धेतोः हे आत्मन ! इममाचारं किं जहासि ?, अपि तु मा जहाहि, मा त्यजेत्युपदेशः ।।१.१७।।

**[५७] निजः परो वेति कृतो विभागो,**
**रागादिभिस्ते त्वरयस्तवात्मन् ! ।**
**चतुर्गतिक्लेशविधानतस्तत्,**
**प्रमाणयन्नस्यरिनिर्मितं किम् ? ।।१.१८।।**

**धनवि.**—अथ समताविध्वंसकानां राग-द्वेषादीनां वैरित्वमुपदिशति —

'निजः' इति **हे आत्मन्,** 'अयं जनो **निजः**-स्वकीयः, अयं **परः**-परकीय' इत्ययं **विभागो**-भेदव्यवहारो **रागादिभिः**-राग-द्वेष-काम-क्रोध-मद-मत्सरैः **कृतो**-निष्पादितोऽस्ति, **ते तु**-रागादय**श्चतुर्गतिक्लेशविधानतः, तवारयो**-वैरिणः सन्ति; **तत्**-तस्माद् **अरिनिर्मितं**-वैरिविलसितं स्व-परविभागं **किं प्रमाणयन्नसि ?**, किं सत्यतया मन्यसे ? इत्यर्थः ।।१.१८।।

**रत्न.**—अथ स्व-परविभागे हेतुमाह —

**'निजः परो वा'** इति, व्याख्या-हे आत्मन ! अयं निजः-कलत्रादिजनो वा पुनरयं परो-द्विषदादिरिति विभागो-भेदो रागादिभिः षडन्तरारिवर्गैः कृतोऽस्ति,

तुरिति विशेषे, ते रागादयस्तवारयः सन्ति । कुतः ? - चतसृणां मनुष्य-तिर्यग्-देव-नरकगतीनां यत् क्लेशविधानं, तस्मात्, तत्-तस्मात् कारणात्, अरिनिर्म्मितं स्व-परादिविभागं किं प्रमाणयन्नसि ? - प्रमाणीकुर्वन्नसि, अपि तु मा प्रमाणयेत्यर्थः ।।१.१८।।

**[५८] अनादिरात्मा न निजः परो वा,**
**कस्यापि कश्चिन्न रिपुः सुहृद् वा ।**
**स्थिरा न देहाकृतयोऽणवश्च,**
**तथापि साम्यं किमुपैषि नैषु ? ।।१.१९।।**

**धनवि.**—नन्वनन्तरं समतोपयोगी निज-परविभागाभावः कर्तव्य उपदिष्टः, स कथं भवति ? इत्याकाङ्क्षायां तमेव (निजपरत्वाभावं) दर्शयन्नुपदिशति-

'अनादिः' इति **आत्मा**-जीवः, **अनादिः**-आदिरहितो वर्त्तते नित्यत्वेन सदा वर्त्तमानत्वात्, च पुनः **कस्यापि**-आत्मनः कश्चिद्-आत्मा, न-नैव, सर्वथा **निजः** स्वकीयः **पर**श्च-अस्वकीयो भवति, अत्र निजत्व-परत्वाभावोऽनन्तशो भिन्नभिन्नजातीयरूपेण [स्वकीया] स्वकीयत्वेन मातापित्रादिरूपेण शत्रुत्वेन च जातत्वात्; च पुनः कस्याप्यात्मनः कश्चिदात्मा सर्वथा **न रिपुः**-वैरी **सुहृद् वा**-मित्रं भवति, अत्र सर्वथा शत्रुत्वाभावो मित्रत्वा-भावश्चानन्तशः शत्रुत्वेन मित्रत्वेन च सर्वेषां जीवानां सर्वेषु जीवेषु जातपूर्वत्वात्, यदुक्तम्-**उत्तराध्ययने** [वैराग्यशतकेऽपि]

**[५९]** "न सा जाई न सा जोणी, न तं ठाणं न तं कुलं ।
न जाया न मुया जत्थ, सव्वे जीवा अणंतसो" ।। [ ] ।।

तथा **भगवत्या**दिष्वपि द्वादशे शतके सप्तमोद्देशके –

"अयं नं भंते ! जीवे सव्वजीवाणं माइत्ताए भाइत्ताए भगिणित्ताए भज्जत्ताए पुत्तत्ताए धूयत्ताए सुण्हत्ताए उववण्णपुव्वे ?, हंता गोयमा ! जाव अणंतखुत्तो" इत्यादि, एवं "मित्तत्ताए अरियत्ताए दासत्ताए" इत्याद्यपि; च पुनः कस्यापि देहिनो **देहाकृतयः** शरीराकारा अणवः-परमाणवो **न स्थिराः**, तत्र देहाकाराणां

परमाणूनामस्थिरत्वं मृत्तिका-वालुका-धान्यकण-रसा-ऽसृग्-मांस-मेदो-ऽस्थि-मज्जा-शुक्रादिनानारूपत्वेन जायमानत्वात्; **तथाऽपि**-एवं सत्यप्येषु-निज-पर-वैरि-सुहृच्छरीरेषु **साम्यं**-समतां **किं न उपैषि**-प्राप्नोषीत्यर्थः ? ।।१.१९।।

**रत्न.**—अथ सर्ववस्तुनामनित्यत्वज्ञापनेन साम्ये प्रेरयन्नाह —

**'अनादिः'** इति, व्याख्या, आत्मा, न विद्यते आदिरस्य सः अनादिर्वर्त्तते, यद्यात्मन आदिर्भवति तदा कश्चित् कर्त्ता विलोक्यते, किञ्चिच्च समवायि कारणं द्रव्यं विलोक्यते, ते द्वे अपि न स्तः तेनात्माऽनादिः, प्रयोगश्च-आत्मा अनादिः, अनिर्म्मितत्त्वात्, यद्यद् अनिर्मितं तत् तद् अनादिर्यथा व्योम-इत्यन्वयव्याप्तिः, यद् अनादि न भवति तद् अनिर्मितं न भवति, यथा घट इति व्यतिरेकव्याप्तिः, इत्यन्वय-व्यतिरेकाभ्यामात्माऽनादिः साधितः, अत्रार्थे बहु वक्तव्यं परं ग्रन्थगौरवभयान्न प्रतन्यते । अथ प्रस्तुतम्, तेन कश्चिदात्मा कस्यापि निजः-स्वो नास्ति, वा-अथवा परः-अन्योऽस्वजनो नास्ति, स्व-परव्यवहारौ सादित्वे भवतः ।

तथा कश्चित् कस्यापि रिपुः, वा-अथवा सुहृद्-मित्रं नास्ति, रिपु-मित्रव्यवहारावपि सादित्वे भवतः, तथा देहाकृतयः-शरीराकाराः स्थिरा न भवन्ति क्षणक्षयित्वात्, तथा अणवः-परमाणवः स्थिरा न भवन्ति, क्षणेन सुरभि-दुरभितया परिणमनशीलत्वात्, तथापि हे आत्मन् ! एषु देहाकृत्यणुषु साम्यं-समत्वं राग-द्वेषराहित्यलक्षणं किं न त्वमुपैषि-प्राप्नोषि ?, अपि तु साम्यं भजेत्यर्थः, तथा देहाः-शरीराण्याकृतयो येषां ते देहाकृत्यणवः, देहत्वेन परिणताः परमाणव इत्यर्थः, इति विशेषण-विशेष्यतयाऽपि व्याख्येयम् ।।१.१९।।

**[६०] यथा विदां लेप्यमया न तत्त्वात्,**
**सुखाय माता-पितृ-पुत्र-दाराः ।**
**तथा परेऽपीह विशीर्णतत्-त-**
**दाकारमेतद्धि समं समग्रम् ।।१.२०।।**

**धनवि.**—नन्वनन्तरं समतोक्ता, सा सुखदायकेषु स्नेहस्थानकेषु माता-पितृ-पुत्र-कलत्रेषु कथं भवति ? इत्याशङ्कायामुपदिशति - 'यथा-विदाम्' इति - - **यथा**-येन प्रकारेण, विदन्ति-जानन्तीति क्विप्प्रत्यये विदः, तेषां विदां पण्डितानां **लेप्यमयाः**-चित्रकृता निर्मिता माता-पितृ-पुत्र-दारा-जननी-जनक-तनय-कलत्राणि **तत्त्वतः**-परमार्थतः **सुखाय न** भवन्ति, अत्र च मातरश्च पितरश्च पुत्राश्च दाराश्च 'आ द्वन्द्वे' [सि.हे. ३-२-३९] इत्यनेन माता-पितृ इति साधु, **तथा**-तेन प्रकारेणेह-संसारे **परेऽपि**-प्रत्यक्षेण दृश्यमाना अपि माता-पितृ-पुत्र-दारास्तत्त्वतः सुखाय न भवन्तीति, अत्र कियत्कालीनसुखस्येन्द्रजालिककृत-नयनसुखस्येवा-परमार्थिकत्वात् तत्त्वतोऽपरमार्थिकत्वम्; अत्र कियत्कालीनतामेव दर्शयति-**हि**-यतः **विशीर्णतत्तदाकारं**-विनष्टमाता-पितृ-पुत्र-कलत्रा-ऽऽद्याकारम्, एतत् **समग्रं**-लेप्यमयमलेप्यमयं च दृश्यमानं सर्वं समं-सुखकारित्वाभावेन सदृशं भवतीति; भावार्थस्तु लेप्यमयाः प्रत्यक्षेण दृश्यमानाश्च माता-पितृ-पुत्र-दारा अविनष्टाः सन्तो नेत्रादिसुखाय भवन्ति, विनष्टाश्च न भवन्तीत्येषां साम्यमिति ।।१.२०।।

**रत्न.**—पुनरनित्यत्वमेव दृढयति —

**यथा विदाम्**..इति, व्याख्या—हे आत्मन् ! यथा विदां-पण्डितानां लेप्यमया-लेप्यनिर्म्मिता माता-पितृ-पुत्र-दाराः, तत्त्वात्-परमार्थतः सुखाय न भवन्ति तथा परेऽपि-लेप्यमयेभ्योऽन्येऽपीह-जगति माता-पितृ-पुत्र-दाराः सुखाय न भवन्ति । हि-यस्मात् कारणाद् विशीर्णो-विनष्टः स स आकारो यस्य तद् विशीर्णतत्तदाकारारमेतत् समग्रं वस्तु तुल्यमिति ।।१.२०।।

**[६१] जानन्ति कामान् निखिलाः ससंज्ञा,**
**अर्थं नराः कर्म च केऽपि धर्मम् ।**
**जैनं च केचिद् गुरुदेवशुद्धं,**
**केचिच्छिवं केऽपि च केऽपि साम्यम् ।।१.२१।।**

**धनवि.**—अत्रैवं सत्यपि संसाररूपे समतां विरला एव जना जानन्ति-इति दर्शयन्नाह —

जानन्ति इति – **निखिलाः**-सर्वे संज्ञिनोऽसंज्ञिनश्च प्राणिनः, **कामान्**-'पदैकदेशे पदसमुदायोपचारात्' [ ] कामगुणान्-शब्दादिविषयान् जानन्ति-विदन्ति, ननु सर्वप्राणिनां शब्दादिग्रहणं कथमिति चेत् ?, न, एकेन्द्रियादिष्वनुत्तरवैमानिकदेव-पर्यवसानेषु संज्ञ्यसंज्ञिजीवेषु शब्दादिज्ञानयोग्यताया विद्यमानत्वात्, तत्रैकेन्द्रियेषु शब्दादि-विषयग्रहश्च स्वसिद्धान्तोक्तः, यथा –

**[६२]** "पञ्चिंदिओ [१]उ बउलो नरो व्व सव्वविसयउवलंभा।
तह वि न भण्णइ पञ्चिंदिउ त्ति बज्झिन्दियाभावा ।। इति श्रीजीवाभिगमवृत्तौ।।

[विशेषावश्यक भाष्य-३००१]

एवं लौकिकशास्त्रोक्तोऽपि यथा –

**[६३]** पादाहतः प्रमदया विकसत्यशोकः,
शोकं जहाति बकुलो मधुसीधुसिक्तः ।
आलिङ्गितः कुरबकः कुरुते विकास-
मालोकितस्तिलक उत्कलिको विभाति ।। [ ]।।

एवमन्यत्र क्वचिदागमगम्यः क्वचित् प्रत्यक्षसिद्धश्च शब्दादिविषयग्रहसद्भाव इति, **च** पुनः संज्ञ्यसंज्ञिषु प्राणिषु **ससंज्ञा**-संज्ञिनः प्राणिनः, अर्थं-द्वितीयपुरुषार्थं धनं जानन्ति, अत्र प्राय इति गम्यं, एकेन्द्रियादिष्वप्यसंज्ञिष्वप्यव्यक्तलोभसंज्ञायाः सिद्धान्ते भणनात्, लोकेऽपि सप्ररोह-बिल्व-पलाश-प्रपुन्नाटादिषु सद्रव्यताव्यवहार-दर्शनाच्च न विरोधः, सर्वेषु संज्ञिषु तु मूषक-भुजगादिषु प्रायो धनस्थानज्ञानस्य लोके शास्त्रे च श्रूयमाणत्वात्; च पुनः संज्ञिष्वपि **केऽपि नराः कर्म**-कृषि-वाणिज्यादिव्यापारं जानन्ति, कृषि-वाणिज्यादिव्यापारज्ञानयोग्यताया मनुष्येष्वेव विद्यमानत्वात्, **च** पुनर्मनुष्येष्वपि केपि प्राणिनो **धर्म**-दानादिकं जानन्ति; दानाद्यन्तरायापाये केषुचिन्मनुष्येषु 'दानादिधर्मं करोमि'इति ज्ञानस्य विद्यमानत्वात्, पुनधर्मज्ञमनुष्येष्वपि **जैनं** धर्मं-देशविरति-सर्वविरत्यादिरूपं केचिन्मनुष्या जानन्ति,

१. ०दिय व्व ब० - को. ।

मिथ्यात्वमलिनीकृतधर्मज्ञेष्वपि केषुचिदेव मनुष्येषु 'देशविरति-सर्वविरत्यादिप्रतिपत्तिं करोमि'इति ज्ञानस्य विद्यमानत्वात्, पुनर्जैनधर्मज्ञेष्वपि निन्हवत्वादिवर्जिताः **केचिन्मनुष्या गुरु-देव**शुद्धं जैनं धर्मं जानन्ति, अत्र देवाश्च राग-द्वेषविजेतारः, गुरवश्च पञ्चेन्द्रियसंवरण-नवविधब्रह्मचर्य-गुप्त्यादिषट्त्रिंशद्गुणविराजमानाः, तैः शुद्धं-निर्दोषं, केषुचिदेव जैनधर्मज्ञमनुष्येषु 'देव-गुरुशुद्धं पञ्चविधमिथ्यात्वापगमे सम्यक्त्वालङ्कृतं जैनं धर्मं करोमि'इति ज्ञानस्य जायमानत्वात्; पुनस्तेषां मध्ये **केऽपि** मनुष्याः **शिवं**-मोक्षं जानन्ति, सम्यक्त्वसहितजैनधर्मज्ञेष्वपि केषुचिदेव संसारनिर्विण्णचित्तेषु प्राणिषु 'मोक्षं प्राप्नोमि'इति ज्ञानस्य जायमानत्वात्, तेष्वपि **केऽपि** प्राणिनः **साम्यं** जानन्ति, यत इह मुमुक्षवो भूयांसः सन्ति, तेष्वप्यासन्नसिद्धिकानामेव 'समतां श्रयेऽहम्'इति ज्ञानस्य जायमानत्वात्, अत्र चशब्दः समुच्चयार्थः सर्वत्र योज्य इति; भावार्थस्तु समताया ज्ञातारः स्वल्पा एव सन्तीति ।।१.२१।।

**रत्न.**–अथ साम्यभाजामल्पत्वमाह –

**जानन्ति कामान्...**इति, व्याख्या-निखिलाः ससंज्ञा-संज्ञावन्तो जीवाः (१) स्त्रीसम्भोगादिलक्षणान् कामान् जानन्ति, जानन्तीति सर्वत्र योज्यं (२) नरा अर्थं-द्रव्यं जानन्ति द्रव्योपार्जने तत्पराः सन्तीत्यतस्तेषां नराणामेवार्थेनोदरम्भरित्वाद्, देवानां नारकाणां चार्थेन प्रयोजनाभावात्, तिरश्चामपि नराणां पारवश्यादर्थेन प्रयोजनाभावात् (३) केऽपि च कर्म जानन्ति, कर्मवादिन एव सन्तीत्यर्थः, अथवा कर्म स्वोदरभरणार्थं प्रवृत्ति-निवृत्तिलक्षणं जानन्ति (४) केऽपि धर्मं, सामान्यतो वयं धर्मं कुर्म इति पूत्कुर्वन्तीत्यर्थः (५) केचिज्जैनवेषधारिणो जैनं धर्मं-वयं जैना जैनं धर्मं कुर्म इति (६) केचिद्-गुरुदेवाभ्यां शुद्धं जैनं धर्मं जानन्ति, गुरुः सदाचारवान् शुद्धप्ररूपकश्चेति, देवोऽष्टादशदोषरहितोऽर्हन्नेवेति (७) तथा केचिच्छिवं-मोक्षं, मोक्षपदार्थं तु तेषां मध्ये अल्पीयांस एव विदन्तीत्यर्थः (८) केचित् साम्यं-समभावं रागद्वेषानाकुलितत्वं, मोक्षवित्स्वपि साम्यवेत्तारः अल्पीयांस एवेत्यर्थः इति दिक् ।।१.२१।।

**[६४] स्निह्यन्ति तावद्धि निजा निजेषु,**
**पश्यन्ति यावन्निजमर्थमेभ्यः ।**
**इमां भवेऽत्रापि समीक्ष्य रीतिं,**
**स्वार्थे न कः प्रेत्यहिते यतेत ? ।।१.२२।।**

**धनवि.**–अथ समताप्रतिबन्धकं स्नेहं निरस्यन्नुपदिशति –

'स्निह्यन्ति' इति – **हि** यतो **निजाः**-स्वकीया, **निजेषु**-स्वकीयेषु **तावत्** कालं **स्निह्यन्ति**-स्नेहपरा भवन्ति, **यावत्** कालम्, **एभ्यो**-निजेभ्यो **निजं**-स्वकीयम् **अर्थं**-साध्यं **पश्यन्ति**,

एतदर्थसंवादो वेदेऽपि –

"न दार-पुत्राणां कामाय पुत्राः प्रिया भवन्ति, आत्मनस्तु कामाय पुत्राः प्रिया भवन्ति [ ] इति; ततः कारणाद् **अत्रापि**-इह संसारेऽपि **इमां** दृश्यमानां **रीतिं**-लोकव्यवस्थां **समीक्ष्य**-दृष्ट्वा **प्रेत्यहिते**-परभवपथ्ये **स्वार्थे**-आत्मकार्ये तपः-संयम-साम्यादौ **कः** पुमान् **न यतेत**-न प्रयत्नं कुर्याद् ?, अपि तु सर्वोऽपि कुर्यादित्यर्थः ।।१.२२।।

**रत्न.**–अथ सर्वेषां स्वार्थनिष्ठत्वं ज्ञापयति –

**स्निह्यन्ति तावद्...**इति, व्याख्या-हि निश्चितं निजाः-स्वकीया, निजेषु-स्वकीयेषु कलत्रादिषु तावत्-तावत्कालं स्निह्यन्ति-स्नेहं कुर्वन्ति, यावदिति-यावत्कालं निजं-स्वकीयमर्थं-कृत्यमेभ्यः-स्वेभ्यः कलत्रादिभ्यः पश्यन्ति, अत्रापि भवे इमां रीतिं-मर्यादां समीक्ष्य-विचार्य विलोक्य वा प्रेत्य-परभवे हिते-हितकारिणि स्वार्थे-तपः-क्रियानुष्ठानादिरूपे को न यतेत ? - न यत्नं कुर्याद्, अपि तु दक्षो जनः सर्वोऽपि यतेतेति ।।१.२२।।

**[६५] स्वप्नेन्द्रजालादिषु यद् वदाप्तै-**
**रोषश्च तोषश्च मुधा पदार्थैः ।**
**तथा भवेऽस्मिन् विषयैः समस्तै-**
**रेवं विभाव्यात्मलयेऽवधेहि ।।१.२३।।**

**धनवि.**—नन्विन्द्रियपञ्चकप्रभवे विषयसुखे स्वाधीने सति किं समतासुखेन? इत्याकाङ्क्षायामुपदिशति —

'स्वप्नेन्द्र' इति – **यद्वद्**-यथा **स्वप्नेन्द्रजालादिष्वाप्तैः**-प्राप्तैः **पदार्थैः**-दारिद्र्यादिभिः साम्राज्यादिभिर्वा **रोषः**-ईर्ष्या **च** पुन**स्तोषः** तुष्टि**र्मुधा**-निष्फलो भवति, अत्र स्वप्नाश्च-निद्रावस्थाज्ञानविशेषा, इन्द्रजालानि च नाटकविशेषाः, ते आदौ येषां ते तथा तेषु स्वप्नेन्द्रजालादिषु, अत्रादिपदात् मरुमरीचिकादिभ्रमपरिग्रहः, **तथा**-तद्वद् **अस्मिन्न**नुभूयमाने **भवे**-संसारे **समस्तैः**-सर्वैरिन्द्रियपञ्चकप्रभवै**र्विषयैः**-इष्टानिष्टैराप्तैः-प्राप्तैर्मुधा रोषस्तोषश्च कर्त्तव्यो भवति; भावार्थस्तु स्वप्नेन्द्रजालादिना प्राप्तेषु विषयेषु साक्षात् प्राप्तेषु च विषयेषु यावदनुभवं सुख-दुःखे भवतः, अनुभवोत्तरकालं च स्वप्नेन्द्रजालप्राप्त-साक्षात्प्राप्तयोर्विषययोः सुख-दुःखानुभवाभावात् मुधात्वमिति; एवमनन्तरोक्तं **विभाव्य**-विशेषेण चेतसा पर्यालोच्य, **आत्मलये**-ममात्मा कथं सुखी भवति ? इतिध्याने, **अवधेहि**-समाधानवान् भवेत्यर्थः।।१.२३।।

**रत्न.**—अथ [1]राग-द्वेषषयोर्मुधात्वं दर्शयन्नाह —

**'स्वप्नेद्रजालादिषु'** इति, व्याख्या-- यद्वदिति यथा स्वप्ने इन्द्रजालादिषु च, आप्तैः-प्राप्तैरशुभ-शुभैः पदार्थैः करणभूतैर्यो रोषो-द्वेषस्तोषश्च-रागो मुधा-वृथा, क्षणदृष्टनष्टत्वात् कार्यकरणा-समर्थत्वाच्च । रोषस्तोषश्च कृतस्तदा किमिति ?; तथाऽस्मिन् भवे समस्तैर्विषयैः-शब्द-रूप-गन्ध-रस-स्पर्शलक्षणैः स्वप्नेन्द्रजालादिवत् क्षणदृष्ट-नष्टैरेवमिति रोष-तोषौ मुधा विभाव्य-विचिन्त्य हे आत्मन् ! आत्मलये-आत्मनि लयः-साम्यं राग-द्वेषाभ्यां रहितत्वम् तत्रावधे[2]हि - सावधानो भवेत्यर्थः ।।१.२३।।

---

१. राग-द्वेषयोः - २. ०हि अवधानं कुरु सा० इति मु० ।

**[६६] एष मे जनयिता जननीयं,**
**बन्धवः पुनरिमे स्वजनाश्च ।**
**द्रव्यमेतदिति जातममत्वो,**
**नैव पश्यसि कृतान्तवशं स्वम् ।।१.२४।।**

**[६७] नो धनैः परिजनैः स्वजनैर्वा,**
**दैवतैः परिचितैरपि मन्त्रैः ।**
**रक्ष्यतेऽत्र खलु कोऽपि कृतान्तान्-**
**नो विभावयसि मूढ ! किमेवम् ? ।।१.२५।।**

**धनवि.**—नन्वात्मीयवस्तुनि ममतापरिहारेण समतास्वीकारः केन क्रियते ?, इत्याशङ्कायां यमभयेन सर्वत्र ममतां निरस्यन्नुपदिशति —

'एष मे' इति – **एषः** प्रत्यक्षेण दृश्यमानो **मे**-मम **जनयिता** वर्त्तते, च **पुनरियं जननी**-मम माता वर्त्तते, च **पुनरिमे** मम **बन्धवो**-भ्रातरो वर्तन्ते, च पुनर्मम इमे **स्वजनाः**-सगोत्रा वर्त्तन्ते, च पुनः मम **एतद् द्रव्यम्**-धनधान्यादि नवविधपरिग्रहलक्षणं धनं वर्त्तते, **इति** अमुना प्रकारेण **जातममत्वः**-सञ्जाततममतापरिणामः **स्वम्**-आत्मानं **कृतान्तवशं**-यमायत्तं **न पश्यसि**-न विलोकयसीत्यन्वयः, भावार्थस्तु -

**[६८]** 'चेतोहरा युवतयः स्वजनोऽनुकूलः,
सद्बान्धवाः प्रणयगर्भगिरश्च भृत्याः ।
गर्जन्ति दन्तिनिवहास्तरलास्तुरङ्गाः,
संमीलने नयनयोर्नहि किञ्चिदस्ति' ।। [ ]।। इति

पद्यभावनया स्पष्ट एव ।।१.२४।।

**धनवि.**—ननु धन-स्वजन-परिजनेषु सत्सु कुतः कृतान्तवशता? इत्याशङ्कायामर्थतो युग्मेनोपदिशति —

'नो धनैः' इति, 'तैर्भवेऽपि' इति (१) **खलु**-निश्चितम् **अत्र**-जगति **कोऽपि**

**धनैः**-द्रव्यैरपि, **वा**ऽथवा **परिजनैः**-दास-दासीप्रमुखपरिवारैरपि, वाऽथवा **स्वजनैः**-माता-पितृ-भ्रातृ-पुत्र-कलत्राद्यैः स्वजातीयैरपि, वाऽथवा **दैवतैः**-देववृन्दैरपि, अथवा **परिचितैः**-पूर्वसेवासाधनादिना बहुकालाभ्यस्तै**र्मन्त्रैः**-साऽधिष्ठायकोंकाराद्यक्षरसंयोगैरपि, **सुभूम-रावणा**दिवत् **कृतान्ताद्**-यमात् **नो रक्ष्यते**-नैव त्रायते; हे **मूढ**-हे मूर्ख ! एवमनेन प्रकारेणोक्तं जगत्स्वरूपं **किन्नो विभावयसि?** - किं नो विचिन्तयसि ।।१.२५।।

नन्वत्र वृत्तद्वये क्रियाभेदे सति युग्मरूपता कथं जायते ? - इत्याशङ्कायामाह--**अर्थतो युग्मम**िति, भावार्थतो युग्ममित्यर्थः ।।

**रत्न.**—अथ काव्यद्वयेन जीवस्य मृत्युपारवश्यमाह —

**'एष मे जनयिता'** इति, व्याख्या-एष इति प्रत्यक्षं दृश्यमानो मे-मम जनयिता-जनकोऽस्ति, सन्ति च यथार्हं योज्यं, तथा इयं जननी, पुनरिमे बन्धवो-भ्रातरः, डमरुकमणिन्यायेनेमे इत्यस्योभयत्रापि योजनादिमे स्वजना-गोत्रिणश्च, तथैतद्द्रव्यमिति जातं ममत्वं यस्य स इति जातममत्वः सन् हे आत्मन् ! स्वमात्मानं कृतान्तवशं-यमपराधीनं नैव पश्यसि-नैव विलोकयसि ?, अपि तु स्वं कृतान्तपराधीनं विलोकयेति व्यङ्ग्यम्[1] ।।१.२४।।

**रत्न.—'नो धनैः' इति** व्याख्या-अत्र-संसारे खलु-निश्चितं कोऽपि जनो धनैः-स्वर्ण-रूप्य-मण्यादिभिः कृतान्ताद्-यमाद् नो रक्ष्यते, एवं परिजनैर्वा अथवा स्वजनैर्दैवतैः-दैवैस्तथा परिचितैः-अहरहर्जापैर्न साधितैर्मन्त्रैरपीति योज्यम्, हे मूढ-हे रागग्रस्त ! एवं किं नो विभावयसि-न विचिन्तयसि ?, अपि तु सम्यग् विभावयेत्यर्थः ।।१.२५।।

**[६९] तैर्भवेऽपि यदहो सुखमिच्छं स्-**
**तस्य साधनतया प्रतिभातैः ।**
**मुह्यसि प्रतिकलं विषयेषु,**
**प्रीतिमैषि न तु साम्यसतत्त्वे ।।१.२६।।**

---

१. भावः - इति. मु० ।

**धनवि.**—अहो इत्याश्चर्ये **यद्**-यस्मात् कारणात् **तस्य** सुखस्य **साधनतया**-हेतुतया **प्रतिभातैः**-मनसा मिथ्याज्ञातैस्तैरनन्तरोक्तैर्यमादरक्षकैर्धनादिभि**र्भवेऽपि**-संसारेऽपि **सुखं**-सौख्यमिच्छन्-वाञ्छन् **प्रतिकलं**-प्रतक्षणं **विषयेषु**-शब्दादिषु **मुह्यसि**-मोहं गच्छसि; **तु** पुनः **साम्यसतत्त्वे** साम्यस्वरूपे **प्रीतिं**-प्रेम **नैषि**-न गच्छसीत्यर्थः ।।१.२६।।

**रत्न.**—अथ धनादिभिर्जीवस्य मूढत्वमाह —

**'तैर्भवेऽपि' इति,** व्याख्या-अहो इति सम्बोधने, हे आत्मन् ! तैर्धनादिभिः कारणभूतैर्यत् त्वं भवेऽपि संसारेपि सुखमिच्छन्-वाञ्छन् विषयेषु शब्द-रूप-गन्ध-रस-स्पर्शेषु मुह्यसि-मोहं प्राप्नोषि, तैः कथम्भूतैः? - तस्य सुखस्य साधनतया प्रतिभातैः, कथं ? - प्रतिकलं प्रतिसमयं, तु पुनः, साम्यस्य सतत्त्वं-स्वरूपम्, तस्मिन् प्रीतिं-प्रेम नोपैषि-न प्राप्नोषि, अपिग्रहणेनैकान्त-दुःखमये संसारे इति सूचनमिति ।।१.२६।।

**[७०] किं कषायकलुषं कुरुषे स्वं,**
**केषुचिन्ननु मनोऽरिधियाऽऽत्मन् ! ।**
**तेऽपि ते हि जनकादिकरूपै-**
**रिष्टतां दधुरनन्तभवेषु ।।१.२७।।**

**धनवि.**—स्वापराधिषु वैरिषु कथं समता कार्या ? इत्याकाङ्क्षायामुपदिशति—

'किं कषाय' इति—**नन्विति** वितर्के, हे **आत्मन् ! - केषुचित्** प्राणिषु, **अरिधिया**-वैरिबुद्ध्या **कषायकलुषं**-क्रोधादिकषायमलिनं **स्वं**-स्वकीयं **मन**श्चित्तं **किं कुरुषे, हि** यत**स्तेऽपि**-वैरित्वव्यवहारभाजः प्राणिनः, ते तव **जनकादिकरूपैः**-जननी-जनकत्वादिस्वरूपैः **इष्टतां**-प्रीतिपात्रताम्, **अनन्तभवेषु**-अनन्तजन्मसु **दधुः**-धरन्ति स्मेति । यदागमः-"अयं णं भंते ! जीवे सव्वजीवाणं माइत्ताए" इत्यादि, 'अणन्तखुत्तो' इत्यन्त [भग.सूत्र] इति ।।१.२७।।

**रत्न.**—अथानेकशः पितृ-मात्रादिसम्बन्धदर्शनेनात्मानं प्रतिबोधयन्नाह —

**'किं कषायकलुषं'** – इति, व्याख्या - हे आत्मन् ! ननु-निश्चितं केषुचिज्जनेष्वरिधिया-वैरिबुद्ध्या त्वं स्वं-स्वकीयं मनः प्रतिकषायैः कलुषं-मलिनं किं कुरुषे ? अपि तु मा कुर्वित्यर्थः । यतस्तेऽपि जनाः ते-तव हि निश्चितम्, अनन्तभवेषु जनकादिरूपैः-पितृ-पुत्र-मातृ-भ्रातृ-सम्बन्धैरिष्टतां[1] दधुः, यतः - [वैराग्यशतक]

**[७१]** "न सा जाई न सा जोणी, न तं ठाणं न तं कुलं ।
न जया न मुया जत्थ, सव्वे जीवा अणन्तसो," त्ति-।१.२७। [२३]।।

**[७२] यांश्च शोचसि गताः किमिमे मे,**
**स्नेहला ? इति धिया विधुरात्मा ।**
**तैर्भवेषु निहतस्त्वमनन्ते-**
**ष्वेव तेऽपि निहता भवेष[2] च ।।१.२८।।**

**धनवि.**–ननु स्वोपकारिषु वियुक्तेषु सत्सु शोकाकुलितचित्तेन कथं समता काया ? इत्याकाङ्क्षायामुपदिशति –

'यांश्च शोचसि' इति – **च**कारोऽवधारणे, **इमे** प्रत्यक्षा **मे**-मम **स्नेहलाः**-स्नेहपात्राणि स्वजनाः **किं गताः**-किं परलोकं प्राप्ता **इति धिया**-एवं प्रकारबुद्ध्या **विधुरात्मा**-व्याकुलान्तःकरणः सन् **यानेव** स्वजनान् **शोचसि**-शोकविषयीकरोषि **तैः** स्वजनैः, **अनन्तेषु भवेषु** - जन्मसु **त्वं निहतो**-घातविषयीकृतोऽसि, **च** पुन**स्तेऽपि** स्वजनानाः[भवता]त्वयाऽनन्तेषु भवेषु **निहता**-घातविषयीकृता इति । भावार्थस्तु "अयण्णं भन्ते ! जीवे एयस्स जीवस्स वेरियत्ताए घायगत्ताए" इत्यादि–उववण्णपुव्वे हन्ता गोयमा ! इत्यादिना, अदुवा अणन्तखुत्तो इत्यन्तेन' **भगवती**[सूत्र]पाठेन श्रेणिक-कोणिकाद्युदाहरणेन च स्पष्ट एवेति ।।१.२८।।

**रत्न.**–अथ य एव स्वजनास्त एव शत्रव इति दर्शयन्नाह –

---

१. 'वल्लभत्वं' इति मु० अधिकम् पदम् । २. भवता पाठः मूलत्वेन, को०

**'यांश्च शोचसि गता'** इति, व्याख्या-हे आत्मन् ! त्वं यान् मृतान् शोचसि शोकं कुरुषे, किंलक्षणः ? इतिधिया विधुर आत्मा यस्य सः, इतीति किं ? - इमे-मम स्नेहला-ममोपरि स्नेहवन्तः किं गताः ? परं तैः स्वजनैः स्नेहलैस्त्वमनन्तेष्वेव भवेषु निहतोऽसि-मारितोऽसि, भवता च-त्वयापि ते अनन्तेष्वेव भवेषु निहता वर्त्तन्त इति ।।१.२८।।

**[७३] त्रातुं न शक्या भवदुःखतो ये,**
**त्वया न ये त्वामपि पातुमीशाः ।**
**ममत्वमेतेषु दधन् मुधाऽऽत्मन् !,**
**पदे पदे किं शुचमेषि ? मूढ ! ।।१.२९।।**

**धनवि.**—अथ साम्यानयनाय शोकापनोदनोपायं दर्शयन्नुपदिशति —

'त्रातुं न शक्या' इति – **ये** स्नेहला**स्त्वया भवदुःखतः** संसारापायात्, **त्रातुं**-पातुं **न शक्याः,** शक्यन्ते इति शक्याः, न शक्तिविषया इत्यर्थः, च पुनर्ये स्नेहलाः, **त्वाम**प्यनाथी ऋषिमिव भवदुःखतः **पातुं**-त्रातुं **न ईशा**-न समर्था भवन्ति, ततः कारणात्, हे **आत्मन् ! हे मूढ ! मुधा** निरर्थक**मेतेषु** स्नेहलेषु-**ममत्वं**-'ममैते ममैते' इति ममतां **दधत्**-धरन् **पदे पदे**-स्थाने स्थाने **किं शुचं**-शोकम्, **एषि**-यासीत्यर्थः, अत्र 'हवः शिति' [सि.हे. ४-१-१२] इति सूत्रेण द्विर्भावे 'अन्तो नो लुग्' [सि.हे. ४-२-१४] इत्यनेन नलुकि दधदिति प्रयोगः शतृप्रत्ययान्त इति ।।१.२९।।

**रत्न.**—अथ न कश्चित् कान् प्रति त्रातुं शक्तः इति दर्शयन्नाह —

**त्रातुं न शक्या'** इति, व्याख्या-हे आत्मन् ! ये त्वया भवदुःखतस्त्रातुं-रक्षितुं न शक्या-न शकनीया, ये च त्वामपि पातुं-रक्षितुं न ईशाः-न समर्थाः, हे मूढ ! - हे आत्मन्, एतेषु स्वजनादिषु त्वं ममत्वं दधत्, पदे पदे-स्थाने स्थाने किं शुचं-शोकमेषि-प्राप्नोषि?, अपि तु ममत्वं शोकं च त्यज, साम्यं भजेत्युपदेशः ।।१.२९।।

**[७४] सचेतनाः पुद्गलपिण्डजीवा,**
**अर्थाः परे चाणुमया द्वयेऽपि ।**
**दधत्यनन्तान् परिणामभावांस्-**
**तत् तेषु को न्वर्हति राग-रोषौ ? ।।१.३०।।**

**धनवि.**—अथ समताद्वारोपसंहाराय समताप्रतिपक्षौ राग-द्वेषौ परिहर्त्तव्यावित्युपदिशति —

'सचेतनाः' इति — **पुद्गलपिण्डः**-शरीरं, तदधिष्ठिता **जीवाः**-प्राणिनः, **अर्थाः**-पदार्थाः स्त्री-सर्पादयः **सचेतनाः**-चैतन्यवन्तः, **च** पुनः **परे**-अचेनना **अणुमयाः**-परमाणुमयाः स्वर्ण-लोहादयोऽर्थाः सन्ति, एते द्वयेऽपि पदार्था **अनन्तान् परिणामभावान्**-अनेकान् पर्यायान् **दधति**-धरन्ति; **तत्**-तस्मात्, **नु** इति वितर्के **तेषु**-स्त्री-सर्पादिषु स्वर्ण-लोहादिषु च **राग-द्वेषौ** कर्तुं **कः** पुमान्, **अर्हति**-योग्यो भवति?, न कोऽपीत्यर्थः । भावार्थस्तु सचेतनानां जीवद्रव्यापेक्षया भवान्तरे देवत्व-मानुषत्व-तिर्यक्त्व-नारकत्व-पितृत्व-पुत्रत्व-पतित्व-पत्नीत्वादिपर्यायाणां इह भवेऽपि च मित्रत्व-शत्रुत्व-स्वामित्व-सेवकत्वाद्यनेकपर्यायाणाम् च परावृत्त्या प्रियत्वाऽप्रियत्वसम्भवात्, अचेतनानां च सुवर्ण-लोहादीनां कालान्तरेण **सुबुद्धि**-प्रधानपरिकर्मितपरिखापानीयवद्, अनेकपर्यायाणां परावृत्त्या प्रियत्वा-ऽप्रियत्वसंभवाच्च सचेतना-ऽचेतनेषु पदार्थेषु राग-द्वेषौ नोचितावितिं ।।१.३०।।

---

इति श्रीतपोगच्छनायकश्री**मुनिसुन्दरसूरि**निर्म्मितस्य तत्पट्टपरम्पराप्रभावक-पातसाह-श्री**अकब्ब**रप्रतिबोधकभट्टारकश्री**हीरविजयसूरि**श्रीविजय**सेनसूरि**प्रमुख-महापुरुषपरिशीलितस्य षोडशशाखस्या**ध्यात्मकल्पद्रुमस्यअधिरोह**णीटीकायां सकलशास्त्रारविन्दप्रद्योतन-महोपाध्यायश्री**कल्याणविजय**गणि-शिष्योपाध्यायश्री-**धनविजय**गणिविरचितायां समतानाम्नी प्रथमपदपद्धतिः ।।१।।

---

**रत्न.**—अथ जीवानां पुद्गलानां च नानापरिणामपरिणतत्वदर्शनेन रागद्वेष-परिहारमाह —

**सचेतना**'इति, व्याख्या-पुद्गलपिण्ड इति-पुद्गलानां समुदायः, पुद्गलस्कन्ध इत्यर्थः, तमाश्रित्य जीवन्तीति पुद्गलपिण्डजीवाः, एवंविधा ये सचेतनाः-चेतनावन्तः, सर्वे जीवा इत्यर्थः, यावन्तः सचेतनास्ते पुद्गलपिण्डमाश्रित्य जीवन्तीति, स पुद्गलपिण्डो जीवमुक्तः अचेतनो भवतीति, वा पुनः परे-अन्येऽणुमयाः अनन्त-परमाणुनिष्पन्नस्कन्धमया घट-पटादयोऽर्थाः-पदार्थाः सन्ति, एतेनाऽचेतनास्ते इत्युक्तम्, ते सचेतना अचेतनाश्चैवं द्वयेऽप्यनन्तान् परिणामभावान् परिणामचेष्टा वा दधति ।। यत उक्त**मनेकाथ** –

**[७५]** प्रागग्रे..... ।
..... भावोऽभिप्रायवस्तुनो [अनेका० २.५२१]

**[७६]** स्वभाव-जन्म-सत्ता-ऽऽत्मक्रिया-लीला-विभूतिषु ।। [२.५२२]।।
चेष्टायोग्ये बुधे जन्तौ, शृङ्गारादेश्च कारणे,'।।

**[७७]** आत्मशब्दप्रवृत्तिहेतौ च [२.५२३] इति,

तत्-ततो हेतोस्तेषु-सचेतनाचेतनेष्वर्थेषु तु पुनः कः पुमान् रागरोषौ प्रत्यर्हति ? - योग्यो भवति, अपि तु विद्वान् जनो नार्हतीत्यर्थः, कर्तुमिति गम्यम्, अथवा परिणामभावान् परिणामत्वानीति व्याख्येयम् ।।१.३०।।

**[७८]** श्री **शान्तिचन्द्र**वरवाचकदुग्धसिन्धु-
लब्धप्रतिष्ठवरवाचकरत्नचन्द्रः ।
**अध्यात्मकल्प-फल**दप्रथमाधिकारे,
वृत्तिं चकार ललिताऽर्थ-पदप्रपञ्चाम् ।।१।।

इति **समतैकलीनचित्त** इति प्रथमोऽधिकारो व्याख्यातः ।।



## २. ललना-ममत्वमोचनाधिकारः

**[७९] मुह्यसि प्रणयचारुगिरासु,**
**प्रीतितः प्रणयिनीषु कृतिन् ! किम् ? ।**
**किं न वेत्सि पततां भववार्धौ,**
**ता नृणां खलु शिला गलबद्धाः ? ।।२.१।।**

**धनवि.**—नन्वनन्तरद्वारे समतोक्ता, सा च ममतायां सत्यां कुतः समायाति? - इति ममतामोचन-द्वाराणि वक्तुकामो 'ममतामूलं च स्त्री'इति प्रथमं स्त्रीममता-मोचनद्वारमाह –

**'अथ स्त्रिय'** इति, समताद्वारनिरूपणानन्तरं स्त्रियो-ललना ममतामोचनविषया उपदिश्यन्ते इत्यर्थः । तत्रापि स्त्रीममतामोचनाऽसाधारणकारणं स्त्रीमोहमोचनं प्रथममुपदिशति –

हे **कृतिन् !** हे विद्वन् ! प्रणयेन-स्नेहेन चार्वी-मनोहरा गिरा-वाणी यासां तास्तथा तासु, अत्र 'गिरासु' इत्याबन्तं सप्तमीबहुवचनान्तं ज्ञेयं, यतो –

**[८०]** 'वष्टि भागुरिरल्लोपमवाऽप्योरुपसर्गयोः ।
आपं चैव हसऽन्तानां, यथा वाचा निशा दिशा ।।[ ]।।' इति,

**प्रणयचारुगिरासु** वल्लभासु, **प्रीतितः**-प्रेमतः त्वं **किं किमु मुह्यसि** - मोहं यासीति; अव्ययानामनेकार्थत्वादत्र **खलु**शब्दो हेत्वर्थे, तेन खलु यतो हेतो**र्भववार्धौ**-संसारसागरे **पतताम्**-अधो गच्छतां **नृणां**-नराणां **ताः**-प्रणयिन्यो **गलबद्धाः**-कण्ठनियन्त्रिताः **शिलाः**-स्थूलपाषाणविशेषाः **किं न वेत्सि ?** - किं न जानासीत्यर्थः ।।२.१।।

**रत्न.**—अथ द्वितीयोऽधिकारो ललनायां ममत्वमोचनाख्यो व्याख्यायते, तत्र स्त्रीषु मोहनिरासे प्रथमं वृत्तमाह –

**'मुह्यसि'** इति, व्याख्या-हे कृतिन् ! - हे पण्डित ! त्वं प्रीतितः-प्रेमतः प्रणयिनीषु किं मुह्यसि ? - किं मोहं प्राप्नोषि, [१]काकूक्त्या प्रश्नः, अपि तु मा मुह्य इत्युपदेशः, किंलक्षणासु ? - प्रणयो [२]**गर्भे-मध्ये** यासां ताः **प्रणयगर्भा**

१. काकुध्वनिः - मु० । २. 'प्रणयगर्भगिरासु' इति पाठो रत्न.टीकायाः प्रतौ मूलत्वेन ।

गिरो-वाण्यः यासां तास्तासु, ताः प्रणयिनीः प्रति शिलाः किं न वेत्सि ? - किं न जानासि । अत्रापि काकूक्त्या, अपि तु विद्धि शिलाः, किंलक्षणाः ? - गले बद्धा गलबद्धाः । केषां ? - नृणां, किं कुर्वतां ? - पततां, कस्मिन् ? - भव एव वार्द्धिः-समुद्रः, तस्मिन्, एकं तावत् समुद्रपतनं विषमम्, उत च गले शिलाः बद्धाः, तथैककस्यापि पुंसः संसारवार्द्धेर्निर्गमो दुःशकः, उत च स्त्रीद्वितीयस्य विशेषत इति भावः, खलु निश्चितार्थे ।।२.१।।

**[८१] चर्मा-ऽस्थि-मज्जा-ऽन्त्र-वसा-स्र-मांसा-**
**ऽमेध्याद्यशुच्यस्थिरपुद्गलानाम् ।**
**स्त्रीदेहपिण्डाकृतिसंस्थितेषु,**
**स्कन्धेषु किं पश्यसि ? रम्यमात्मन् ! ।।२.२।।**

**धनवि.–**अथ ललनास्वरमणीयतां दर्शयति –

'चर्माऽस्थि' इति । **हे आत्मन्**-हे प्राणिन् ! **स्त्रीदेहपिण्डाकृतिसंस्थितेषु, चर्मा-ऽस्थि-मज्जा-ऽन्त्र-वसा-ऽस्र-मांसा-ऽमेध्याद्यशुच्यस्थिरपुद्गलानां स्कन्धेषु रम्यं**-रमणीयं, **किं पश्यसि**? - किं विलोकयसीत्यन्वयः, अत्र **चर्म** च-शरीरत्वग्, **अस्थि** च-कीकसं पञ्चमधातुतया प्रसिद्धं, **मज्जा** च-षष्ठधातुतया प्रसिद्धा शरीरान्तर्गता ज्ञेया, **अन्त्राणि** च-शरीरान्तर्गता लोकप्रसिद्धा अवयवविशेषाः, [=आंतरडां] **वसा** च-मेदश्चतुर्थधातुतया प्रसिद्धः, **अस्रं** च-रुधिरं, द्वितीयधातुतया प्रसिद्धं, **मांसं** च-पिशितं तृतीयधातुतया प्रसिद्धं, **अमेध्यं** च-अपवित्रमर्थात् मूत्र-पुरीष-श्लेष्मादिकं, तान्यादौ-प्रथमं येषां ते च ते अशुचयश्च-अपवित्रास्ते च तेऽ**स्थिरा**श्च-विनाशिनस्ते च ते **पुद्गलाश्च**-पूरण-गलनधर्माणस्ते तथा [चर्मा...पुद्गलाः] तेषां **चर्मा-ऽस्थि-मज्जा-ऽन्त्र-वसा-ऽस्र-मांसा-मेध्याद्यशुच्यस्थिर-पुद्गलानाम्,** अत्रादिपदात् पूत्यादीनां, **स्कन्धेषु**-एकाकारतया जाता(जातेष्वड)-नन्तपरमाणुषु **रम्यं**-रमणीयं **किं पश्यसि?** - किं विलोकयसीत्यर्थः, अथ स्कन्धानेव च विशेषयति-**स्त्रीणां**-ललनानां **देहरूपो** यः **पिण्डः,** तस्या-ऽऽ**कृतिः**-आकारः तत्र **संस्थितेषु**-सन्निविष्टेषु-इति ।।२.२।।

**रत्न.**–अथ पुरुषादपि विशेषतः स्त्रीशरीराणामंशुचित्वमाह –

**'चर्मा-ऽस्थि'** इति, व्याख्या-चर्म च अस्थि च मज्जा च अन्त्रं च वसा च असृं च मासं च अमेध्यं चर्मास्थि... मेध्यानि, तान्यादौ येषां तानि चर्मा...-मेध्यादीनि, **आदि**शब्देन मूत्र-कफ-श्लेष्मादिग्रहणं, तेषामशुचयः-अपवित्रा अस्थिराः-क्षणक्षयिणो ये पुद्गलाः, तेषां स्कन्धेषु, हे आत्मन् ! किं रम्यं-सुन्दरं पश्यसि ?, एषु किमपि सुन्दरं नास्तीति मा पश्य इत्यर्थः, स्कन्धेषु किं-लक्षणेषु ? - स्त्रिया देहः-शरीरं, तस्य पिण्डाकृतिः-सान्द्रो य आकारः, तया संस्थितेषु संस्थानमापन्नेषु, चर्मास्थ्यादिपदानि सुगमानीति न व्याख्यातानि

[८२] "पिण्डो वृन्दे जपापुष्पे, गोले बोलेऽङ्ग-सिल्हयोः ।
कवले, पिण्डं तु वेश्मैकदेशे जीवनाऽऽयसोः ।। [अने.२.१२१.]।।

बले सान्द्र" [इत्यनेकार्थ] वचनात् स्कन्धः-समूह इति ।।२.२।।

**[८३] विलोक्य दूरस्थममेध्यमल्पं,**
**जुगुप्ससे मोटितनासिकस्त्वम् ।**
**भृतेषु तेनैव विमूढ ! योषा-**
**वपुष्षु तत् किं कुरुषेऽभिलाषम् ? ।।२.३।।**

**धनवि.**–पूर्वश्लोके ललनायां अरमणीयताया [१]दर्शनाऽनन्तरमनभिलषणीयतां दर्शयन्नुपदिशति –

'विलोक्य' इति – **हे विमूढ !** - हे विशेषेण मूर्ख ! यत**स्त्वं दूरस्थम्**-अनासन्नम्, **अल्पं**-किञ्चिन्मात्रम्, **अमेध्यं**-विष्ठादि जुगुप्सनीयं वस्तु **विलोक्य**-दृष्ट्वा, **मोटितनासिको**-वक्रीकृतनक्रो **जुगुप्ससे**-जुगुप्सां कुरुषे, **तत्**-तस्मात् **तेनैव**-अमेध्येन [एवं] **भृतेषु**- भरितेषु **योषावपुष्षु**-नारीशरीरेषु, **अभिलाषं**-वाञ्छां **किं कुरुष ?** - किं करोषीत्यर्थः ।।२.३।।

---

१. दर्शनाद्, अत... मु० ।

**रत्न.**–अथाशुचित्वमेव दृढयति –

**'विलोक्य'** इति, व्याख्या-हे आत्मन् ! दूरस्थमल्पमपि अमेध्यं-शकृदाद्यशुचि वस्तु विलोक्य त्वं जुगुप्ससे-जुगुप्सां करोषि, अत्रापिशब्दोऽध्याहार्यः, इत्थमेवार्थदीप्तेः[1], किंलक्षणः ? - मोटिता-वक्रीकृता नासिका येन सः, तत्कारणात् हे विमूढ ! - हे मूर्खविशेष ! तैरेवामेध्यैर्भृतेषु योषाणां[2] वपुष्षु-शरीरेष्वभिलाषं-वाञ्छां किं कुरुषे ?, अपि तु मा कुर्वित्युपदेशः ।।२.३।।

**[८४] अमेध्यमांसा-ऽस्रु-वसात्मकानि,**
**नारीशरीराणि निषेवमाणाः ।**
**इहाप्यपत्य-द्रविणादिचिन्ता-**
**तापान् परत्रेग्रति दुर्गतीश्च ।।२.४।।**

**धनवि.**–अथ ललनामोहजनितमिह लोके परलोके चानिष्टफलं दर्शयन्नुपदिश्यते-

अमेध्य इति – **अमेध्यमांसा-ऽस्रु-वसात्मकानि नारीशरीराणि**-स्त्रीणामङ्गोपाङ्गरूपाणि **निषेवमाणा-नितरा**मत्यासक्त्या **सेवमाना**-भजमाना जना, **इहापि**-इह भवेऽपि, **अपत्य-द्रविणादिचिन्तातापान्** स्वर्णमाषद्वययाचक**कपिला**दिवत्, इग्रति-प्राप्नुवन्ति, तत्रा-ऽपत्यानि च-पुत्र-पुत्रीप्रभृतीनि, द्रविणानि च-धनानि, तान्यादौ-प्रथमं येषां तेऽपत्य-द्रविणादयः, आदिपदाद् वस्त्र-पात्र-भक्ष्यादयः, तेषां चिन्ता-किं भविष्यति, कथं भविष्यति ? इत्यादिपीडा, तस्याः तापान्-परितापान् खेदानित्यर्थः; **च** पुनर्नारीशरीराणि निषेवमाणा जनाः **परत्र**-परभवे **दुर्गतीः**-तिर्यग्-नरक-गतीः, इग्रति-प्राप्नुवन्ति, अत्र 'ऋ प्रापणे च [गतौ] गतौ [है.२६.] इत्यस्य वर्त्तमाना, अन्तीति स्थिते 'हवः शिति' [सि.हे. ४-१-१२] द्वित्वे, 'पृ-ऋ-भृ-मा-हा-क्ष-ङ्म इः' इति [सि.हे. ४-१-५८] पूर्वस्येत्त्वे 'पूर्वस्यास्वे स्वरे य्-वोः इय्-उव्' [सि.हे. ४-१-३७] इति इयि 'इवर्णादेरस्वे स्वरे' [सि.हे. ४-१-२१] इति रत्वे, 'अन्तो नो लुक्' [सि.हे. ४-२-९८] इति **न** लोपे च साधु ।।२.४।।

१. प्राप्तेः - मु० । २. योषा योषित् (अ.चि.५०४) योषिता. शि० ३९ ।

**रत्न.–'अमेध्य'** इति, व्याख्या-नारीणां शरीराणि निषेवमाणाः-सम्भोगद्वारेण सेवमानाः पुरुषा, इहापि-इहलोकेऽपि अपत्यं-पुत्र-पुत्र्यादिलक्षणं, द्रविणं-धनं, द्वन्द्वसमासः, अपत्य-द्रविणे आदौ तेषां तानि, तथा तेषां चिन्ता-चिन्तनं, तया तापान्-सन्तापान् इग्रति-प्राप्नुवन्ति, च पुनः परत्रेति-परलोके [1]दुर्गतीः-निरय-तिर्यग्लक्षणाः प्रति इग्रति, नारीशरीराणि किंलक्षणानि अमेध्यं च मांसं च अस्रं च वसा च अमेध्य-मांसाऽस्र-वसाः, ता एवात्मास्वभावो येषां तानि अमेध्यमांसा-स्र-वसात्मकानि अमेध्य-मांसा-स्र-वसारूपाणीत्यर्थः ।।२.४।।

**[८५] अङ्गेषु येषु परिमुह्यसि कामिनीनां,**
**चेतः ! प्रसीद विश च क्षणमन्तरेषाम ।**
**सम्यग् समीक्ष्य विरमाशुचिपिण्डकेभ्यस्-**
**तेभ्यश्च शुच्यशुचिवस्तुविचारमिच्छत् ।।२.५।।**

**धनवि.–**ननु साक्षात् तनु-मनो-नयनानन्ददायिषु स्नात-धौत-सुसंस्कृतकान्ता-कान्त-स्तन-जघन-वदन-नयनेषु दृश्यमानेषु केन द्रष्ट्राऽनन्तरोक्ता अमेध्यमांसा-ऽस्र-वसाद्यात्मकता ? इत्याशङ्कायामुपदिशति –

'अङ्गेषु' इति – हे **चेतः !** हे चित्त ! त्वं **येषु कामिनीनां**-ललनानाम्, **अङ्गेषु**-स्तन-नितम्बाद्यवयवेषु **परिमुह्यसि**-परि सामस्त्येन मोहं यासि, परं हे चेतःत्वं **प्रसीद**-अस्वस्थतां मुक्त्वा प्रसन्नं भव, **च** पुनः प्रसन्नभवनानन्तरं हे चेतः ! **एषाम्**-अङ्गानाम् **अन्तः**-मध्ये त्वमुपयोगद्वारा **विश**-प्रवेशं कुरु, **च** पुनः प्रवेशानन्तरं **सम्यक्**-समीचीनं यथा स्यात् तथा हे **शुच्यशुचिवस्तुविचारमिच्छत्** हे चेतः ! त्वं **समीक्ष्य**-अशेषविशेषोल्लेखनया परामृश्य, **अशुचिपिण्डकेभ्यो**-मांसाद्यवयवसञ्चयेभ्यः, **तेभ्यः**-अङ्गेभ्यः **विरम**-निवृत्तिं कुरु;, अत्र **शुचि** च पवित्रम्, **अशुचि** चापवित्रं,

१. दुर्गतीः इत्यस्य द्वयोः वृत्त्योः क्रमभेदो विचारणीयः धनवि.-टीकामां 'तिर्यग्-नरक' इति क्रमोऽस्ति. रत्नवि.-टी.कायामत्र 'निरय-तिर्यग्' इति च क्रमः । नारीषु अर्थात् विषयेषु अत्याशक्त्याः प्रथमं फलं । 'नरकत्वं' अल्पाशक्त्याः तिर्यग्त्वं, अतः अनाशक्तिरेवोचिता इति भावः ।

**वस्तु**-अर्थस्तस्य **विचार**-इदं पवित्रमिदमपवित्रमिति विमर्शः, तं **इच्छत्**-वाञ्छदिति नपुंसकलिङ्गे एकवचनान्तं सम्बोधनपदमित्यक्षरार्थः, भावार्थस्तु शुच्यशुचि-वस्तुविचारकेण पुरुषेणापवित्रवस्तुभूतेभ्यो नारीशरीरेभ्यो निवृत्तिः कार्येति ।।२.५।।

**रत्न.**—**'अङ्गेषु'** इति, व्याख्या - हे चेतः ! - हे मनः ! कामिनीनां-स्त्रीणां येष्वङ्गेषु-शरीरेषु त्वं मुह्यसि-मोहग्रस्तं भवसि, परं हे चेतस् ! त्वं प्रसीद प्रसन्नं भव, प्रसन्नीभूय किं कुर्वित्याह-क्षणं तेषां कामिन्यङ्गानामन्तः-मध्ये विश-प्रविश, प्रविश्य सम्यक् स्वरूपं विचारयेत्यर्थः, सम्यक् समीक्ष्य विचार्य च पुनस्तेभ्यः-कामिन्यङ्गेभ्यो विरम-निवर्त्तस्व । किंलक्षणेभ्यः ? - अशुचीनाम्-अपवित्रपुद्गलानां पिण्डकेभ्यः-समूहेभ्यः, किं कुर्वत् ? - इच्छत्, कम्प्रति ? - शुचि चाशुचि च शुच्यशुचिनी, ते च ते वस्तुनी च शुच्यशुचिवस्तुनी, तयोर्विचारम्-इमे शुचय इमे अशुचयः पदार्था इति विवेकं कुर्वदित्यर्थः ।।२.५।।

**[८६] विमुह्यसि स्मेरदृशः सुमुख्या,**
**मुखेक्षणादीन्यभिवीक्षमाणः ।**
**समीक्षसे नो नरकेषु तेषु,**
**मोहोद्भवा भाविकदर्थनास्ताः ।।२.६।।**

**धनवि.**—ननु स्त्रीशरीरमध्येऽपावित्र्यं भवतु मा वा, परं —

**[८७]** "मक्षिका शकटं घृतं राजमार्गः प्रदीपनम् ।
स्त्रीवक्त्रं बालवक्त्रं च, पवित्राणि युगे युगे" ।। [ ] इति वचनात्,

स्त्रीमुखादीनि पवित्राणि रमणीयानि च, कथं न कमनीयानि भवन्ति ? इत्याशङ्कायामुपदिशति —

'विमुह्यसि' इति - **स्मेरदृशः सुमुख्या मुखेक्षणादीनि**-वदन-नयनादीनि, आदिपदादधर-पयोधरादीनि, **अभिवीक्षमाणः**-अभिमुखं पश्यन्, **विमुह्यसि**-विमूढो भवसीति, अत्र स्मेरे-विकसिते दृशौ-लोचने यस्याः सा स्मेरदृक्, तस्याः, तथा

सुष्ठु-शोभनं मुखं सा सुमुखी, तस्याः अत्र 'परं' इत्यध्याहारात्, परं **तेषु** प्रसिद्धेषु सप्तसु **नरकेषु मोहोद्भवा**-मोहोत्थिताः **ताः** शास्त्रप्रसिद्धा दशविधा **भाविकदर्थना**-भविष्यन्नानाप्रकाराः पीडा **नो समीक्षसे**-नो पश्यसीति, तत्र दशविधा वेदनाश्च नरकेषु - १ शीत, २ उष्ण, ३ क्षुधा, ४ तृषा, ५ कण्डू, ६ परवशता, ७ भय, ८ शोक, ९ ज्वर, १० व्याधिस्वरूपा ज्ञेयाः, तत्र नानाप्रकारत्वं च –

**[८७]** "पञ्चेव य कोडीओ, रोगा तह अट्ठसट्ठिलक्खाणं ।

णवणउयं च सहस्सा पंचसया हुंति चुलसी उ ।। [द्वीपसागर पन्नत्ति-२२]।।

इति सप्तमनरके एतावतां रोगाणां सत्त्वादिति ।।२.६।।

**रत्न.**–अथ ललनाङ्गनिरीक्षण-ललनाङ्गभोगयोः फलमाह –

**विमुह्यसि** इति, व्याख्या-हे आत्मन् ! त्वं स्त्रिया मुखेक्षणादीनि-वदन-नेत्रप्रभृत्यङ्गानि, अभिवीक्षमाणः-संमुखं विलोकयन् विमुह्यसि-मोहं प्राप्नोषि, **आदि**शब्देनाधर-स्तनाद्यवयवग्रहणं, किंलक्षणायाः ? - स्मेरे-उन्निद्रे दृशौ-चक्षुषी यस्याः सा तस्याः, पुनः किंलक्षणायाः ? - सुष्ठु मुखं यस्याः सा तस्याः, स्त्र्यङ्गेषु नेत्र-मुखयोरेव प्राधान्यख्यापनार्थं विशेषणद्वय्युक्ता, परमेतेषु **निरयावलिको**पाङ्गप्रज्ञप्तस्वरूपेषु नरकेषु ता **निरयावलिको**पाङ्गप्रज्ञप्ताः तप्तायःपुत्रिकालिङ्गनादिकाः भाविन्यश्च ताः कदर्थनाश्च भाविकदर्थनाः-भाविन्यो वेदनाः प्रति नो समीक्षसे-नो पश्यसि, किंलक्षणाः ? - मोहात् स्त्र्याद्यङ्गनिरीक्षण-जनितादुद्भवन्तीति मोहोद्भवाः ।।२.६।।

**[८९] अमेध्यभस्त्रा बहुरन्ध्रनिर्यन्-**
**मलाऽऽविलोद्यत्कृमिजालकीर्णा ।**
**चापल्यमायाऽनृतवञ्चिका स्त्री,**
**संस्कारमोहान्नरकाय भुक्ता ।।२.७।।**

**धनवि.**–अथ स्त्रीशरीरस्वरूपं स्त्रीस्वभावस्वरूपं स्त्रीभोगफलस्वरूपं च

दर्शयन्नुपदिशति –

'अमेध्य' इति – **अमेध्यस्य**-विष्ठाया जुगुप्सनीयवस्तुनो वा **भस्त्रा**-चर्मप्रसेविका, चर्मकोथलिका इत्यर्थः, **बहु**भिः-अनेकैरेकादशभिर्वैद्यकशास्त्रानुसारेण द्वादशभिर्वा **रन्ध्रैः**-छिद्रैर्**निर्यन्**-निर्गच्छन् **मलो**-भुक्ताहारकिट्टं, तेनाऽऽ**बिला**-मलिना **उद्यन्त**-उत्पद्यमानाः **कृमयो**-द्वीन्द्रिया जीवाः, तेषां **जालं**-समूहः, तेन **कीर्णा**-व्याप्ता, **चापल्यं** च-चपलता, **माया** च-शठता, **अनृतं** च-असत्यं, तै**र्वञ्चिका**-वञ्चनपरा, **संस्कारमोहात्**-संस्कारश्च-अनादिभवानुभूतविषयाविस्मृतिः, तेन मोहो-मौढ्यं तस्मात्, **भुक्ता**-चतुरशीत्यासनकरणादिनाऽतिगृद्ध्या सेविता, एवंविधा **स्त्री नरकाय**-नरकदुर्गतये भवति। (१) अमेध्यभस्त्रात्वं –

**[९०]** "यकृत्-छकृन्-मलश्लेष्म-मज्जा-ऽस्थिपरिपूरिताः ।

स्नायुस्यूता बहीरम्याः, स्त्रियश्चर्मप्रसेविकाः ।।[ ]।। इत्यादिना स्पष्टम्

(२) बहुरन्ध्रनिर्यन्मलाबिलत्वं च प्रत्यक्षं, (३) उद्यत्कृमिजालकीर्णत्वं च -

**[९१]** "रक्तजाः कृमयः सूक्ष्मा, मृदुमध्या-ऽधिशक्तयः ।

जन्मवर्त्मसु कण्डूतिं, जनयन्ति तथाविधाम् ।।[ ]।।

इत्यादि **वात्स्यायन**शास्त्रप्रसिद्धं, (४) चापल्य-माया-ऽनृतादयो दोषा जगद्विदिता एवेति । संस्कारमोहाद् भुक्ता नरकाय भवतीति – [ ]

**[९२]** "सयसहस्सनारीणं, पोट्टं फाडेइ निग्घिणो ।

सत्तट्ठमासिए गब्भे, तडप्फडंते निकंतइ ।।[ ]।।

**[९३]** ता तस्स जत्तियं पावं, तत्तिअं चेव चउगुणं ।

इक्क[१]सित्थीपसंगेणं, साहू [२]बंधइ मेहुणे ।।[ ]।।

**[९४]** साहुणीए सहस्सगुणं मेहुणे[३]क्कंसि सेविए ।

कोडीगुणं बिइज्जेणं, तइए बोही विणस्सइ ।।[ ]।।

१. इक्क इत्थि. मु० । २. बंधिज्ज मु० । ३. ०णेक्कसि ।

[९५] आजम्मेणं तु जं पावं, बंधिज्जा मच्छबंधओ ।
वयभंगं काउमाणस्स[1], तं चेवऽट्ठगुणं भवे" ।।[ ]।।

इत्याद्यागमेन स्पष्टमेवेति स्त्री परिहरणीयैवेति ।।२.७।।

**रत्न.—अमेध्यभस्त्रात्रा-इति.** व्याख्या-स्त्री भुक्ता सती नरकाय, नरकगतये इत्यर्थः, स्यात्. कस्मात् ? - संस्कारेण-परिकर्मणा मोहो रागोत्पत्तिः तस्मात् पूर्वभवाभ्यास-जनितसंस्कारेण स्मृतिबीजेन वा यो मोहस्तस्मात्, 'स्मृतिबीजं संस्कार' इति [ ] वचनात् । स्त्री कथम्भूता ? अमेध्यस्य-अपवित्रवस्तुनो विष्ठादेर्भस्त्रेव-चर्मप्रसेविकेवामेध्यभस्त्रा, पुनः किंलक्षणा ? - बहूनि यानि रन्ध्राणि-छिद्राणि तेभ्यो निर्यन्तो ये मलाः, तैराविला । पुनः ? किं.-उद्यत्-प्रकटीभवद् यत् कृमीणां-योन्युत्थसूक्ष्मजन्तूनां जालं-समूहः, तेनाकीर्णा-व्याप्ता, पुन. किंलक्षणा ? - चापल्यं-चपलता माया-शाठ्यं अनृतं-मिथ्यावचस्, तैर्वञ्चिका-वञ्चनकर्त्री ।।२.७।।

**[९६] निर्भूमिर्विषकन्दली गतदरी व्याघ्री निराह्वो महा-**
**व्याधिर्मृत्युरकारणश्च ललनाऽनभ्रा च वज्राशनिः ।**
**बन्धुस्नेहविघात-साहस-मृषावादादिसन्तापभूः,**
**प्रत्यक्षाऽपि च राक्षसीतिबिरुदैः ख्याताऽऽगमे, त्यज्यताम् ।।२.८।।**

**धनवि.—**अथ ललनाममतामोचनद्वारोपसंहाराय ललनानां हीनवस्तूपमेयतां दर्शयन्नुपदिशति —

'निर्भूमिः' इति – **निर्भूमिः**-भूमिरहिता **विषकन्दली**-विषवल्लरी, च पुन**र्गतदरी**-गुहारहिता **व्याघ्री**-सिंही, च पुन**र्निराह्वो**-निर्नामा **महाव्याधिः**-महारोगः, च पुनर् **अकारणो**-निष्कारणो **मृत्युः**-मरणं, **च** पुनः **अनभ्रा**-वार्दलरहिता आकाशरहिता वा **वज्राशनिः**-वज्रमयी विद्युत्, च पुन**र्बन्धुस्नेहविघात-साहस-मृषावादादिसन्तापभूः**-बन्धूनां-स्वजनानां स्नेहः-प्रेम, तस्य विघातश्च-विनाशः, साहसं च-अविमृश्यकारिता,

१. मण० मु० ।

मृषावादश्च-असत्यभाषणं, ते आदौ येषां ते बन्धुस्नेहविघात-साहस-मृषावादादयः, ते च ते सन्तापाश्च, तेषां भूः-भूमिरुत्पत्तिस्थानम्, **अपि च** पुनः **प्रत्यक्षा**-दृष्टिग्राह्या **राक्षसीइति** एवंप्रकारै**र्बिरुदैः**-निजगुणतः संप्राप्तनानाभिधानैः, **आगमे**-धर्मशास्त्रे **ख्याता**-प्रसिद्धा **ललना**-स्त्री हे साधा! त्वया **त्यज्यतां**-दूरतो मुच्यतामिति; एतोषामुपमानानां ललनाया उपमेयतायां हेतुर्बन्धुस्नेहविघातसाहसमृषावादादि-सन्तापभूत्वम्, अत एवंविधोपमानोपमेया ललना त्याज्येति ।।२.८।।

---

इति श्रीतपागच्छनायकश्री**मुनिसुन्दरसूरि**निर्मितस्य तत्पट्टपरम्पराप्रभावक-पात-साहिश्रीअकब्बरप्रतिबोधकभट्टारकश्री**हीरविजयसूरि**श्री**विजयसेनसूरि**-प्रमुखपट्टपरंपरा-परिशीलितस्य षोडशशाखस्या**ध्यात्मकल्पद्रुमस्याधिरोहणीटीकाया** सकलशास्त्रारविन्द-प्रद्योतनमहोपाध्यायश्री**कल्याणविजयगणि**शिष्योपाध्याय-श्री**धनविजयगणि**विरचितायां **ललनाममतामोचननाम्नी** द्वितीया पदपद्धतिः ।।२५।।

---

**रत्न.–निर्भूमि र्विषकंदली**-इति. व्याख्या-आगमे-सर्वज्ञप्रणीतशास्त्रे, इतिबिरुदैः ख्याता-प्रसिद्धा एवंविधा ललना-स्त्री त्यज्यतां-हीयतां, कर्मोक्तौ युष्माभिरिति कर्तृपदं योज्यं, तानि बिरूदान्याह-इयं ललना विषस्य कन्दली-नवाङ्कुरः, कन्दलशब्दस्त्रिलिङ्गः, किंलक्षणा ? - निर्गता भूमिः-उत्पत्तिस्थानं क्षितिरस्याः सा निर्भूमिः, अपरा विषकन्दली भूमावुत्पद्यते इयं भूमिरहितेत्यर्थः । पुनरियं व्याघ्री वर्त्तते, किंलक्षणा ? - गता दरी-गुहा यस्याः सा, अन्या व्याघ्री दर्यां शेते इयं ललना व्याघ्री दरीरहितेति । इयं ललना महाव्याधिर्महान् रोगः किंलक्षणा ? - निर्गता आह्वा-नाम यस्य सः, निर्नामको व्याधिरित्यर्थः । ललना मृत्युः-मरणं, किंलक्षणः ? - न विद्यते कारणम्-अपथ्यासेवनादि यस्य सः, अपरो मृत्युः सकारणो भवति, अयं ललनारूपो मृत्युरकारण एव, च पुनर्, अदृश्यपातत्वात् स्फुलिङ्गवर्षित्वाद् वज्रमिव या अशनिः-विद्युत्, किंलक्षणा ? - न विद्यते *अभ्रं-मेघो यस्यां सा अनभ्रा, मेघरहितेत्यर्थः, अपरा अशनिर्मेघसहितेति,* अथवा न विद्यते अभ्रम्-आकाशमुत्पत्तिस्थानं यस्याः सा अनभ्रा, अपरा अशनिराकाशे उत्पद्यते, इयं तु आकाशरहितेति, तथा बन्धवः-स्वजनास्, तेषु स्नेहः-प्रेम, तस्य

---

१. निर्भूमी वि - मु० ।

विघातो-नाशः, साहसम्-अविमृश्यप्रवृत्तिः, मषावादः-असत्यवचनं ततो द्वन्द्वसमासः, बन्धुस्नेहविघात-साहस-मृषावादा आदौ येषां ते च ते सन्तापाश्च तेषां भूः-उत्पत्तिस्थानम्, आदिशब्देनादत्तमैथुन-सेवनपरिग्रहमेलनग्रहणम् । च पुनर्ललना राक्षसी, किंलक्षणा ? - प्रत्यक्षा, अपरा राक्षसी देवरूपत्वाददृश्या भवति, इयं च साक्षाद् दृश्यमानेत्यन्वयः ।।२.८।।

**[९७]** श्री**शान्तिचन्द्र**वरवाचकदुग्धसिन्धु-
लब्धप्रतिष्ठवरवाचक**रत्नचन्द्रः** ।
**अध्यात्म-कल्पफल**दस्य चकार वृत्तिं,
तत्राऽगमच्च किल नेत्रमितोऽधिकारः ।।२।।

इति ललनाममत्वमोचनाख्यो द्वितीयोऽधिकारः ।



# ३. अपत्यममतामोचनाधिकारः

**[९८] मा भूरपत्यान्यवलोकमानो,**
**मुदाऽऽकुलो मोहनृपारिणा यत् ।**
**चिक्षिप्सया नारकचारकेऽसि,**
**दृढं निबद्धो निगडैरमीभिः ।।३.१।।**

**धनवि.**—अनन्तरद्वारे स्त्रीममतामोचनमुपदिष्टं[1], परं स्त्रीममतामोचनेऽपत्यानि कुतो भवन्ति ? इत्याशङ्कायामपत्यममतामोचनद्वारमप्युपदिशन्नाह —

**अथापत्याधिकारः** अथापत्याधिकारः इत्यथापत्यममतामोचनाधिकार उपदेशविषयः क्रियते इत्यर्थः । तत्र प्रथममपत्यानां बन्धनरूपतां दर्शयन्नुपदिशति—

'मा भूः' इति - 'तद्' इत्यध्याहारात् **तत्**-तस्मात्, हे आत्मन् ! **त्वमपत्यानि**-पुत्र-पुत्र्यादीनि, **अवलोकमानः**-पश्यन् **मुदाकुलो**-हर्षाकुलो **मा भूः-मा** भव, **यद्**-यस्मात्, **मोहनृपारिणा**-मोहनामनृपलक्षणेन वैरिणा **नारकचारके**-नरकरूपकारागृहे **चिक्षिप्सया**-क्षेप्तुमिच्छया **निगडैः**-लोहिशृङ्खलाप्रायैः[2], **अमीभिरपत्यैर्दृढं**-गाढं **निबद्धो**-नियन्त्रितोऽसि, निगडनियन्त्रितस्याऽनिन्दितत्वमार्द्रकुमारादिनिदर्शनेन युक्तियुक्तमिति ।।३.१।।

**रत्न.**—अथापत्यममत्वमोचनाख्यस्तृतीयोऽधिकारो व्याख्यायते ।

प्रथमं अपत्योपरि मोहं मा कुर्वित्याह —

**'मा भूः'** इति, व्याख्या-हे आत्मन् ! त्वमपत्यानि-पुत्री-पुत्रान् विलोकमानो मुदा-प्रेम्णा आकुलो मा भूः-मा भव, यत् कारणात् त्वं, मोहनामा नृपः, स एवारिः, तेन नारकाणां चारके प्रक्षेप्तुमिच्छया अमीभिरपत्यैर्निगडैः-हिञ्जीरैर्[3]दृढं

---

१. ०मुद्दि, मु० । २. लोह मु० । ३. अ०चि० १२२९ हिञ्जीरश्च पादपाशो तथा 'शृङ्खलः' देशी० ६.११६, एवं देश्योऽयं शब्दः संस्कृतभाषायां स्वीकृतः - यतो द्वयोः शब्दकोश्योरेककर्त्तृत्वात् । एवं शब्दानां संस्कृत-देश्यत्वयो र्विवेकः कार्यः, तेनार्थबोधः सुगमः स्यात् ।

बद्धोऽसि । अपरो राजादिः कञ्चन जनं चारके प्रक्षेप्तुमिच्छुः प्रथमं पादपाशेन नियन्त्रयति पश्चाद् बन्दिगृहे प्रक्षिपतीति, नारका यत्र प्रक्षिप्यन्ते स नारकचारक इत्युच्यते इति ।।३.१।।

**[९९] आजीवितं जीव ! भवान्तरेऽपि वा,**
**शल्यान्यपत्यानि न वेत्सि किं हृदि ?।**
**चलाचलैर्यैर्विविधार्त्तिदानतो-**
**-ऽनिशं निहन्येत समाधिरात्मनः ।।३.२।।**

**धनवि.**—अथेह लोके परलोके च पुनरपत्यानां शल्यरूपतां दर्शयन्नुपदिशति—

'आजीवितम्' इति - **हे जीव ! आजीवितं**-जीवितपर्यन्तं **वा**-अथवा **भवान्तरेऽपि** तान्य**पत्यानि**-पुत्र-पुत्र्यादीनि **हृदि**-हृदये शल्यानि लोहकीलकादिप्रायाणि **किं न वेत्सि ?** - किं न जानासि ?, **यैर**पत्यै**श्चलाचलैः सद्भिर्विविधार्त्तिदानतो**-नानाप्रकारचित्तपीडाप्रदानतः, **आत्मनः**-स्वस्य **समाधिः**-चेतःस्वास्थ्यम्, **अनिशं**-निरन्तरं **निहन्येत**-विनाशविषयीक्रियेतेति; अत्र चलानि च-स्वल्पायूंषि अचलानि-बह्वायूंषि चलाचलानि तैः, अथवा चलाचलैः-चपलैरिति, भावार्थस्तु स्वल्पायुष्कैरप्यपत्यैः शोकरूपार्त्तिर्दीयते, बह्वायुष्कैरपि पाणिग्रहणाद्यनेकप्रकरणेषु वित्तव्ययाद्यनेकार्त्तिर्दीयते; यद् वा चपलान्यपत्यानि प्रायः कुकर्मकराणि, इहलोके पित्रोश्चेतःस्वास्थ्याभावापादकानि भवन्ति, तत्रापि विशेषतः पुत्री, यतः—

**[१००]** जम्मंतीए सोगो, वड्ढंतीए पवड्ढए चिंता ।
परिणीयाए दंडो दुहियपिया निच्चदुहिय व्व ।। [ ]

**[१०१]** नियगेहसोसणी[1] परगेहमण्डणी कलिकलंककुलभवणं ।
जेण न जाया धूया. ते सुहिया जीवलोगम्मि ।। [ ]

इहलोके **च** चेतःस्वास्थ्याभावापादकत्वे, परलोके चेतःस्वास्थ्याभावापादकत्वं

१. निमगिह मु० ।

सुतरां सिद्धम्, 'अन्ते या मतिः सा गतिः'न्यायादिति ।।३.२।।

**रत्न.**—अथापत्यानामुपमानान्तरेण जीवं प्रतिबोधयन्नाह —

**आजीवितम्** इति व्याख्या —

हे जीव ! जीवितं मर्यादीकृत्य आजीवितं वा-अथवा भवान्तरेऽपि-प्रेत्यभवेऽपि हृदि-हृदये अपत्यानि शल्यानि किं न वेत्सि ?, अपि तु शल्यान्येव विद्धि-इत्यर्थः। अथवा शल्यधर्मं निरूपयन्नाह-यैरपत्यलक्षणैः शल्यैर्विविधार्त्तिदानतो-नानाचिन्ताप्रदानतः आत्मनो-जीवस्य समाधिः-स्वास्थ्यं निहन्येत, यतः किंलक्षणैः ? - चलाचलैः-अतिचपलैः, अन्यान्यपि शल्यान्यतिचपलानि दुःखदायीनि भवन्ति।

अत्र पालना-ऽशन-वस्त्रप्रदान-विवाह-वधूसीमन्तकरण-पौत्र-तत्पालनादिका अर्त्तयो ग्राह्या इति ।।३.२।।

**[१०२] कुक्षौ युवत्याः कृमयो विचित्रा,**
**अप्यस्र-शुक्रप्रभवा भवन्ति ।**
**न तेषु तस्या नहि तत्पतेश्च,**
**रागस्ततोऽयं किमपत्यकेषु ? ।।३.३।।**

**धनवि.**—ननु स्वोदरोत्पन्नेष्वपत्येषु ममतामोचनं कथं क्रियते ? इत्याशङ्कायां स्वोदरोत्पन्नाः कीटकादयोऽपि भवन्ति-इति कृमिसाम्यं दर्शयन्नपत्यममतामोचन-मुपदिशन्नाह —

'कुक्षौ' इति — **युवत्याः**-स्त्रियाः **कुक्षौ**-गर्भाशये, **अस्र-शुक्रप्रभवा**-रजो-रेतःसम्भवा **विचित्रा**-नानाप्रकाराः **कृमयो**-द्वीन्द्रियादयः कीटा **अपि भवन्ति**-जायन्ते, **हि** यतः कारणात् तेषु-कृमिषु **तस्या**-युवत्याः **तत्पतेश्च**-भर्तुर्न **रागो** भवतीति, **ततः** कारणात्, **अपत्यकेषु**-कुत्सितसन्तानेषु तात्त्विकोपकारकर्तृत्वाभावेन कुत्सितकृमि-समानसन्तानेषु **किं** रागः क्रियते इति ? ।।३.३।।

**रत्न.**—अथापत्यानां कृम्युपमादानेन रागापनयनमाह —

**'कुक्षौ युवत्या'** इति, व्याख्या-युवत्याः कुक्षौ-गर्भे कृमयोऽपि विचित्रा भवन्ति, किंलक्षणाः ? - अस्रं-रुधिरं स्त्रिया योनिसम्बन्धि, शुक्रं-रेतः कामुकपुंसः सम्बन्धि, ताभ्यां प्रभवा-उत्पत्तिमन्तः, यत उक्तम् – [संबोधप्रकरणे]

**[१०२]** "इत्थीण जोणिमज्झे हवन्ति बेइन्दिया उ जे जीवा ।
इक्को व दो व तिन्नि व लक्खपुहुत्तं च उक्कोसा" ।। [५७९]।।

गर्भजाः संमूर्च्छजाश्च पञ्चेन्द्रियास्त्वन्ये इति । तेषु कृमिषु तस्या युवतेस्तत्पतेश्च रागो न भवति, ततोऽयं रागः अपत्यकेषु किं भवति ?, काक्वा प्रश्नः, यदि रागो युक्तः, तदा कुक्षिजत्वात् तेष्वपि युक्तः, यदि न करणीयस्तदाऽपत्येष्वपि न करणीयः, तेनैकत्र न जायते, तत्रार्थे काकूक्त्या प्रश्नः ।।३.३।।

**[१०४] त्राणाऽशक्तेरापदि,-**
**सम्बन्धा-ऽऽनन्त्यतो मिथोऽङ्गवताम् ।**
**सन्देहाच्चोपकृतेर्-**
**माऽपत्येषु स्निहो जीव ! ।।३.४।।**

**धनवि.**–अथापत्यममतामोचनद्वारोपसंहारायापत्यममताऽसाधारणकारणस्नेह-निरासकरणकारणानि त्रीणि दर्शयन्नुपदिशति –

'त्राणाऽशक्तेः' इति - **हे जीव! आपदि**-आपदायामापतितायां सत्यां, **त्राणाऽशक्तेः**-पालनासामर्थ्यात्, च पुनः **अङ्गवतां**-देहिनां **मिथः**-परस्परं **सम्बन्धाऽऽनन्त्यतः**-अनन्तभवभावित्वेन पितृत्व-पुत्रत्वादि-सम्बन्धस्यानन्तत्वम्, च पुनः, **उपकृतेः**-वार्द्धक्ये पालनलक्षणस्योपकारस्य सन्देहात्-कः पूर्वं मरिष्यति ? कश्च पश्चान्मरिष्यति ? इत्यादिना अग्रे सुपुत्रः कुपुत्रो वा भविष्यति ? इत्यादिना वा संशयात्, **अपत्येषु**-पुत्र-पुत्र्यादिषु **मा स्निहः**-स्नेहं मा कुर्या इत्यक्षरार्थः ।

भावार्थस्तु कर्मजनितायामापत्तावापतितायां सत्यामत्रायकत्वेन ।

**[१०५]** 'पीयं थणयच्छीरं सायरसलिलाउ हुज्ज बहुययरं ।
संसारम्मि अणंते माऊणं अन्नमन्नाणं ।। [उपदेशमाला-२०१]

इत्यादिना सम्बन्धस्यानन्त्येन वृद्धावस्थायामुपकारकत्वस्य संशयेनापत्येषु ममतां त्यज समतां च भजेति ।।३.४।।

---

इति श्रीतपागच्छनायकश्री**मुनिसुन्दरसूरि**निर्म्मितस्याध्यात्मकल्पद्रुमस्याधिरोहणी-टीकायां सकलशास्त्राऽरविन्दप्रद्योतनमहोपाध्यायश्रीकल्याणविजयगणिशिष्योपाध्याय श्री**धनविजयगणि**विरचितायाम्, अपत्यममतामोचननाम्नी तृतीया पदपद्धतिः ।।३।।

---

**रत्न.**—अथापत्यतः स्वार्थपूर्त्तिरेव कारण[1] भविष्यतीति निरूपयन्नाह —

**त्राणाशक्ते**' इति, व्याख्या - हे जीव ! त्वमपत्येषु मा स्निहः-स्नेहं मा कृथाः, कस्याः ? - त्राणाय-रक्षणाय, अशक्तेः-असामर्थ्यात्, कस्याम ? - आपदि-मरणलक्षणायां, विपदि अन्यस्यां वा रोगादिकायां, आपदि अपत्यानि मातरौ पितरौ प्रति रक्षितुं न शक्तानि भवन्तीति, च पुनरुपकृतेः-उपकारस्य सन्देहात्, कुता ? - मिथः-परस्परमङ्गवतां-देहभाजां सम्बन्धानां मातृ-पितृ-पुत्र-भ्रातृ-लक्षणानामानन्त्यतः-अनन्तत्वतो न जाने कः कस्योपकारं करिष्यतीति सन्देहस्तस्माद्, यश्च पिता स एवानन्तशः पुत्रो जातः, य एव पुत्रः स एवानन्तशः पिता जात इति, सर्वेषां सम्बन्धानामानन्त्यमागमवचनाद्, व्यवहारमात्रतोऽवसेयम्। इह भवे पिता-पुत्रयोर्वैरि-सम्बन्धेनोत्पन्नयोरुपकारं प्रति सन्देह एव, यथा श्रेणिका-ऽशोकचन्द्रयोरिति स्नेहं मा कृथा इत्युपदेशः ।।३.४।।

**[१०६]** श्री**शान्तिचन्द्र**वरवाचकदुग्धसिन्धु-
लब्धप्रतिष्ठवरवाचक**रत्नचन्द्रः** ।
अध्यात्म-कल्पफलदस्य चकार टीकां,
तत्राधिकार इति पूर्त्तिमगात् तृतीयः ।।३।।

इति - अपत्यममतामोचनाभिधस्तृतीयोऽधिकारः

---

१. ...रेव रागका० मु० ।

# ४. धनममतामोचनाधिकारः

**[१०७] याः सुखोपकृतिकृत्त्वधिया त्वं,**
**मेलयन्नसि रमा ममताभाग् ।**
**पाप्मनोऽधिकरणत्वत एता,**
**हेतवो ददति संसृतिपातम् ।।४.१।।**

**धनवि.**—नन्वनन्तरमपत्यममतामोचनद्वारमुक्तं, परमपत्यममतामोचने धनं विद्यमानं कस्याधीनं क्रियते ? इत्याशङ्कायां द्रव्यममतामोचनद्वारमुपदिशन्नाह —

**अथ धनाधिकारः**-अथ धनाधिकार इति अथापत्यममतामोचनाधिकारमुपदिश्य द्रव्यममतामोचनाधिकार उपदिश्यत इत्यर्थः । तत्र द्रव्यस्य प्रथमं पापाधिकरणत्वं दर्शयन् तस्य ममतात्यागमुपदिशति —

'या सुखोपकृति' इति — **सुखोपकृतिकृत्त्वधिया** सुखं च-अहं लक्ष्मीवान् इत्यादि मानसं सौख्यम्, उपकृतिश्च-स्वजनपोषणादिलक्षण उपकारः, तयोः कर्तृत्वबुद्ध्या, यद् वा सुखस्योपकारकत्वबुद्ध्या, **ममताभाग्**-ममेदमिति ममत्ववान् सन्, **या रमाः**-कमलाः **त्वं मेलयन्**-स्वकीयत्वकरणादिना सञ्चयीकुर्वन्, **असि**-वर्त्तसे, परं **पाप्मनोऽधिकरणत्वतः**-अधिक्रियते आत्मा नरकादिषु याभिरित्यधिकरणं, तस्य भावस्तत्त्वं [अधिकरणत्वं] तस्मात्, तथा पापोकरणत्वत इत्यर्थः, **पाप्मनः**-पापस्य परस्त्रीगमनादिलक्षणस्य महारम्भ-महापरिग्रहादिलक्षणस्य वा दुष्कृतस्य **हेतवो**-निमित्तभूताः कमलाः **संसृतिपातं**-संसारे पतनं मम्मणस्येव **ददति**-यच्छन्ति इत्यर्थ ।।४.१।।

**रत्न.**—अथ तुर्यो धनममत्वमोचनाधिकारो व्याख्यायते । तत्र प्रथमं धनात् सुखोपकृती भवत इति मा चिन्तयेत्युपदिशति —

**याः सुखोपकृतिकृत्त्वधियात्वम्** इति, व्याख्या - हे जीव ! त्वं या रमा-लक्ष्मीः प्रति मेलयन्नसि-सञ्चयन्नसि, त्वं कीदृशः ? - ममतां-ममत्वं भजसीति ममताभाक्, कया ! - सुखं चोपकृतिश्च सुखोपकृती, ते कुर्वन्तीति सुखोपकृतिकृतः,

सुखोपकृतिकृतां भावः सुखोपकृतिकृत्त्वं, तस्य धीः-बुद्धिस्तया, रमाः स्वस्य कुटुम्बस्य च सुखकृतो भवन्ति, परेषां दीनानाथानां चोपकृतिकृतो भवन्ति-इतिबुद्ध्येत्यर्थः, परमेता रमाः संसृतौ-संसारे, पातं-पतनं ददति । एतेषां संसृतिपाते कुतः शक्तिरित्याह-एताः किंरूपाः ? - हेतवः-कारणानि, कस्य ? - पाप्मनः-पापस्य, कुतः ? - अधिकरणत्वतः, **प्रायो लक्ष्म्यः पापाधिकरणमेव भवन्ति** तरवारिप्रभृतिशस्त्रवत्, केषांचिद् धन्यानामेव पुण्याधिकारिण्यो भवन्ति, तस्माद् बहुसावद्यकर्मभिर्लक्ष्मीमेलनं न युक्तिमदिति ।।४.१।।

**[१०८] यानि द्विषामप्युपकारकाणि,**
**सर्पोन्दुरादिष्वपि यैर्गतिश्च ।**
**शक्या च नापन्मरणामयाद्या,**
**हन्तुं धनेष्वेषु क एव मोहः ? ।।४.२।।**

**धनवि.**—ननु –

**[१०९]** 'धनैर्दुष्कुलीनाः कुलीनाः क्रियन्ते, धनैरेव पापात् पुनर्निस्तरन्ति ।
धनेभ्यो विशिष्टो न लोकेऽस्ति कश्चिद् धनान्यर्ज्जयध्वं धनान्यर्ज्जयध्वम् ।। [ ]

इति वचनात् कथं ममतामोचनं क्रियते ?, इत्याशङ्कायां द्रव्यस्यासारतां दर्शयन्नुपदिशति –

'यानि' इति - **यानि** धनानि **द्विषामपि**-वैरिणामपि, **उपकारकाणि**-उपकारकर्तृणि **परशुरामादि**धनानि **सुभूमादी**नामिव भवन्ति, **च** पुनर्यैर्धनैः **सर्पोन्दुरादिष्वपि**-भुजगमूषकादिष्वपि **सुरप्रिय**स्येव **गति**स्तिर्यग्लक्षणा भवतीति, च पुनर्यैर्ध**नैर्मरणा-ऽऽमयाद्या**-मृति-रोगादिका, **आपद्**-आपदा **हन्तुं**-निराकर्तुं **न शक्या**-न शक्यते, तेषु-**एष्व**नन्तरोक्तेषु **धनेषु, एव**-निश्चये **को मोहो**-ममतालक्षणः कर्त्तव्य इति ?, अत्र 'किम्' शब्दः कुत्सावाची वाच्यः ।।४.२।।

**रत्न.**—अथ धनेभ्योऽनर्थपरम्परामाह –

**'यानि द्विषामपि'** इति, व्याख्या-यानि धनान्यर्जितानि-सञ्चितानि, द्विषां-

वैरिणामप्युपकारकाणि भवन्ति-उपयोगीनि भवन्ति, सञ्चयिनं निहत्य वैरिणो गृह्णन्ति-इत्यर्थः । च पुनर्यैः सर्पोन्दुरादिष्वपि गतिः-भवान्तरप्राप्तिर्भवति, सञ्चयी पुमान् धनमोहात् सर्पोन्दुरादिषु योनिषु मृत्वोत्पद्यते इति, च पुनर्यैर्धनैरापत्-मरणाऽऽमयाद्यामृत्यु-रोगादिका विपद्, हन्तुं-निवारयितुं न शक्या, अवश्यंभाविनो मरणरोगादयो भावा भवन्त्येवेति भावः, **ब्रह्मदत्त**चक्रिण इव, तत एवंविधेषु धनेषु हे आत्मन् ! क एव मोहः ?, काकूक्त्या प्रश्नः, अपि तु न कोऽपि, निरर्थक एवेति भावः ।।४.२।।

**[११०] ममत्वमात्रेण मनःप्रसाद-**
**सुखं धनैरल्पकमल्पकालम् ।**
**आरम्भपापैः सुचिरं तु दुःखं,**
**स्याद् दुर्गतौ दारुणमित्यवेहि ।।४.३।।**

**धनवि.**—ननु धनस्य द्विषदुपकारकत्वादिदोषोऽस्तु, परं ममत्वबुद्ध्या मनःप्रसादसुखं तु भवति ? इत्याशङ्कायामाह —

'ममत्वमात्रेण' इति – **ममत्वमात्रेण**-'ममेदं धनं, ममेदं गृहम्'इत्यादिममतामात्रेण **धनैः**-द्रव्यैः, **अल्पकं**-कुत्सितमल्पमल्पकं-ईषत्तरमात्रं, **अल्पकालम्**-अल्पः कालः-समयो यस्य तदल्पकालम्-अल्पकालीनं, **मनःप्रसादसुखं**-चित्तप्रसन्नतालक्षणं, सौख्यं स्याद्-भवति, **तु** पुनर् **आरम्भपापैः**-द्रव्यार्जनार्थं षट्कायाद्युपमर्दजनितदुष्कृतै**र्दुर्गतौ**-नरकादिगतौ **सुचिरम्**-अतिचिरकालं **दारुणम्**-अतिभयङ्करं दुःखं **स्याद्**-भवति, **इति**-अमुना प्रकारेणोक्तं सम्यग्-**अवेहि** जानीहीत्यर्थः,

भावार्थस्तु द्रव्यममतामात्रेणोत्कृष्टं शतवर्षमात्रं सुखं भवति, द्रव्यार्ज्जना-जन्यपापैस्तूत्कृष्टं त्रयस्त्रिंशत्सागरोपमाणि यावन्नरकगतौ दुःखं भवतीति सम्यक् प्रकारेण ज्ञात्वा द्रव्यममतां मुञ्चेति ।।४.३।।

**रत्न.**—अथ धनेभ्यः सुखस्याल्पत्वं दुःखस्य भूयस्त्वमाह —

**ममत्वमात्रेण मनःप्रसाद,** इति व्याख्या-धनैर्हेतुभिर्ममत्वमात्रेण, मनसः-चेतसः,

प्रसादः-प्रसत्तिः स्यात्, परं धनैः सुखमल्पकं-स्तोकं, तदप्यल्पकालं भवति, अथवा मनःप्रसादलक्षणं सुखमल्पकमल्पकालं भवति[1], तुरिति विशेषे, आरम्भेभ्यः पापैरारम्भपापैः-षट्कायोप-मर्दादिजनितैः सुचिरं-चिरकालं दुर्गतौ-तिर्यग्-नरकादौ दुःखं स्यात्, किंलक्षणं ? - दारुणं भयावहं, हे आत्मन् ! इति त्वमवेहि-जानीहि, यथा नवानामपि **नन्दराजा**नाम् ।।४.३।।

**[१११] द्रव्यस्तवात्मा धनसाधनो न,**
**धर्मोऽपि साऽऽरम्भतयाऽतिशुद्धः ।**
**निस्सङ्गतात्मा त्वतिशुद्धियोगान्-**
**मुक्तिश्रियं यच्छति तद्भवेऽपि ।।४.४।।**

**धनवि.**—ननु द्रव्यस्तवसाधनं धनं कथं दुर्गत्यै ? इत्याशङ्कायामाह —

'द्रव्यस्तवात्मा'- इति - **द्रव्यस्तवात्मा**-द्रव्यस्तवः पूजा-प्रासाद-प्रतिमाप्रतिष्ठादिकः "भावकारणं द्रव्यं" इति [ ] वचनात्, स एवात्मा-स्वरूपं यस्य स तथा, **धनसाधनो**-धनं-स्वर्णादिकमेव साधनं-निमित्तं यस्य स तथा, सहारंभेन-षट्कायाद्युपमर्द्देन वर्त्तते यः स तथा तस्य भावस्तत्ता [सारम्भता], तया **सारंभत**या इति, एतावता धनप्रभवः पूजादि**धर्मोऽपि** किञ्चिदारम्भकलङ्कितत्वा-न्निष्कलङ्को **न** भवतीति, **तु** पुन**र्निःसङ्गतात्मा** धर्मोऽति-**शुद्धियोगात्, तद्भवे**ऽपि **मुक्तिश्रियं**-मोक्षलक्ष्मीं **यच्छति**-ददातीति; अत्र **निस्सङ्गतात्मा** निर्गतः सङ्गो-धनधान्यादिर्नवविधः परिग्रहो यस्मात् स, तथा तस्य भावस्तत्ता [निःसङ्गता] सैवात्मा-स्वरूपं यस्य स तथा, **अतिशुद्धियोगाद्**-अतिशयेन शुद्धिः-निष्कलङ्कता, तस्या योगात्-सम्बन्धात् **तद्भवेऽपि**-स एव भवो-जन्म तद्भवस्तस्मिन्, अत्र **अपि**शब्दो वैलक्षण्यद्योतको, वैलक्षण्यं चेदं-द्रव्यस्तवात्मा धनसाधनो धर्मो भवान्तरे मुक्तिप्रापको भवति, निस्सङ्गतात्मा तु धर्मस्तपः-संयमरूपो भवान्तरे तद्भवे वा मुक्तिप्रापको भवतीति ।।४.४।।

**रत्न.**—अथ द्रव्यस्तवात्मा धर्मो भवति, इति धनैरेव, धनसञ्चयः कर्त्तव्य

१. प्रतौ 'भवति स्य खण्डं' पदमस्ति, तत्र 'भवति, सुखस्य खण्डम्' पदानि भवेयुः । सं० ।

इति विचारोऽपि न सम्यगित्याह –

**'द्रव्यस्तवात्मा'** इति, व्याख्या-जिनप्रासाद[1]-जिनबिम्ब-प्रतिष्ठा-जिनबिम्बार्चना-ऽऽदिर्द्रव्यस्तवः, स एवात्मा-स्वरूपं यस्य स द्रव्यस्तवात्मा धर्मोऽपि सारम्भतया-आरम्भसहितत्वेन नातिशुद्धो-नातिनिर्मलो वर्त्तते, तज्जनित-शुभकर्मणां स्वर्गादौ भोग्यत्वात्, सर्वस्यापि संसारसुखस्य दुःखत्वेनोक्तत्वादिति । किंलक्षणो ? - धनान्येव साधनं-कारणं यस्य स धनसाधनः, धनैरेव साध्य इत्यर्थः, तुरिति विशेषे, निस्सङ्गता-निरीहता एवात्मा-स्वरूपं यस्य स निस्सङ्गतात्मा धर्मोऽतिशुद्धः, आरम्भरहितत्वेन पापमलाभावान्निर्मलताया योगात्, निस्सङ्गतात्मना धर्मेण केवलं कर्मनिर्जरणमेव भवतीति विशुद्धत्वमेवेत्यर्थः, तेन स एव भवो वर्त्तमानो भवः तस्मिन्नपि मुक्तिश्रयं यच्छति-ददातीति ।।४.४।।

**[११२] क्षेत्र-वास्तु-धन-धान्य-गवाश्वैर्-**
**मेलितैः सनिधिभिस्तनुभाजाम् ।**
**क्लेशपापनरकाभ्यधिकः स्यात्,**
**को गुणो न यदि धर्मनियोगः ? ।।४.५।।**

**धनवि.**–अनन्तरं यतीनुपदिश्य, गृहस्थोद्देशेन ममतात्यागमुपदिशति-

'क्षेत्र' इति – **क्षेत्राणि** च-शालीक्षुप्रमुखकेदाराः, **वास्तूनि** च-गृहा-ऽट्ट-हट्टप्रभृतीनि, **धनानि** च-स्वर्ण-रूप्यादीनि, **धान्यानि** च-व्रीह्यादीनि, **गावश्च**-धेनु-धेनुपतयः, **अश्वाश्च**-तुरङ्गमाः, उपलक्षणाद् गज-रथ-पदात्यादयः, तैस्तथा, किंभूतैः ? - **सनिधिभिः**-निधानसहितै**र्मेलितैः**-सञ्चितैः **तनुभाजां**-देहिनां **क्लेशश्च**-शरीरश्रमः, **पापानि** च-पञ्चाश्रवसेवनादीनि, **नरकाश्च** प्रसिद्धाः तेभ्यो**ऽधिकः**-अतिरिक्तः, तदेत्यध्याहारात् को **गुणः ?** - को विशेषलाभो भवतीत्यक्षरार्थः, **यदि**-चेद् **धर्मनियोगो**-धर्मस्थाने व्यापारो **न** भवेदिति ।।४.५।।

**रत्न.**–अथ 'भूरिपरिग्रहः पापायैव'इति द्रढयन्[2]नाह –

---

१. ...दकारण-जि.'मु० । २. द्रढयति-क्षेत्र... इति प्रतौ. ।

**क्षेत्र-वास्तु धन-धान्य-गवाश्चैः** इति, व्याख्या-तनुभाजां-प्राणिनां क्षेत्र-वास्तु-धन-धान्य-गवाश्वैः परिग्रहैः कृत्वा क्लेश-पाप-नरकेभ्योऽधिकः को गुणः स्याद् ?, अपि तु न कोऽपि गुणः स्यादित्यन्वयः, पूर्वं क्लेशः १ पश्चात् पापं २ तदनु नरक ३ इति त्रयो गुणाः परिग्रहस्येति सूचितम्, अत्र गुणशब्दो लक्षणया ग्राह्य इति । अथ पदव्याख्या-क्षेत्रं सेतु-केतुभयात्मकं, वास्तु-गृहा-ऽट्टादि, धनं-श्रीफलपूगादि गणिम-धरिमभेदाद्, धान्यं-गोधूमादि चतुर्विंशतिधा, गवाश्वैरिति गावोऽश्वाश्च, ततो द्वन्द्वसमासस्तैः, उपलक्षणान्महिष्युष्ट्राऽजोरभ्रादीनामपि ग्रहणं, किंलक्षणैः ? - मेलितैः-स्थाने स्थाने वृन्दतामापादितैः, पुनः किंलक्षणैः ? - सनिधिभिः-निधानसहितैरिति कथनेन रूप्य-स्वर्ण-मण्यादयो गृहीता, निधयस्तु तैरेव भवन्तीति, यदि न धर्मनियोगो, धर्मे नियोगो-नियोजनं व्यापारणं स्यात्, यदा धर्मे नियोगो व्यापारणं स्यात् तदा तस्य परिग्रहस्य[1]-कश्चिद् गुणोऽप्यस्तीति भावः । अत्र स्वर्गादिसुखप्राप्तिलक्षणो गुणः सूचित इति ।।४.५।।

**[११३] आरम्भैर्भरितो निमज्जति यतः प्राणी भवाम्भोनिधा-**
**वीहन्ते कुनृपादयश्च पुरुषं येन च्छलाद् बाधितुम् ।**
**चिन्ताव्याकुलाकृतेश्च हरते यो धर्मकर्मस्मृतिं,**
**विज्ञा ! भूरिपरिग्रहं त्यजत तं भोग्यं परैः प्रायशः ।।४.६।।**

**धनवि.**—अथ परिग्रहपरिमाणव्रताऽङ्गीकारेण ममतात्यागमुपदिशन्नाह —

**यतः** परिग्रहात् **प्राणी**-जीवः **आरम्भैः**-षट्कायाद्युपमर्दैर्**भरितो**-व्याप्तो **भवाम्भोनिधौ**-संसारसमुद्रे **निमज्जति**-ब्रुडति, **च** पुनर्येन परिग्रहेण **कुनृपादयः** आदिपदाच्चौर-नट-विटादयः पुरुषाः परिग्रहवन्तं **पुरुषं च्छलाद्**-आज्ञाभङ्गादिच्छलं प्राप्य **बाधितुं**-बाधां कर्तुमीहन्ते, वाञ्छन्तीत्यर्थः, **च** पुनर्यः परिग्रहः-**चिन्ताव्याकुलताकृतेः**-चिन्ता-परिग्रहस्या-प्राप्तस्यार्जनोपायपरिचिन्तनं प्राप्तस्य परिरक्षणोपायपरिचिन्तनं च, तेन व्याकुलता-अस्वास्थ्यं, तस्य [तस्याः] कृतेः-करणाद् **धर्मकर्मस्मृतिं-**

१. ०स्य यदि धर्मे चैत्योपाश्रय-साधर्मिकपोष-ज्ञानभाण्डागारकरणादिलक्षणे नियोगो व्यापारणं० इति मुद्रितेऽधिकः पाठः ।

धर्मस्य कर्माणि-कार्याणि देव-गुरु-वन्दनादीनि, तेषां कर्तुमुद्दिष्टानां स्मृतिं-स्मरणं **हरते**-अपनयतीत्यर्थः, भो **विज्ञा** ! - **भोः** पण्डिताः ! तस्मात् तं यच्छब्दप्रदर्शितस्वरूपं **प्रायशो**-बाहुल्येन **परैः** आत्मव्यतिरिक्तै**र्भोग्यं**-परिभोगयोग्यं **भूरिपरिग्रहं**-मूर्च्छया बहुधन-धान्यादिसङ्ग्रहं **त्यजत**-परिहरतेत्यर्थः ।।४.६।।

**रत्न.**—अथ परिग्रहात् परत्रेह च दुःखानि भवन्ति, इति निरुपयन्नाह —

**आरम्भैः** इति, व्याख्या-यतो-यस्मात् कारणादारम्भैः-सावद्यव्यापारेण जीवोपमर्दादिजातैर्भरितः-पूर्णः-प्राणी भवाम्भोनिधौ-संसारसमुद्रे निमज्जति ब्रुडति, अन्योऽपि गाढं भारवान्[१] समुद्रे निमज्जतीति, च पुनर्येन परिग्रहेण कुनृपादयो-दुष्टराजाद्याः, आदिशब्देन दुष्टमन्त्र्या-ऽऽरक्षका-ऽन्यनियोगिनां ग्रहणम्, पुरुषं प्रति छलाद्-अन्यायाभावेऽपि च्छलग्रहणेन बाधितुं-पीडितुमीहन्ते-वाञ्छन्ति, च पुनर्यः परिग्रहश्चिन्ताभिः-धन[२]-रक्षणादिजनिता[३]भिर्व्याकुलता व्यग्रत्वं, तस्याः कृतेः-करणतो, धर्मकर्मणोः स्मृतिं हरते, चिन्ताव्याकुलचित्तस्य धर्मकर्मापि न स्मरतीति, अथवा धर्मस्य कर्मण इति तत्पुरुषसमासः कार्यः । हे विज्ञा ! - हे दक्षाः ! यूयं तं भूरिपरिग्रहं त्यजत, कीदृशं ? - भोग्यं-भोगार्हं, कैः ? - परैरर्जकादित्यर्थः कथं ? - **प्रायसः**[४]-प्रायेण, द्रव्यस्यार्जको भिन्नो भोक्तारस्त्वन्ये भवन्तीत्यर्थः, यतः-

**[११४]** "कीटिकासञ्चितं धान्यं, मक्षिकासञ्चितं मधु ।
कृपणैः सञ्चितं वित्तं, परैरेवोपभुज्यते ।। [ ] इति

यथा सोढतादृक्कष्ट-परम्परयोगिगृहीतसिद्धरसभोक्ता वलभीवासी रङ्कः श्रेष्ठी जात इति ।।४.६।।

**[११५] क्षेत्रेषु नो वपसि यत् सदपि स्वमेतद्-**
**यातासि तत् परभवे किमिदं गृहीत्वा ? ।**
**तस्यार्जनादिजनिताऽघचयार्जितात् ते,**
**भावी कथं नरकदुःखभराच्च मोक्षः ? ।।४.७।।**

१. न् पदार्थः स० मु० । २. धनार्जन मु० । ३. ...न्ति चिन्ताभिर्व्या मु० । ४. प्रायसः-मूलत्वेऽपि गृहीतः ।

**धनवि.**—अथ द्रव्यममतामोचनद्वारमुपसंहरन् तर्करीत्या धर्मस्थानेऽव्यापृतस्य द्रव्यस्य दोषान् दर्शयितुमुपदिशति —

'क्षेत्रेषु'-इति-यदि—**यदेतत्** प्रत्यक्षेण दृश्यमानं **सदपि**-विद्यमानमपि **स्वं**-द्रव्यं **क्षेत्रेषु**-जिनभवन-बिम्ब-पुस्तक-साधु-साध्वी-श्रावक-श्राविकारूपेषु सप्तसु प्रतिष्ठा-तीर्थयात्रा-सहितेषु नवसु वा **नो वपसि**-नो बीजसन्ततिं कुरुषे, तर्हि **तद्** इदं दृष्यमानं धनं **गृहीत्वा**-लात्वा **परभवे**-अग्रेतने जन्मनि **किं याताऽसि** ? - गन्ताऽसीत्यर्थः, **च** पुनस्, **तस्य** धनस्य **अर्जन**म्-उपार्जनमादौ येषां तेऽर्जनादयः, आदिपदात् क्रयाणक-क्रय-विक्रयादयः, तै**र्जनिता**नि-उत्पादितानि **अघा**नि-पापानि, तेषां **चयः**-समूहः, तेना**र्जित**-उत्पादितः, तस्मा**न्नरकदुःखभरा**त्-नरकगतिसम्बन्धि-दुःखसमूहात् **मोक्षः** मुक्तिस्तव **कथं**-केन प्रकारेण **भावी**-भवितेति ? । अत्र यदि तर्हीति पदे अध्याहार्ये ।।४.७।।

---

इति श्रीतपागच्छनायक**मुनि अध्यात्मकल्पद्रुम**स्याधिरोहणीटीकायां सकलशास्त्रारविन्दप्रद्योतनमहोपाध्यायश्री**कल्याणविजय**गणिशिष्य**श्रीधनविजय**-गणिविरचितायां द्रव्यममतामोचननाम्नी चतुर्थी पदपद्धतिः ।।४।।

---

**रत्न.**—अथार्थान्तरकथनेन सप्तक्षेत्र्यां धनवपनोपदेशमाह-**क्षेत्रेषु नो वपसि** इति, व्याख्या-हे धनिन् ! यदि त्वं क्षेत्रेषु-जिनभवनादिषु सप्तसु प्रवचनप्रतीतेषु, सद्-विद्यमानमपि स्वं-धनं नो वपसि, अत्र वपनक्रियाया लक्षणया प्रयोगः, क्षेत्रशब्दोऽपि लक्षणया एव, यथा क्षेत्रे उप्तं व्रीह्यादिधान्यं शतगुणं भवति, तथाऽत्रापि सप्तक्षेत्र्यां दत्तमनन्तगुणं भवतीत्युपचारात् क्षेत्रशब्दस्य वापक्रियायाश्च निर्देश इति । इदं स्वं किं गृहीत्वा-सार्थे लात्वा परभवे त्वं याताऽसि ? - गन्ताऽसि, काक्वा प्रश्नः । सार्थे गृहीत्वा यातुं न शक्यमिति सूचाऽपि । वेति पक्षान्तरे । हे धनिन् ! ते-तव नरकस्य-निरयस्य दुःखं, तस्य भरः-प्रचयस्तस्मान्मोक्षो-मोचनं कथं भावी ?, अत्रापि काक्वा प्रश्नः, अपितु न भावीति सूचाऽपि । किंलक्षणात ? - तस्य-स्वस्यार्जनादिना जनितम्-उत्पादितं, यदघं पापं, तस्य चयः-समूहः, तेनाऽर्जिताद्-उपार्जितादितिहेतोः, क्षेत्रेषु स्वं वपसि तदपि सुन्दरमितीत्यर्थः ।।५३।।७।।

[११६] श्रीशान्तिचन्द्रवरवाचकदुग्धसिन्धु-
लब्धप्रतिष्ठवरवाचकरत्नचन्द्रः ।
शिष्यार्थनाः[1] सफलयन् कुरुते स्म टीकां,
तत्राधिकार इति पूर्त्तिमवाप तुर्यः ।।४।।

इत्यध्यात्मकल्पद्रुमे धनममत्वमोचनाख्यस्तुर्योऽधिकारः



१. शिष्यार्पितां - मु० ।

# ५. देहममतामोचनाधिकारः

**[११७] पुष्णासि यं देहमघान्यचिन्तयँस्-**
**तवोपकारं कमयं विधास्यति ? ।**
**कर्माणि कुर्वन्निति चिन्तयाऽऽयतिं,**
**जगत्ययं वञ्चयते हि धूर्तराट् ।।५.१।।**

[1]उपजाति

**धनवि.**—ननु धनममतामोचने शरीरसत्यापना कथं भवति ? इत्याशङ्कायां शरीरममतामोचनद्वारमुपदिशन्नाह – **अथ देहाधिकारः** – अथ देहाधिकार इति, अथ देहममतामोचनोऽधिकार उपदिश्यत इत्यर्थः । तत्र [2]पूर्वं देहस्यानुपकारकत्वं धूर्त्ततां च दर्शयन् देहपोषं[3]णे दोषमुपदिशति –

'पुष्णासि' इति - हे आत्मन् ! **अघानि**-जीवघातादिजनितानि पापानि, **अचिन्तयन्**-अविचारयन् त्वं, **यं देहं**-शरीरं **पुष्णासि**-पुष्टिविषयीकरोषीत्यर्थः, सोऽयं देहस् **तव कं**-किंनामकम्, **उपकारं**-हितकार्यकरणलक्षणं **विधास्य**ति-करिष्यति ?, ततः **कर्माणि**-देहपोषणार्थं जीवहिंसादिकार्याणि, **कुर्वन्**-सृजन् इत्यनन्तरोक्तामायतिम्-उत्तरकालं **चिन्तय**-विमृशेति, **हि** निश्चितं **जगति**-विश्वेऽथवा **जँगन्ति**[4]-जगज्जंतून्, **अयं**-कायाह्वयो **धूर्तराट्**-वञ्चकपतिः, वञ्चयते विप्रतारयतीत्यर्थः, भावार्थस्तु - त्वं यं देहं पुष्णासि स देहस्त्वां कर्मभारभारितं दुर्गतियोग्यं च कृत्वा नंष्ट्वा यास्यतीति धूर्त्तराजत्वं देहस्येति ।।५.१।।

**रत्न.**—अथ देहममत्वमोचनाधिकारः पञ्चमो व्याख्यायते, [5]तस्य चेदं प्रथमं वृत्त । तत्र प्रथमं पापं कुर्वन् वपुःपोषं मा कुर्वित्युपदिशति –

**पुष्णासि यं देहम्,** इति, व्याख्या हे शरीरिन् ! त्वं यं देहं पुष्णासि-पुष्टं करोषि, किं कुर्वन् ! - अचिन्तयन्-अविचारयन्, कानि ? - अधानि प्रति

---

१. इन्द्रवंशा त-त-ज-र' + वंशस्थ - 'ज-त-ज-र' नुं मिश्रण । २. प्रथमं मु० । ३. पोषणादौ० मु० । ४. 'जगन्ति' पाठः रत्नटी. प्रतौ मूलत्वेन गृहीतः । ५. 'तस्य...वृत्तं' मु० नास्ति.

पापानि प्रति देहं पुष्णन् पापानि चिन्तयस्येव नेत्यर्थः, परमयं देहः पोषितः सन् तव कमुपकारं विधास्यति-करिष्यति ?, त्वं जीवोपघातलक्षणानि पापानि अतिसावद्यानि कर्माणि प्रति कुर्वन् सन् इति आयतिं-उत्तरकालं विचिन्तय-विचारय, हि-निश्चितमयं देहो धूर्त्तराट्-वञ्चकानां राजा **जगन्ति** प्रति, 'आश्रये[1] आश्रयिणामुपचाराद्' जगद्वासिनो जगत्, तद् वञ्चयते, तेन बहुजीवघातादिनाऽस्य पोषणं न तवायतिहिताय भावीत्यर्थः, वञ्चकत्वोपचाराद् धूर्त्तराडुपमानमस्येति ।।५.१।।

**[११८] कारागृहाद् बहुविधाशुचितादिदुःखान्-**
**निर्गंतुमिच्छति जडोऽपि हि तद् विभिद्य ।**
**क्षिप्तस्ततोऽधिकतरे वपुषि स्वकर्म-**
**व्रातेन तद् द्रढयितुं यतसे ? किमात्मन् ! ।।५.२।।**

**धनवि.**—अथ सावद्यौषधा-ऽऽहारादिना देहदाढ्र्यकरणे दोषमुपदिशति-

'कारागृहाद्' इति-हे **आत्मन् ! हि** यतः कारणात् **कारागृहाद्**-गुप्तिगृहाद् **बहुविधं**-नानाप्रकारम्, **अशुचितादि**-अपावित्र्यादि **दुःखं** यत्र, (ततः), **आदि**पदात् क्षुत्-पिपासा,-पारवश्यादिपरिग्रहः, तथा तस्मात्, **जडोऽपि**-मूर्खोऽपि **तत्** कारागृहं **विभिद्य**-विदार्य **निर्गंतुं**-निर्गमनक्रियां कर्तुम्, **इच्छति**-वाञ्छतीत्यर्थः, ततस्तस्मात् कारणात्-हे आत्मन् ! **स्वकर्मव्रातेन**-स्वकीयप्राक्कृतकर्मसमूहेन, **ततः** कारागृहाद् **अधिकतरे**-अतिशयेनाधिके बीभत्से, **वपुषि**-शरीरे क्षिप्तः-प्रवेशितः सन् तद्वपु**र्द्रढयितुं**-सावद्याहारादिना दृढीकर्तुं त्वं **किं यतसे ?** - किं यत्नं कुरुषे इत्यर्थः ।।५.२।।

**रत्न.**—अथ शरीरं कारागृहादप्यधिकत्वेन चिन्तयन्नाह —

**कारागृहाद्** इति, व्याख्या-हे आत्मन् ! जडोऽपि-मूर्खोऽपि जनः कारागृहाद्-गुप्तिगृहान्निर्गन्तुमिच्छति वाञ्छति। किं कृत्वा ? - तत् कारागृहं विभिद्य, खात्रं दत्त्वेत्यर्थः, किंलक्षणात् ? - बहुविधं-नानाप्रकारमशुचितादि-अपावित्र्यादि दुःखं

१. आश्रयेषु-मु० ।

यस्मिन् तस्माद्, आदिशब्देन क्षुत्-तृड्दुःखग्रहणम्, ततः कारागृहादधिकतरे वपुषि-शरीरे स्वस्य कर्मणो व्रातेन-समूहेन क्षिप्तः सन्, तद् वपुः प्रति द्रढयितुं-दृढं कर्तुं किं यतसे ? - किं यत्नं करोषि, अत्रापि काकूक्त्या व्याख्यानं, अपि तु मा यतस्वेत्युपदेशोऽपि, ततोऽधिकरत्वं चास्य जीवनावधि सद्भावाद् भवे भवे प्राप्यत्वाच्चेति ।।५.२।।

**[११९] चेद् वाञ्छसीदमवितुं परलोकदुःख-**
**भीत्या ततो न कुरुषे किमु पुण्यमेव ?**
**शक्यं न रक्षितुमिदं, हि न दुःखभीतिः,**
**पुण्यं विना क्षयमुपैति न वज्रिणोऽपि ।।५.३।।**

**धनवि.**—विद्यमानशरीरापगमे परलोके दुःखं भविष्यतीति पुष्टि-दाढ्र्यकरणादिना एतच्छरीरयत्नो विधीयते इत्याशयानां संशयनिरासायोपदिशति —

'चेद् वाञ्छसीदम्'-इति-हे आत्मन् ! **चेद्**-यदि त्वं **परलोकदुःखभीत्या**-शरीरममतामोचने एतच्छरीरापगमे च परलोके गतस्य मम दुःखं भविष्यति-इतिभयेनेदं शरीरमवितुं-रक्षितुं वाञ्छसि, ततः परलोकदुःखभीत्या **पुण्यमेव**-सुकृतमेव शरीररक्षणादियत्नत्यागेन **किमु नो कुरुषे ?** - किं न करोषीत्यन्वयः, **हि** यतः कारणात्, **इदं** शरीरमतिशक्तिमता केनापि **रक्षितुं**-त्रातुं **न शक्यं**-न-शक्तिविषयीकार्यं भवतीत्यर्थः, **दुःखभीतिश्च**-परभवदुःखभयं, **पुण्यं विना**-तथाविधसुकृतमन्तरेण **क्षयं**-विनाशं **वज्रिणोऽपि**-इन्द्रस्यापि **नोपैति**-न गच्छतीत्यर्थः ।।५.३।।

· **रत्न.**—अथ वपुषि पुष्टीकृते सति बहुजीवनात् परलोकदुःखं नायातीति 'वरं **वपुःपोष**' [ ] इति कश्चिद् वक्ष्यतीत्याशङ्क्याह —

**'चेद् वाञ्छसीदमवितुम्'** इति, व्याख्या-हे आत्मन् ! त्वं चेद्-यदि परलोकदुःखानां भीत्या-भयेनेदं वपुः प्रति अवितुं-रक्षितुं वाञ्छसि, पुष्टीकृते वपुषि बहुवर्षजीवनात् परलोकदुःखानि नायान्तीति वरं पुष्टीकृतं वपुरित्यर्थः, ततस्तर्हि पुण्यमेव

किम् ? - किं न कुरुषे, हि यस्मात् कारणात् इदं वपुर्दुःखभीतेः दुःखानां भयाद् रक्षितुं रक्षणाय न शक्यं-न शकनीयं इति न, 'द्वौ नञौ प्रकृतमर्थं गमयत' इति न्यायादपितु शक्यम्, अर्थात् पुण्येनैवेति, च पुनरिदं वपुर्वज्रिणोऽपि इन्द्रस्यापि पुण्यं विना क्षयं-नाशमुपैति-प्राप्नोति । तस्माद् त्वं यदि परलोकदुःखभीतस्तदा पुण्यं कुरुष्वेत्युपदेशः ।।५.३।।

**[१२०] देहे विमुह्य कुरुषे किमघं ? न वेत्सि,**
**देहस्थ एव भजसे भवदुःखजालम् ।**
**लोहाश्रितो हि सहते घनघातमग्निर्-**
**बाधा न तेऽस्य च नभोवदनाश्रयत्वे ।।५.४।।**

**धनवि.**—अनन्तरोक्तयुक्त्या परलोकदुःखभीत्या शरीरयत्नो माऽस्तु, परं शरीरपोषणादिना सुखं तु भवत्येवेति शरीरयत्नो विधीयते इत्याशयानां पुंसामुपदेशमुपदिशति —

'देहे' इति—हे आत्मन् ! **देहे**-शरीरे **विमुह्य**-विशेषेण मोहं प्राप्या-**ऽघं**-पापं **किं कुरुषे ?**, इति-अग्रे वक्ष्यमाणं स्वरूपं किं **न वेत्सि ?** - न जानासीत्यर्थः, **देहस्थ एव**-शरीरे[१] स्थित एव त्वं **भवदुःखजालं**-सांसारिकदुःखसमूहं **भजसे**-प्राप्नोषीत्यर्थः, **हि** यतः कारणात्, **लोहाश्रितो**-लोहसंश्रितोऽ**ग्निः**-वह्नि**र्घनघातं**-लोहमयघनप्रहारं **सहते**-क्षमते, **गगनवद् अनाश्रयत्वे**-निरालम्बनत्वे **ते**-तव **च** पुनर**स्य**-वह्ने**र्बाधा**-पीडा न भवतीति, नभसो वति प्रत्यये 'मनुर्नभोऽ-गिरो वति' इति [सि.हे. १-१-२४] सूत्रेण पदत्वाभावात्' नभोवद्' इति चिन्त्यम्, अन्यथा वा यथाज्ञातं समर्थनीयमिति, स्थानाङ्गटीकायां प्रथमाधिकारे नभोवदिति प्रयोगस्य विद्यमानत्वात् सुस्थमिति वा [२][नभस्वदित्युपदेश-रत्नाकरे, न वदन्तं नामेदं, अव्ययमिदं वेदिक्यां च सूत्रमिदं, अग्नेः सम्बन्ध्यपि नभस्वान्-वायुः अनाश्रयत्वात् न घातमाप्नोतीत्यर्थे तु नभस्वदित्येव] ।।५.४।।

---

१. 'शरीरस्थित०' मु० । २. [ ] अन्तर्गतः पाठः मुद्रिते टीप्पणी ।

**रत्न.**—अथ यं देहं त्वं पुष्णासि, तत्रस्थस्यैव तव दुःखं वर्त्तत इति वक्तुमाह —

**'देहे विमुह्य'** इति, व्याख्या-हे आत्मन् ! त्वं देहे विमुह्य -मोहं प्राप्य किमघं कुरुषे ?। अपि तु मा कुर्वित्युपदेशः । त्वं किं न वेत्सि ? इति काकूक्त्या व्याख्यानम्, अपि तु वेत्सि-जानीषे इति सूचाऽपि, किं न वेत्सीत्याह त्वं देहस्थ एव भवस्य-संसारस्य जन्म-जरा-मरणलक्षणस्य दुःखानां जालं-समूहं भजसे, देहाश्रितस्यैव नरकदुःखाद्यनुभवनं, न तु देहमुक्तस्य, एतद् दृष्टान्तेन द्रढयति-हि निश्चितं अग्निर्लोहाश्रितो घनस्य-लोहमयशस्त्रविशेषस्य घातं-प्रहारं सहते क्षमते, नाग्निः केवलो घनघातविषयीकर्तुं शक्यत इत्यर्थः । हे आत्मन! ते-तव च पुनरस्य-अग्नेरनाश्रयत्वे बाधा-पीडा न भवति, किंवत ? - नभस्वद्-आकाशवद्, यथा नभसः अनाश्रयत्वे लत्ताप्रहारादिका परकृता बाधा न भवति तथा तवापि देहस्यानाश्रयत्वे मुक्तिं गतस्य बाधा न भवतीत्यर्थः । 'मनुर्नभोऽङ्गिरो वति' [सि.हे. १-१-२४] इति सूत्रेण पदत्वाभावात्, नभोवदिति न स्यात। यथा आकाशस्यानाश्रयत्वे बाधा न भवति तथा तवापीत्यर्थः।।५.४।।

**[१२१] दुष्टः कर्मविपाकभूपतिवशः कायाह्वयः कर्मकृद्,-**
**बद्ध्वा कर्मगुणैर्हृषीकचषकैः पीतप्रमादासवम् ।**
**कृत्वा नारकचारकापदुचितं त्वां प्राप्य चाशु च्छलं,**
**गन्तेति स्वहिताय संयमभरं तं वाहयाल्पं ददत् ।।५.५।।**

**धनवि.**—अथ शरीरस्य वञ्चकस्वभावत्वेन दुष्टतां दर्शयन्नुपदिशति —

'दुष्ट' इति—**कर्म**णामष्टविधानां नामकर्मणो वा **विपाकः** स एव **भूपतिः** तस्य **वश**-आयत्तः **दुष्टः**-अपावित्र्यादिदोषदूषितः आहाराद्यर्थं हिंसाकारित्वादिदोषदूषितो वा **कायाह्वयः कर्मकृद्**-दासः, त्वां **कर्मगुणैः**-कर्मलक्षणरज्जुभि**र्बद्ध्वा**-नियन्त्र्य, **च** पुनस्त्वां **हृषीकचषकैः**-हृषीकाणि-इन्द्रियाणि तद्रूपाश्चषकाः-मद्यपानपात्राणि तैर्हृषीकषकैः **पीतः**-अत्यादरेण सेवितः **प्रमादः**-पञ्चप्रमादलक्षण **आसवो**-मद्यं येन

स तथा तं **पीतप्रमादासव कृत्वा, नारको**-नरकः स एव **चारकः**-कारागृहं, तस्याऽऽपद्-विपत्तिः, तस्या उचितो-योग्यः स तथा तं **नारक-चारकापदुचितं** कृत्वा, **च** पुनः **छलम्**-आयुःपूर्त्तिलक्षणं मिषं **प्राप्य**-लब्ध्वा **गन्ता**-याताऽस्तीत्यर्थः, **इति**हेतोस्तं बलीवर्दसदृशं कायाह्वयं कर्मकरम्, **अल्पं**-द्विचत्वारिंशदाहारदोषादूषितं लघु कायभाटकप्रायमाहारादि **ददत्**-प्रयच्छन् **स्वहिताय**-परभवे आत्मनो मोक्षलक्षणसुखाय **संयमभरं**-सप्तदशसंयमलक्षणं भारं त्वं **वाहया**[१]**-SS**-जीवितान्तं पारं प्रापयेति, वाहयेत्यत्र वह्धातुः स्वभावतो ण्यन्तत्वाद् वा द्विकर्मकः ।।५.५।।

**रत्न.**–अथ कायं कर्मकरत्वेनोपमयति –

**दुष्टः कर्मविपाकभूपतिवश** इति, व्याख्या-हे आत्मन् ! काय इत्याह्वयो-नाम यस्य सः कायाह्वयः कर्मकृत् कर्मकरः, त्वां नारकचारकाऽऽपदुचितं कृत्वा-निरयगुप्तिगृहविपद्योग्यं कृत्वा, पुनराशु-शीघ्रं छलं प्राप्य गन्ता-गमिष्यतीत्यन्वयः, कर्मकृत् किंलक्षणः? - दुष्टो निर्दयः, पुनः कीदृक? - कर्मणां ज्ञानावरणीयादीनां विपाको-विपचनं, स एव भूपतिः, तस्य वशः-अधीनः, स्वयं दुष्टः अथ च कर्मविपाकराजप्रेरित इत्यर्थः । किं कृत्वा ? - बद्ध्वा, कैः ? - कर्मोण्येव गुणाः-रज्जवस्तैः, अपरोऽपि अपराधी रज्जुभिर्बध्यत इति, त्वां किम्भूतं ? - पीतः प्रमाद एवासवः-सीधुर्मदिराविशेषो येन स तं, कैः ? - हृषीकाणि-इन्द्रियाण्वेव चषकाः-पानपात्राणि, यैः कृत्वा मद्यं पीयते ते चषका इति, अनेन पीतमद्यत्वाद् बद्धुं सुकर इति सूचितं, अपरोऽपि नृपादिष्टः सेवकोऽपराधिनं बद्ध्वा गुप्तौ प्रक्षिप्य यातीति तथा कायः कर्मकृदपि । इतिहेतोः स्वकायकर्मकृतं त्वं वाहय-वञ्चय, किं कुर्वन् ? - ददद्-ददानः, कं? - संयमभरं, किंभूतम्-अल्पं-स्तोकं, बहोर्दाने असमर्थस्त्वं, अत एव स्तोकमपीत्यर्थः। कस्म ? - स्वहिताय, अपरोऽपि नृपसेवको लञ्चाप्रदानेन वञ्च्यते तथा त्वमपि चास्य संयमभररूप-लञ्चाप्रदानेन वञ्चय यथाऽसौ त्वामबद्ध्वा नारकचारकापदुचितं चाकृत्वैव यातीति ।।५.५।।

---

१. वाहय-जीवितान्ते - मु० ।

**[१२२] यतः शुचीन्यप्यशुचीभवन्ति,**
**कृम्याकुलात् काक-शुनादिभक्ष्यात् ।**
**द्राग्भाविनो भस्मतया ततो-ऽऽङ्गान्-**
**मांसादिपिण्डात् स्वहितं गृहाण ।।५.६।।**

**धनवि.**–अथ शरीरस्यासारतां दर्शयन्नुपदिशति –

'यतः' इति–**यतः** शरीराद्-आहाराऽङ्शुकादीनि वस्तूनि **शुचीन्यपि**-पवित्राण्यपि, **अशुची-भवन्ति**-अपवित्रीभवन्ति सजीवनावस्थायां, **कृम्याकुलात्**-कृमिगण्डोलकसंकुलात् निर्जीवनावस्थायां च **काक-शुनादिभक्ष्याद्**-वायस-सारमेयादिभिर्भक्ष्याद्-भक्षणीयाद्, आदिपदात् कङ्क-गृध्रादिभक्ष्याद् **द्राग्**-शीघ्रं **भस्मतया**-[1]रक्षारूपतया **भाविनो**-भविष्यतो **मांसादिपिण्डाद्**, आदिपदाद् रस-ऽसृग्-मांस-मेदादिपिण्डसमूहात् **ततो-ऽङ्गात्**-तस्माच्छरीरात् **स्वहितं**-परभवसुखसाधनं तपःसंयमादि पुण्यं **गृहाण**-स्वायत्तीकुर्वित्यर्थः ।।५.६।।

**रत्न.**–अथाशुचिदेहादन्येऽपि पदार्था अशुचीभवन्ति-इत्यादिदेहदोषानाह –

**यतः शुचीन्यप्यशुचीभवन्ति** इति, व्याख्या-यतः अङ्गात् शुचीनि पवित्राण्यपि वस्तूनि-पायसादीनि अशुचीभवन्ति-अपवित्राणि भवन्ति, यथा घृतशर्कराचूर्णयुक्तस्य भक्षितस्य पायसस्य तत्समय एव वमनदशायां दूरूप-दुर्गन्धितया सर्वजन-जुगुप्सनीयत्वेन त्याज्यत्वं दृश्यत इति । यतः किम्भूतात् ? - कृमिभिराकुलाद्-व्याप्तात्, पुनः किंलक्षणात् ? - काक-शुनादीनां भक्ष्यात्[2], पुनः किं लक्षणात् ? - भवितेति भावि, तस्माद् भाविनः, कया ? - भस्मतया-रक्षात्वेन, कथं ? - द्राक्, मृतानन्तरमित्यर्थः । हे आत्मन् ! ततोऽङ्गात्-तस्माच्छरीरात् त्वं स्वस्य हितं तपःप्रभृति गृहाण, किं. ? - मांसादीना पिण्डः-समुदायस्तस्माद्, आदिशब्देना-ऽस्र-वसा-ऽस्थि-मेदसां ग्रहणम् ।।५.६।।

---

१. 'राजरूपे' सं. । २. ०त्, शोषे भक्ष्यं न स्यात्, पुनः - मु० ।

**[१२३] परोपकारोऽस्ति तपो जपो वा,**
**विनश्वराद् यस्य फलं न देहात् ।**
**स भाटकादल्पदिनाप्तगेह-मृत्,**
**पिण्डमूढः फलमश्नुते किम् ? ।।५.७।।**

**धनवि.**—नन्वनन्तरं 'स्वहितं गृहाण'इत्युक्तम्, अथ च यः शरीरं प्राप्य स्वहितं न गृह्णाति, तस्य किं स्याद् ? इत्याशङ्कायामुपदिशति —

'परोपकार' इति—**यस्य** पुरुषस्य **विनश्वराद्**-विनाशस्वभावाद् **देहात्**-शरीरात् **परोपकारः**-परहितकरणं, **वा**ऽथवा **तपो** द्वादशप्रकारं, वाऽथवा **जपः**-पञ्चपरमेष्ठिनमस्कारादिस्मरणं **फलं**-साध्यार्थो **नास्ति;** स पुरुषो **भाटकात्**-निष्क्रयाद् **अल्पदिनावधिप्राप्त**[1]श्चासौ **गेह**मेव-गृहमेव **मृत्पिंडो**-मृत्तिकास्कन्धस्तत्र **मूढो**-'ममेदं गृहं, मा विनश्यत्वितिधिया मोहं प्राप्तः, **किं फलं ?** - किंनामकं फल**मश्नुते**-प्राप्नोतीत्यर्थः, भावार्थस्तु यथा कश्चिदल्पदिनमर्यादया भाटकेन गृहीते गृहे ममेदं गृहं मा विनश्यत्वितिबुद्ध्या मूढमतिस्तद्गृहं न व्यापारयति स संपूर्णावधौ च परकीये गृहे जाते सति तद्गृहस्य प्राप्तिफलरहितो भवति तथा यः परिमितायुषि शरीरे प्राप्ते ममेदं शरीरं परोपकार-तपःकरणादिना दुर्बलं माऽस्त्वितिबुद्ध्या मूढमतिस्तं शरीरं न व्यापारयति सोऽप्यायुःपूर्त्तौ शरीरनाशे मानुष्यशरीरप्राप्तिफलरहितो भवतीति ।।५.७।।

**रत्न.**—अथ देहात् तपो-जपादिफलमाह —

**'परोपकरोऽस्ति'** इति, व्याख्या-यस्य पुंसो देहात् परोपकारः फलं नास्ति वा पुनस्तपः फलं जपश्च फलं नास्ति, देहस्य त्रीण्येव फलानि सन्तीति सूचितम्, यतः किलक्षणात् ? - विनश्वराद्-विनाशशीलात्, स पुमान् देहात् किं फलमश्नुते ?, अपि तु न किमपि । स किंलक्षणात् ? - भाटकाद्-भाटकोक्तद्रव्यप्रदानादल्पदिनान् यावदाप्तं गेहं, तदेव मृत्पिण्डः-शरीरं तत्र

---

१. 'मूले' दिनाप्त' पदमस्ति, अतः विग्रहे 'दिनैराप्त' इति कर्त्तव्यम् ।

मूढो-मोहग्रस्तः, भाटकगृहं यथा यथा व्यापार्यते तथैव भव्यं, अन्यथा भाटकद्रव्यमुपविशति अर्थः कश्चिन्न सिद्ध्यतीति । देहस्या-ऽशन-पान-वस्त्रादिदानं भाटकं, तस्य परोपकारादि फलं न गृह्यते तदा वृथैव भाटकदानमिति दृष्टान्तसाम्यं, गेहमपि मृत्पिण्डमयं भवतीति ।।५.७।।

**[१२४] मृत्पिण्डरूपेण विनश्वरेण,**
**जुगुप्सनीयेन गदा-ऽऽलयेन ।**
**देहेन चेदात्महितं सुसाधं,**
**धर्मान्न किं तद् यतसेऽत्र ? मूढ ! ।।५.८।।**

**धनवि.**–अथ देहममतामोचनद्वारोपसंहाराय देहस्यासारतां देहजन्यसुकृताचरणफलस्य च सारतां दर्शयन्नुपदिशति –

'मृत्पिण्ड' इति–हे अज्ञानिन् ! **चेद्**-यदि **मृत्पिण्डरूपेण**-मृत्तिकास्कन्धस्वभावेन **विनश्वरेण**-विनाशशीलेन **जुगुप्सनीयेन**-अतिनिन्दास्पदेन **गदालयेन**-रोगगृहेण **देहेन**-शरीरेण कारणभूतेन, **आत्महितं**-स्वस्य पारभविकसुखसाधनं **सुसाधं**-सुखसाध्यं **धर्मात्**-तपश्चरण-संयमपालनलक्षणाद् भवति, **तत्**-तदाऽत्र-धर्मे **किं न यतसे ?** - किं नोद्यमं कुरुषे इति ।।५.८।।

---

इति श्रीतपोगच्छनायकश्री**मुनिसुन्दर**सूरिनिर्मितस्य षोडशशाखस्या**ध्यात्मकल्पद्रुमस्य** महोपाध्यायश्री**कल्याणविजय**गणिशिष्योपाध्यायश्री**धनविजयगणि**विरचितायां देहममतामोचननाम्नी पञ्चमी पदपद्धतिः ।।५।।

---

**रत्न.**–पुनस्तदेव द्रढयति –

**'मृत्पिण्डरूपेण'** इति, व्याख्या-हे आत्मन् ! चेद्-यदि देहेन निमित्तभूतेन धर्मात्-सुखकारणाद् आत्महितं सुसाधं-सुखसाध्यं वर्त्तते, देहेन कीदृशेन ? - मृत्पिण्डरूपेण-मृत्पिण्डसदृशेन, अत एव विनाशशीलेन, पुनः किंलक्षणेन ? - जुगुप्सनीयेन-जुगुप्सायोग्येन, पुनः किंलक्षणेन ? - गदानां-रोगाणामालयो-गृहं तेन, तत्-तर्हि अत्र-आत्महिते हे मूढ ! किं न यतसे ? - यत्नं न करोषि?

अपि तु यत्नं कुरुष्वेति, अथवाऽत्र धर्मे किं न यतसे इत्यपि व्याख्येयम् ।।५.८।।

**[१२४]** श्रीशान्तिचन्द्रवरवाचकदुग्धसिन्धु-
लब्धप्रतिष्ठवरवाचक**रत्नचन्द्रः** ।
अध्यात्मकल्पफलदस्य चकार टीकां,
तत्राधिकार इति पञ्चम आप पूर्त्तिम् ।।५।।

इति देहममत्वमोचनाधिकारः पञ्चमः ।।



# ६. विषयनिग्रहाधिकारः

**[१२५] अत्यल्प-कल्पितसुखाय किमिन्द्रियार्थैस्-**
**त्वं मुह्यसि प्रतिपदं प्रचुरप्रमादः ? ।**
**एते क्षिपन्ति गहने भवभीमकक्षे,**
**जंतून् न यत्र सुलभा शिवमार्गदृष्टिः ।।६.१।।**

**धनवि.**—नन्वनन्तरद्वारे देहममतामोचनमुपदिष्टं, तच्च विषयनिग्रहमन्तरेण कथं स्याद् ? इत्याशङ्कायां विषयनिग्रहद्वारमभिधित्सुराह —

**अथ विषयाः प्रमादाश्च** - अथ विषया इति, ननु विषयसहचारिणः के निग्राह्या ? - इत्याशङ्कायामाह —

**प्रमादाश्चे**ति, अथ विषयाः-पञ्चेन्द्रियविषयाः इष्टानिष्टशब्दादयः, च पुनः प्रमादा-मद्यादयः पञ्च, अज्ञानादयोऽष्टौ वा, निग्रहविषयीकार्याः संवलिताः[1] प्रतिपाद्यन्ते इति, अत्र प्रमादस्य पञ्चप्रकारता —

**[१२६]** "मज्जं विसय कसाया, निद्दा विकहा य पंचमी भणिया ।
एए पंच पमाया जीवं पाडंति संसारे ।।[ ]।।"

इत्यादिना भावनीया, अष्टप्रकारता च -

**[१२७]** "पमाओ य मुणिंदेहिं, भणिओ अट्ठभेयओ ।
अन्नाणं संसओ चेव, मिच्छानाणं तहेव य ।।[ ]।।

**[१२८]** रागो दोसो मइब्भंसो, धम्मम्मि य अणायरो ।
जोगाणं दुप्पणिहाणं, अट्ठहा वज्जियव्वओ" ।।[ ]।।

इत्यादिना भावनीया ।।

---

१. 'मिलिताः' इति प्रतौ टीप्पणी ।

ननु विषयसेवने को दोष ? इत्याशङ्कायामाह –

'अल्प' इति–हे आत्मन् ! **त्वं प्रचुरप्रमादः** सन्-बहुप्रमादसहितः सन्, **अत्यल्पकल्पितसुखाय**-अतिशयेनाल्पमत्यल्पं अत्यल्पं च तत् कल्पितं च-सुखं सुखमितिबुद्ध्यारोपितं तच्च सांसारिकं स्त्रीसंभोगादिलक्षणं सुखं तत् तथा तस्मै, **प्रतिपदं**-स्थाने स्थाने **इन्द्रियार्थैः**-शब्दादिविषयैः, **किं मुह्यसि ?** - किं मूढो भवसीत्यर्थः; यतः कारणाद् **एते** इन्द्रियार्थाः **जंतून्**-प्राणिनो **गहने**-दुःखावगाह्ये **भवभीमकक्षे**-संसाररूपभयङ्करकान्तारे **क्षिपन्ति**-बलात्कारेण प्रवेशयन्तीत्यर्थः, **यत्र** भवभीमकक्षे **शिवमार्गदृष्टिः**-मोक्षमार्गदर्शनं **सुलभा**-सुप्रापा **न** अस्तीति ।।६.१।।

**रत्न.**–अथ षष्ठोऽधिकारो विवरीतुं प्रारभ्यते । तत्र विषयाः प्रमादाश्च, तत्र प्रथममिन्द्रियार्थेषु मोहत्यागविषये उपदिशति –

**अत्यल्पकल्पितसुखाय**...इति, व्याख्या-हे आत्मन् ! त्वमिन्द्रियार्थैः-शब्द-रूप-गन्ध-रस-स्पर्शैः किं मुह्यसि ?, काकूक्त्या व्याख्यानं, अपि तु मा मुह्य इत्युपदेशोऽपि, कस्मै ? - अत्यल्पं कल्पितम्-औपचारिकं न तु तात्त्विकं, यत् सुखम् तस्मै, कथं ? - प्रतिपदं-स्थानं स्थानं प्रति अथवा वस्तु वस्तु प्रति,

**[१२९]** 'पदं स्थाने विभक्त्यन्ते, शब्दे वाक्यैङ्क वस्तुनोः ।
त्राणे पादे पादचिह्ने ..... [ ] इत्यनेकार्थकोष-

[२.२२५-ब, २.२२६-अ] वचनात्,

किंलक्षणस्त्वं ? - प्रचुरः प्रमादो यस्य सः, एते इन्द्रियार्थाः भवः-संसारः स एव भीमो-भयावहः कक्षः-शुष्कवनं, तस्मिन् क्षिपन्ति । किंलक्षणे ? गहने - दुष्प्रवेशार्हे । कान् ? - जन्तून्-प्राणिनः, कुत्र ? - तत्र, तत्रेत्यध्याहार्यं, यत्रेति पदस्य सत्त्वात्, यत्र शिवस्य-मोक्षस्य मार्गदृष्टिः-मार्गदर्शनं न सुलभा-न सुप्रापा । अपरस्मिन्नपि गहने कक्षे शिवस्य-निरुपद्रवस्य मार्गस्य दृष्टिः सुलभा न भवतीति ।।६.१।।

**[१३०] आपातरम्ये परिणामदुःखे,**
**सुखे कथं वैषयिके रतोऽसि ? ।**
**जडोऽपि कार्यं रचयन् हितार्थी,**
**करोति विद्वन् ! यदुदर्कतर्कम् ।।६.२।।**

**धनवि.**—नन्वमृतलवकल्पमपि वैषयिकं सुखमनन्तरोक्तोपदेशानुसारेण कथं हेयम् ? इत्याशङ्कायामुपदिशति —

'आपातरम्ये' इति-हे **विद्वन् ! आपातरम्ये**-दर्शनमात्ररमणीये **परिणामदुःखे**-परिणत्या दुःखदायके **वैषयिके**-विषयजनिते **सुखे कथं**-केन प्रकारेण त्वं **रतः**-आसक्तः, **असि ?, यद्**-यस्मात् कारणात् **जडोऽपि**-मूर्खोऽपि हितं-सुखोपायः, तस्यार्थः-प्रयोजनं यस्य स **हितार्थी** सन् **कार्यं**-व्यापारादिकं घटादिकं वा **रचयन्**-कुर्वन् घटयन् **उदर्कतर्कं** 'उदर्कस्तद्भवं फलं'इति [ ] वचनादुदर्कः-कार्यकरणोत्तरकाले तत्कार्यजन्यफलं, तस्य तर्क-'एतत् कार्यकरणात् ममोत्तरकाले किं फलं भविष्यति'इति विचारः, तं **करोति**-विदधातीत्यर्थः, भावार्थस्तु मूर्खोऽपि कार्यं कुर्वन् चेतसा चिन्तयति-इदं मया क्रियमाणं कार्यमग्रे सुन्दरपरिणाम-सुन्दरपरिणामं वेति, त्वं तु पण्डितः सन् भुक्तिकालसुन्दरे परिणतिकालासुन्दरे किंपाकफलोपमे वैषयिके सुखे कथं रतोऽसि-इति ? ।।६.२।।

**रत्न.**—अथैहिकसुखस्याऽऽपातरम्यत्व-परिणामदुःखत्वे दर्शयन्नाह —

**आपातरम्ये.** इति, व्याख्या-हे विद्वन् ! - हे आत्मन् ! विषयसम्बन्धिनि वैषयिके सुखे किं रतोऽसि ? - रागी जातोऽसि, अपितु मा रज्य । किंलक्षण ? - आपातः-तत्कालस्तस्मिन् रम्ये, दृश्यमानमनोहरे इत्यर्थः, पुन किंलक्षणे ? - परिणामे-परिपाके दुःखदायि'इति दुःखं तस्मिन्, यद्-यस्मात् कारणाज्जडोऽपि-मूर्खोऽपि कार्यं स्वयं कुर्वन्नुत्तरकालजं फलं उदर्कः, तस्य तर्को-विचारः तं करोति, ममेदं कार्यं कुर्वतः सतोऽग्रे किं फलं भविष्यति ? इति विचारयतीत्यर्थः। विद्वन् ! इति साभिप्रायं सम्बोधनं, तेन त्वं विद्वानसि, वैषयिकं सुखं भुज्जान उदर्क्कतर्क्कं किं न करोषीति भावः ।।६.२।।

**[१३१] यदिन्द्रियार्थैरिह शर्म बिन्दवद्,**
**यदर्णवत् स्वः-शिवगं परत्र च ।**
**तयोर्मिथः सप्रतिपक्षता कृतिन् !,**
**विशेषदृष्ट्याऽन्यतरद् गृहाण तत् ।।६.३।।**

**धनवि.**—नन्वनन्तरोक्तप्रकारेण यदि वैषयिकसुखस्याऽऽपातरमणीयता भविष्यति, तदा सुखत्वेन समानधर्मस्य स्वर्गापवर्गसुखस्यापि तथैव रमणीयता भविष्यति-इत्याशङ्कायामुपदिशति —

'यदिन्द्रियार्थैः' इति—**इह** लोके **यच्छर्म**-यद् वैषयिकं सुखं **बिंदुवद्** वर्त्तते, बिन्दुः-जलकणः, तद्वदाचरतीति[1] बिन्दवत् इति सांसारिकशर्मविशेषणं, **च** पुनः **परत्र**-परलोके यत् **स्वः-शिवगं**-स्वर्गा-ऽपवर्गगतमिन्द्रियजानिन्द्रियजं शर्म **अर्णवद्** वर्तते, अर्णवः-समुद्रः, तद्वदाचरति,इति **अर्णवदि**ति स्वर्गापवर्गगतशर्मविशेषणं, **तयोः**-सांसारिकसुख-स्वर्गापवर्गसुखयो**र्मिथः**-परस्परं **सप्रतिपक्षता**-'एकस्य सत्त्वे-ऽपरस्यासत्त्वम्'इतिरूपा वैरिताऽस्तीत्यन्वयः; **हे कृतिन् !** - हे पण्डित ! त्वं **विशेषदृष्ट्या**-इदमस्मात् समीचीनमिदमस्मादसमीचीनमिति विवेकदृशा, **अन्यतरद्**-ऐहिक-पारलौकिकसुखयोर्मध्ये एकं यत् सुन्दरं **तद् गृहाण**-स्वायत्तं कुर्वित्यर्थः ।।६.३।।

**रत्न.**—अथैहिकसुखस्य तुच्छत्वेन(त्वं) दर्शयन्नाह —

**यदिन्द्रियार्थै**रिति, व्याख्या-हे आत्मन् ! इह लोके यत्, इन्द्रियार्थैः शब्द-रुप-गन्ध-रस-स्पर्शैः शर्म सुखं वर्त्तते, तद् बिन्दुरिव वर्तते, च पुनर् इन्द्रियार्थेभ्यो विरत्याः करणेनेति-गम्यम्, परत्र परलोके स्वः-स्वर्गः, शिवं-मोक्षः, तयोर्गच्छतीति स्वः-शिवगं, यच्छर्म तदर्णव इव-समुद्र इवाचरतीति अर्णवति अर्णववद् वर्त्तते, आचारार्थे शतृप्रत्यये शर्मविशेषणं, तयोः शर्मणोर्मिथः-परस्परं सप्रतिपक्षता प्रतिपक्षत्वं रिपुत्वमस्ति, यदैहिकं सुखं तदा पारत्रिकं न, यदा पारत्रिकं तदा चैहिकं नेति

१. 'अत्र विग्रहस्पष्टतायै' - 'बिन्दवति, बिन्दवति इति बिन्दवत्' एतत् पदकदम्बकम् उपादेयम्-तथा 'अर्णवति इति अर्णवद्' इत्यपि ज्ञेयम्० सं. ।

सप्रतिपक्षता । हे कृतिन् ! - हे पण्डित ! तत्कारणात् तयोर्मध्ये विशेषदृष्ट्या-विशेषदर्शनेन विशेषज्ञानेन वा विशेषं दृष्ट्वा ज्ञात्वा चेत्यर्थः अन्यतरद्-एकं वरीयः सुखं गृहाणेति ।।६.३।।

**[१३२] भुङ्क्ते कथं नारक-तिर्यगादि-**
**दुःखानि देहीत्यवधेहि शास्त्रैः ।**
**निवर्त्तते ते विषयेषु तृष्णा,**
**बिभेषि पापप्रचयाच्च येन ।।६.४।।**

**धनवि.**–अथ विषयतृष्णानिवृत्त्यर्थं शास्त्रश्रवणैरवहितो भवेत्युपदिशति – 'भुङ्क्ते' इति–**देही**-प्राणी **नारक-तिर्यगादिदुःखानि**-नरकगति-तिर्यग्गति-प्रमुखदुःखानि, आदिपदान्मनुष्यगति-देवगतिदुःखानि, **कथं ?** - केन प्रकारेण ? केन प्राक्कृतकर्मणा ? वा **भुङ्क्ते**-अनुभवति, अत्र चतुर्गतिदुःखस्वरूपप्रतिपादिका इमा गाथाः –

**[१३३]** कक्खडदाहं [१]सामलि [२]असिवण वेयरणिं[३] पहरणसएहिं ।
जा जायणा उ पावंति नारया तं अहम्मफलं ।।[ ]।।

**[१३४]** तिरिया कसंऽकुसा-ऽऽरानिवाय-वह-बंध-मारणसयाइं ।
न वि इहयं पावंता परत्थ जइ नियमिआ हुंता ।।[ ]।।

**[१३५]** चारग-निरोह-वह-बंध-रोग-धणहरण-मरण-वसणाइं ।
मणसंतावो अजसो विग्गोवणया य माणुस्से ।।[ ]।।

**[१३६]** तं सुरविमाणविभवं चिंतिय चवणं च देवलोगाओ ।
अइबलियं चिय जं न वि फुट्टइ [४]सयसक्करं हिययं ।।[ ]।।

**[१३७]** ईसा-विसाय-मय-कोह-माण-लोभेहिं एवमाईहिं ।
देवा वि समभिभूया तेसिं कत्तो सुहं नाम ? ।।[ ]।। इत्युपदेशमालायाम्,

१. शाल्मलिवृक्षपत्रैः अङ्गच्छेदनं । २. खड्गसदृशपत्रवने भ्रमणं । ३. तप्तत्रपु सदृशजला नदी, तस्या जलस्य पानं । ४. शतखण्डं - १-४ प्रतौ टीप्पणी - सं. ।

इत्यमुना प्रकारेणानन्तरोक्तम् । **शास्त्रैः**-लक्षणया शास्त्रवचनैः शास्त्रश्रवणैर्वा, **अवधेहि**-सम्यग् जानीहीत्यर्थः, **येन** नारक-तिर्यगादिदुःखानुभव-कारणसम्यग्ज्ञानेन, **ते**-तव **विषयेषु**-दुर्गतिकारणेषु शब्दादिषु **तृष्णा**-गार्ध्यं **निवर्त्तते**-विरमतीत्यर्थः, **च** पुनर्येन सम्यग्ज्ञानेन **पापप्रचयात्**-पापपुष्टिकरणाद् **बिभेषि**-त्वं भयमधिगच्छसीति ।।६.४।।

**रत्न.**–अथ विशेषदर्शनमेवाह –

**भुङ्क्ते कथम्** इति., व्याख्या-हे आत्मन् ! त्वं शास्त्रैः-शास्त्राध्ययनैरित्यर्थः इत्यधेहि-अवधानं कुरु, सावधानो भवेत्यर्थः । इतीति किं ? - देही-देहवान् नारक-तिर्यगादिदुःखानि कथं भुङ्क्ते ? - महता कष्टेन भुङ्क्ते इत्यर्थः, **आदि**शब्देनातिपापप्रकृत्युदयवन्मनुष्यदुःखानामपि ग्रहणम्, येन-शास्त्रैः कृत्वा अवधानेन विषयेषु पञ्चसु तृष्णा-लौल्यं निवर्त्तते, च पुनः, येन पापस्य प्रचयात्-समूहाद् बिभेषि-भयं प्राप्नोषीति ।।६.४।।

**[१३८] गर्भवासनरकादिवेदनाः,**
**पश्यतोऽनवरतं श्रुतेक्षणैः ।**
**नो कषायविषयेषु मानसं,**
**श्लिष्यते बुध ! विचिन्तयेति ताः ।।६.५।।**

**धनवि.**–अनन्तरोक्तमेवार्थं प्रकारान्तरेण दर्शयन्नुपदिशति –

'गर्भवास' इति–**अनवरतं**-निरन्तरं, **श्रुतेक्षणैः**-शास्त्ररूपलोचनैर्**गर्भवासनरकादि-वेदनाः पश्यतो**-विलोकयतः, **तव मानसं**-चित्तं, **कषाय-विषयेषु नो श्लिष्यते**-नैवा--ऽऽलिङ्गतीत्यर्थः[1] । अत्र गर्भवासवेदनास्वरूपसूचिके इमे गाथे–

**[१३९]** सूईहिं अग्गिवण्णाहिं, संभिन्नस्स निरंतरं ।
जारिसं गोयमा ! दुक्खं, गब्भे अट्ठगुणं तओ[2] ।।[ ]।।

---

१. ०वालिम्पती० मु० । २. 'भवे' मु० ।

[१४०] गब्भाओ नीहरंतस्स, जोणि[1]जंतनिपीलणे ।

सयसाहस्सिअं दुक्खं, कोडाकोडिगुणं पि वा ।।[ ]।। इति

नरकवेदनाश्च दशविधाः पूर्वोक्ताः, तिर्यगादिवेदनाश्च "तिरिया कसंकुसारा इत्यादिनाऽनन्तरोक्ताः ज्ञेया इति; नन्वत्र विषयाधिकारे कषायग्रहणं किमर्थमिति चेत् ?, न, कषायाणामपि विषयाणामिव प्रमादत्वसूचनार्थं विषय-कषाययोः समानफलत्वदर्शनार्थं वा ग्रहणादिति; **हे बुध !** - हे पण्डित ! **इति** कारणात्, ता गर्भवास-नरकादिवेदनाः, त्वं [2]चेतसि **विचिन्तय**-सम्यक्परिभावनेन स्मरण-विषयीकुर्वित्यर्थः ।।६.५।।

**रत्न.**–पुनरपि विशेषदर्शनमेव दृढयति –

**'गर्भवासनरकादिवेदना'** इति., व्याख्या-हे आत्मन् ! श्रुतानि-शास्त्राण्येवेक्षणानि-लोचनानि अथवा श्रुतानामीक्षणानि-विलोकनानि तैर्गर्भवास-नरकादिवेदनाः प्रति पश्यतः, तव कषायाः-क्रोध-मान-माया-लोभाश्चत्वारो, विषयाः-शब्दादयः पञ्च च, तेषु मानसं-मनो न श्लिष्यते-न श्लेषं प्राप्नोति, न लगतीत्यर्थः, ताश्च श्रुतेक्षणैरेव दृश्याः, न चर्मचक्षुषा, तेन श्रुतेक्षणैरिति । हे बुध ! - हे विद्वन्! ततस्ता गर्भवास-नरकादिवेदनाः प्रति विचिन्तय-विचारय, आदिशब्देनातीव पापप्रचयवन्मनुष्य-तिर्यक्-संमूर्छनजमनुज-तिर्यग्वेदनानामपि ग्रहणम् ।।६.५।।

**[१४१] वध्यस्य चौरस्य यथा पशोर्वा,**
**संप्राप्यमाणस्य पदं वधस्य ।**
**शनैः शनैरेति मृतिः समीपं,**
**तथाऽखिलस्येति कथं प्रमादः ? ।।६.६।।**

**धनवि.**–अथ मरणभयं दर्शयन् प्रमादपरिहारमुपदिशति –

'वध्यस्य' इति–**यथा**-यद्वद् **वध्यस्य**-वधयोग्यस्य, **चौरस्य वा**ऽथवा **पशोः**-

१. जंतम्मि पीलणा मु० । २. त्वं चिन्तय - मु० ।

अजस्य **वधस्य**-हिंसायाः **पदं**-स्थानं **संप्राप्यमाणस्य**-नीयमानस्य **शनैः शनैः**-मन्दं मन्दं मृतिः-मरणं **समीपम्**-आसन्नम्, **एति**-आगच्छति **तथा**-तद्वद् **अखिलस्य**-सकललोकस्य मृतिः समीपमेतीति हेतोः **कथं ?** - केन प्रकारेण **प्रमादो**-विषयसेवाभिलाषलक्षणस्तवास्तीति ।।६.६।।

**रत्न.**—अथ मृत्योर्भयदर्शनेन प्रमादपरित्यागे प्रतिबोधयन्नाह —

**वध्यस्य चौरस्य** इति, व्याख्या-यथेति दृष्टान्तोपन्यासे, वध्यस्य-वधार्हस्य चौरस्य वा-अथवा पशोः-तिरश्चोऽजस्य वा शनैः शनैर्मृतिः-मरणं समीपमेति-आगच्छति । किं क्रियमाणस्य ? - सम्प्राप्यमाणस्य, किं प्रति ? - पदं (वधस्य), स्थानं प्रति, तथेति दृष्टान्तोपनंये, अखिलस्य देहिनो मृतिः शनैः शनैः समीपमेति । यो वर्ष-मास-पक्ष-दिन-प्रहर-मुहूर्त्त-घटिकादिकः कालो याति, सा आयुषस्त्रुटिरेव भवतीत्यर्थः। इतिहेतोः, हे आत्मन ! त्वया प्रमादो-मद्यादिकः पञ्चधा कथं क्रियत?, अपि तु न कार्य एवेति ।।६.६।।

**[१४२] बिभेषि जन्तो ! यदि दुःखराशेस्,**
**तदिन्द्रियार्थेषु रतिं कृथा मा ।**
**तदुद्भवं नश्यति शर्म यद् द्राग्,**
**नाशे च तस्य ध्रुवमेव दुःखम् ।।६.७।।**

**धनवि.**—अथ सुखसिषाधयिषया सेवितेषु विषयेषु दुःखकारणत्वं दर्शयन्नुपदिशति-

'बिभेषि' इति-हे **जन्तो !** हे प्राणिन् ! **यदि**-चेत्, त्वं **दुःखराशेः**-दुःखसमूहाद् **बिभेषि**-भयमाप्नोषि, **तत्**-तदा **इन्द्रियार्थेषु**-विषयेषु **रतिम्**-आसक्तिं **मा कृथा**-मा कार्षीः, **यद्**-यस्मात् कारणात् **तदुद्भवं**-विषयरतिसंभवं **शर्म**-सुखं **द्राक्**-शीघ्रं **नश्यति**-क्षणादसद्भवतीत्यर्थः, **च** पुनस् **तस्य**-विषयासक्तिसमुत्पन्नसुखस्य **नाशे**-क्षये **ध्रुवं**-निश्चितं विषयसेवनजनितदुष्कृत्यजन्यं **दुःखमेवेह** परत्र भवतीति ।।६.७।।

**रत्न.**—अथ सुखस्य द्राग् नाशेन[१] जीवं प्रतिबोधयन्नाह —

१. नाशस्योपदेशेन जी० - मु० ।

**बिभेषि जन्तो** इति., व्याख्या-हे जन्तो ! - हे प्राणिन् ! यदि त्वं दुःखराशेर्बिभेषि-भयमाप्नोषि, तत्-तर्हि, इन्द्रियार्थेषु-विषयेषु शब्दादिषु, रतिं-रागं मा कृथाः-मा कार्षीः, तेभ्यः इन्द्रियार्थेभ्य उद्भवम्-उत्पन्नं शर्म-सुखं यद्-यस्मात् कारणात्, द्राक्-शीघ्रं नश्यति, च पुनस्तस्य शर्मणो नाशे जाते सति, ध्रुवं-चिरस्थायि दुःखमेव वर्त्तते, यथा आलोकनाशेऽन्धकारं ध्रुवमेवेति, यथा आलोका-ऽन्धकारयोः प्रतिपक्षता तथा सुख-दुःखयोरपीति भावः ।।६.७।।

**[१४३] मृतः किमु ? प्रेतपतिर्दुरामया,**
**गताः क्षयं किं ?, नरकाश्च मुद्रिताः ? ।**
**ध्रुवाः किमायुर्धन-देह-बन्धवः ?,**
**सकौतुको यद् विषयैर्विमुह्यसि ।।६.८।।**

**धनवि.**–अथ ध्रुवभाविदुःखकारणान्युपदिशति –

'मृतः' इति–**किमु**'इति काकूक्तिप्रश्ने **प्रेतपतिः**-यमो **मृतो**-मरणं प्राप्तोऽस्ति ?, **च** पुनर्, **दुरामयाः**-दुष्टरोगाः, किं काकूक्तिप्रश्ने क्षयं-विनाशं **गताः ?, च** पुनर्**नरकाः** सप्तापि, किं प्रश्ने **मुद्रिता**-राजमुद्रया पिहिताः ?, अत्र किंशब्दो देहलीप्रदीपन्यायेन डमरुकमणिन्यायेन वोभयत्रापि योज्यः, **च** पुनर् **आयुर्-धन-देह-बन्धवो** जीवित-द्रव्य-शरीर-स्वजनाः, किं प्रश्ने, **ध्रुवाः**-शाश्वताः ?, **यद्**-यस्मात् कारणात् **सकौतुकः**-अदृष्टकल्याण इव साश्चर्यो, **विषयैः**-इन्द्रियार्थैर्**विमुह्यसि**-विशेषेण मोहं यासीति ।।६.८।।

**रत्न.**–अथ प्रकारान्तरेण जीवस्य सुख प्रतिबन्धकान् निर्दिशति-**मृतः किमु प्रेत. पतिः** इति, व्याख्या-हे आत्मन् ! यत्, त्वं विषयैः सकौतुको विमुह्यसि विमोहं प्राप्नोषि, यतः –

**[१४४]** कोरकं तु .....।
'कौतुकं नर्मणीच्छायामुत्सवे कुतुके मुदि ।। ३.२७ ।।

**[१४५]** पारम्पर्यागतख्यात-मङ्गलोद्वाहसूत्रयोः ।
गीतादौ भोगकाले च.....।। ३.२८ ।। इत्यनेकार्थवचनात्

इच्छायां मुदि च कौतुकशब्दोऽत्र व्याख्यातः, ।

तत् किमु ? - किं प्रेतपतिः-यमो मृतः ?, अजरामृतत्वात् तस्य, तं मृतं मा चिन्तेयेत्यर्थः । तथा दुः-दृष्टा आमया रोगाः किं क्षयं गताः ?, शरीरिणः प्रत्यनेकरोगाणां कोटिसद्भावात् । यत उक्तम् –

**[१४६]** रोगाणां कोडीओ हवंति पञ्चेव लक्ख अडसट्ठी ।
नवनवइ सहस्साइं छच्च सया चेव पणयाला ।।[ ]।।

**[१४७]** खासे १ सासे २ जरे ३ दाहे ४ कुच्छिसूले ५ भगंदरे ६ ।
अरसा ७ अजीरए ८ दीही[1] ९, मुहसूले १० अरोयए ११ ।।[ ]।।

**[१४८]** अच्छिवेयण १२ कंडू य १३, कण्णबाधा १४ जलोयरे १५ ।
कुट्ठे १६ एमाइया रोगा, पीलयन्ति सरीरिणं ।।[ ]।। इति-

तेषामपि क्षयं मा विचिन्तयेति । च पुनर्नरकाः सप्तसङ्ख्याकाः किं मुद्रिता ? दत्तद्वारकाः[2] कृताः ?, तेषामपि मुद्रितुमशक्यत्वात्, तानुद्घाटितानेव चिन्तयेति, तथा आयु-र्धन-देह-बन्धवो ध्रुवा-नित्याः सन्ति ?, तेऽपि कदाचन[3] नित्या न भवन्तीत्यर्थः ।।६.८।।

**[१४९] विमोह्यसे किं विषयप्रमादैर्-**
**भ्रमात् सुखस्यायतिदुःखराशेः ? ।**
**तद्गर्धमुक्तस्य हि यत् सुखं तद्,**
**गतोपमं चायतिमुक्तिदं च[4] ।।६.९।।**

**धनवि.**–अथ विषयनिग्रहोपदेशमुपसंहरन् विषयसुखस्यायतिदुःखकारणत्व-मुपदिशति –

१. दिट्ठी मु० । २. द्वाराः मु० । ३. कदाचिन्नि - मु० । ४. वा. मु० ।

'विमोह्यसे' इति–हे आत्मन् ! **आयतिदुःखा**नां यो **राशिः** तत्स्वरूपस्य सुखस्य **भ्रमाद्**-दुःखत्ववति सुखत्वप्रकारकज्ञानाद् **विषयप्रमादैः** कर्तृभिः, त्वं **किं विमोह्यस** ? - विशेषेण मोहविषयीक्रियसे ?, भावार्थस्त्वायतिदुःखराशिस्वरूपस्य विषयप्रमाद-सेवनजनितसुखस्य सुखतया ज्ञानं भ्रमः, 'अतद्वति तत्प्रकारकं ज्ञानं भ्रम-इति [ ] वचनात्; अत्र भ्रमता च –

**[१५०]** 'जह कच्छुल्लो कच्छुं कंडुअमाणो दुहं मुणइ सुक्खं ।
मोहाउरा मणुस्सा तह कामदुहं सुहं बिंति' ।। ।।

इत्याद्युप**देशमाला[ ]गाथया** भावनीयेति, **हि** यतः कारणात् **तद्गर्धमुक्तस्य**-विषयप्रमादसुखाभिलाषरहितस्य, **यत् सुखं** भवति **तत् सुखं गतोपमं**-निरुपमं, **चः** पुनर् **आयतिमुक्तिदम्**-उत्तरकाले मोक्षसुखदायकं भवतीति । अत्र निरुपमता

**[१५१]** 'नैवास्ति राजराजस्य तत् सुखं नैव देवराजस्य ।
यत् सुखमिहैब साधोर्लोकव्यापाररहितस्य ।।' इत्यादि-

**प्रशमरतिप्रकरणादि** [ ] भावना भावनीयेति ।।६.९।।

---

इति तपागच्छनायकश्री**मुनिसुन्दर**सूरिनिर्मितस्य तत्पट्टपरंपराप्रभावक० महोपाध्याय**श्रीकल्याण**विजयगणिशिष्योपाध्याय श्री**धनविजयगणि**विनिर्मितायां षोडशशाखस्याध्यात्मकल्पद्रुम-स्याधिरोहिणीटीकायां विषयनिग्रहनाम्नी षष्ठी पदपद्धतिः ।।६।।

---

**रत्न.**–अथ सुखस्यायतौ दुःखत्वेन निरूपयन् जीवं प्रतिबोधयितुमाह –

**विमोह्यसे किम्** इति, व्याख्या-हे आत्मन् ! सुखस्य भ्रमाद्-भ्रान्तेः, विषयाश्च प्रमादाश्च विषय-प्रमादास्तैस्त्वं किं विमोह्यसे ? - विमोहं प्राप्यसे इति ?, काक्वाख्यानं, यतः किंलक्षणस्य ? - आयतौ-उत्तरकाले दुःखानां राशिस्तस्य 'अतद्वति तत्प्रकारकं ज्ञानं भ्रमः' [ ], तेन वैषयिकं सुखं सर्वमपि दुःखं वर्त्तते, तत्र सुखज्ञानं भ्रमः, तस्मादिति, तत्-तस्मात् कारणात् गर्द्धेन-तृष्णया

मुक्तस्य हि निश्चितं यत् सुखं वर्त्तते, तद् गता उपमा यस्य तद् गतोपमं वर्त्तते, च पुनरायतौ-उत्तरकाले मुक्तिं-सिद्धिं ददातीति मुक्तिदं वर्त्तते, पूर्वसुखवदायतौ दुःखस्वरूपं नास्तीत्यर्थः, अथवा तस्य सुखस्य गर्द्धो-लौल्यं, तेन मुक्तस्येति व्याख्येयं, विषयैः प्रमादैरिति वा पाठः ।।६.९।।

**[१५२]** श्री**शान्तिचन्द्र**वरवाचकदुग्धसिन्धु-
लब्धप्रतिष्ठवरवाचक**रत्नचन्द्रः** ।
अध्यात्म-कल्पफलदस्य चकार वृत्तिं,
षष्ठोधिकार इति तत्र गतः सदर्थः ।।६।।

इति विषयावशतोपदेशाख्यः षष्ठोऽधिकारः ।।



# ७. कषायनिग्रहाधिकारः

**[१५२] रे जीव ! सेहिथ सहिष्यसि च व्यथास्तास्-**
**त्वं नारकादिषु पराभवभूः कषायैः ।**
**मुग्धोदितैः कुवचनादिभिरप्यतः किं,**
**क्रोधान्निहंसि निजपुण्यधनं दुरापम् ? ।।७.१।।**

**धनवि.**—अनन्तरद्वारे विषयनिग्रहणमुक्तं, तच्च कषायनिग्रहे एव भवतीति कषाय-निग्रहद्वारमभिधित्सुराह —

**अथ कषायाः** — अथ कषाया इति, अथ कषाया निग्रहविषयीकार्याः प्रतिपाद्यन्ते इत्यर्थः । ते च कषाया मूलतः क्रोध-मान-माया-लोभाख्याश्चत्वारो भवन्ति, ते च प्रत्येकं संज्वलना-ऽप्रत्याख्यानावरणा-प्रत्याख्याना-ऽनन्तानुबन्धिभेदात् षोडश भवन्ति, ते च हास्य-रत्य-ऽरति-भय-शोक-जुगुप्सा-स्त्रीवेद-पुरुषवेद-नपुंसकवेदाख्यनव-नोकषायसहिताः पञ्चविंशतिसङ्ख्या भवन्ति । तत्र कषायेषु मुख्यः स्वपरोपघातकत्वाच्च दुष्टः क्रोधो भवतीति पूर्वं क्रोधनिग्रहमुपदिशति-

'रे जीव !' इति—**रे**-तिरस्कारेण संबोधने, **रे जीव !** - रे प्राणिन्, **त्वं कषायैः**-कषायसेवनैर्हेतुभूतै**र्नारकादि**भवेषु **पराभवभूः**-पराभवस्थानं सन् **ताः प्रज्ञापना-जीवाभिगमा**दिशास्त्रप्रसिद्धा **व्यथा**-दशविधा वेदनाः पूर्वभवे सेहिथ-सहनविषयी-कृतवानित्यर्थः, **च** पुनरग्रेतनभवे कषायैस्त्वं ता व्यथाः सहिष्यसि;, **अतः** कारणात् **मुग्धोदितैः**-निर्विवेकिजनप्रतिपादितैः **कुवचनादिभिः**,-'एकार-तुङ्कारप्रभृति-गालिवाक्यैरपि **क्रोधात्**-प्रथमकषायोदयाद् **दुरापं**-दुर्लभं **निजपुण्यधनं**-स्वकीय-सुकृतलक्षणं धनं, **किं**-किमर्थं **निहंसि**-विनाशयसीत्यर्थः ? ।।७.१।।

**रत्न.**—अथ कषाया-ऽऽद्यवशतोपदेशविषये सप्तमोऽधिकारः किञ्चिद् विव्रियत। तत्र प्रथमं कषायाणां फलमाह —

**रे जीव ! सेहिथ...**इति., व्याख्या-रे इति सम्बोधने, रे जीव ! त्वं कषायैः कारणैर्नारकादिषु आदिशब्दात् तिर्यग्-मनुष्येष्वपि, ता वक्तुमशक्या इत्यर्थः,

व्यथाः प्रति सेहिथ सोढवान्, च पुनरागामिभवेऽपि सहिष्यसि, त्वं कथम्भूतः? - पराभवानां भूः-पदं स्थानं, अतः-अस्मात् कारणात् मुग्धोदितैः-मुग्धजनभाषितैः कुवचनादिभिरपि, निजस्य-स्वस्य पुण्यमेव धनं पुण्यधनं किं निहंसि ?, अपि तु मा जहि, कस्मात् ? - क्रोधाद्, यतः किंलक्षणं [पुण्यधनं] ? - दुरापम्, अतस्त्वं क्रोधादिभिः कषायैस्तपोदानादिपुण्यं मा हार्षीरित्युपदेशः ।।७.१।।

**[१५४] पराभिभूतौ यदि मानमुक्तिस्-**
**ततस्तपोऽखण्डमतः शिवं च ।**
**मानादृतिर्दुर्वचनादिभिश्चेत्**
**तपःक्षयात् तन्नरकादिदुःखम् ।।७.२।।**

**[१५५] वैरादि चात्रेति विचार्य लाभा-**
**ऽलाभौ कृतिन्ना-ऽऽभवसंभविन्याम् ।**
**तपोऽथवा मानमवाभिभूता-**
**विहास्ति नूनं हि गतिर्द्विधैव ।।७.३।। [युग्मम्]**

**धनवि.**—क्रोधानन्तरमवसरप्राप्तो मानो भवतीत्यर्थतो युग्मरूपेण पद्यद्वयेन माननिग्रहमुपदिशति —

'पराभिभूतौ' इति—**यदि**-चेत् **पराभिभूतौ**-दुर्वचनादिपराभवे जायमाने **मानमुक्तिः**-मानत्यागो भवति, तदा **ततो**-मानत्यागात् **तपो** द्वादशभेदम्, **अखण्डं**-खण्डना[१]रहितं भवति, **च** पुनरतः-अखण्डतपसः **शिवं**-मोक्षो भवति; **चेद्**-यदि **दुर्वचनादिभि**र्गालि-तिरस्कारादिभि**र्मानादृतिः**-अभिमानादरो भवति, तदा **तपःक्षयात्**-तपःखण्डना-**न्नारकादिदुःखं** भवतीति ।।७.२।।

**धनवि.**—'वैरादि चात्रेति' इति च पुनरत्र-इहभवे **वैरादि**-विरोधप्रमुखम्, आदिपदात् परस्परं प्रहारादिकं भवतीति हे **कृतिन्** ! - हे पण्डित ! **इति**-अमुना प्रकारेण

१. 'खण्डर०' मु० ।

**लाभा-ऽलाभौ**-आय-व्ययौ **विचार्य**-पौर्वापर्यालोचनया परामृश्य, **आभवसंभविन्यां**-भवं यावत् संभावनाविषयीकृतायाम्, **अभिभूतौ**-पराभूतौ सत्यां, **तपः**-स्वाचरितं तपःकर्म अथवा **मानं**-अहङ्कारम्, **अव**-रक्षेत्यर्थः, **हि** यतः कारणाद् **इह**-संसारे **नूनं**-निश्चितं पराभिभूतौ जायमानायां, **गतिः**-मार्गः प्रकारो वा **द्विधैव**-द्विप्रकारैव तपोरक्षणं मानरक्षणं वाऽस्तीति, भावार्थस्तु मानत्यागे आभवसंभविवचनमात्रपराभवो भवति, मानादरे च परभवसंभवि-नरकादिपराभवो भविष्यतीति लाभालाभरूपं मार्गद्वयं विचार्य यदिष्टं तद् गृहाणेति ।।७.३।।

**रत्न.**—अथ मानामुक्तेर्मानमुक्तेश्च पृथक् फले आह —

**पराभिभूतौ** इति, **वैरादि चात्रेति च,** युग्म., व्याख्या-हे आत्मन् ! परेषामभिभूतौ सत्यां, यदि मानस्य-अहङ्कारस्य मुक्तिः-मोचनं वर्त्तते, ततो मानमुक्तेः तपः अखण्डं वर्त्तते, अतोऽखण्डात् तपसः शिवं-मोक्षो भविष्यति, चेति विशेषे पक्षान्तरे वा, दुर्वचनादिभिर्हेतुभिर्मानादृते-र्मानादरणात्-मानाङ्गीकारजनितात् तपःक्षयात् तत्, **निरयावलिकोपाङ्गोक्तं** नरकादिदुःखं भविष्यति, च पुनरत्र भवे वैरादिर्वर्धते, आदिशब्दाद् वैरजन्यद्रव्यनाश-मरणदुःखयोर्ग्रहणम्, हे कृतिन् ! - हे पण्डित ! त्वं लाभा-ऽलाभौ मानमुक्तेर्लाभं मानादृतेश्चालाभं विचार्याभिभूतौ क्रियमाणायां तपः प्रति अव-रक्ष अथवा मानमव, अभिभूतौ किंभूतायां ? - भवं मर्यादीकृत्य-आभवम्, आभवं सम्भवो अस्त्यस्याः सा आभवसम्भविनी तस्यां, परभवे अनुगामिनी नास्तीति सूचनं, नरकादिदुःखं अनेकभवानुबन्धीति सूचनं च, इह पक्षे गतिरूपायो, नूनं-निश्चितं हि यस्मात् कारणाद् द्विधैवास्ति, एवकारः अन्यव्यवच्छेदार्थः, तेन तृतीया गतिर्नास्तीति सूचितं। अर्थतो युग्मव्याख्यानम् ।।७.३।।

**[१५६] श्रुत्वाऽऽक्रोशान् यो मुदा पूरितः स्याल्-**
**लोष्टाद्यैर्यश्चाहतो रोमहर्षी ।**
**यः प्राणान्तेऽप्यन्यदोषं न पश्यत्-**
**येष श्रेयो द्राक् लभेतैव योगी ।।७.४।।**

**धनवि.**—दुर्वचनादिपराभवसहने शिवं भवतीत्युपदिशति —

'श्रुत्वा' इति—**यः** पुमान् **आक्रोशान्**-निष्ठुरवचनानि **श्रुत्वा**-आकर्ण्य **मुदा**-हर्षेण **पूरितो**-व्याप्तः **स्यात्, च** पुनर्यो **लोष्टाद्यैः**-पाषाणखण्डप्रभृतिभिः, **आहतः**-आहननविषयीकृतो **रोमहर्षी**-रोमाञ्चितः स्यात्, **च** पुनर्यः **प्राणान्तेऽपि**-जीवितनाशेऽ**प्यन्यदोषं**-परापवादं न पश्यति-न विलोकयति, उपलक्षणत्वान्न वक्ति च, स **एष योगी**-मुनिः **श्रेयो**-मोक्षं द्राक् **लभेतैव**-निश्चयेन प्राप्नुयादित्यर्थः, अत्रैवकारोऽत्यन्तायोगं व्यवच्छिनत्तीति ।।७.४।।

**रत्न.**—अथ कषायपरित्यागे मुक्तिफलमाह —

**श्रुत्वाऽऽक्रोशान्**-इति., व्याख्या-यो देही आक्रोशान् मुग्धा-ऽनार्यजनकृतान्, श्रुत्वा मुदा-हर्षेण पूरितो-व्याप्तः स्यात्, यैः शब्दैरेष मामाक्रोशति, तच्छब्दानां प्रवृत्तिनिमित्तमहमनन्तशो बभूव, तर्हि कः कषाय इति ?, च पुनर्यो लोष्टाद्यैराद्यशब्दाद् यष्टि-लगुडादिग्रहणं, आहतः-ताडितः सन् [1]लोमहर्षो-रोमोत्कम्पो अस्यास्तीति **लोमहर्षी** स्याद्, वरं मम कर्मक्षये सहायी मिलित इति **गजसुकुमाला**द्यर्षिवद्, यः प्राणान्तेऽप्यन्येषां दोषं न पश्यति, अहं चेद् दोषवान्, तदा न्येषां दोषदर्शने का ईहेति विमृश्य । एष इति-एतद्गुणवान् योगी मनो-वचन-काययोगवान् द्राक्-शीघ्रमेवेति-निश्चये श्रेयो-मोक्षं लभेत-प्राप्नुयात् ।।७.४।।

**[१५७] को गुणस्-तव कदा च कषायैर्निर्ममे ?**
**भजसि नित्यमिमान् यत् ।**
**किं न पश्यसि च दोषममीषां,**
**तापमत्र नरकं च परत्र ? ।।७.५।।**

**धनवि.**—अथ सामान्येन कषायाणां निग्रहमुपदिशति —

---

१. टीकापाठभेदः ।

'को गुणस्' इति–हे आत्मन् ! **कषायैः**-क्रोधादिभिः **तव कः**-किंनामा, च पुनः **कदा**-कस्मिन् काले **गुणः**-उपकारो **निर्ममे**-चक्रे, **यद्**-यस्माद्, **इमान्**-कषायान् **नित्यं**-निरन्तरं **भजसि**-सेवसे ?, **च** पुन**रमीषां**-कषायाणाम्, **अत्र**-इह लोके **तापं**-चित्तपरितापं पश्चात्तापलक्षणं, **च** पुनः प**रत्र**-परलोके **नरक**गतिप्राप्तिलक्षणं **दोषं**-वैगुण्यं **किं न पश्यसि**-न विलोकयसीत्यर्थः ? ।।७.५।।

**रत्न.**–अथ भङ्ग्या कषायेषु गुणाभावं दर्शयन्नाह –

**को गुणस्तव...**इति., व्याख्या-हे आत्मन् ! च पुनरहं त्वां पृच्छामि त्वं कथयेति शेषः, तव कषायैः-क्रोध-मान-माया-लोभैः को[1] गुणो निर्ममे-निर्मितः ! यद्-यस्मात् कारणात् इमान् कषायान् नित्यं भजसि-सेवसे, नित्यं सेवा तु तेषामेव क्रियते यैः कदापि कश्चिद् गुणः कृतो भवति, अकृतगुणानां सेवाऽजागलस्तमुखप्रक्षेप इवेति सूचनं, अथ गुणोऽपि कृतो मा भवतु यदि दोषः कृतो न स्यात्, ततो गुणेऽसत्यपि कषायदोषमाह-हे आत्मन् ! अमीषां कषायाणां दोषं किं न पश्यसि ?, अपि तु पश्य, तमाह-अत्र-इह लोके तापं-तपनं शरीरे उष्णीभवनं, चित्तसन्तापं वा परत्र-प्रेत्य नरकं-नरकगतिमिति ।।७.५।।

**[१५८] यत् कषायजनितं तव सौख्यं,**
**यत् कषायपरिहाणिभवं च ।**
**तद् विशेषमथवैतदुदर्कं,**
**संविभाव्य भज धीर ! विशिष्टम् ।।७.६।।**

**धनवि.**–अथ कषायसेवना-ऽसेवनयोः फलविशेषविभावनामाह –

'यत् कषाय...' इति–हे आत्मन् ! **तव कषायजनितं**-स्वापराधिषु क्रोधादिकरणादिनोत्पादितं यत् **सौख्यं, कषायाणां परिहाणिः**-क्षयः तदुद्भूतं च यत् सौख्यं भवति, **तद्-विशेषं**-तयोः-कषायजनितसुख-कषायक्षयजनितसुखयोर्विशेषं-न्यूनाधिकगुणतालक्षणम्, **अथवा एतदुदर्कं**-कषायकरण-कषायाऽकरणयोरुत्तरकाल-

१. लोभैः कदा को० मु० ।

प्रादुर्भूतं कुगति-सुगतिलक्षणं फलं-साध्यं **संविभाव्य**-सम्यग् पर्यालोच्य, हे **धीर! विशिष्टं**-वरिष्ठमनयोर्मध्ये, **भज**-श्रयेत्यर्थः ।।७.६।।

**रत्न.**—अथ कषायकरणा-ऽकरणे सुखविचाराय प्रेरयितुमाह —

**यत् कषाय-जनितम्...**इति., व्याख्या-हे आत्मन् ! यत् कषायैर्जनितं तव सौख्यं वर्तते, च पुनर्यत् कषायाणां परिहाणिः-परित्यागः, तस्या भवम्-उत्पन्नं सुखं वर्त्तते, तयोर्विशेषम्, अथवैतयोः-कषाय-कषायपरिहाण्योरुदर्क्कम्-उत्तरकालभावि फलं संविभाव्य-सम्यग् विचार्य, तयोर्मध्ये हे धीर ! विशिष्टं-वरिष्ठं भजसेवस्व ।।७.६।।

**[१५९] सुखेन साध्या तपसां प्रवृत्तिर्-**
**यथा तथा नैव नु मानमुक्तिः ।**
**आद्या न दत्तेऽपि शिवं परा तु,**
**निदर्शनाद् बाहुबलेः प्रदत्ते ।।७.७।।**

**धनवि.**—अथ सामान्यतः कषायनिग्रहमुपदिश्य पूर्वोपदिष्टं विशेषतः पुनर्मान-निग्रहमुपदिशति —

'सुखेन' इति—**यथा**-येन प्रकारेण **तपसां**-अनशनादीनां **प्रवृत्तिः**-आचरणा **सुखेन**-अप्रयासेन **साध्या, तथा**-तेन प्रकारेण **मानमुक्तिः**-अहङ्कारनिवृत्तिः सुखेन साध्या **नैव** भवति; यतः कारणाद् **आद्या**-तपसां प्रवृत्तिः केवला **शिवं**-मोक्षं **न दत्तेऽपि**-न ददात्यपीत्यर्थः, अत्रापिशब्देन तपसां प्रवृत्तिर्मानमुक्तिसहिता शिवं दत्ते, मानसहिता च शिवं न दत्ते इति सूच्यते, **तु** पुनः **परा**-मानमुक्ति**र्बाहुबलिनिदर्शनाद्**-बाहुबलिदृष्टान्ताच्छिवं **प्रदत्ते**-निश्चयेन ददातीत्यर्थः —

**[१६०]** "धम्मो मएण हुंतो तो न वि सीउण्हवायविज्झडिओ ।
संवच्छरमणसीओ बाहुबली तह किलिस्संतो" ।।[उप.२५]।।

इति गाथार्थभावनया बाहुबलिदृष्टान्तः स्पष्ट एवेति ।।७.७।।

**रत्न.**—अथ तपःप्रवृत्तेरपि मानमुक्तिः कर्तुं दुःशकेति दर्शयन्नाह —

**सुखेन साध्या...**इति, **सम्यग् विचार्येति** च युग्मव्याख्या-हे आत्मन् ! यथा तपसां प्रवृत्तिः-प्रवर्त्तनं सुखेन साध्या वर्त्तते तथा मानस्य मुक्तिः-मोचनं न सुखसाध्या, आद्या-प्रथमोद द्दिष्टा तपसां प्रवृत्तिः शिवं-मोक्षं न दत्तेऽपि-न ददात्यपि, मानमुक्तिं विना केवलेत्यपिशब्दार्थः, नुरिति विशेषे, परा अन्या-मानमुक्तिः शिवं प्रदत्ते, कस्माद् ? - निदर्शनाद्-दृष्टान्तात्, कस्य ? - बाहुबलेः-भरतानुजस्य, सत्यपि तपसि बाहुबलिना मानमुक्तिर्न कृता, तावत् केवलं नोत्पन्नमेव, यदा मानमुक्तिः कृता, तदा तत्समय एव केवलमुत्पन्नमिति ।।७.७।।

**[१६१] सम्यग् विचार्येति विहाय मानं,**
**रक्षन् दुरापाणि तपांसि यत्नात् ।**
**मुदा मनीषी सहतेऽभिभूतीः,**
**शूरः क्षमायामपि नीचजाताः ।।७.८।।**

**धनवि.**—अनन्तरोक्तार्थमेव विशदयन्नितिकर्त्तव्यतामादिशति —

'सम्यग्' इति-**इत्य**नन्तरोपदिष्टं, **सम्यग्**-यथास्वरूपतया **विचार्य मानम्**-अहङ्कारं **विहाय**-त्यक्त्वा **दुरापाणि**-भवकोटिशतैरपि दुष्प्रापाणि **तपांसि**-तपःकर्माणि पूर्वमाचरितानि **यत्नाद्**-उद्यमाद् **रक्षन्**-पालयन् **क्षमायां**-क्षान्तौ **शूरो**-वीरो **मनीषी**-पण्डितः साधु**र्नीचजाता अपि**-अधमजनजनिता अपि **अभिभूतीः**-पराभवान् **मुदा**-मम प्राक्कृतकर्मनिर्जराऽवाञ्छिता सहसा स्वत एव जायत इति हर्षेण **सहते**-क्षमत इत्यर्थः ।।७.८।।

**रत्न.**—मनीषी-पण्डितः इति सम्यग्विचार्य मानं विहाय-त्यक्त्वा मुदा-हर्षेणाभिभूतीः-अभिभवान् सहते-क्षमते, किं कुर्वन् ? - रक्षन्, कानि प्रति ?

- तपांसि प्रति, किंलक्षणानि ? - दुरापाणि-दुष्प्रापाणि, कस्माद् ? - यत्नात्, मनीषी किंलक्षणः ? - शूरो-वीरः, कस्यां ? - क्षमायां-क्षान्तौ, अभिभूतीः किंलक्षणाः ? - नीचेभ्यः-पामरेभ्यो जाताः, कथमपि बलवत्पुरुषेभ्यो जातास्तु सोढव्या एव, परं नीचजनकृताभिभूतिसहने केवलं क्षमैव हेतुरिति तेनात्रापिशब्दो योज्यः, अर्थतो युग्मम् [1] ।।७.८।।

**[१६२] पराभिभूत्याऽल्पिकयाऽपि कुप्य-**
**स्यधैरपीमां प्रतिकर्तुमिच्छन् ।**
**न वेत्सि तिर्यग्-नरकादिकेषु,**
**तास्तैरनन्तास्त्वतुला भवित्रीः ।।७.९।।**

**धनवि.**—अथ क्रोध-मानयोर्द्वेषत्वेन साम्यात् मानस्य क्रोधसहचारित्वाच्च कथञ्चिदभेदात् क्रमविपर्ययेऽपि क्रोधनिग्रहमुपदिशति —

'पराभूत्या' इति-हे आत्मन ! त्वम्, **अल्पिकयाऽपि**-अतिस्तोकयाऽपि **पराभिभूत्या**-परकृतदुर्वचनादिपराभवेन **कुप्यसि**-कोपं गच्छसि, **तु** पुनर् **अधैरपि**-वध-बन्धनादिपापकर्मभिर्, **अपीमां** पराभिभूतिं **प्रतिकर्तुं**-पराभवकर्तॄन् प्रति प्रतिपराभवं कर्तु**मिच्छन्**-वाञ्छन्, **तैः** पापैस्, **तिर्यग्-नरकादिषु** भवेषु, **अनन्ता**-दुरन्ता **अतुला**-असदृशा **भवित्रीः**-अग्रेभवनशीलास्, **ताः** पराभिभूतीः परमाधार्मिकादिकृतास्त्वं **न वेत्सि** ? - न जानासीति । भावार्थस्तु —

**[१६३]** "वह-मारण-अब्भक्खाणदाण-परधणविलोवणाईणं ।
सव्वजहण्णो उदओ दसगुणिओ इक्कसि कयाणं ।।[उप.१७७]।।

**[१६४]** तिव्वयरे उ पओसे सयगुणिओ सहस्सकोडिगुणो ।
कोडाकोडिगुणो वा हुज्ज विवागो बहुतरो वा ।।[उप.१७८]।।

इत्यादिना स्पष्ट एवेति ।।७.९।।

---

१. युग्मव्याख्या - मु० ।

**रत्न.**—अथ पराभिभूतिसहनमेव भङ्ग्योपदिशति —

**पराभिभूत्या** इति., व्याख्या-हे आत्मन् ! त्वमल्पिकयाऽपि-अतीवाल्पयाऽपि परेषामभिभूत्या अभिभवेन कुप्यसि-कोपं करोषि, अभिभवकारकपुरुषायेति गम्यं, किं कुर्वन् ? - इच्छन्-वाञ्छन्, किं कर्तुं ? - प्रतिकर्तुं-प्रतिक्रियां कर्तुं, केषाम् ? - अघानां-पापानां नाशं वाञ्छन्निति भावः, तुरिति विशेषे, परमार्थेनाभिभूतीर्भवित्रीः भाविनीर्न वेत्सि-न जानासि, कैः ? - तैर्नवीनकृतैरघैः, कियतीः ? - अनन्ता-अन्तरहिताः, पुनः कीदृशीः-अतुला-उपमारहिताः, केषु ?-नरकादिकेषु **आदि**-शब्दान्मनुष्य-देवदुर्गत्योरपि ग्रहणम् ।।७.९।।

**[१६५] धत्से कृतिन् ! यद्यपकारकेषु,**
**क्रोधं[1] ततो धेह्यरिषट्क एव ।**
**अथोपकारिष्वपि तद्भवार्त्ति-**
**कृत्कर्महृन्मित्रबहिर्द्विषत्सु ।।७.१०।।**

**धनवि.**—ननु पराभवकर्तृषु क्रोध-मानौ कथं परिहरणीयौ इत्याशङ्का-यामुपदिशति —

'धत्से' इति-हे **कृतिन् !** - हे पण्डित ! **यदि**-चेत् त्वम्, **अपकारकेषु**-अहितकारकेषु च **क्रोधं**-कोपं, तत्सहचरितत्वात् **पाठान्तरेण वा**-अथवा **मानम्**-अहङ्कारं, **धत्से**-धरसि, **ततो** दुर्गतिदायकत्वेनापकारिषु क्रोध-मानकरणप्राप्तेः, **अरिषट्के एव** क्रोधं मानं वा **धेहि**-धरेत्यन्वयः, तत्रारिषट्कं काम-क्रोध-लोभ-मान-मद-हर्षलक्षणं, तत्र १ परपरिगृहीतास्वनूढासु ऊढासु वा स्त्रीषु दुरभिसंधिः कामः. २ परस्यात्मनो वाऽपायमविचार्य कोपकरणं क्रोधः. ३ दानार्हेषु स्वधनाप्रदानं निष्कारणं परधनग्रहणं च लोभः. ४ दुरभिनिवेशामोक्षो युक्तोक्ताग्रहणं वा मानः. ५ कुल-मदादिभिरहङ्कारकरणं मदः. ६ निर्निमित्तं परदुःखोत्पादनेन स्वस्य द्यूत-पापद्ध्यार्द्यनर्थसंश्रयेण वा मनःप्रमोदो हर्षः । एतेषामेव चतुर्गतिक्लेशकारणत्वेना-पकारकत्वात्; **अथे**ति पक्षान्तरे य**द्युपकारिष्वपि**-हितकारकेष्वपि क्रोधम्, **अथवा**

१. 'मानं' इति टीका-पाठान्तरः,

**मानं धत्से तत्**-तदा भवः-संसारः, तस्यार्त्तिः-पीडा तां कुर्वन्तीति **भवार्त्तिकृन्ति** सांसारिक-दुःखदायकत्वात्, तानि च तानि **कर्माणि** च-ज्ञानावरणादीनि, तानि हरन्ति-अपनयन्तीति **भवार्त्तिकृत्कर्महृन्ति** तानि च तानि परीषहोपसर्गकरणादिना कर्मक्षय-लक्षणोपकारकत्वेन **मित्राणि** च-सुहृदो **भवार्त्तिकृत्कर्महृन्मित्राणि,** तान्येव **बहिर्द्विषदो**-बाह्यवैरिणो **भवार्त्तिकृत्कर्महृन्मित्र-बहिर्द्विषन्तः,** तेषु **भवार्त्तिकृत्कर्म-हृन्मित्रबहिर्द्विषत्सु** क्रोधं मानं वा, धेहीति; भावार्थस्तु इह लोके बाह्यवैरिणः खलु प्राक्कृतकर्मनिर्जरा-कारणत्वेन परलोकेऽनन्तसुखप्राप्ति-साहाय्यकारकत्वादुपकारिणो भवन्ति यथा **गजसुकुमाला-ऽवन्तिसुकुमालादीनां सोमिल-शृगाल्यादय** इति ।।७.१०।।

**रत्न.**—अथ तव यदि कोपस्तदा वैरिष्वेव युक्त इत्यात्मानमुपदिशति —

**धत्से कृतिन्** इति, व्याख्या-हे कृतिन् ! - हे पण्डित ! त्वं यदि अपकारकेषु-तवापकारिषु वैरष्वित्यर्थः, क्रोधं **पाठान्तरेण वा मानं** धत्से-वहसि ततः-तर्ह्यरीणां षट्के एव-क्रोध-मान-माय-लोभ-राग-द्वेषलक्षणे एव धेहि धत्स्व-वहस्व, एवकारः अन्ययोग-व्यवच्छेदार्थः, तेन नान्येषु, अथेति पक्षान्तरे, यदि त्वमुपकारिष्वपि-उपकारकेषु मित्रेष्वित्यर्थः क्रोधं मानं वा धत्से तत्-तर्हि भवे-संसारे अर्त्तिं-पीडां कुर्वन्तीति भवार्त्तिकृन्ति, एवंविधानि यानि कर्माणि तानि प्रहरन्तीति भवार्त्तिकृत्कर्महृन्ति, एवंविधानि मित्राणि तान्येव बहिर्द्विषन्तो-बाह्यवैरिणस्तेषु धेहि । अथ भावार्थ उच्यते-गजसुकुमालादीनां बाह्यद्विषन्तः सोमिलादयस्तत्त्वतो मित्राणि सन्ति, कर्मक्षये साहाय्यदानात्, ततः सोमिलादय उपकारिणः, तेन यद्युपकारिषु क्रोधः कर्त्तव्यस्तदा सोमिलादिषु तत्त्वतो मित्रेषु बाह्यतो वैरिषु कर्त्तव्यः, अथापकारिषु कर्त्तव्यस्तदाऽन्तर्वैरिषु क्रोधादिषु कर्त्तव्य इत्येवं ज्ञात्वा गजसुकुमालादिभिः सोमिलादिभ्यो न कुपितमिति ।।७.१०।।

**[१६६] अधीत्यनुष्ठान-तपः-शमाद्यान्,**
**धर्मान् विचित्रान् विदधत् समायान् ।**
**न लप्स्यसे तत्फलमात्मदेह-**
**क्लेशाधिकं तांश्च भवान्तरेषु ।।७.११।।**

**धनवि.**–अथ क्रमप्राप्तं च मायानिग्रहमुपदिशति –

'अधीति' इति-अधीतिश्च-अध्ययनम्, अनुष्ठानं च-षडावश्यकादिक्रिया, तपश्च द्वादशभेदं, शमश्च-उपशमः, ते आद्या येषां ते तथा, आदिपदाद् दम-दानादिपरिग्रहः तान्-**अधीत्यनुष्ठान-तपःशमाद्यान्, विचित्रान्**-अनेकप्रकारान्, **समायान्**-उत्कट-परवञ्चनात्मकपरिणाम-लक्षणमायया सहितान्, **धर्मान्**-धर्मकार्याणि **विदधत्**-कुर्वन् **आत्मदेहक्लेशाधिकं**-निजशरीरश्रमातिरिक्तं **तत्फलं**-तेषां धर्माणां फलं **न लप्स्यते**-नाप्स्यसे, **च** पुनर्**भवान्तरेषु**-परभवेषु **तान्,** अध्ययनादीन् धर्मान् मायां च कुर्वन्न लप्स्यसे; नन्वेवं सति **महाबल**भवापेक्षया मायाकारिणा **मल्लिनाथेन** तीर्थकरर्द्धिः कथं प्राप्तेति चेत् ? न, अत्रोपदेशे उत्कटमायाकारिणः केवलं जनरञ्जनादि-वञ्चनबुद्ध्या धर्मकर्मणि मायाकारिणश्च धर्मफलवैफल्यदर्शनात् ।।७.११।।

**रत्न.**–अथ क्रोध-मान-मुक्तिविषये उपदिश्य मायाविषये उपदिशति –

**अधीत्यनुष्ठान-शमाद्यान्**-इति, व्याख्या-हे आत्मन् ! त्वमधीतिः-अध्ययनं, अनुष्ठानं-योगोपधान-सामायिक-पौषधादिकरणलक्षणं, तपः-षष्ठादि, शमः-उपशमः, ते आद्या येषां ते तान्, आद्यशब्देन वैयावृत्त्यप्रभृतिग्रहणं, धर्मान् विदधत्-कुर्वन्, तेषां धर्माणां फलं, तत्फलं न लप्स्यसे, न प्राप्स्यसि, किंभूतान्, विचित्रान् नानाविधान्, यतः लक्षणान् किं ? - सह मायया कुसृत्या पररञ्जनात्मिकया वर्त्तन्ते ये, तान् फलं किंलक्षणं ? - आत्मनः-स्वस्य देहः, तस्य क्लेशः, तस्मादधिकं, देहक्लेशः कृतस्तदेव फलं नान्यत् फलमित्यर्थः, केषु ? - भवान्तरेषु-अन्यजन्मसु, च पुनस्तान्[1]-अधीत्यनुष्ठानतपःशमाद्यान् धर्मान् न लप्स्यसे, स(ह)मायया कृतत्वाद् बोधेर्दुर्लभत्वाच्च, अत्रापि भवान्तरेष्विति योज्यम् ।।७.११।।

**[१६७] सुखाय धत्से यदि लोभमात्मनो-**
**ज्ञानादिरत्नत्रितये विधेहि तत् ।**
**दुःखाय चेदत्र परत्र वा कृतिन् !,**
**परिग्रहे तद् बहिरान्तरेऽपि च ।।७.१२।।**

१. ०स्तदधी० मु० ।

**धनवि.**—अथ क्रमप्राप्तं लोभनिग्रहमुपदिशति —

'सुखाय' इति - हे आत्मन् ! **यदि**-चेद्-**आत्मनः**-स्वस्य **सुखाय लोभं धत्से**-धरसि, तत्-तदा **ज्ञानादिरत्नत्रितये**-ज्ञान-दर्शन-चारित्ररूपरत्नत्रये लोभं **विधेही**ति, अत्र **"जातौ जातौ यदुत्कृष्टं, तद् रत्नमभिधीयते"** इति [ ] वचनादुष्कृष्टे ज्ञान-दर्शन-चारित्रे यत्नं विधेहीत्यर्थः, हे **अकृतिन् !** - अपण्डित ! **च** पुनश्चेद् ! यदि **अत्र**-इह लोके च पुनः **परत्र**-परलोके स्वस्य **दुःखाय** लोभं धत्से, **तत्**-तदा **बहिः**-बाह्यपरिग्रहे धन-धान्यादिनवविधे, **च** पुनर् **आन्तरेऽपि परिग्रहे** कषायलक्षणे लोभं विधेहीति ।।७.१२।।

**रत्न.**—अथ लोभमुक्तिमाश्रित्योपदिशति —

**सुखाय धत्से** इति, व्याख्या-हे आत्मन ! यदि त्वमात्मनः-स्वस्य हेतवे लोभं धत्से दधासि तत्-तर्हि ज्ञानमादौ यस्य तद् ज्ञानादि, तच्च रत्नत्रितयं च ज्ञानादिरत्नत्रितयं, तस्मिन् ज्ञान-दर्शन-चारित्रलक्षणे इत्यर्थः विधेहि-कुरु, रत्नोपमानेन निधानीकर्तुं योग्यत्वमुपदिष्टं, अन्यस्मिन्नसारे वस्तुनि लोभः कृतः, तत्र किं न कृतस्तदा, किं च यदा च लोभः क्रियते तदा रत्नवस्तुन्येव क्रियते इति सूचितं, तेन साभिप्रायमुपमानं । हे कृतिन्[1] ! - हे पण्डित ! चेद्-यदि अत्र-इह लोके दुःखाय-दुःखनिमित्तं लोभं धत्से, तत्-तर्हि परिग्रहे लोभं विधेहि, किंलक्षणे ? - बहिर्भवे-धनधान्यादिनवविधे, च पुनः कस्मिन ? - आन्तरे क्रोध-मान-माया-लोभादिके विधेहि, एवं द्विविधेऽपीत्यर्थः ।।७.१२।।

**[१६८] करोषि यत् प्रेत्यहिताय किंचित्**
**कदाचिदल्पं सुकृतं कथञ्चित् ।**
**मा जीहरस्तन्मद-मत्सरादैर्-**
**विना च तन्मा नरकातिथिर्भूः ।।७.१३।।**

---

१. धनवि.टीकायां अकृतिन् पदं, तेन हे अपण्डित० साक्षात् सङ्केतः । रत्नवि.टीकायां हे कृतिन् 'इत्यस्ति' 'अकृतिन्' इति लाक्षणिकोऽर्थ ज्ञेयः ।

**धनवि.**–अथ कषायविशेषमद-मत्सरादिनिग्रहमुपदिशति –

'करोषि' इति **कदाचिद्**-अनन्तोत्सर्प्पिण्यवसर्पिण्यादिकालातिक्रमे **कथञ्चित्**-कर्मणां लाघवे जाते त्रयोदशकाष्ठिकेभ्यो लब्धावकाशतया **किञ्चिद्**-दानशीलाद्यन्यतरद् **अल्पं**-स्वल्पमात्रं **यत् सुकृतं**-पुण्यं, **प्रेत्यहिताय**-परलोकसुखाय **करोषि, तत् सुकृतं मदश्च**-जात्यादिभिरवलिप्तचित्तत्तावृत्तिः, **मत्सरश्च**-परसंपदसहनं, तौ **आद्यौ**-प्रथमौ येषां ते तथा **तैर्मद-मत्सराद्यैः,** आद्यपदात् स्वश्लाघा-परनिन्दा-नवनोकषायादिभि**र्मा जीहरः**-मा हारय इत्यर्थः, **च** पुनस्, **तत्** सुकृतं **विना नरकातिथिः**-नरकगतिप्राघूर्णको **मा भूः**-मा भवेत्यर्थः, अत्र कथञ्चित् कष्टेन त्रयोदशकाष्ठिकेभ्यो लब्धावकाशतयेत्युक्तम्, ते च त्रयोदश काष्ठिकाः – [आवश्यकनिर्युक्तौ]

**[१६९]** आलस्स-मोहऽवन्ना थंभा कोहा पमायकिविणत्तं ।
भय-सोगो अन्नाणं वक्खेवकुऊहला रमणा ।। [८४१]।।

तत्र १. आलस्यवान् साधुसमीपं न गच्छति न शृणोति वा २. मोहाद् गृहकर्त्तव्यतामूढो वा ३. अवज्ञातो वा 'किमेते जानन्ति' इति वा ४. स्तम्भाद् वा जात्याद्यभिमानात् ५. क्रोधाद् वा साधुदर्शनादेव कुप्यति ६. प्रमादाद् वा मद्यादिलक्षणात् ७. कृपणत्वाद् दातव्यं किञ्चित् स्यादिति ८. भयाद् वा नरकादिभयं वर्णयन्तीति ९. शोकाद् वा इष्टवियोगजात् १०. अज्ञानाद् वा कुदृष्टिमोहितः ११. व्याक्षेपाद् वा बहुकर्त्तव्यतामूढः १२. कुतूहलान्नटादिविषयात् १३. रमणाद् वा लावकादिखेड्डेनेति १४. गाथार्थः, इत्या**वश्यकवृत्तौ सामायिकप्राप्त्य**धिकाराद् ज्ञेया इति ।।७.१३।।

**रत्न.**–अथ जीवं प्रति सुकृतरक्षणविषये उपदिशति –

**करोषि यत्प्रेत्यहिताय**..इति., व्याख्या-हे आत्मन् ! यत् त्वं कदाचित् काले किंचिद्-दानादि तपोऽनुष्ठानादि वा अल्पं सुकृतं प्रेत्यहिताय-परभवे हितार्थं करोषि, कथं ? - कथञ्चित् महता कष्टेन तत् सुकृतं मद-मत्सराद्यैरभिमान-परसम्पत्त्यसहनाद्यैः प्रयोजकैर्मा जीहरः-मा हारय। च पुनस्तत्-सुकृतं विना सप्तानां नरकाणामतिथिः-प्राघुर्णस्त्वं[1] मा भूः-मा भव । एते मद-मत्सराद्याः

१. प्राघूर्णः - मु० ।

कृतस्यापि सुकृतस्य हर्तार इत्युपदिष्टं, मा जीहर इत्यत्र माङ्योगे भविष्यत्काले अद्यतन्या युष्मत्पुरुषैकवचनेऽसौ ह्रधातोर्ण्यन्तः प्रयोगः, अल्पमपि सुकृतं मद-मत्सरादिभिर्विना कुरुष्वेत्युपदेशः यतोऽक्षयं भवति ।।७.१३।।

**[१७०] पुराऽपि पापैः पतिताऽसि संसृतौ,**
**दधासि रे ! किं गुणिमत्सरं पुनः ? ।**
**न वेत्सि किं घोरजले निपात्यसे,**
**नियंत्र्यसे शृंखलया च सर्वतः ? ।।७.१४।।**

**धनवि.**–अथ कषायविशेषस्य केवलमत्सरस्य निग्रहमुपदिशति –

'पुराऽपि' इति-रे दुरात्मन् ! **पुरा**ऽपि-पूर्वमपि **पापैः**-पापकर्मभिः पञ्चाश्रव-सेवनादिभिः **संसृतौ**-संसारे, **पतिताऽसि**-पतिनशीलोऽस्ति, **पुनः** समुच्चये, रे दुरात्मन् ! **गुणिमत्सरं**-ज्ञानाद्यधिकगुणवत्सु मत्सरं-स्पर्द्धां **किं दधासि**-धरसि ?, अत्रोक्तमर्थं दृष्टान्तदर्शनपूर्वकं समर्थयति-किमिति प्रश्ने **न वेत्सि ?** - न जानासि, काकूक्त्या, त्वं पापै**र्घोरजले**-अगाधपानीये **निपात्यसे**-नितरामधोगतिविषयः क्रियसे, च पुनः, गुणिषु मत्सरधरणेन **सर्वतः**-समन्तात्, **शृङ्खलया**-लोहनिगडेन **नियन्त्र्यसे**-बन्धनविषयीक्रियसे, इति कर्मोक्त्या ।।७.१४।।

**रत्न.**–अथ मत्सरविषये किञ्चिदुपदिशति –

**पुराऽपि पापैः** इति, व्याख्या - हे आत्मन् ! त्वं पुराऽपि-पूर्वमपि पापैः संसृतौ-संसारे [१]**पतितोऽसि,** पुनर्गुणिषु-गुणवस्तु मत्सरम्-असूयां किं दधासि ?, काकूक्त्या व्याख्यानं, अपि तु मा धत्स्व, किं न वेत्सि ? - न जानासि, अत्रापि [२]काकूध्वनिः त्वं गुणिमत्सरेण, घोरं च तज्जलं च घोरजलं तस्मिन् संसृतिसमुद्रे इत्यर्थः निपात्यसे, तथा सर्वतः-सर्वाङ्गेषु शृङ्खलया नियन्त्र्यसे,

१. टीकागतः मूले पाठभेदः – 'अत्र धनवि.-टीकाया भावस्तु एवं - पापानि संसा रे सर्वदा पातनशीलानि, रत्नवि.टीकायास्तु 'त्वं अधुनापि संसारे पतितवान् एवासि अत पापेभ्यो विरम, पुण्येषु च रमस्व...' इति भावः । २. काकूक्त्या व्याख्यानं मु० ।

अन्योऽपि सर्वाङ्गेषु निगडादिना नियन्त्र्य घोरजलेऽन्धकूपे निपातितः सन् कदाऽपि बहिर्निर्गन्तुं न शक्नोति, तथैव क्रियसे इत्यर्थः ।।७.१४।।

**[१७१] कष्टेन धर्मो लवशो मिलत्ययं-**
**क्षयं कषायैर्युगपत् प्रयाति च ।**
**अतिप्रयत्नार्जितमर्जुनं ततः,**
**किमज्ञ ! ही हारयसे नभस्वता ? ।।७.१५।।**

**धनवि.**–अथ कषाये कृते सुकृताचरणं यातीत्याह –

'कष्टेन' इति, **अयं**-श्रुतचारित्रलक्षणो **धर्मो** दानादिजो वा धर्मः-पुण्यं, **लवशो**-लवैर्लवैः कृत्वा, **कष्टेन**-बहुदुःखसहनेन, **मिलति**-सञ्चयविषयीभवतीति, **च** पुनरयं कष्टेन मिलितो धर्मः **कषायैः**-क्रोधादिभिर्मद-मत्सराद्यैर्वा **युगपत्**-समकालं **क्षयं**-विनाशं **प्रयाति, ततः** तद् दार्ष्टान्तिकयोजनतो – हे **अज्ञ !** - मूर्ख ! **ही**ति खेदे **अतिप्रयत्नार्जितम्**-अग्निफूत्करण-धूमपान-लोकवञ्चनप्रमुखातिप्रयत्नेन-बहुप्रयासेन, **अर्जितं**-मीलितं, **अर्जुनं**-सुवर्णं **नभस्वता**-फूत्कारवातेन प्रबलवातेन वा **किं हारयस ?** - नाशयसि; अत्रोत्तरार्द्धेन- **'ध्मातं सुवर्णं फूत्कारेण हारितम्'**इत्याभाणको[1] दर्शितो भवति; किंच-अत्र कष्टस्यातिप्रयत्नो धर्मस्य सुवर्णं, लवस्य सुवर्णलवा एवं मेलनस्यार्जनं, क्षयस्य हारणं, कषायस्य नभस्वान्, दृष्टान्ता इति दृष्टान्तदार्ष्टान्तिकयोजनेति भावः ।।७.१५।।

**रत्न.**–अथात्मानं कष्टार्जितधर्मरक्षणविषये उपदिशति –

**कष्टेन धर्मो लवशो मिलत्ययम्**-इति., व्याख्या-हे आत्मन् ! अयं धर्मः कष्टेन मिलति समूहीभवतीत्यर्थः कथं लवशः-कणशः, बहुभिर्लवैर्लवशः, च पुनः कषायैर्हेतुभिर्युगपत्-समकालं क्षयं-नाशं प्रयाति, एतद् दृष्टान्ते विषयी-कृत्योपदिशति-हे अज्ञ ! - हे मूर्ख ! ततः-तर्हि अतिप्रयत्नेन-अत्युद्यमेनार्जितं सुवर्णं नभस्वता-वातेनार्थान्मुखवातेन प्रयोजकेन, हीति खेदे किं हारयसे ?,

१. कहेती, कहेवत - सं. ।

अपि तु मा हारयेत्यर्थः । धर्मस्य सुवर्णोपमानं कषायाणां वातोपमानमिति, **"धम्युं सोनुं फूकइं गम्युं"** इति लौकिकाभाणको ज्ञेयः ।।७.१५।।

**[१७२] शत्रूभवन्ति सुहृदः कलुषीभवन्ति,**
**धर्मा यशांसि निचिताऽयशसीभवन्ति ।**
**स्निह्यन्ति नैव पितरोऽपि न बान्धवाश्च,**
**लोकद्वयेऽपि विपदो भविनां कषायैः ।।७.१६।।**

**धनवि.**—अथ भवद्वयेऽपि दुःखदायकत्वं दर्शयति —

'शत्रूभवन्ति' इति, **शत्रूभवन्तीति, कषायैः**-क्रोधादिभिः **सुहृदो**-मित्राणि, **शत्रूभवन्ति** अशत्रवः शत्रवो भवन्ति इति शत्रूभवन्ति-वैरिणो भवन्ति, **च** पुनः **कषायैः धर्माः**-श्रुत-चारित्रलक्षणा दानादयो वा **कलुषीभवन्ति**-मलिनीभवन्तीत्यर्थः, **च** पुनः **कषायैः यशांसि निचितायशसीभवन्ति**-अनिचितायशांसि (निचितायशांसि) भवन्ति इति निचितायशसीभवन्ति, अतिशयेनाकीर्त्तयो भवन्तीत्यर्थः । **च** पुनः **कषायैः पितरोऽपि बान्धवाश्च**-भ्रातरः स्वजना वा **नैव स्निह्यन्ति**-स्नेहवन्तो भवन्ति, एवम्-उक्तप्रकारेण **भविनां**-संसारिजीवानां **कषायैः लोकद्वयेऽपि**-इहलोक-परलोकलक्षणे **विपदो**-विपत्तयो भवन्ति, अत्रैवमित्याध्याहार्यम् ।।७.१६।।

**रत्न.**—अथ कषायैः किं किमशुभं भवतीत्याह —

**शत्रूभवन्ति**-इति., व्याख्या-कषायैः करणैः, सुहृदो-मित्राणि अशत्रवः शत्रवो भवन्ति शत्रूभवन्ति, कषायैरिति सर्वत्र योज्यं, धर्माः-पुण्यानि तपोदानादिसमुत्थाः कलुषीभवन्ति-मलिनीभवन्तीत्यर्थः, तथा यशांसि-कीर्त्तयः, निचितानि च तानि अयशांसि च निचितायशांसि, अनिचितायशांसि निचितायशांसि भवन्तीति निचितायशसीभवन्ति, निचयीकृतापयशसीभवन्तीत्यर्थः, तथा पितरो[1] मातृ-पित्रादयः, कुलवृद्धा अपि, न स्निह्यन्ति-न स्नेहं-प्रेम कुर्वन्ति, **न बन्धवः**[2]-अन्ये स्वजना अपि, **च** पुनर्लोकद्वयेऽपि-इहलोके परलोकेऽपि विपदो-विपत्तयो भवन्ति, केषा ? - भविनां संसारिणामिति सर्वत्र योज्यम् ।।७.१६।।

---

१. माता-पितादया मु० । २. 'न बन्धवश्च' इति मूलत्वेनापि पाठः ।

**[१७३] रूप-लाभ-कुल-विक्रम-विद्या-**
**श्री-तपो-वितरण-प्रभुता-ऽऽद्यैः ।**
**किं मदं वहसि ? वेत्सि न,**
**मूढा-ऽनन्तशः स्वभृशलाघवदुःखम् ? ।।७.१७।।**

**धनवि.**—अथ कषायविशेषस्य केवलमदस्य निग्रहमुपदिशति —

'रूप' इति, **रूपं** च-शरीरसौन्दर्यं, **लाभश्च**-व्यापारदिषु धन धान्या-ऽङ्शुकादिप्राप्तिः, **कुलं** च-पित्रन्वयः, **विक्रमश्च**-बलं, **विद्या** च-तर्कविद्यादिका, **श्रीश्च**-लक्ष्मीः, **तपश्च** द्वादशप्रकारं, **वितरणं** च-दानं, **प्रभुता** च-ऐश्वर्यम्, एते पदार्था **आद्या** येषां ते तथा, **आद्य**पदाज्जाति-रमणी-मन्दिरादिग्रहणं तै **रूप-लाभ-कुल-विक्रम-विद्या-श्री-तपो-वितरण-प्रभुता-ऽऽद्यैः**, मदम्-अभिमानं **किं वहसि**-धरसि ?, परं तैरेव रूपादिमदैः **अनन्तशः**-अनन्तवारान् स्वस्य **भृशम्**-अत्यर्थं **लाघवदुःखं**-लघुतादुःखं भावि भूतं वा **न वेत्सि ?** - न जानासि, उक्तं च-

**[१७४]** "जाति-लाभ-कुलैश्वर्य-बल-रूप-तपः-श्रुतैः ।
कुर्वन् मदं पुनस्तानि, हीनानि लभते जनः ।।[ ]।।" इति ।।७.१७।।

**रत्न.**—अथ विषय-कषाया-ऽऽद्यवश इत्यत्रादिशब्दसङ्गृहीतमदविषये किञ्चिदु-पदिशति —

**रूप-लाभ** इति., व्याख्या-हे आत्मन् ! त्वं मदम्-अहङ्कारं किं वहसि ? - काकुध्वन्या व्याख्येयं, अपि तु मा वह इति सूचापि, कैः? - रूपं च लाभश्च कुलं च विक्रमश्च विद्या च श्रीश्च तपश्च वितरणं च प्रभुता च-रूप... प्रभुताः, ता आद्या येषां [तै] तैः, विक्रमो-बलं, श्रीः-लक्ष्मीः, वितरणं-दानं, प्रभुता-ऐश्वर्यं, शेषपदानामर्थः प्रतीतः, आद्यशब्देन ललितललना-हर्म्य-जात्यादिग्रहः, परं हे मूढ ! - हे मूर्ख ! त्वमनन्तशः-अनन्तवारान् स्वस्य भृशम्-अत्यर्थं यल्लाघवं तस्य दुःखं किं न वेत्सि ?, काकूक्त्या प्रश्नगर्भं व्याख्यानं, अपि तु विद्धि,

रूपलाघवस्य [1]दुःखं कुरूपप्राप्त्या, लाभलाघवस्य लाभान्तरायेण, कुललाघवस्य श्वपचादिकुलप्राप्त्या, विक्रमलाघवस्य सर्वतो बलहीनत्वेन, विद्यालाघवस्य जडत्वेन, श्रीलाघवस्य दरिद्रत्वेन, तपोलाघवस्य तपःकरणाशक्तत्वेन, वितरणलाघवस्य दानान्तरायेण, प्रभुतालाघवस्य सर्वेषां दासत्वेनाऽनादेयवचनतया त्वयैवानन्तशः प्राप्तमिति जानीहीति भावः ।।७.१७।।

**[१७५] विना कषायान् न भवार्त्तिराशिर्-**
**भवेद् भवेदेव च तेषु सत्सु ।**
**मूलं हि संसारतरोः कषायास्-**
**तत् तान् विहायैव सुखी भवात्मन् ! ।।७.१८।।**

**धनवि.**–अथ सांसारिकपीडायाः कषायाणां च परस्परमन्वय-व्यतिरेकाभ्यां कार्य-कारणभावं दर्शयन् कषायनिग्रहमुपदिशति –

'विना कषायान्' इति, **कषायान्**-क्रोधादीन् **विना भवार्त्तिराशिः**-संसारपीडासमूहो, **न भवेत्**, च पुनस्**तेषु** क्रोधादिषु **सत्सु**, भवार्त्तिराशिः, **एव** निश्चयेन **भवेत्**-स्यादित्यन्वय-व्यतिरेक इति । **हि**-यतः कारणात्, **संसारतरोः**-भववृक्षस्य, **कषायाः**-क्रोधादयो **मूलम्**-आदिकारणं भवन्ति-इत्यर्थः; **तत्**-तस्मात् कारणात्, तान् कषायान् **विहाय**-त्यक्त्वा, हे **आत्मन् !** - जीव ! **सुखी**-सुखवान् **भवे**ति सम्बन्धः ।।७.१८।।

**रत्न.**–अथ पुनः सिंहावलोकनन्यायेन कषायपरित्यागमेव दृढयति –

**विना कषायान**..इति., व्याख्या-भवे-संसारे कषायान् विना भवस्य संसारस्य, **अर्त्तिः**-पीडा, तस्या राशिः समूहो न भवेदेव, यथाऽयं निश्चयः, तथा च पुनस्तेषु कषायेषु सत्स्वेव भवार्त्तिराशिर्भवेद् अयमपि निश्चयः, हि यस्मात् कारणात् कषायाः संसारतरोः-संसारवृक्षस्य मूलं वर्तन्ते, तत्-तस्माद्धेतोस्तान् विहायैव-त्यक्त्वैव हे आत्मन् ! त्वं सुखीभव-अक्षय्यसुखवान् भवेत्यर्थः ।।७.१८।।

---

१. 'दुःखं' सर्वत्र षष्ठ्यन्तपदात् योज्यम् ।

**[१७६] समीक्ष्य तिर्यग्-नरकादिवेदनाः,**
**श्रुतेक्षणैर्धर्मदुरापतां तथा ।**
**प्रमोदसे यद्विषयैः सकौतुकैस्-**
**ततस्तवात्मन् ! विफलैव चेतना ।।७.१९।।**

**धनवि.**—अथ कषायाणां विषयाणां च प्रमादत्वेन परस्परं साधर्म्याद् विषय-कषाययोः परस्परं साहचर्याच्च कषायद्वारे विषयनिग्रहमुपदिशति —

'समीक्ष्य' इति, हे **आत्मन् !** त्वं **श्रुतेक्षणैः**-शास्त्रलोचनैस्-**तिर्यग्-नरकादिवेदनाः तथा** च पुनरर्थे **धर्मदुरापतां**-धर्मस्य दुर्लभतां, **समीक्ष्य**-निरीक्ष्य, **सकौतुकैः**-कुतूहलसहितै**र्विषयैर्यद्**-यस्मात्, त्वं **प्रमोदसे**-हृष्यसि, **ततः** कारणाद्, हे **आत्मन !** तव **चेतना**-ज्ञानं **विफलैव**-निष्फलैव जातेत्यर्थः;

भावार्थस्तु तिर्यग्-नरकादिवेदनाः श्रुतेक्षणैः समीक्ष्येत्युक्तं तत्रादिपदात्-मनुष्य-वेदनाः चारकनिरोधादिका द्रष्टव्याः, तिर्यग्वेदनास्तु - "तिरिया कसंकुसार-इत्यादिकाः प्रसिद्धाः, नरकवेदनाश्च - "इमीसे णं भंते ! रयणपभाए पुढवीए णेरइया केरिसयं णिरयभवं पच्चणुब्भवमाणा विहरंति ?, गोयमा ! ते णं तत्थ णिच्चं भीया, णिच्चं छुहिया, णिच्चं तसिया, णिच्चं उव्विग्गा, णिच्चं उपप्पुया[1]" इत्यादिका **जीवाभिगमतृतीयपद**प्रतिपादिताः । सविस्तराः सव्याख्याः, तत एवावसेयाः,

किंच-धर्मदुरापतां समीक्ष्येत्युक्तं, सा च धर्मदुरापता दशदृष्टान्तैर्बोध्या, ते च दश दृष्टान्ताः —

**[१७७]** विप्रः प्रार्थितवान् प्रसन्नमनसः श्री**ब्रह्मदत्तात्** पुरा,
क्षेत्रेऽस्मिन् **भरते**ऽखिले प्रतिगृहं मे भोजनं दापय ।

---

१. 'उवदुया' मु० ।

इत्थं लब्धवरोऽथ तेष्वपि कदाऽप्यश्नत्यहो द्विः स चेद्-
भ्रष्टो मर्त्त्यभवात् तथाऽप्यसुकृती भूयस्तमाप्नोति न ।।१.चुल्लगम्।।

**[१७८]** स्तम्भानां हि सहस्रमष्टसहितं प्रत्येकमष्टोत्तरं,
कोणानां शतमेषु तानपि जयन् द्यूतेऽथ तत्सङ्ख्यया ।
साम्राज्यं जनकात् सुतः स लभते स्याच्चेदिदं दुर्घटं,
भ्रष्टो मर्त्त्यभवात् तथाऽप्यसुकृती भूयस्तमाप्नोति न ।।२.द्युतम्।।

**[१७९]** वृद्धा कापि पुरा समस्तभरतक्षेत्रस्य धान्यावलिं,
पिण्डीकृत्य च तत्र सर्षपकणान् क्षिप्त्वाऽऽढकेनोन्मितान् ।
प्रत्येकं च पृथक्करोति किल सा सर्वाणि चान्नानि चेद्,
भ्रष्टो मर्त्त्यभवात् तथाऽप्यसुकृती भूयस्तमाप्नोति न ।।३.धान्यम्।।

**[१८०]** सिद्धद्यूतकलाबलाद्-धनिजनं जित्वाऽथ हेम्नां भरैश् -
**चाणाक्येन** नृपस्य कोशनिवहः पूर्णीकृतो हेलया ।
दैवादाढ्यजनेन तेन स पुनर्जीयेत मंत्री क्वचिद्,
भ्रष्टो मर्त्त्यभवात् तथाऽप्यसुकृती भूयस्तमाप्नोति न ।।४.चाणक्यः।।

**[१८१]** रत्नान्याढ्यसुतैर्वितीर्य वणिजां देशान्तरादीयुषां,
पश्चात्तापवशेन तानि पुनरादातुं कृतोपक्रमैः ।
लभ्यन्ते निखिलानि दुर्घटमिदं दैवाद् घटेत् तत् क्वचिद्,
भ्रष्टो मर्त्त्यभवात् तथाऽप्यसुकृती भूयस्तमाप्नोति न ।।५.रत्नम्।।

**[१८२]** स्वप्ने कार्पटिकेन रात्रिविगमे श्री**मूलदेवेन** च,
प्रेक्ष्येन्दुं सकलं कुनिर्णयवशादल्पं फलं प्राप्य च ।
स्वप्नस्तेन पुनस्स तत्र शयितेनालोक्यते कुत्रचिद्,
भ्रष्टो मर्त्त्यभवात् तथाऽप्यसुकृती भूयस्तमाप्नोति न ।।६.स्वप्ने।।

**[१८३]** राधाया वदनादधः क्रमवशाच्चक्राणि चत्वार्यपि,
भ्राम्यन्तीह विपर्ययेण तदधो धन्वी स्थितोऽवाङ्मुखः ।
तस्या वामकनीनिकामिषुमुखेनैवाशु विध्यत्यहो,
भ्रष्टो मर्त्त्यभवात् तथाऽप्यसुकृती भूयस्तमाप्नोति न ।।७.राधावेधः।।

**[१८४]** दृष्ट्वा कोऽपि हि कच्छपो ह्रदमुखे सेवालबन्धच्युते,
पूर्णेन्दुं मुदितः कुटुम्बमिह तद् द्रष्टुं समानीतवान् ।
सेवाले मिलिते कदापि स पुनश्चन्द्रं समालोकते,
भ्रष्टो मर्त्त्यभवात् तथाऽप्यसुकृती भूयस्तमाप्नोति न ।।८.कूर्मः।।

**[१८५]** शम्या पूर्वपयोनिधौ निपतिता, भ्रष्टं युगं पश्चिमा-
म्भोधौ दुर्द्धरवीचिभिश्च सुचिरात् संयोजितं तद् द्वयम् ।
सा शम्या प्रविशेद् युगस्य विवरे, तस्य स्वयं क्वापि चेद्,
भ्रष्टो मर्त्त्यभवात् तथाऽप्यसुकृती भूयस्तमाप्नोति न ।।९.शमीयुगम्।।

**[१८६]** चूर्णीकृत्य पराक्रमान्मणिमयस्तम्भं सुरः क्रीडया,
मेरौ सन्नलिकासमीरवशतः क्षिप्त्वा रजो दिक्षु चेत् ।
स्तम्भं तैः परमाणुभिः सुमिलितैः कुर्यात् स चेत् पूर्ववद्,
भ्रष्टो मर्त्त्यभवात् तथाऽप्यसुकृती भूयस्तमाप्नोति न ।।१०.परमाणु।।

इति संक्षेपतो, विस्तरतस्तूत्त**राध्ययनवृत्त्या**दिभ्योऽवसेया इति ।।७.१९।।

**रत्न.**–अथाधीतावपि सत्यां विषयग्रस्तत्वात्[1] चेतनावैफल्यं दर्शयति –

**समीक्ष्य**..इति., व्याख्या-हे आत्मन् ! श्रुतान्येवेक्षणानि-लोचनानि, अथवा श्रुतानामीक्षणानि-विलोकनानि तैः करणैः, तिर्यग्-नारकादीनां वेदनाः प्रति-पीडाः प्रति समीक्ष्य-विलोक्य विचार्य वा, तथा तैरेव धर्मस्य प्रकरणादर्हदुक्तस्य

१. ०ग्रस्ते मु० ।

दुरापतां-दुर्लभत्वं समीक्ष्य-विलोक्य विचार्य वा, यत् त्वं विषयैः-शब्द-रूप-गन्ध-रस-स्पर्शैः करणैः प्रमोदसे-प्रमोदं प्राप्नोषि । किंलक्षणैः ? - सह कौतुकेन-नर्मणा मुदा कुतुकेन वा, वर्तन्ते ये ते तैः, यतः

**[१८७]** कोरकं तु .....।

"कौतुको((कं)) नर्मणीच्छायामुत्सवे कुतुके मुदि ।। अने.३.२७ ।।

**[१८८]** पारंपर्यागतख्यात, मङ्गलोद्वाहसूत्रयोः ।

गीतादौ भोगकाले च- ..... ।। अने.३.२८ उत्तरार्धम्।।

'इत्यनेकार्थकोष [ ] वचनात्, ततः-तस्मात् कारणात् तव चेतना-चैत्यन्यं विगतं फलं तत्त्वज्ञानरूपं यस्याः सा विफला, कथं ? - एव निश्चयेन ।।७.१९।।

**[१८९] चौरैस्तथा कर्मकरैर्गृहीते,**
**दुष्टैः स्वमात्रेऽप्युपतप्यसे त्वम् ।**
**पुष्टैः प्रमादैस्तनुभिश्च पुण्य-**
**धनं न किं वेत्स्यपि लुट्यमानम् ? ।।७.२०।।**

**धनवि.**—अथ कषायाणां साक्षात् प्रमादत्वं दर्शयन् प्रमादनिग्रहद्वारा कषायनिग्रहमुपदिशति —

'चौरे' इति, यदि **दुष्टैः**-क्रूरै**श्चौरैः**-तस्करैः, **तथे**ति पक्षान्तरे **दुष्टैः**-अविनीतत्वादिदोषदूषितैः **कर्मकरैः**-स्वगृहसत्कदास-दासीप्रभृतिभिः **स्व-मात्रेऽपि**-सुवर्णादिद्रव्यमात्रेऽपि बलाच्छलाद् वा **गृहीते**-अपहृते **त्वमुपतप्यसे**-परितप्यसे,

अत्र **स्वं**-धनं गणिम १ धरिम २ मेय ३ परिच्छेद्य ४ भेदाच्चतुर्द्धा, यदुक्तम् —

**[१९०]** "गणिमं जाईफलफोफलाइं १, धरिमं तु कुंकुमगुडाई २ ।
मेयं चोप्पडलोणाई ३ रयणवत्थाइ परिच्छेज्जं ४ ।।[ ]।।" इति

**च** पुनस्तदा **पुष्टैः**-उत्कृष्टैर्विषय-कषायै; च पुनस्, **तनुभिः**-जघन्यैर्हास्य-मद-मत्सराद्यैः **प्रमादैः**-मद्यादिभिः **पुण्यधनं**-धर्मधनं **लुट्यमानम्**-अपह्रियमाणमपि त्वं **किं न वेत्सि ?** - न जानासीति, काकूक्त्या; अत्र कषायदोषदर्शनाधिकारे प्रमाददोषदर्शनं कषायाणां प्रमादत्वसूचनार्थं ।।७.२०।।

**रत्न.**—अथ लुट्यमानं धर्मधनं न वेत्सीति जीवं प्रति ज्ञापयन्नाह —

**चौरेस्तथा कर्मकरैः**..इति., व्याख्या-हे आत्मन् ! त्वं चौरेस्तथा कर्मकरैः-गृहदासैः, केवलं स्वं-स्वमात्रं बाह्यद्रव्यमित्यर्थः, तस्मिन् स्वमात्रेऽपि गृहीते सति उपतप्यसे-उपतापं प्राप्नोषि । किंलक्षणैः ? - दुष्टैः-दुराचारैः, परं प्रमादैः-मद्यादिभिः च पुनस्तनुभिः पुण्यमेव धनं-आन्तरं सारद्रव्यं लुट्यमानं-मुष्यमाणं किं वेत्स्यपि न ? - जानास्यपि न, निराकरणं तद्विषये उपतापश्च दूरे आस्तां, परं जानीहीति काकूक्त्या व्याख्यानं, प्रमादैस्तनुभिश्च किंलक्षणैः ? - पुष्टैः-पोषं प्राप्तैः, प्रमादैः किंलक्षणैः ? - चौरैरिव चौरैर्बहिस्तादागतत्वाच्चौरोपमानं, तनुभिः किंलक्षणैः ? - कर्मकरैरिव कर्मकरैरात्मस्वामिन इति ।।७.२०।।

**[१९१] मृत्योः कोऽपि न रक्षितो न जगतो दारिद्र्यमुत्त्रासितं,**
**रोग-स्तेन-नृपादिजा न च भियो निर्नाशिताः षोडश ।**
**विध्वस्ता नरका न नापि सुखिता धर्मैस्-त्रिलोकी सदा,**
**तत् को नाम गुणो? मदश्च? विभुता का ते? स्तुतीच्छा च का? ।।७.२१।।**

**धनवि.**—अथ कषायपरिहारद्वारमुपसंहरन् क्रोधादिकषायमूलमौद्धत्यं परिहर्तु-मुपदिशति —

'मृत्योः' इति—हे आत्मन् ! यदि त्वया **मृत्योः**-मरणात्, **कोऽपि** प्राणी **न रक्षितो**-न त्रातः, च **पुनर्जगतो**-विश्वजन्तुजातस्य **दारिद्र्यं**-दौःस्थ्यं त्वया **नोत्त्रासितं**-**न उत्**-प्राबल्येन सर्वथा, **त्रासं** प्रापितं, च पुना **रोग-स्तेन-नृपादिजाः षोडश**-षोडशसङ्ख्या **भियो**-भीतयो **न निर्नाशिताः**-त्वया न नितरां नाशं प्रापिताः, च पुनस्त्वया **नरकाः** सप्त **न विध्वस्ता**-न विनाशं प्रापिताः, च पुनस्त्वया धर्मैः-

पुण्यैस्-**त्रिलोकी**-लोकत्रयी **सदा**-सर्वकालं **नापि सुखिता**-सुखीकृता, सुखं जातमस्याः सा सुखिता, सुखवती कृतेत्यर्थः, **तत्**-तदा **ना**मेति कोमलामन्त्रणे **को गुणः ?** - किंनामा गुणः परोपकारित्वादिर्वर्त्तते ?, च पुनः **कः ?** - किंनामा **मदो**-जात्यादिर्वर्त्तते ?, च पुनस्तदा **का ?** - किंनाम्नी तव **विभुता**-प्रभुता वर्त्तत ?, च पुनस्तदा तव **स्तुतीच्छा**-स्तुतिवाञ्छा **का ?** - किंनाम्नी वर्त्तते ?

अत्र षोडश भियो –

**[१९२]** "रोग-जल-जलण-विसहर-चोरा-ऽरि-मइंद-गय-रणभयाइं"

इति गाथासूचिता नव९' –

**[१९३]** १-इह २-परलोया ३-याण ४-मकम्हा ५-आजीव ६-मरण ७मसिलोए ।

सत्त य भयठाणाइं इमाइं सिद्धंतभणियाइं ।। [ ] ।।'

इति गाथासूचिताः सप्त ७, एतद्गाथाव्याख्या च- १. मनुष्यादेः सजातीयादन्यस्मान्मनुष्यादेरेव सकाशाद् भयमिहलोकभयं २. तिर्यग्-देवादेः सकाशाद् भयं परलोकभयं ३. आदीयते इत्यादानं-धनं तदर्थं चौरादिभ्यो यद् भयं तदादानभयं ४. अकस्मादेव बाह्यनिमित्तानपेक्षं गृहादिष्वेवावस्थितस्य रात्र्यादौ भयमकस्माद्भयं ५. निर्धनः कथं दुर्भिक्षादावात्मानं धारयिष्यामीत्याजीविकाभयं ६. मरणभयं प्रतीतमेव ७. अश्लोकभयम्-अयशोभयम्,'एवं क्रियमाणे महदयशो भवति'इत्यश्लोकभयम्- इत्यत्र विशेषव्याख्यानं **प्रवचनसारोद्धारवृत्त्या**दिभ्योऽवसेयं, मिलिताः सर्वा अपि षोडश भियो, यद्वा श्री**मानतुङ्गसूरि**विरचित-**भक्तिभरअमरपणय**मित्यादिस्तोत्रचतुर्थगाथावचूर्णौ –

१ 'रोग २ जल ३ जलण ४ विसहर ५ चोरा ६ ऽरि ७ मृगेन्द्र ८ गजेन्द्र ९ सर्प १० संग्राम ११ डाकिनी १२ शाकिनी १३ राकिनी १४ लाकिनी १५ हाकिनी १६ काकिनीति 'जलजलणाई सोलस' इति पदव्याख्यानुसारेण षोडश भियः, तथाविधसंप्रदायाभावादेवं व्याख्याताः, तथाविधसंप्रदायावगमे च मनीषिभिः सम्यग् व्याख्येयाः ।।७.२१।।

इति श्रीतपोगच्छनायकश्री**मुनिसुन्दर**सूरिविरचित-षोडशशाखस्याऽध्यात्मकल्पद्रुम-स्याधिरोहणीटीकायां सकलशास्त्रारविन्दप्रद्योतनमहोपाध्याय-श्री**कल्याणविजय**गणि शिष्योपाध्याय-श्री**धनविजय**गणिविरचितायां कषायनिग्रहनाम्नी सप्तमी पदपद्धतिः ।।७।।

**रत्न.**—अथेयतां कार्याणां करणासमर्थस्य तवात्मनो मदादिकरणे का वाञ्छेति दर्शयति —

**मृत्योः कोऽपि**-इति., व्याख्या-हे आत्मन् ! यदि त्वया मृत्योः-मरणात् सकाशात् कोऽपि न रक्षितो-न त्रातः, तथा जगतः-**'आश्रये आश्रयिण उपचारात्'** जगद्वासिजनस्य दारिद्र्यं-दरिद्रत्वं नोत्त्रासितं न उत्त्रासं प्रापितं, बलान्न निर्णाशितमित्यर्थः, तथा षोडश कासादयो रोगा न निर्णाशिताः, च पुनः स्तेनाः-चौरा, नृपा-राजानस्ते आदौ येषां ते स्तेन-नृपादयस्तेभ्यो जाताः स्तेननृपादिजा भियो-भीतयो न निर्णाशिताः, आदिशब्देनामात्या-ऽऽरक्षका-ग्नि-जलादीनां ग्रहणं, तथा नरकाः सप्त न विध्वस्ताः-विध्वंसं न प्रापिताः, अपि पुनरर्थे, धर्मैर्हेतुभिः सदा त्रयाणां जगतां समाहारस् त्रिलोकी, सा न सुखिता-न सुखं प्रापिता तत्-तर्हि नामेति कोमलामन्त्रणे ते-तव गुणः कः ? - **'अर्थवशाद् विभक्तिपरिणाम'** [ ] इति न्यायान्नामेति नाम्ना को गुणः ?, अथवा नामेति प्राकाश्येऽव्ययं, तव को गुणः प्रकटो-जगद्विख्यात ? इति काकूक्त्या व्याख्यानं, अपि तु न कश्चिदपीत्यर्थः, तादृग्दीप्तगुणाभावे मदः-अहङ्कारः कः ?, मदाभावे विभुता च का ?, विभुताया अभावे च पुनस्ते-तव स्तुतेः-स्तवनस्य का इच्छा ?, यदैतानि पूर्वोक्तानि कार्याणि न कृतानि, तदा गुणादि सर्वमपि निरर्थकमित्यर्थः, तेन मद-मत्सरादीनां त्याग एव युक्त इति सूचनमिति ।।७.२१।।

**[१९४]** श्री**शान्तिचन्द्र**वरवाचकदुग्धसिन्धु-
लब्धप्रतिष्ठ-वरवाचक**रत्नचन्द्रः** ।
अध्यात्म-कल्पफलदस्य चकार टीकां,
तत्राऽगमन्नयमितः प्रथितोधिकारः ।।७।।

इति सप्तमोऽधिकारः संपूर्णः ।।

# ८. शास्त्रगुणाधिकारः

[शास्त्राश्रितोपदेशं प्रथमं प्रतिद्वारम्]

अथानन्तरद्वारे कषायनिग्रह उपदिष्टः, स च शास्त्रश्रवणाधीन इति शास्त्राण्याश्रित्योपदेशमभिधित्सुराह –

**अथ शास्त्राण्याश्रित्योपदेशः** – अथ शास्त्राण्याश्रित्योपदेश इति, **अथ** इति कषायनिग्रहोपदेशानन्तरं तन्निमित्तभूतशास्त्राण्याश्रित्योपदेश उच्यते इत्यर्थः ।

**[१९५] शिलातलाभे हृदि ते वहन्ति,**
**विशन्ति सिद्धान्तरसा न चान्तः ।**
**यदत्र नो जीवदयाऽऽर्द्रताऽऽस्ते,**
**न भावनाङ्कूरततिश्च लभ्या ।।८.१.१।।**

**धनवि.**–तत्र प्रथमं शास्त्रश्रवणेऽपि येषां प्रमादपरिहारो न भवति तानुपदिशति–

'शिलातलाभे' इति–हे आत्मन् ! तत्-तस्मात्, **ते**-तव **शिलातलाभे**-शिलातलसदृशे **हृदि**-हृदये **सिद्धान्तरसा**-जिनागमजलानि **वहन्ति**-प्रवाहमार्गेणोपरि गच्छन्तीत्यर्थः, **च** पुनर्-**अन्तः**-मध्ये **न** प्रविशन्ति, हृदयस्य कठिनत्वात्, 'आगमोक्तं मया कार्यम्' इत्यादिरूपा रसा मनसि नायान्तीत्यर्थः, **यद्**-यस्माद् **अत्रैव**-इहभवे **ते**-तव **जीवदयार्द्रता नो आस्ते**-नास्ति, च पुन**र्भावनाङ्कूरततिः**-द्वादशभावनारूपाङ्क[१] श्रेणि**र्लभ्या**-प्रत्यक्षेण लभ्यमाना **नो** आस्ते-नास्ति ।।८.१.१।।

**रत्न.**–अथ शास्त्राण्याश्रित्योपदेशाख्योऽष्टमोऽधिकारो व्याख्या[२]विषयीक्रियते। अथोपमानदानेन हृदयस्य काठिन्यं सूचयति –

**शिलातलाभे** इति., व्याख्या-हे आत्मन् ! शिलातलस्याभं-सदृशं, तस्मिन् शिलातलाभे हृदि-हृदये सिद्धान्तस्य रसा वहन्ति[३], चेति विशेषे, अंतः-मध्ये न विशन्ति-न प्रविशन्ति, यद्-यस्मात् कारणात् ते-तवात्र-हृदये जीवदयया-

१. स्यात् प्ररोहोऽङ्कुरोऽङ्कूरो [अभि. १११८] २. व्याख्यायते-मु० । ३. भवं (वहं)ति - मु० ।

जीवानुकम्पया आर्द्रता-आर्द्रत्वं सरसत्वं नो वर्त्तते, तेन कारणेन, च पुनर्भावना एवाङ्कूराः तथा भावनाया वाऽङ्कूराः, तेषां ततिः-श्रेणिर्न लभ्या-न प्राप्या, शिलातलेऽपि रसा-मेघजलान्युपर्येव वहन्ति, नत्वन्तः प्रविशन्ति, तत्कालं पतितस्यैव शुष्कत्वादार्द्रताऽपि न भवति, तेनाङ्कूरोद्गमोऽपि दुर्लभ इत्युपमानोपमेय-साम्यम्, अत्र हृच्छब्देन मन एव ग्राह्यम्, न तु बाह्यहृदयं, उपदेशादिना दुर्भेद्यत्वाज्जाड्योपेतत्वाच्च शिलातलोपमानम्, सिद्धान्तपक्षे रस्यन्ते-चर्व्यन्ते सामाजिकैरिति रसाः-शृङ्गारादयः, अत्र मुख्यतयोपदेष्टव्यत्वात् शान्तरस एव ग्राह्य इति ।।८.१.१।।

**[१९६] यस्यागमाम्भोदरसैर्न धौतः,**
**प्रमादपङ्कः, स कथं शिवेच्छुः ? ।**
**रसायनैर्यस्य गदाः क्षता नो,**
**सुदुर्लभं जीवितमस्य नूनम् ।।८.१.२।।**

**धनवि.**–अथ शास्त्रश्रवणेऽपि यः प्रमादं न त्यजति, तं प्रत्युपदिशति–'यस्यागम' इति–**यस्य** पुरुषस्य, **आगमाम्भोदरसैः**-सिद्धान्तरूपमेघपानीयैः, **प्रमादपङ्कः**-प्रमाद एव-अज्ञान १ संशय २ विपर्यय ३ राग ४ द्वेष ५ स्मृतिभ्रंश ६ योगदुष्प्रणिधान ७ धर्मानादर ८ भेदादष्टविधो, मद्यादिः पंचविधो वा, [पङ्कः] कर्दमो **न धौतो**-न क्षालितः, **स** पुरुषः **कथं**-केन प्रकारेण **शिवेच्छुः ?** - मोक्षस्पृहो भवति, अत्र शिवमिच्छतीति शिवेच्छुः । उक्तमेवार्थं दृष्टान्तेन दर्शयति-**यस्य** पुरुषस्य **रसायनैः**-पक्वपारद-सुवर्णभस्मादिभिः सिद्धरसैर्**गदा**-राजयक्ष्मादयो रोगा **नो** क्षताः-न क्षयं प्राप्ताः, तदा **नूनं**-निश्चितम्, **अस्य** रोगिणो **जीवितं**-प्राणधारणं **सुदुर्लभं**-सुष्ठु-अतिशयेन दुर्लभं-दुष्प्रापं भवतीति ।।८.१.२।।

**रत्न.**–अथागमस्योपमादानेन माहात्म्यं दर्शयति –

**यस्यागमाम्भोदरसैर्...**इति., व्याख्या-यस्यात्मन आगमा-आप्तोक्तयः एवाम्भोदाः, तेषां रसैः-जलैः शान्तरसैर्वा करणैः, प्रमादो मद्यादिः, स एव पङ्कः-कर्दमो न धौतो-न क्षालितः, स कथं शिवं-मोक्षमिच्छतीति शिवेच्छुः ?, अथवा शिवं-

कल्याणमिच्छतीति शिवेच्छुर्भवति, चलन् सन् पङ्के निमज्जत्येव, अपि तु न भवति, दृष्टान्तदानेन तत् समर्थयति-रसायनैः-अनेकौषधमिश्रीकृतदग्धसुवर्णादि-धातुचूर्णैर्यस्य गदा-रोगा नो [1]**क्षिताः**-न क्षयं नीता अस्य पुंसो नूनं-निश्चितमथवा नूनमिति संभावने, जीवितं सुदुर्लभम्-अतिदुर्लभमित्यर्थः । [2]अत्र सिद्धान्तानां रसायनोपमानं प्रमादपङ्कस्य गदोपमानं, सिद्धान्तपक्षे रस्यन्ते-चर्व्यन्ते सामाजिकैरिति, रसाः-शृङ्गारादयो नव, सामान्यत उक्तावपि, अत्र मुख्यत उपदेश्यत्वाच्छान्तरस एव ग्राह्यः तेषां, सिद्धान्तपक्षे प्रमादात् पङ्कः-पापमिति व्याख्येयम् ।।८.१.२।।

**[१९७] अधीतिनोऽर्चादिकृते जिनागमः,**
**प्रमादिनो दुर्गतिपापतेर्मुधा ।**
**ज्योतिर्विमूढस्य हि दीपपातिनो,**
**गुणाय कस्मै शलभस्य चक्षुषी ? ।।८.१.३।।**

**धनवि.**—अथ जनेभ्यः पूजाप्राप्त्यर्थं शास्त्राध्ययनं फलवन्न भवतीति दर्शयन्नुपदिशति —

'अधीतिन' इति—**अर्चादिकृते**-पूजा-प्रतिष्ठाद्यर्थमादिपदादन्नाद्यर्थम्, **अधीतिनः**-अध्ययनशीलस्य **प्रमादिनः**-प्रमादपरवशस्य जन्तो**र्दुर्गतिपापतेः**-भृशं दुर्गतिपतनशीलस्य, **जिनागमो**-भगवत्सिद्धान्तो **मुधा**-निष्फलो भवति, अत्र पापतेरिति पतधातोर्यङि'ङौ सासहि वावहि चाचलि पापतिः' [सि. हे. ५-२-३८] इति सूत्रेण षष्ठ्यां साधुः, उक्तमर्थं दृष्टान्तेन दृढयति-**हि**-यतो **ज्योतिर्विमूढस्य**-दीपदीप्तिमोहितस्य **दीपपातिनः**-प्रदीपान्तःपतनशीलस्य **शलभस्य**-पतङ्गस्य **चक्षुषी**-नेत्रे **कस्मै ?** - किंनाम्ने **गुणाय**-स्वोपकाराय भवत इति, काकूक्त्या न कस्मैचिदुपकारायेत्यर्थः ।।८.१.३।।

**रत्न.**—अथाधीतिनोऽप्यध्ययनं वृथेति दर्शयति —

---

१. टी.पा.-क्षिताः-'अत्र क्षि[मृ]क्षमे. हे.धा.१०.। धनवि.क्षताः, अत्र क्षण्[क्षणृ]हिंसायां हे.धा.१५.१ विद्यते ।
२. इत आरभ्य पद्यान्तं यावद् वृत्तिशेषः ह.प्र.मध्ये नास्ति० सं. ।

**अधीतिनोऽर्चादिकृते जिनागम,** इति., व्याख्या-अर्चादीनां-पूजादीनां कृते-प्रयोजनाय, अधीतिनः-अध्ययनवतः साधो-र्जिनागमो मुधा, जिनागम इत्युक्तेऽपि कारणे कार्योपचाराज्जिनागमस्याधीतिर्वृथेति । यतः किंभूतस्य ? - प्रमादवतो-निद्रादिप्रमादवतः, अत एव किंभूतस्य ? - अतिशयेन दुर्गतौ पततीति दुर्गतिपापतिस्तस्य, यङ्लुपि प्रयोगोऽयं, एतदेव निदर्शनविषयीकुरुते-शलभस्य-पतङ्गस्य चक्षुषी-नेत्रे कस्मै गुणाय स्याताम् ?, अपि तु न कस्मैचिद् गुणाय, प्रत्युताहितायेति । यतः किंलक्षणस्य ? - ज्योतिभिरर्थाद् दीपसम्बन्धिभिर्विमूढस्य-विमोहं प्राप्तस्य, अत एव दीपे पततीत्येवंशीलो दीपपाती तस्य, अत्रार्चादिकृते अधीतिनो ज्योतिर्विमूढस्य शलभस्योपमानं दुर्गतिपतनस्य च दीपपातोपमानमित्युप-मानोपमेयभावो योजनीयः ।।८.१.३।।

**[१९८] मोदन्ते बहुतर्कतर्कणचणाः केचिज्जयाद् वादिनां,**
**काव्यैः केचन कल्पितार्थघटनैस् तुष्टाः कविख्यातितः ।**
**ज्योति-र्नाटक-नीति-लक्षण-धनुर्वेदा-ऽऽदिशास्त्रैः परे,**
**ब्रूमः प्रेत्यहिते तु कर्मणि जडान् कुक्षिंभरीनेव तान् ।।८.१.४।।**

**धनवि.**—अथ धर्मशास्त्राध्ययनातिरिक्तं शास्त्राध्ययनं परलोकहितं न भवतीत्युपदिशति —

'मोदन्ते' इति—ये **केचिन्नरा वादिनां जयात्**-परवादिविजयात्, **मोदन्ते**-हृष्यन्ति, कथंभूता ? - बहवो-भूयांसश्च ते तर्काश्च-अनिष्टप्रसञ्जनरूपाः प्रमाणादिपदार्थरूपा वा, तेषां तर्कणं-विचारणं, तेन प्रसिद्धा **बहुतर्कतर्कणचणाः**-'तेन वित्ते चञ्चु-चणौ'इति [सि.हे.७-१-१७५] तद्धितसूत्रेण चणप्रत्यये साधुः, **च** पुनर्ये **केचन कल्पितार्थघटनैः काव्यैः** करणभूतैः, **कविख्यातितो**-नवनवकाव्यकर्तृत्वप्रसिद्धितस्, **तुष्टाः**-सन्तोषवन्तः सन्तो मोदन्ते, च **पुनर्ज्योति**श्च-ज्योतिःशास्त्राणि **बृहज्जातका**दीनि, **नाटका**नि च-नाटक-शास्त्राणि **भरत-पिंगलादी**नि, **नीतयश्च**-नीतिशास्त्राणि **चाणाक्य-पञ्चाख्याना**दीनि, **लक्षणानि** च-लक्षणशास्त्राणि **पाणिनीयादि**व्याकरणानि सामुद्रिकशास्त्राणि वा, **धनुर्वेदा**श्च-धनुर्वेदशास्त्राणि **द्रोणाचार्य**प्रभृतिकलाचार्य-

विरचितानि, तान्यादौ येषां तानि तथा तानि च तानि शास्त्राणि च तानि तथा **तैर्ज्योति-र्नाटक-नीति-लक्षण-धनुर्वेदा-ऽऽदिशास्त्रैः,** अत्रादिपदाद् ब्रह्मयामल-रुद्रयामल-वास्तुशास्त्र-कात्यायन-वात्स्यायन-शकुनशास्त्रैः **परे**-तदितरे ये केचन नरा मोदन्ते, **तु** पुनः परं **तान् प्रेत्यहिते**-परलोकहिते **कर्मणि**-संयमलक्षणे कार्ये **जडान्**-तत्समाचरणपरिज्ञानविकलान् तर्कशास्त्रादिनिपुणान् नरान् **वयं कुक्षिंभरीनेव**-स्वोदरपूरकानेव **ब्रूमः**-कथयामः, नन्वत्र ब्रूम इति बहुवचनान्तप्रयोगो महामुनीनाम-हङ्कार-विरहितानां प्रयोगानर्हः, कथमत्र प्रयुक्त इति चेत् ?, न, अत्र ग्रन्थकृता बहुवचनप्रयोगस्य सुविहितत्वेन शुद्धप्ररूपकत्वेन समानधर्माणामेकवाक्यतासूचनार्थं प्रयुक्तत्त्वादिति ।।८.१.४।।

**रत्न.**—अथ तत्त्वज्ञानमन्तरेण यदधीतं तद् वृथेति दर्शयितुमाह[1] —

**मोदन्ते** इति., व्याख्या-केचिदात्मानं पण्डितम्मन्या वादिनां-प्रतिवादिनां जयाद् मोदन्ते-हृष्यन्ति, किंलक्षणाः ? - बहवस्तर्काः-षोडश पदार्थाः प्रमाण-प्रमेयादयः, सप्त पदार्था वा द्रव्यादयः, तेषां तर्कणं-विचारणं, तत्र चणाः[2]-विदितास्ते बहुतर्कतर्कणचणाः, अत्र चणप्रत्यये सति 'जसि चणा' [ ] इति जातं, तथा केचन कविषु प्रसिद्धिस्तस्याः-कविख्यातितस्तुष्टाः-तोषं प्राप्ताः, कैर्हेतुभिः ? - काव्यैः-काव्ययोजनैः, नवीनकाव्य-करणैरित्यर्थः, काव्यानि रघुकाव्यादीनि, तेषां पठनपाठनादिभिर्वा, किंलक्षणैः ? - कल्पिताः-स्वमत्युत्प्रेक्षिता येऽर्थाः, तेषां घटना-रचना येषु तैः, परे-अन्ये केचन ज्योतिश्च नाटकं च नीतिश्च लक्षणं च धनुर्वेदश्च ज्योति-र्नाटक-नीति-लक्षण-धनुर्वेदाः, ते आदौ येषां तानि ज्योति-र्नाटक-नीति-लक्षण-धनुर्वेदादीनि तानि च तानि शास्त्राणि च ज्योति-र्नाटक-नीति-लक्षण-धनुर्वेदादिशास्त्राणि, तैस्तुष्टाः, ज्योतिः-ज्योतिःशास्त्रं, नाटकशास्त्रं नाटकं, नीतिः-नीतिशास्त्रं चाणाक्यादि, लक्षणं-सामुद्रकमश्वगज-लक्षणशास्त्रं च धनुर्वेद-आयुधाभ्यासशास्त्रं, आदिशब्दाच्छकुनि-रुतादि गृह्यते, तान् सर्वान् वयमध्यात्म-शास्त्रविदः कुक्षिंभरीनेव ब्रूमः, यतः किंलक्षणान् ? - जडान्-

१. दर्शयितुकाम आह - मु. । २. 'तेन वित्ते चञ्चु-चणौ' [सि.हे.७/१/१७५] इति सूत्रेण केनचिद् विषयेन - या प्रसिद्धिः, तदर्थसूचायै प्रत्ययाविमौ ।

मूर्खान्, कस्मिन् ? - कर्मणि, किंलक्षणे ? प्रेत्य-परलोके हिते-हितकारिणि ।।८.१.४।।

**[१९९] किं मोदसे पण्डितनाममात्राच्-**
**-छास्त्रेष्वधीती जनरञ्जकेषु ।**
**तत् किञ्चनाधीष्व कुरुष्व चाशु,**
**न ते भवेद् येन भवाब्धिपातः ।।८.१.५।।**

**धनवि.**–अथ सकलशास्त्राध्ययनापेक्षया धर्मशास्त्राध्ययनस्यैव प्राधान्यं दर्शयन्नुपदिशति –

'किं मोदसे' इति–हे आत्मन् ! **जनरञ्जकेषु**-लोकचमत्कारकारिषु ज्योतिः-शकुन-निमित्तादि**शास्त्रेषु** अधीतमनेनाधीती-अध्ययनशीलः संस्त्वं **किं मोदसे**-हृष्यसि ?, कुतो ? - नामैव नाममात्रं परमार्थतोऽर्थशून्यं, पण्डित इति नाममात्रं पण्डितनाममात्रं तस्मात् **पण्डितनाममात्राद्,** इति; हे आत्मन् ! त्वं **किञ्चन** धर्मशास्त्रम्, **अधीष्व**-अध्ययनविषयीकुरुष्व, च पुनरध्ययनानन्तरं, तत् किञ्चन तपः-संयमादिकम्, **आशु**-शीघ्रं **कुरुष्व येन** अध्ययनेन तपः-संयमादिना च **ते**-तव **भवाब्धिपातः**-संसारसमुद्रपतनं न स्यादिति, अत्र' **अधीती** इतिप्रयोगः 'इष्टादेः'इति [सि.हे.७-१-१६८] तद्धितसूत्रेण इञ्प्रत्यये साधुः ।।८.१.५।।

**रत्न.**–पुनस्तदेव दृढयति –

**किं मोदसे** इति., व्याख्या-हे विद्वन् ! पण्डितस्य नाम पण्डितनाम केवलं पण्डितनाम पण्डितनाममात्रं, तस्मात् पण्डितनाममात्रात् त्वं किं मोदसे ? - हर्षं प्राप्नोषि ?, अपि तु मा मोदस्व, यतः त्वं किंलक्षणः ? - अधीती-अध्ययनवान्, केषु ? - शास्त्रेषु, किंलक्षणेषु-जनानां रञ्जकानि-मनआह्लादकारीणि काव्य-नाटक-वसंतराजादीनि तेषु, परं तत् किञ्चन शास्त्रमधीष्व-पठ, च पुनस्तच्छास्त्रज्ञानं कुरुष्व, कथं ? - आशु शीघ्रं, येनाधीतेन येन कर्मणा च ते-तव भवाब्धिपातो-भवसमुद्रपतनं न भवेद्, एतेन जिनागममधीष्व तदुपदिष्टं

च कुरुष्वेति सूचितमिति[1] ।।८.१.५।।

**[२००] धिगागमैर्माद्यसि रञ्जयन् जनान्,**
**नोद्यच्छसि प्रेत्यहिताय संयमे ।**
**दधासि कुक्षिंभरिमात्रतां मुने !,**
**क्व ते ? क्व तत् ? क्वैष च ते भवान्तरे ? ।।८.१.६।।**

**धनवि.**—अथागमाध्येतॄन् संयमाऽनुद्यतान् तिरस्कारपुरस्कारेणोपदिशति – 'धिगागमैर्' इति—हे **मुने ! त्वां धिग**स्तु, अत्र यत इति गम्यं, तेन यतः कारणाद्, **आगमैः**-सिद्धान्ताध्ययनै**र्जनान्**-लोकान् **रञ्जयन्**-रङ्गमुत्पादयन् **माद्यसि**-मदवान् भवसि, यच्च **प्रेत्यहिताय**-परलोकसुखार्थं **संयमे**-चारित्रे **नोद्यच्छ**सि-नोद्यमं कुरुषे, ततः कारणात्, त्वं **कुक्षिंभरिमात्रतां**-स्वोदरपूरकतामेव **दधासि**-धरसि; परं **भवान्तरे**-परभवे **ते** आगमाः, ते-तव **क्व** भविष्यन्ति ?, **च** पुन**स्तत्** प्रेत्यहितं **ते**-तव क्व भविष्यति ?, च पुनर **एष** संयमस्ते-तव क्व भविष्यतीति ?, नन्वत्र धिगिति तिरस्कारवचनं, तच्च धर्मशास्त्रे धर्मोपदेशे च न युज्यत इति चेत् ? न – [श्राद्धदिनकृत्ये]

**[२०१]** रूसउ वा परो मा वा, विसं वा परिअट्टओ ।
भासिअव्वा हिया भासा, सपक्खगुणकारिया ।।[२११]।। इति वचनात्

स्ववर्गस्य शिष्यवर्गस्येव पुत्रस्येव वा तिरस्कारपूर्वकं हितोपदेशस्य युक्तत्वादिति ।।८.१.६।।

**रत्न.**—अथ क्रियां विना केवलं जिनागमाध्ययनं वृथेति सूचयति –

**धिगागमैः**-इति., व्याख्या-हे मुने ! - हे यते ! त्वां धिगस्तु, यतस्त्वमागमैः-जिनागमाध्ययनैरित्यर्थः जनान् रञ्जयन् माद्यसि-मदं प्राप्नोषि, हर्षं प्राप्नोषीत्यर्थः, यतश्च प्रेत्य-परभवे हितार्थं त्वं संयमे-चारित्रे न उद्यच्छसि-नोद्यमं करोषि, ततस्त्वं कुक्षिंभरिमात्रतां दधासि-धत्से, परं भवान्तरे ते-तव ते जिनागमाः क्व? एतज्जनरञ्जनं क्व ? एष संयमः-चारित्रं क्व ?, अत्र त्रयोऽपि क्वशब्दा

१. सूचनमिति - मु० ।

अत्यन्तासङ्गतिवाचकाः, तेन भवान्तरे एते त्रयोऽपि न सन्तीत्यर्थः ।।८.१.६।।

**[२०२] धन्याः केऽप्यनधीतिनोऽपि सदनुष्ठानेषु बद्धादरा-**
**दुस्साध्येषु परोपदेशलवतः श्रद्धानशुद्धाशयाः ।**
**केचित् त्वागमपाठिनोऽपि दधतस् तत्पुस्तकान् येऽलसाः,**
**अत्रामुत्र हितेषु कर्मसु कथं ते भाविनः प्रेत्यहाः ? ।।८.१.७।।**

**धनवि.**—अथ केवलशास्त्राध्ययनात् सम्यक् श्रद्धानसहितशास्त्रोक्तानुष्ठानाचरणस्याधिक्यं दर्शयन्नाह —

धन्या इति,-ते पुरुषा **धन्याः**-पुण्यवन्तो भवन्ति, ये **केऽपि परोपदेशलवतः**-सुगुरुपदेशात्, **श्रद्धानशुद्धाशयाः**-सम्यक्त्वनिर्मल-चित्ताः सन्तः, **अनधीतिनोऽपि**-अपठिता अपि, **दुस्साध्येषु**-दुर्द्धरेषु **सदनुष्ठानेषु**-प्रधानक्रियासु तपः-संयमादिक्रियासु **बद्धादराः**-सुबद्धकच्छा भवन्ति । **तु** पुनर्ये **केचिदागमपाठिनोऽपि**-जैनशास्त्राध्येतारोऽपि **च** पुन**स्तत्पुस्तकान्**-जैनागमपुस्तकान् **दधतोऽपि**-धरन्तोऽपि, **अत्र**-इह लोके, **अमुत्र**-परलोके **हितेषु**-सुखकारिषु **कर्मसु**-तपः-संयमादिकार्येषु, **अलसाः**-प्रमादिनो भवन्ति, **ते** पुरुषाः **प्रेत्यहाः**-परलोकहितहन्तारः, **कथ ?** - केन प्रकारेण परलोके सुखिनो भविष्यन्तीति ।।८.१.७।।

**रत्न.**—अथाल्पाध्ययनेऽपि क्रियाया उत्कर्षं दर्शयति —

**धन्याः 'केऽपि'** इति., व्याख्या-केऽप्यनधीतिनोऽपि-नञोऽगाल्यार्थकात्वादल्पपाठिनोऽपि, धन्याः-सुकृतिनः, यतः किंलक्षणा ? - बद्ध आदरो यैस्ते, केष ? - सन्ति-शोभनानि अनुष्ठानानि-क्रियाविशेषाः, तेषु, किंलक्षणेषु ? - दुस्साध्येषु-निःसत्त्वजनैर्दुःखेन कर्त्तव्येषु, किंलक्षणाः ? - श्रद्धानं-सम्यक्त्वं तेन शुद्धो-निर्मलः कदाग्रहरहित इत्यर्थः आशयः-चित्ताभिप्रायो येषां ते, कस्मात् ? - परेभ्यः-सुविहितशुद्धप्ररूपकगीतार्थेभ्यः उपदेशस्य लवः-कणः, तस्मात् परोपदेशलवतः, परोपदेशलवं प्राप्येत्यर्थः, अत्र यब्लोपे पञ्चमी ज्ञेया[1] तुरिति[2] विशेषे, केचिदागमपाठिनोऽपि साधवः **अत्र**-इह लोके, अमुत्र-परलोके, हितेषु-हितकारिषु कर्म-

१. अत्र 'गम्य-यपः कर्माऽऽधारे 'इति [सि.हे.२.२.७४] सूत्रमनुसन्धेयम् । २. नु इति टीकापाठान्तरः ।

जप-तपः-क्रियासु अलसाः-शीतकाः सन्ति, प्रमादिनः सन्तीत्यर्थः, किं कुर्वन्तो? - दधतः, कान् ? - तेषामागमानां पुस्तकान्, अनेन क्रियाशैथिल्येऽपि बहुपुस्तक-सङ्ग्रहित्वं सूचितमिति । [१]हा इति खेदे, ते नामसाधवः, प्रेत्य-परभवे किं भाविनः ? - किं भविष्यन्ति, किंशब्दस्य काकुध्वनिव्याख्यानेन महादुःखिनो भाविन इति सूचनमिति ।।८.७।।

**[२०३] धन्यः स मुग्धमतिरप्युदितार्हदाज्ञा-**
**रागेण यः सृजति पुण्यमदुर्विकल्पः ।**
**पाठेन किं व्यसनतोऽस्य तु दुर्विकल्पैर्-**
**यो दुःस्थितोऽत्र सदनुष्ठितिषु प्रमादी ? ।।८.१.८।।** इति वा पाठः।

**धनवि.**–अनन्तरोक्तमेवार्थं बहुवचनगर्भं पाठान्तरेणैवैकवचनगर्भं दर्शयति –

'धन्य' इति–**स** पुरुषो **मुग्धमतिरपि**-शास्त्राध्ययनाद्यसंस्कृतबुद्धिरपि, **धन्यः**-पुण्यवान् भवति, उदित-उत्पन्नो योऽसौ, **अर्हतां**-तीर्थकृताम्, **आज्ञा**-वचनानि तेषु **रागो**-भक्तिविशेषः - "तमेव सच्चं निस्संकं जं जिणेहिं पवेइयं" इतिरूपः, तेन-**उदितार्हदाज्ञारागेण, यः** पुमान् **अदुर्विकल्पः**-शङ्काऽऽकाङ्क्षादि-दुष्टविकल्परहितः, **पुण्यं**-तपः-संयमादिकं **सृजति**-करोतीत्यर्थः, **तु** पुनर्-**अस्य** पुरुषस्याग्रे यच्छब्दाभिधेयस्य, **व्यसनतः**-अत्यासक्तितः **पाठेन**-शास्त्राध्ययनेन, **किं** फलं स्यादिति काकूक्त्याऽन्वयः, यः पुमान्, **अत्र**-जगति **दुर्विकल्पैः**-दुश्चिन्तनैः करणभूतैर्**दुःस्थितो**-दुःस्थावस्थां प्राप्तः सन् **सदनुष्ठितिषु**-षडावश्यकादिसदनुष्ठानेषु **प्रमादी**-अलसः स्यात् ? ।।८.१.८।। उक्तस्यैव पद्यस्य पाठान्तरं दर्शयति-**इति वा पाठ** इति स्पष्टम् ।

**रत्न.**–पुनरर्थान्तरेण तदेव दृढयति –

**धन्यः स मुग्धमति**रिति. व्याख्या-स पुमान् [२]मुग्धा-असदाग्रहरहिता मतिर्यस्य

१. हा इति एदर्थ-अव्यय इति व्याख्याति. - अतः 'प्रेत्य हा' इति टीकापाठान्तरः संभावनीयः ।

२. धनवि. 'अत्र' मुग्ध-इति शास्त्राध्ययनाद् असंस्कृता इति अत्र 'जडधीत्वमिति भावः व्याख्याति रत्नवि.-तु-मुग्धा=असदाग्रहरहिता इति व्याख्याति - अत्र 'सरलधीत्वमिति भावः ।

→ स मुग्धमतिरपि, अल्पाध्ययनेऽपि ऋजुमतिरित्यर्थः, धन्यः-सुकृती, सः कः ? उदिता-कथिताऽर्हतां-तीर्थंकराणामाज्ञा, तस्यां रागेण-प्रेम्णा, माऽर्हदाज्ञाभङ्गोऽस्त्विति प्रेम्णेत्यर्थः । पुण्यं सृजति-करोति । विशेषणेन मुग्धमतित्वं दर्शयति-यतः किंलक्षणाः ? - न विद्यन्ते दुः-दुष्टा विकल्पाः-चित्ताभिप्राया यस्य सः, [1]तुरिति विशेषे → पुनरस्य [2]मुग्धमतिविपरीतस्यासद्ग्रह-ग्रस्तस्येत्यर्थः, पाठेन-अध्ययनेन किं स्याद् ? - न किमपीत्यर्थः, कस्यचिदैहिक-पूजासत्कारादिस्पृहयालुत्वादध्ययने आसक्तिर्वर्त्तते, तेनाध्ययनं करोति, परं तस्याध्ययनं न किञ्चिदित्यर्थः, एतदेव हेतुदर्शनेन द्रढयति-व्यसनतः-सप्तव्यसनेभ्यो दुर्विकल्पैः-कं केन काव्यादिना रञ्जयामि ?, कस्य पार्श्वे किं गृह्णामि, कं च कां च व्यामोहयामीति चित्ताभिप्रायजालैरित्यर्थः, अत्र-इह लोके दुःस्थितः-तादृगिष्टवस्त्वप्राप्त्या दुःखितो वर्त्तते, अत एव किंलक्षणः ? - प्रमादी-प्रमादवान्, कासु ? - सदनुष्ठितिषु-[3]शोभनानुष्ठानेष्विति ।।८.८।। इति वा पाठः-पूर्वोक्तस्यैव काव्यस्य पाठान्तरमित्यर्थः।।

**[२०४] अधीतिमात्रेण फलन्ति नागमाः,**
**समीहितैर्जीव ! सुखैर्भवान्तरे ।**
**स्वनुष्ठितैः किन्तु तदीरितैः खरो,**
**न यत् सिताया वहनश्रमात् सुखी ।।८.१.९।।**

**धनवि.**—अत्र शास्त्राण्याश्रित्योपदेशमुपसंहरन् केवलस्याध्ययनस्य जन्मान्तरीय-सुखं प्रति कार्यकारणभावेऽन्वय-व्यतिरेकाभ्यां व्यभिचारं दर्शयन्नुपदिशति —

'अधीतिमात्रेण' इति—हे **जीव !** - प्राणिन् **आगमाः**-सिद्धान्ता **अधीतिमात्रेण**-केवलाध्ययनेन, **भवान्तरे**-परभवे **समीहितैः**-वाञ्छितैः सुखैः स्वर्गापवर्गजैर्न **फलन्ति**-न सफला भवन्ति, अयमन्वयव्यभिचारः अध्ययनसत्त्वे फलासत्त्वात्, अत्रापि मात्रशब्दोऽध्ययन-व्यतिरिक्तक्रियादिप्रतिषेधवाचकः; **किंतु तदीरितैः**-आगमप्रतिपादितैः **स्वनुष्ठितैः**-शोभनानुष्ठानैरागमाः फलन्ति, अयं व्यतिरेकव्यभिचारः, अध्ययनासत्त्वे

१. अत्रापि टी.पा. विद्यते । २. '→ .....←अनयोर्मध्यगतः पाठः ह. प्र. मध्ये नास्ति ।
३. सदनुष्ठा० मु० ।

फलसत्त्वात्; अत्र दृष्टान्तमाह-**यद्**-यस्मात् कारणात् **सितायाः**-शर्कराया **वहनश्रमाद्**-उत्पाटनपरिश्रमात् खरो-गर्दभः **सुखी**-सुखवान् न स्यादिति, यदुक्तम् –

**[२०५]** "जहा खरो चंदणभारवाही, भारस्स भागी न हु चंदणस्स ।
एवं खु नाणी चरणेण हीणो, नाणस्स भागी न हु सुग्गईए ।।[उप.४२६]।।"

इति शास्त्रनाम्नि षोडशपद्ये, अष्टमद्वारे नव पद्यैः केवलशास्त्राण्याश्रित्योपदेशमयं प्रथमं प्रतिद्वारम् । इति ।।८.१.९।।

**रत्न.–'अधीतिमात्रेण'** इति, व्याख्या-हे जीव ! - हे आत्मन् ! केवलमधीतिः-अध्ययनं अधीतिमात्रं तेन, क्रियारहिताध्ययनेनेत्यर्थः, आगमा न फलन्ति, कैः? - कस्मिन् ? - भवान्तरे सुखैः, किंलक्षणैः ? - समीहितैः-वाञ्छितैर्मोक्षसुखैरित्यर्थः, मोक्षसुखरूपफलप्रदायिनो न भवन्ति, किन्तु इतिविशेषे, तैरागमैरीरितैः-कथितैः, स्वनुष्ठितैः-सदनुष्ठानैः कृतैः, सद्भिः आगमाः फलन्ति, यथाऽऽम्रादयो वृक्षाः आम्रादिभिः फलैः फलन्ति, तथाऽऽगमाः सुखैरेव फलैः फलन्तीत्यर्थः । तत्रार्थे दृष्टान्तमाह-यद्-यस्मात्, खरो-रासभः, सितायाः-शर्करायाः वहनश्रमाद्-उत्पाटनक्लमान्न सुखी स्यात्, क्रियाहीनस्य केवलाधीतिनः खरोपमानं, आगमस्य सितोपमानं, यथा सिताया वहनश्रमः, तथा आगमस्य पठन-पुस्तकवहनश्रम इति ।।८.९।।

**[२०६]** श्री**शान्तिचन्द्र**वरवाचकदुग्धसिन्धु-
लब्धप्रतिष्ठवरवाचक**रत्नचन्द्रः** ।
अध्यात्म-फलदस्य चकार वृत्तिं,
तत्राष्टमोऽर्थविषयत्वमितोधिकारः ।।८[१]।।

---

इत्यष्टमोऽधिकारः संपूर्णः ।।

---

१. धनवि.-टीकायां अष्टमेऽधिकारे द्वे प्रतिद्वारे स्तः, तत्र ९२ पद्यादारभ्य-१०० तम पद्यं यावत् प्रथमं प्रतिद्वारं, द्वितीयं च १०१ तः-१०७ तमं यावत्, किन्तु रत्नवि. टीकायां अष्टमोधिकारः ९२तम पद्यतः - १०० तमे पद्ये पूर्णो भवति, १०१ पद्यतः १२४ पद्ये नवमोधिकारः पूर्यते, धनवि.टीकायां तु नवमोधिकारः १०८-१२४ तमेषु पद्येषु, अतः द्वयोरधिकारयोरयं भेदो वृत्तिकृतो विवक्षया इति समाधानमाधेयम्, अतोऽस्माभिरपि - अथ अधिकारपद्यसङ्ख्या वृत्तिकृतोऽभिप्रायेण कृता- (सं.)

## अथ चतुर्गतिमाश्रित्य-द्वितीयं प्रतिद्वारम्

**[२०७] दुर्गन्धतो यदणुतोऽपि पुरस्य मृत्यु-**
**रायूंषि सागरमितान्यनुपक्रमाणि ।**
**स्पर्शः खरः क्रकचतोऽतितमामितश्च,**
**दुःखावनन्तगुणितौ भृशशैत्य-तापौ ।।८.२.१।।**

**[२०८] तीव्रा व्यथाः सुरकृता विविधाश्च यत्रा-**
**ऽऽक्रन्दारवैः सततमभ्रभृतोऽप्यमुष्मात् ।**
**किं भाविनो न नरकात् कुमते ! बिभेषि ?,**
**यन्मोदसे क्षणसुखैर्विषयैः कषायी ।।८.२.२।।**

'युग्मं'

**धनवि.–अथ चतुर्गत्याश्रितोपदेशः** - अथ शास्त्रद्वारे एव शास्त्रोपदिष्टचतुर्गत्याश्रितोपदेशाख्यं प्रतिद्वारं वक्तुकाम आह - अथेति शास्त्राण्याश्रित्योपदेशानन्तरं शास्त्रोक्तचतुर्गत्याश्रितोपदेशः कथ्यत[1] इत्यक्षरार्थः, तत्र प्रथमं पद्यद्वयेन शास्त्रोक्तं नरकगतिस्वरूपं दर्शयन्नुपदिशति –

'दुर्गन्धतः' इति **यस्य** नरकस्य, अणुतोऽपि-परमाणुकणोपमितादपि [यदणुतोपि] **दुर्गन्धतो**-दुरभिगन्धतो-ऽहिमृतकादिस्वरूपतः, **पुरस्य**-लक्षणया मनुष्यलोकसम्बन्धि-सकलनगरलोकस्य **मृत्युः**-मरणं भवति, च पुनर्यत्र नरके **अनुपक्रमाणि**-निरुपक्रमाणि **सागरमितानि**-दशकोटाकोटिपल्योपमरूपसागरोपम-प्रमाणानि अर्थादुष्कृष्टतस्त्रय-स्त्रिंशत्सागरोपम-प्रमितानि, **आयूंषि**-जीवितानि सन्तीति, च पुनर्यत्र नरके **स्पर्शः**-स्पर्शनेन्द्रियग्राह्यो गुणः, **क्रकचतो**ऽपि-करपत्रस्पर्शादपि, **अतितमाम्**-अतिशयेन **खरः**-कर्कशो भवतीत्यर्थः, च पुनर्यत्र नरके **दुःखौ**-दुःखोत्पादकौ, इतो-मनुष्यलोकगतशैत्यतापाद्, **अनन्तगुणितौ**-अनन्तनामकगुणकारेण गुणितौ **भृशम्**-अत्यर्थं **शैत्य-तापौ** स्तः ।

---

१. इत्यर्थः मु० ।

किञ्च-अत्र शैत्य-तापस्वरूपं श्री**जीवाभिगमतृतीयपदद्वितीयोद्देशकप्रदर्शित-दृष्टान्तचतुष्टयेनावसेयं,** तद्यथा- १. केनचित् समर्थेन दक्षेण लोहकारपुत्रेण पक्षं यावत् पुनः पुनः ध्माते कुट्टिते घटप्रमाणे लोहगोलके नरकशीतभूमौ मोचिते, एकेनैव मेषोन्मेषान्तरेण पुनरुद्धर्तुमीप्सिते स लोहकारस्तं लोहगोलकं नरकभूमिगतशैत्येन द्रुतमेव विलीनमेव पश्यति, इतोऽपि शैत्यादधिकतरं शीतं नरके इति शैत्यदृष्टान्तः । २. अथ तेनैव लोहकारेण मासं यावत् पुनः पुनर्ध्माते कुट्टिते पुनः शीतीकृते च लोहगोलके उष्णनरकभूमौ मोचिते मेषोन्मेषान्तरेण पुनरुद्धर्तुमीप्सिते नरकभूमि-गतोष्णत्वेन स तं विलीनमेव पश्यति, इतोऽप्यधिकतरमुष्णत्वं नरके इत्युष्णदृष्टान्तः । ३. पुनरत्रार्थे दृष्टान्तद्वयं, यथा मत्तो गजस्तृषाक्रान्तो दवाद् भीतस्तोयपूर्णां पुष्करिणीं प्राप्य यथा मोदते तथा शीतवेदनान्नरकादुद्धृतो नारकी मनुष्यसंबंधिनमतिशयेन शीतं हिमपुञ्जादिकं प्राप्य नरकगतौ शीतवेदनामपाकुर्वन् मोदते, इतोऽप्यधिकतरा नरकेषु शीतवेदना, इति शैत्ये हस्तिदृष्टान्तः । ४. एवमुष्णवेदनायां तथाविध एव हस्ती तथाविधां पुष्करिणीं प्राप्य यथा मोदते तथोष्णवेदनान्नरकादुद्धृतो नारकी मनुष्यलोक-सम्बन्धिनमत्युष्णं ताम्राद्याकरं प्राप्य नरकभूमिगततापमपाकृत्य मोदते, इतोऽप्यधिकतरोष्णवेदना नरकेषु इत्यादि । विस्तरार्थिभिर्ग्रन्थान्तरतोऽवसेयम् ।।८.२.१।।

**धनवि.—**'तीव्रा' इति-च पुन**र्यत्र** नरके **तीव्रा**-दुःसहाः **सुरकृताः**-परमाधार्मिक-देवकृता **विविधाः**-छेदन-भेदन-पचनादिका **व्यथाः**-पीडाः सन्ति,

अत्र परमाधार्मिककृता इत्युपलक्षणं, तेन — [बृहत्सङ्ग्रहण्याम्]

**[२०९]** "सत्तसु खित्तज-वेयण-अन्नुन्नकया वि पहरणेण विणा ।
पहरणकया वि पंचसु तिसु परमाहम्मियकया वि" ।। [२०६]।।

इत्यादिग्रहणं, **हे कुमते !** - हे कुबुद्धे ! **अमुष्माद्**-अनन्तरोदितस्वरूपात् **सततं**-निरन्तरम्, **आक्रन्दारवैः**-आक्रन्दशब्दैः, **अभ्रभृतः**-अभ्रं-नभोमार्गं भरति-पूरयतीत्यभ्रभृत् तस्मात्, तथा **भाविनो**-भविष्यतो **नरकाद्**-नरकगतेः, किमिति

प्रश्ने **नो बिभेषि ?** - नो भयं प्राप्नुषे इति काकूक्त्या, **यद्**-यस्मात्, त्वं **कषायी**-क्रोधादिमान् **क्षणसुखैः**-स्तोककालसुखै**र्विषयैः**-शब्दादिभि**र्मोदसे-हृष्यसि-**

अनन्तरोक्त-पद्यद्वयस्य युग्मरूपतां साक्षाद् दर्शयन्नाह-**युग्ममिति** ।।८.२.२।।

**रत्न.**–अथ चतुर्गतिमाश्रित्योपदेशाख्यो **नवमोऽधिकारः** प्रस्तूयते-तत्र तावत् प्रथमं नरकगतिमाश्रित्योपदिशति –

**दुर्गन्धतो यदणुतो-ऽपि,** इति, [तथा] **तीव्रा व्यथा.** इति च युग्मव्याख्या-यस्य नरकस्य-नैरयिकाणां वासक्षेत्रस्य, अणोः-परमाणोरपि दुर्गन्धतो-दुर्गन्धात् सकलस्य पुरस्य मृत्युर्भवति, पुरस्येत्युक्तेऽपि 'आश्रये आश्रयिण उपचारात्' पुरवासिजनो गृह्यते, एकवचनं तु जातिवाचकत्वात्, तर्हि यस्य सम्बन्धिनः पुद्गलस्कन्धस्य दुर्गन्धात् किमुच्यत इति ?, एतेन परमाणोरपि गन्धोत्कट्यं दर्शितं, तथा आयूंषि-जीवितानि सागरमितानि-सागरस्योपमानि सन्ति, यथा रत्नप्रभायामेकं सागरोपमं, सप्तम्यां त्रयस्त्रिंशत्सागरोपमाणि-इत्यादि **संग्रहणीसूत्र**तो ज्ञेयं, इह तु विस्तरभयान्न प्रतन्यते। तानि किंलक्षणानि ? विद्यन्ते उपक्रमा-अन्तरायुस्त्रुटिहेतवो येषु तानि, नारका देवाश्च निरुपक्रमायुष्का भवन्तीति, स्पर्शः खरः कर्कशः कथं ? - अतितमाम्-अतिशयेन, कुतः ? - क्रकचादिति-क्रकचतः करपत्रतः, च पुनर्-इतो-मनुष्यलोकाद् भृशशैत्य-तापौ भृशम्-अत्यर्थं शैत्यं च तापश्च, तौ अनन्तगुणितौ, दुःखयत इति दुःखौ-दुःखकारिणावित्यर्थः भवतः ।।९.१।।

अथ क्षेत्रवेदनामुक्त्वा परमाधार्मिकदेवकृतां वेदनामाह-च पुनस्तीव्रा व्यथाः-पीडाः सुरैः-परमाधार्मिकैः कृता भवन्ति, किंभूता ? - विविधा-नानाप्रकाराः तप्तलोहपुत्रकालिङ्गनदापन-तप्तत्रपुपानकरण-वैतरणीयद्युत्तारणादिकाः । हे आत्मन ! - हे कुमते ! भाविनो-भविष्यतोऽमुष्मान्नरकात् किं न बिभेषि ? - भयं न प्राप्नोषि, अपि तु बिभीहि । किंलक्षणात ? - सततं-निरन्तरमभ्रम्-आकाशं बिभर्त्तीति अभ्रभृत् तस्माद्, आक्रन्दा-ऽऽवेदनयोगात् पूत्काराः, तेषां आरवाः-शब्दास्तैः, यद्-यस्मात् कारणात् त्वं विषयैः पञ्चभिः-शब्द-रूप-गन्ध-रस-स्पर्शैर्मोदसे-

हृष्यसि, किंलक्षणैः ? - क्षणं यावत् सुखयन्तीति क्षणसुखास्तैः, त्वं कीदृशः ? - कषायी-कषायवान् ।।९.२।।

**[२१०] बन्धोऽनिशं वाहन-ताडनानि,**
**क्षुत्-तृड्-दुरामा-ऽऽतप-शीत-वाताः ।**
**निजा-ऽन्यजातीयभया-ऽपमृत्यू,**
**दुःखानि तिर्यक्ष्विति दुःसहानि ।।८.२.३।।**

**धनवि.**–अथ शास्त्रोक्तं तिर्यग्गतिस्वरूपं दर्शयन्नुपदिशति –

'बन्ध' इति–**अनिशं**-निरन्तरं **बन्धो**-रज्ज्वादिभिर्नियन्त्रणं दुःखं भवति, च पुनरनिशं वाहनानि च रथ-जल-यन्त्र-तैल-यन्त्रादिषु योजनानि, ताडनानि च-कशा-ऽङ्कुश-प्राजनादिना प्रहारविषयीकरणानि, **वाहन-ताडनानि,** दुःखानि भवन्ति, च पुनः क्षुच्च-क्षुधा, तृट् च-तृषा, दुरामाश्च-दुष्टरोगाः - मुखपाक-पादपाक-कुष्ठादयः, आतपाश्च उष्णर्तुप्रभवाः, शीतानि च-शीतकालप्रभवाणि शैत्यानि, वाताश्च-वर्षाऋतुप्रभवाः पवनाः, **क्षुत्-तृड्-दुरामा-ऽऽतप-शीत-वाताः** दुःखानि भवन्ति, च पुन**र्यत्र निजान्यजातीयभयं** च-स्वजातीय-परजातीयजन्तुभ्यो भीतिः **अपमृत्युश्च**-गलमोडन-गलकर्त्तनादिनामरणं निजान्यजातीयभया-ऽपमृत्यू दुःखे भवतः, **इत्य**मुना प्रकारेणोक्तानि **तिर्यक्षु**-तिर्य्यग् गतिगतजन्तुषु **दुःखानि दुःसहानि**-दुःखेन सहनीयानि भवन्तीत्यर्थः ।।८.२.३।।

**रत्न.**–अथ तिर्यगा[1]श्रित्य दुःखानि दर्शयति –

**बन्धोऽनिशम्** इति. व्याख्या.-अनिशं-निरन्तरं बन्धो-बन्धनं, अनिशमिति सर्वत्र योज्यं, भवति, भवतो, भवन्ति चेति यथार्हं योजनीयम्, वाहनानि-अतिभारस्योत्पाटनानि रथादौ, कृषिकर्मणि योजनानि वा ताडनानि प्राजनकादिभिः तथा क्षुद्-बुभुक्षा, तृष्णा-तर्षा, दुष्टा आमा-रोगाः अतिभारवाहनसंजातव्रणादिकाः, तथा आतपः शीतं वातो-वायुः, तेषां इतरेतरद्वन्द्वः, तथा निजा-ऽन्यजातीयेभ्यो

१. तिर्यग्गतिमा० मु० ।

महिषाणां महिषेभ्यो, गजानां गजेभ्यश्चेत्यादि, अन्यजातीयेभ्यो गजानां सिंहेभ्यः, सिंहानां सरभेभ्यश्चेत्यादि भयं, तथाऽपमृत्युः-क्षुत्-तृड्-गाढवेदना-ऽऽक्रान्तत्वेन मरणं, तौ इति-अमुना प्रकारेण दुःखानि भवन्तीति योगः, किंलक्षणानि? - दारुणानि भयङ्कराणि केषु ? - तिर्यक्षु ।।९.३.।।

**[२११] मुधाऽन्यदास्या-ऽभिभवा-ऽभ्यसूया,**
**भियो-ऽन्त-गर्भस्थिति-दुर्गतीनाम् ।**
**एवं सुरेष्वप्यसुखानि नित्यं,**
**किं तत्-सुखैर्वा परिणामदुःखैः ? ।।८.२.४।।**

**धनवि.**—अथ शास्त्रोक्तं देवगतिस्वरूपं दर्शयन्नुपदिशति —

'मुधा' इति,-**मुधा**-उदरपूरणार्थरहितम्-**अन्येषां दास्यं**-किङ्करता, **अभिभवश्च**-देव्याः परबलवत्तर-देवैर्बलात्कारेण प्रविचारणादिः, **अभ्यसूया** च-अभि-सामस्त्ये-नासूया-परगुणासहनम्, **'असूयाऽन्यगुणदूषणम्** इति [अभि.चि.-३२३] वचनाद् मत्सर इत्यर्थः, **मुधाऽन्यदास्या-ऽभिभवा-ऽभ्यसूया** भवन्ति, च पुनर्-**अन्ते**-देवभव-स्थितिपर्यवसाने **यद् वाऽन्तश्च**-देवभवायुःपर्यवसानं, **गर्भस्थितिश्च**-मनुष्य-तिर्यक्स्त्रीणामुदरेषु गर्भत्वेनावस्थानं, **दुर्गतयश्च**-पृथिव्याद्येकेन्द्रियेषु गमनानि, **अन्तगर्भस्थिति-दुर्गतय**स्तासां[भियः भयानि]**एवम्**-अमुना प्रकारेणोक्तानि, **असुखानि**-दुःखानि **सुरेष्वपि**-देवगतिगतजन्तुष्वपि **नित्यं**-निरन्तरं भवन्ति, अत्र सुरेष्वपीत्यत्र अपिशब्दो, यदि सुरेष्वपि दुःखानि तदा नारकादीनां का वार्तेति सकलसंसारस्य दुःखमयत्वद्योतकः ।

ननु देवभवेषु सुखान्यपि बहूनि भवन्तीति किमल्पैरुपवर्णितैर्दुःखैः ? - इत्याकाङ्क्षायामाह-**वाऽथवा तत्सुखैः**-देवभवसुखैः **परिणामदुःखैः**-परिणामेन-परिपाकेणान्ते प्राक्कृतपुण्यक्षयलक्षणेन, दुःखैः-दुःखजनकैः **किं** स्याद् ?; न किमपीत्यर्थः; भावार्थस्तु —

[२१२] "तं सुरविमाणविभवं चिंतिय चवणं च देवलोगाओ ।
अइबलियं चिअ जन्नवि फुट्टइ सयसक्करं हिययं" ।।[उप.२८६]।।

इत्यादिगाथाभावनया, [तथा] **भगवतीसूत्रे प्रथमशते सप्तमोद्देशके** देवाश्च्यवन-कालेऽग्रेतनभवोत्पत्तिस्थानमसमञ्जसं दृष्ट्वा कियत्कालमनाहारका भवन्तीत्यादि-भावनया च-स्पष्ट एवेति ।।८.२.४।।

**रत्न.**–अथ सुरगतिमाश्रित्य दुःखानि दर्शयति –

**मुधाऽन्यदास्य..**इति. व्याख्या-मुधा-वृथा, मनुष्यास्तु वेतनग्रहणेनोदरभरणार्थं दास्यादि कर्म कुर्वन्ति, देवास्तु वेतनोदरभरणे विनैव तत् कुर्वन्तीति मुधाशब्दप्रयोगः, अन्येषाम्-इन्द्रादीना दास्यं-दासकर्म, तेषामेवाभिभवः-पराभवो, वज्रादिना ताडनादिकः तथाऽभ्यसूया-परस्परमीर्ष्या, इतरेतरद्वन्द्व[1], ता भवन्तीत्यन्वयः, अन्तश्च-च्यवनं, गर्भस्थितिः-गर्भवासः, तथा दुर्गतयः-श्वपचादिकुलोत्पत्तिलक्षणा वा, इतरेतरद्वन्द्व, तासां **भियो-भयानि** भवन्तीति-एवममुना प्रकारेण सुरेष्वप्यसुखानि भवन्ति, कथं? - नित्यं, वा पुनस्तेन हेतुना तेषां सुखैस्तत्सुखैः किं स्याद् ?, अपि तु न किमपि । ततः किंलक्षणैः ? - परिणामेन-परिपाकेन दुःखयन्तीति दुःखानि तैः, अत्र गर्भस्थितिभीकथनेन ग्रैवेयका-ऽनुत्तरसुराणामपि दुःखं गृहीतम्, अन्यथा तेषां दास्याद्यभावात् कथं दुःखानि स्युरिति ? ।।९.४।।

**[२१३] सप्तभीत्यभिभवेष्टविप्लवा-**
**ऽनिष्टयोग-गद-दुःसुतादिभिः ।**
**स्याद् ध्रुवं विरसता नृजन्मनः,**
**पुण्यतः सरसतां तदानय ।।८.२.५।।**

**धनवि.**–अथ शास्त्रोक्तं मनुष्यगतिगतदुःखस्वरूपं दर्शयन्नुपदिशति –

'सप्तभीति' इति–यद्-यस्मात् **सप्त** भीतयश्च-पूर्वोक्ता, **अभिभवश्च**-पराभव, **इष्टविप्लवश्च**-प्रियवियोगः, **अनिष्टयोगश्च**-अप्रियसंयोगः, **गदाश्च**-रोगा, **दुःसुताश्च**-

१. द्वन्द्वः - मु० ।

कुपुत्रा इति द्वन्द्वः, ते **आदिर्येषां** ते तथा तैः, आदिपदात् कुग्राम[वास]-कुनरेन्द्रसेवा-कुभोजन-कुकलत्र-निर्धनत्व-निष्पुत्रत्व-कन्याबहुत्वादिभिः । **"दुष्कुटुम्बकै"रिति वा पाठः** - अत्र पाठान्तरेण **दुष्कुटुम्बकैः**-अपरमात्रादिभिः, **ध्रुवं**-निश्चितं **नृजन्मनः**-मनुष्यावतारस्य **विरसता**-वैरस्यं **स्याद्**-भवति, **तत्**-तस्मात् **पुण्यतो**-धर्मकर्मतो, नृजन्मनः **सरसतां**-सारस्यमानय-प्रापयेति ।।८.२.५।।

**रत्न.**—अथ मनुष्यगतिसम्बन्धिदुःखान्याह —

**'सप्तभीति'** इति, - व्याख्या-ध्रुवं निश्चितं नृजन्मनो-मनुष्यभवस्य, विरसता-रसराहित्यं स्यात्, निःस्वादता स्यादित्यर्थः, कैः ? - इहलोक १,-परलोका-२,-ऽऽदाना ३,-ऽऽकस्मिका ४,-ऽऽजीविका ५,-मरणा ६,-ऽयशोभय ७,-लक्षणास्सप्त भीतयः, तथा राजा-ऽऽमात्य-बलवदादीनामभिभवः, तथेष्टानां-स्त्र्यादीनां विप्लवो-विरहः, तथा अनिष्टानां-दस्यु-पारदारिक-पिशुनानां योगः-सम्बन्धः तथा गदा-रोगाः, तथा दुः-दुष्टाः सुताः-पुत्राः, ते आदौ येषां, तैर्हेतुभिः, आदिशब्दाद् दुर्भ्रातृ-भार्यादीनां ग्रहणं, तथा **दुष्कुटुंबकै**रिति वा पाठान्तरं । हे आत्मन् ! तत् कारणात्, तस्य नृजन्मनः सरसतां पुण्यतः-पुण्यकार्यकरणादानय, अत्र रसशब्दो लक्षणया प्रयुक्तः, यथा सरसं वस्त्राम्रादि मनोहरं सु-स्वादु सुखदं च भवति, तथा नृजन्मापि कुरुष्वेत्यर्थः ।।९.५।।

**[२१४] इति चतुर्गतिदुःखततीः कृतिन् ! —**
**-नतिभयास्त्वमनन्तमनेहसम् ।**
**हृदि विभाव्य जिनोक्तकृतान्ततः,**
**कुरु तथा न यथा स्युरिमास्तव ।।८.२.६।।**

**धनवि.**—इति चतुर्गति-इति हे **कृतिन् ! -** हे पण्डित ! **त्वमनन्तमनेहसम्**-अनन्तं कालं यावदनुभूता, **इति**-अनन्तरोक्तस्वरूपा, अतिशयेन भयं यासु ता **अतिभयाः, चतुर्गतिदुःखतती-र्जिनोक्तकृतान्ततो**-भगवदुक्तसिद्धान्ततो **हृदि**-चित्ते, **विभाव्य**-विचिन्त्य **तथा**-तेन प्रकारेण, धर्मं **कुरु**-विधेहीति, **यथा**-येन प्रकारेण

**तवेमा**श्चतुर्गतिदुःखततयो **न स्युः**-न भवन्ति[1] इति (भवेयुः)इति ।।८.२.६।।

**रत्न.**—अथोपसंहारवाक्यमाह —

**इति चतुर्गतिदुःखततीः**..इति. व्याख्या-हे आत्मन् ! हे कृतिन् ! - हे पण्डित ! इति-पूर्वोक्तप्रकारेण चतुर्गतीनां-नरक-तिर्यग्-देव-मनुष्यगतीनां दुःखततीः प्रति-दुःखश्रेणीः प्रति, जिनेन-अर्हता **वीरेणोक्तो** यः कृतान्तः-सिद्धान्तः, तस्माद् हृदि-मनसि विभाव्य विचार्य त्वं तथा कुरु । किंलक्षणाः ? - अति-अतिशयेन भयं याभ्यस्ताः, कथं ? - यावत्, कम् ? - अनन्तम्-अन्तरहितमनेहसं-कालं, तथा कथं ? - यथा इमाः चतुर्गतिदुःखतयस्तव न स्युः-न भवन्तीति ।।९.६।।

**[२१५] आत्मन् ! परस्त्वमसि साहसिकः श्रुताक्षैर्-**
**यद् भाविनं चिरचतुर्गतिदुःखराशिम् ।**
**पश्यन्नपीह न बिभेषि ततो न तस्य,**
**विच्छित्तये च यतसे विपरीतकारी ।।८.२.७।।**

**धनवि.**—अथ शास्त्राख्यमूलद्वारमुपजिहीर्षुरुपदिशति —

'आत्मन्' इति-हे **आत्मन**! - हे प्राणिन् ! **तत्**-तस्मात् त्वं **पर**-उत्कृष्टः **साहसिकः**-अविमृश्यकारी **असि**-वर्त्तसे, **यद्**-यस्मात् त्वमिह-संसारे **भाविनं**-भविष्यन्तं **चिरं चतुर्गतिदुःखराशिं**-देव-मनुष्य-तिर्यग्-नरकसत्कदुःखसमूहं, **श्रुताक्षैः**-श्रुतलोचनैः, **पश्यन्नपि**-विलोकयन्नपि, **ततश्चिरचतुर्गतिदुःखराशेर्न बिभेषि**-न भीतिं प्राप्नोषि, **च** पुन**स्तस्य** चिरचतुर्गति-दुःखराशे**र्विच्छित्तये**-विशेषेणोच्छेदाय **विपरीतकारी** सन्-शास्त्रोक्तार्थाद् विपरीतसमाचरणः सन् न यतसे-नोद्यमं कुरुषे ।।८.२.७।।

इति श्रीतपागच्छनायक... महोपाध्यायश्री**कल्याणविजयगणि**शिष्योपाध्याय... श्री**धनविजयगणि**विरचितायां... शास्त्राधिकारनाम्न्यष्टमी पदपद्धतिः ।।८।।

**रत्न.**—अथ चतुर्गतिदुःखराशिं भाविनं जानानस्याप्यात्मनोऽधर्मे प्रवृत्तिमतः

---

१. भवेताम् इति. मु० ।

साहसिकत्वं दर्शयति-**आत्मन् ! परस्त्वमसि..**इति. व्याख्या-हे आत्मन् ! त्वं परः-उत्कृष्टः साहसिकः-अविमृश्यप्रवृत्तिकार्यसि, यतो हेतोर्भाविनं-भविष्यन्तं चिरं-चिरकालं चतुर्गतिदुःखराशिं, श्रुताक्षैः-श्रुतनेत्रैः, पश्यन्नपीह-संसारे न बिभेषि-भयं नाप्नोषि, ततो हेतोरस्य-चतुर्गतिदुःखराशेर्विच्छित्तये-विच्छेदाय च पुनर्न यतसे-न यत्नं करोषि, यतस्त्वं किंलक्षणः ? - विपरीतं-चिरचतुर्गतिदुःखराशिजनकं विषयासेवनं करोषीत्येवंशीलो विपरीतकारी ।।९.७।।[१]

१. अग्रेतनेऽधिकारे रत्नवि.टीकायां ९.८ इत्यादिका अवान्तरसङ्ख्या भविष्यति, दृश्यतां २०६ तमपद्यस्य टिप्पणकम्-सं.।

# ९. चित्तदमनाधिकारः

**[२३५] कुकर्मजालैः कुविकल्पसूत्रजैर्-**
**निबध्य गाढं नरकाग्निभिश्चिरम् ।**
**विसारवत् पक्ष्यति जीव ! हे !, मनः-**
**कैवर्त्तकस्त्वामिति माऽस्य विश्वसीः ।।९.१।।**

**धनवि.**—ननु मनोनिग्रहं विनाऽनन्तरोक्तेन शास्त्रद्वारेण किं स्याद् इत्याशङ्कायां मनोनिग्रहद्वारमुपदिशन्नाह – **अथ मनः, अथ मन** इति,

**अथ** शास्त्रद्वारकथनानन्तरं **मनः**-चित्तं निग्रहविषयीकार्यमिति **मनोनिग्रहद्वार**-मुपदिश्यते इति । तत्र प्रथमं मनसो धीवरसादृश्यं दर्शयन्नुपदिशति –

'कुकर्मजालैः' इति–**हे जीव !** आत्मन् ! **मनःकैवर्त्तकः**-चित्तधीवरः **कुविकल्प-सूत्रजैः**-कुचिन्तन-रूपतन्तुजन्यैः, **कुकर्मजालैः**-ज्ञानावरणाद्यष्टविधदुष्कर्मलक्षण-मत्स्यजालै**र्गाढम्**-अत्यर्थं, **निबध्य**-नियन्त्र्य, **विसारवद्**-मत्स्यमिव **त्वां, नरकाग्निभिः**-नरकलक्षणवैश्वानरैः, चकारादन्यैर्दुःखाग्निभिश्चिरं-चिरकालं **पक्ष्यति**-पचनक्रियाविषयं करिष्यति, **इति** अनन्तराद्धेतोरस्य-मनसो **मा विश्वसीः**-विश्वासं मा कार्षीरित्यर्थः ।।९.१।।

**रत्न.**—अथात्मनो [1]मनोदुर्जनेऽस्य विश्वासं निषेधयति –

**कुकर्मजालैः कुविकल्पसूत्रजै** इति. व्याख्या-हे जीव ! मन एव कैवर्त्तको-धीवरस्त्वां प्रति विसारं-मत्स्यमिव विसारवत् पक्ष्यति-पाकविषयीकरिष्यति, कैः? - नरका-नरकावासा अतीवोष्णत्वादग्नय इवाग्नयः, तैः कथं ? - चिरं-चिरकालं, किं कृत्वा ? - निबध्य-बद्ध्वा, कथं ? - गाढम्-अत्यर्थं, कैः ? - कुकर्माण्येव जालानि-मत्स्यबन्धनोपकरणानि तैः, किंलक्षणैः ? - कुविकल्पा एव सूत्राणि-तन्तवः, तेभ्यो जायन्त इति कुविकल्पसूत्रजानि तैः, धीवरोऽपि

---

१. मनः-कैवर्त्ती - मत्स्यानिव त्वां बद्ध्वा पक्ता इति न विश्वासार्ह इति दर्शयति-

जालैर्मत्स्यं निबध्याग्निभिश्चिरं पचतीति युक्त उपमानोपमेयभावः, इति हेतोस्त्वमस्य मनःकैवर्त्तकस्य मा विश्वसीः-मा विश्वासं कुर्याः, यथाऽस्य जाले न पतसि तथा यतेथा इति ।।१.८।।

**[२१७] चेतोऽर्थये, मयि चिरत्नसख ! प्रसीद,**
**किं दुर्विकल्पनिकरैः क्षिपसे भवे माम् ? ।**
**बद्धोऽञ्जलिः, कुरु कृपां, भज सद्विकल्पान्,**
**मैत्रीं कृतार्थय, यतो नरकाद् बिभेमि ।।९.२।।**

**धनवि.**–अथ दुष्टं मनोऽनुकूलयन्नाह –

'चेतोऽर्थये' इति–हे **चेतः** ! अहम्, **अर्थये**-प्रार्थनां करोमि, हे **चिरत्नसख !**, - हे चिरन्तनमित्र, त्वं **मयि**-मद्विषये **प्रसीद**-प्रसन्नं भव, अत्रात्मनो मनसश्चिरन्तन-मित्रता व्यवहारतोऽनेकभवसम्बन्धादेव प्रतीता, अप्रसन्नस्य प्रसत्तिप्रार्थनायोग्यता भवतीति मनसोऽप्रसत्तिस्वरूपं दर्शयति यतो **दुर्विकल्पनिकरैः**-दुष्टचिन्तनसमूहैस्त्वं **मां भवे**-संसारे **किं**-किमर्थं **क्षिपसे ?** - क्षेपणं कुरुषे, मया **अञ्जलिः** प्रार्थनापूर्वकं करसंयोजनं **बद्धो**-रचितः तव मनसः पुरस्तादितिगम्यं, प्रार्थनामेवाह-त्वं मयि **कृपां**-दयां कुरु-समाचर, का कृपा कर्त्तव्या इत्याह-**सद्विकल्पान्** धर्मध्यान-हेतुकार्यचिन्तनलक्षणान् **भज**-आश्रय, चिरन्तनां **मैत्रीं**-मित्रतां **कृतार्थय**-कृतार्थां-सफलां कुर्वित्यर्थः, एतावत् प्रार्थनाकरणे हेतुमाह-**यतः** कारणादहं **नरका**त्-नरकगते**र्बिभेमि**-भयं गच्छामीति ।।९.२।।

**रत्न.**–अथात्मा भीतः सन् मनःसुहृदं विज्ञपयति –

**चेतोऽर्थये** इति., व्याख्या-जीवः कथयति-हे चेतः ! - हे मनः ! त्वां प्रत्यहमर्थये-याचे, हे चिरत्नसख ! - हे चिरकालीनमित्र, त्वं मयि विषये प्रसीद-प्रसन्नं भव, मां प्रति दुर्विकल्पानां निकराः-समूहाः, तैर्हेतुभिर्भवे-संसारे किं क्षिपसे ?, प्रसादं कृत्वा मा क्षिपस्वेत्यर्थः। त्वां प्रति मयाऽञ्जलिः-प्रसृतिद्वययोजनरूपो बद्धः । किमर्थमित्याह-त्वं कृपां कुरु, कृपां कृत्वा सतः-

शोभनान् विकल्पान् भज-श्रय, तथा मैत्री कृतार्थय-सफलय, यतो हेतोरहं नरकाद् बिभेमि सभयो भवामि-इति ।।९.९।।

**[२१८] स्वर्गाऽपवर्गौ नरकं तथाऽन्तर्-**
**मुहूर्त्तमात्रेण वशाऽवशं यत् ।**
**ददाति जन्तोः सततं प्रयत्नाद्**
**वशं तदन्तःकरणं कुरुष्व ।।९.३।।**

**धनवि.**–अथ मनसः सामर्थ्यं दर्शयन् तद्वशीकार्यमित्युपदिशति –

'स्वर्गापवर्गौ' इति–**यन्मनः**, **अन्तर्मुहूर्त्तमात्रेण** - द्विघटिकाप्रमाणकालमात्रेण, **वशं** च-आयत्तम् **अवशं** च-अनायत्तं **सत् जन्तोः** - प्राणिनः **स्वर्गाऽपवर्गौ** प्रसिद्धौ **तथा नरकं** प्रसिद्धं **ददाति**-दत्ते, वशं मनः स्वर्गाऽपवर्गौ ददाति, अवशं च नरकं ददातीत्यर्थः, **तदन्तःकरणं**-तन्मनः, **सततं**-निरन्तरं **प्रयत्नाद्**-उद्यमतो **वशं**-स्वायत्तं **कुरुष्व**-विधेहीत्यर्थः ।।९.३।।

**रत्न.**–अथ कियद्भिः काव्यैरात्मानं मनोवशीकरणमुपदिशन्नाह-

**स्वर्गाऽपवर्गौ** इति. व्याख्या-हे आत्मन् ! यदन्तःकरणं-मनो वशं च तदवशं च वशावशं सत्, जन्तोः-जीवस्य स्वर्गश्च अपवर्गश्च स्वर्गाऽपवगौ-त्रिदिव-मोक्षौ अन्तर्मुहूर्तमात्रेण जीर्णश्रेष्ठि-प्रसन्नचन्द्रराजर्ष्योरिव ददाति, वशं सदिति ज्ञेयं, तथा-अन्तर्मुहूर्त्तमात्रेण नरकं तन्दुलमत्स्यस्येव ददाति, अवशं सदिति ज्ञेयं, तत्-तस्माद्धेतोर्हे आत्मन् ! तदन्तकरणं वशम्-आयत्तं कुरुष्वेति ।।९.१०।।

**[२१९] सुखाय दुःखाय च नैव देवा,**
**न चापि कालः सुहृदोऽरयो वा ।**
**भवेत् परं मानसमेव जन्तोः,**
**संसारचक्रभ्रमणैकहेतुः ।।९.४।।**

**धनवि.**–अथ मनस एवैहिक-पारलौकिकसुखकारणतां दर्शयन्नुपदिशति –

'सुखाय' इति, **जन्तोः**-प्राणिनः **सुखाय च** पुन**र्दुःखाय देवा**-इन्द्र-चन्द्रादयो **नैव** भवन्ति, च पुनः **कालोऽपि**-सुषम-दुष्षमादिः कृतयुगादिर्वा सुखाय दुःखाय न भवति, नापि **सुहृदो**-मित्राणि, अथवा **अरयः**-शत्रवः सुखाय दुःखाय भवन्ति, **परं**-केवलं **मानसमेव**-अन्तःकरणमेव **जन्तोः संसारचक्रे**-भवसमूहे, अथवोत्सर्पिण्यवसर्पिणीलक्षणद्वादशारे संसारचक्रे **भ्रमणं**-पुनः पुनः पर्यटनं तस्य **एकः**-अद्वितीयो **हेतुः**-कारणं **भवेत्**, अत्र हेतुशब्दोऽजहल्लिङ्गः । भावार्थस्तु आराधिता देवाः सुखाय न भवन्ति, विराधिताश्च देवा दुःखाय न भवन्ति, च पुनः सुषमकालः सुखाय न भवति, दुष्षमकालश्च दुःखाय न भवति, च पुनः सुहृदः सुखाय न भवन्ति, वैरिणश्च दुःखाय न भवन्ति, परं-केवलं मानसमेव वशीकृतं सुखाय भवति, अवशीकृतं च दुःखाय भवतीति ।।९.४।।

**रत्न.—सुखाय दुःखाय च** इति. व्याख्या-हे आत्मन् ! देवाः सुखाय-सुखहेतवे दुःखाय-दुःखहेतवे च न भवन्ति, तथा कालः-प्रावृडादिरपि न, सुहृदो-मित्राण्यपि न वा, पुनररयोऽपि न सुखाय न दुःखाय चेति यथार्हं योजनीयम्, परं-केवलमेकं जन्तोः-जीवस्य मानसं-मन एव सुखाय दुःखाय च भवेद्। यतः किंलक्षणं ? - संसारचक्रे-संसारसमूहे अथवोत्सर्पिण्यवसर्पिणीलक्षणे द्वादशारसंसारचक्रे, भ्रमणं तस्यैकः-अद्वितीयो हेतुः-कारणम्, अत्र एवकारोऽन्ययोगव्यवच्छेदार्थः, इदं वचनं संज्ञिन आश्रित्य ज्ञेयं, असंज्ञिनां मनसः अभावेऽप्यनन्तसंसारचक्रभ्रमो दृश्यते तेनेत्यर्थः ।।९.११।।

**[२२०] वशं मनो यस्य समाहितं स्यात्,**
**किं तस्य कार्यं नियमैर्यमैश्च ? ।**
**हतं मनो यस्य च दुर्विकल्पैः,**
**किं तस्य कार्यं नियमैर्यमैश्च ? ।।९.५।।**

**धनवि.**—अथ मनोनिग्रहमन्तरेण यम-नियमादीनां वैयर्थ्यं दर्शयन् मनोनिग्रहमेवोपदिशति —

'वशं मन' इति **यस्य** पुरुषस्य **मनः**-चित्तं **वशं**-स्वायत्तं [१]सत् **समाहितं**-समाधियुक्तं रागद्वेषरहितं **स्याद्**-भवेत् **तस्य** पुरुषस्य, **नियमैः**-शौचादिभिः पञ्चभिः **च** पुन**र्यमैः**-अहिंसादिभिः, **किं** स्याद् ?, अपि तु न किञ्चिदित्यर्थः; ।

अत्र यम-नियमयोः स्वरूपं चेदं, नियम्यते चित्तमेभिरिति **नियमाः**, ते च

**[२२१]** "नियमाः शौचं संतोषः, स्वाध्याय-तपसी अपि ।
देवताप्रणिधानं [२]च' - इति,

१. शुचेर्भावः कर्म वा शौचं-काय-मनसोः शुद्धिः २. संतोषः-सन्निहितसाधनादधिकस्यानुपादित्सा ३. स्वकीयमध्ययनं स्वाध्यायो, मोक्षशास्त्राध्ययनं प्रणवजपो वा ४. तप्यते तदिति तपः-चान्द्रायणादि[३] ५. देवतायाः-वीतरागस्य प्रणिधानम्-आत्मना सर्वतः **संभेदः**[४] इति पञ्चविधाः; । यम्यते-उपरम्यते दुर्गतिभ्य आत्मा एभिरिति **यमाः**, ते चाऽहिंसा-सूनृताऽस्तेय-ब्रह्मा-ऽकिञ्चनाः, तत्र १. हिंसा-प्राणव्यपरोपणं तदभावोऽहिंसा २. सूनृतं-सत्यं प्रियं [५]वा वचः ३. स्तेयम्-अदत्तादानं तदभावोऽस्तेयं ४. ब्रह्मचर्यं-मैथुनत्यागः ५. अकिञ्चनता-परिग्रहत्यागः ५, इति पञ्चविधाः, **च** पुनः **यस्य मनो विकल्पैः**-दुचिन्तितै**र्हतम्**-उपहतं व्याप्तं (-यमाः), स्यात्, **तस्य** पुरुषस्य **यमैर्नियमैश्च किं कार्यं** स्याद् ?, अपि तु न किञ्चिदिति, मनसो वशत्वेऽवशत्वे च यम-नियमयोर्वैयर्थ्यमिति भावः, यदुक्तम्
—

**[२२२]** "राग-द्वेषौ यदि स्यातां, तपसा किं प्रयोजनम् ? ।
तावेव यदि न स्यातां, तपसा किं प्रयोजनम् ? [ ] ।।९.५।। इति

**रत्न.—वशं मनो यस्य...**इति. व्याख्या-मनो वशं-स्वायत्तं सत्, समानतालक्षणैः हितं-सुस्थं समाधिमत् तस्यात् स्यात् मनो नियमैः-शौच-संतोष-स्वाध्याय-तपो-देवताप्रणिधानलक्षणैः, पञ्चभिर्यमैः-अहिंसा-सूनृताऽस्तेय-ब्रह्माऽकिञ्च[६]तालक्षणैः

१. तत्. मु० । २. 'करणं पुनरासनं' इति पद्यपूर्त्तिः - (अभिधान चिन्तामणि-१.८२) । ३. 'अङ्गचान्द्रायणं पूर्व चान्द्रायणं न्यूनोदरतादि' इति प्रतौ टिप्पणम् । ४. 'मिलनं एकरूपं वा' इति प्र.टी. । ५. 'च' अर्थे 'वा, तुल्यतां' जा य सच्चा, तथा 'असच्चमोसं' इति दशवैकालिकसूत्र - ७.२ तथा ७.३ - प्रभृति गाथा सं. । ६. आकिञ्चन्यैः मु० ।

पञ्चभिश्च किं कार्यं ! - किं प्रयोजनं, ते तु मनोवशीकरणायैव सन्ति, तत् तु स्वत वशेऽस्ति, ततस्तैः किमिति भावः । च पुनर्यस्य मनो दुर्विकल्पैर्हतं-पीडितं तस्यात्मनोऽपि यमैर्नियमैश्च पूर्वोक्तैः किं कार्यं ? - न किञ्चिदिति, नियमा यमाश्च मनोवशीकरणप्रयोजनाः, तत् तु दुर्विकल्पग्रस्तं[1], ततोऽजागल-स्तनमुखप्रक्षेपप्रायैः किं प्रयोजनं, तैः ? चकारस्तुल्ययोगितायां पक्षान्तरे वेति ।।९.१२।।

**[२२३] दान-श्रुत-ध्यान-तपो-ऽर्चनादि,**
**वृथा मनोनिग्रहमन्तरेण ।**
**कषाय-चिन्ताऽऽकुलतोज्झितस्य,**
**परो हि योगो मनसो वशत्वम् ।।९.६।।**

**धनवि.**–अथ मनोनिग्रहमन्तरेण दानादिधर्मव्यर्थतां दर्शयन्नुपदिशति –

'दान-श्रुत' इति, **मनोनिग्रहमन्तरेण**-मनसो वशीकरणं विना **दान-श्रुत-ध्यान-तपो-ऽर्चनादि** धर्मकर्मेति गम्यं, **वृथा**-मिथ्या स्यादिति, तत्र-**दानं** च-अभयदान-सुपात्रदान-अनुकम्पादान-उचितदान-कीर्त्तिदानभेदात् पञ्चधा, यदुक्तम्-"

**[२२४]** अभयं सुपत्तदाणं अणुकंपा उचिय-कित्तिदाणं च ।
तिन्निहिं मोक्खो भणिओ दुन्नि य भोगाइयं दिंति ।।[ ]।।" इति,

**श्रुतं** च-श्रुतज्ञानं शास्त्राध्ययनमित्यर्थः, **ध्यानं** च-धर्मध्यानादि, **तपश्च** द्वादशभेदम्, **अर्चनं** च-अष्टप्रकारादिपूजा, ततो द्वन्द्वः, तान्यादौ-प्रथमं यस्य तत् तथा, आदिपदात् तीर्थयात्रा-प्रतिष्ठादिधर्मकर्मपरिग्रहः; अत्रोक्तार्थे हेतुमाह-**हि** यतः कारणात्, **कषायेभ्यः**-क्रोधादिभ्यः **चिन्ता**-आर्त्तध्यानरौद्रध्यानात्मिका तया, **आकुलता**-व्याकुलता तया, **उज्झितस्य**-रहितस्य पुरुषस्य **मनोवशत्वं**-मनसः स्वायत्तत्त्वं, **परः**-प्रकृष्टो **योगो**-मुक्त्यङ्गं भवतीत्यर्थः, ननु पूर्ववृत्ते नियमवैयर्थ्यकथनेन तदन्तःपातितपोवैयर्थ्यं प्रतिपादितमेव, पुनरत्र तपोवैयर्थ्यप्रतिपादने पौनरुक्त्यं

१. '०पैर्व्युदस्तम्' मु० ।

स्यादिति चेत् ?-न, पूर्वकाव्ये नियमान्तःपातित्वेन तपोवैयर्थ्ये प्रतिपादितेऽपि साक्षात् तस्याप्रतिपादनादिति ।।९.६।।

**रत्न.—दान-श्रुत-ध्यान-तपो-ऽर्चनादि** इति., व्याख्या-मनसो निग्रहो-नियन्त्रणं तमन्तरेण जीवस्य दानं च श्रुतं च तपश्च अर्चनं च दान, तपो-ऽर्चनानि. तानि आदौ यस्य तत्, दानं पञ्चधा, श्रुतं शास्त्राध्ययनं, तपो द्वादशधा, अर्चनं-देव-गुरु-ज्ञानादिपूजनं, आदिशब्दाच्चैत्यबिम्बप्रतिष्ठादि गृह्यते, वृथा-मुधा, न मोक्षसाधकमित्यर्थः, हि-यस्मात् कारणात् मनसो वशत्वं परः-परमो योगः-अष्टाङ्गयोगः, मनसः किंलक्षणस्य ? - कषायाः-क्रोध-मान-माया-लोभास्तैर्या चिन्ता-दुर्विकल्पास्ताभिराकुलता-व्यग्रत्वं तयोज्झितस्य-त्यक्तस्य ।।९.१३।।

**[२२५] जपो न मुक्त्यै न तपो द्विभेदं,**
**न संयमो नापि दमो न मौनम् ।**
**न साधनाद्यं पवनादिकस्य,**
**किं त्वेकमन्तःकरणं सुदान्तम् ।।९.७।।**

**धनवि.—**अथ केवलस्य मनोनिग्रहस्य साक्षान्मुक्त्यङ्गतां दर्शयन्नुपदिशति—

'जप' इति **जपः**-प्रणवजापो[1] **मुक्त्यै**-मोक्षाय **न** स्यादिति, तथा **द्विभेदं**-बाह्यत्वाभ्यन्तरत्वभेदेन द्विप्रकारं **तपः**-अनशन-प्रायश्चित्तादि **मुक्त्यै** न स्यात्, **नापि संयमः**-पृथ्वीकायसंयमादिः पञ्चाश्रवविरमणादिर्वा सप्तदशभेदः, **नापि** दमः-पञ्चेन्द्रियदमनं, **नापि मौनं**-वाक्संयमो, नापि **पवनादिकस्य साधनं,** पवनादिक-स्येत्यत्रादिपदेन ध्याना-ऽऽसनादिपरिग्रहः, साधनाद्यम् इत्यत्राद्यपदेनावस्थान-बन्धनादिपरिग्रहः, तेन ध्यानावस्थानं आसनबन्धनं च मुक्त्यै न भवेदित्यादि गम्यं, अत्र पवनसाधनादिकं योगशास्त्रादिभ्योऽवसेयम्; **एकम्**-अद्वितीयम्, **अन्तःकरणं**-मनः **सुदान्तं**-शोभनप्रकारेण नियन्त्रितं मुक्त्यै भवेदिति, अत्र संयमसप्तदशभेदसूचिका गाथा चेयं — [दशवैकालिकनिर्युक्तौ]

---

१. ओङ्कारादिजापो. मु० ।

[२२६] "पुढवि-दग-अगणि-मारुय-वणस्सइ-बि-ति-चउ-पणिंदिअज्जीवे ।
पेहुप्पेह-पमज्जण परिट्ठवण-मणो-वई-काए ।। [४६]।।"

अत्रोपेक्षासंयमस्वरूपं 'सीदतां संयतानां चिन्ता असंयतानां न' इति **प्रतिक्रमणसूत्रवृत्तौ,** उपेक्षा-असंयमयोगेष्वव्यापारणं संयमयोगस्य व्यापारणमिति **समवायवृत्ता**विति, अत्र विशेषार्थिना**ऽऽवश्यकवृत्ति**र्विलोक्येति,

पुनः संयमस्य प्रकारान्तरेण सप्तदशभेदप्रतिपादिकाऽऽर्या चेयं –

[२२७] "पञ्चाश्रवाद् विरमणं पञ्चेन्द्रियनिग्रहः कषायजयः ।
दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः" [ ] इति ।।९.७।।

**रत्न.–जपो न मुक्त्यै** इति., व्याख्या-जपो-जापः परमेष्ठिमन्त्रादेर्मुक्त्यै-मुक्तये न स्यात्, मुक्त्यै इति सर्वत्र योज्यं, तथा तपो न, किंलक्षणं ? - द्वौ भेदौ बाह्या-ऽभ्यन्तरलक्षणौ यस्य, तथा न संयमः-चारित्रं, न दमः-इन्द्रियदमनं, न मौन तथा न पवनादिकस्य साधनाद्यं, आदिशब्दाच्चतुरशीतियोगाऽऽसन-साधनादिग्रहः, **किंत्वि**ति विशेषे, मनः सुष्ठु दान्तम्-उपशान्तं सत्-मुक्त्यै-अष्टकर्ममुक्तयै स्यात् ।।९.७।।

**[२२८] लब्ध्वाऽपि धर्मं सकलं जिनोदितं,**
**सुदुर्लभं पोतनिभं विहाय च ।**
**मनःपिशाचग्रहिलीकृतः पतन्,**
**भवाम्बुधौ नाऽऽयतिदृग् जडो जनः ।।९.८।।**

**धनवि.–**अत्र दुष्टत्वेन मनसः पिशाचतां दर्शयन् तन्निग्रहमुपदिशति –

'लब्ध्वापि' इति, **सुदुर्लभं** सुष्ठु-अतिशयेन दुर्लभं-दुष्प्रापं दशभिर्दृष्टान्तैरिति शेषः, **पोतनिभं**-यानपात्रसदृशं **जिनोदितम्**-अर्हत्प्रकाशितं **धर्मं** सागाराऽनगारभेदाद् द्विविधं **सकलं**-परिपूर्णं मूलगुणोत्तरगुणसहितं, **लब्ध्वाऽपि**-प्राप्यापि, **मन** एव **पिशाचः**-उन्मादजनकत्वेन व्यन्तरविशेषः, तेन **ग्रहिलीकृतो**-विकलीकृतः सन्, **च**

पुनस्तं तथाविधं धर्मं **विहाय**-त्यक्त्वा **भवाम्बुधौ**-संसारसागरे **पतन्**-निमज्जन् **जडो**-मूर्खो **जनो**-लोक, **आयतिदृग्**-उत्तराकलदर्शी **न** भवतीति ।।९.८।।

**रत्न.–लब्ध्वाऽपि धर्मम्** इति., व्याख्या–जडो-मूर्खो जनः, आयतिम्-उत्तरकालं पश्यतीति आयतिदृग् नास्ति, अथवा आयतौ दृग् बुद्धिर्यस्य स आयतिदृग् नास्ति, उत्तरकाले मम किं भविष्यतीति विचारवान् नास्तीत्यर्थः, किं कुर्वन् ? - पतन्, कस्मिन् ? - भवाम्बुधौ-भवसमुद्रे, किं-कृतः सन् ? - मन एव पिशाचो-भूतः, तेन ग्रहिलीकृतः, ग्रहिलीकृतः सन्, किं कृत्वा ? - लब्ध्वाऽपि-प्राप्यापि, च पुनः किं कृत्वा ? - संत्यज्य, कं ? - धर्मं, धर्मं प्राप्य पुनः संत्यज्येत्यर्थः, कीदृश ? - सकलं-पूर्णं, किंलक्षण ? - जिनैः-सर्वज्ञैरुदितं-कथितं, न तु शाक्याद्यादिष्टमिति, किंलक्षणं[1] ? - सुदुर्लभम् अतिशयेन दुर्लभमित्यर्थः, पुनः कीदृश ? - यानपात्रस्य निभं-सदृशमाश्रितजनतारकत्वादिति ।।९.१५।।

**[२२९] सुदुर्जयं ही रिपवत्यदो मनो,–**
**रिपूकरोत्येव व वाक्-तनू अपि ।**
**त्रिभिर्हतस्तद्-रिपुभिः करोतु किं,**
**पदीभवन् दुर्विपदां पदे पदे ? ।।९.९।।**

**धनवि.–**अथ मनसः शत्रुतां दर्शयन् तन्निग्रहमुपदिशति –

'सुदुर्जयं ही' इति **ही**ति खेदे **अदो मनः सुदुर्जयं** सद्-अतिशयेन दुःखेन-कष्टेन जीयते इति, तथा सद् रि**पवति**-रिपुरिवाचरति, स्वयमिति गम्यं, अत्र अदःशब्देन विप्रकर्षो, यदुक्तम् –

**[२३०]** "इदमः प्रत्यक्षगते समीपतरवर्त्ति चैतदोरूपम् ।
अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात् ।। [ ]।।" इति,

विप्रकृष्टता **च** मनसोऽतिचञ्चलत्वेनास्वायत्तत्वात्, च पुनरदो मनो **वाक्-तनू अपि**-वचन-शरीरे अपि **रिपूकरोति**-शत्रूकरोति, मनोव्यापारे दुष्टे वाक्-

१. पुनः किंभूतं ?

कायव्यापारयोरपि दुष्टत्वभवनात्; **तत्**-तस्मात्, **त्रिभिः**-त्रिसङ्ख्याकैः, **रिपुभिः**-वैरिभिर्वाक्-काय-मनोलक्षणै**र्हतो**-हननविषयीकृतः **पदे पदे**-स्थाने स्थाने **दुर्विपदां**-दुष्टापदां **पदीभवन्**-आस्पदीभवन् भवल्लक्षणो जन इति गम्यं, **किं करोतु ?** - किं साधयत्विति काकूक्त्याऽन्वयः; भावार्थस्तु अकृते मनोनिग्रहे वाक्-तनू दुष्टे भवतः, कृते च मनोनिग्रहे वाक्-तनू मोक्षसाधके भवत इति काव्यभावमवधार्य मनोनिग्रहं पूर्वमेव कुरु, येन वाक्-तनू दुष्टे न भवत इति ।।९.१६।।

**रत्न.—सुदुर्लभम्** इति. व्याख्या-हे आत्मन् ! ते-तव अदः-एतन्मनो-हृदयं रिपवति-रिपुवदाचरति, यतः किंलक्षणं ? - सुदुर्जयं-अतिशयेन दुर्जेतव्यम्, अत एव रिपवतीत्यर्थः, च पुनः स्वयं रिपुवदाचरद् वाक्-तनू प्रति वचन-देहौ प्रति रिपूकरोति, कथमेवं ? - निश्चयेन मनो दृष्टं सद्वाक्-कायावपि दुष्टौ करोत्येवेत्यर्थः, तत्-तस्मात् त्रिभी-रिपुभिर्भवान् हतो-मारितः सन् किं करोतु ? - किं बलं करोत्वित्यर्थः, अपि तु न किमपि, यतो भवान् किं भवन् ? - पदीभवन्, स्थानीभवन् कासा ? - दुः-दुष्टा या, विपदः-आपदः, तासां, कस्मिन् ? - पदे पदे स्थाने स्थान, [1]अन्योपि पुमान् त्रिभिर्वैरिभिर्हतः सन्नतीव निर्बलो किं बलं करोत्वितिभावः ।।९.९।।

**[२३१] रे चित्तवैरि ! तव किं नु मयाऽपराद्धं ?,**
**यद्दुर्गतौ क्षिपसि मां कुविकल्पजालैः।**
**जानासि मामयमपास्य शिवेऽस्ति गन्ता,**
**तत् किं न सन्ति तव वासपदं ह्यसङ्ख्याः ? ।।९.१०।।**

**धनवि.—**अथानन्तरोक्तमेव शत्रुत्वं मनसः समर्थयन्नाह —

'रे चित्त' ! इति, **रे** इति तिरस्कारेण संबोधनं, रे **चित्त** ! - रे मनः **रे वैरि** ! - रे रिपा ! **नु** वितर्के **मया** आत्मना, तव मनसः **किं**-किंनाम वस्तु, **अपराद्धम्**-अपराधविषयीकृतं विनाशितमितियावद्, अत्र वैरिशब्दस्य मनोविशेषणत्वेन

१. अपरोपि - मु० ।

नपुंसकलिङ्गता, **यद्**-यस्मात् **कुविकल्पजालैः**-आर्त्तरौद्रध्यानसमूहैः करणभूतै**र्दुर्गतौ**-नरकादिगतौ त्वं **मां क्षिपसि,** बलात्कारेण नयसीत्यर्थः, अथ दुर्गतिक्षेपणकारणं स्वयमेवोट्ङ्क्य स्वयमेव निरस्यति जानासीत्यादिनोत्तरार्द्धेन, **जानासि**-त्वं यद्येवं मनुषे, एवमिति किम् ?- इत्याह-**अयम्** आत्मा **मामपास्य**-दूरीकृत्य **शिवे**-मोक्षे **गन्ताऽस्ति**-याताऽस्ति, सिद्धावस्थायामात्मनोऽमनस्कत्वस्य सिद्धान्ते भणनात्, **तत्**-तदा **हीति** निश्चितं **तव** मनसो **वासपदं** स्थितिस्थानम् **असङ्ख्याताः** प्राणिनः, **किमिति** काकूक्त्या प्रश्ने **न सन्ति ?,** अपि त्वसङ्ख्याताः सन्तीत्यर्थः, असङ्ख्यातानां पञ्चेन्द्रियगर्भजनरतिरश्चां नारकिणां देवानां च मनोवासस्थानानां विद्यमानत्वात् ।।९.१०।।

**रत्न.–हे चित्तवैरि !** इति व्याख्या.-हे चित्तवैरि ! - हे मनोरिपो ! तव मया किमिति प्रश्ने नु इत्यनुशये, अपराद्धम् ? - अपराधः कृतः, हे चित्तवैरि'इत्यत्र चित्तविशेषणत्वान्नपुंसकत्वमन्यथा पुंस्त्वे वैरिन्निति भवति, यद्-यतो हेतोर्मां प्रति दुर्गतौ क्षिपसि, कैः ? - कुविकल्पानां जालानि-समूहास्तैर्हेतुभिः, यद्-यस्मात् कारणात् त्वं जानासि, किं जानासीत्याह-मां-मनः प्रत्यक्षं जीवः अपास्य-त्यक्त्वा शिवे-मुक्तौ गन्ताऽस्ति, तत्-तर्हि तव मनसो वासाय-वसनाय पदं-स्थानं असङ्ख्या-सङ्ख्यातीताः, किमिति प्रश्ने, न सन्ति ?, अपि तु सन्त्येव । यदा तदा काले मनस्विनोऽसङ्ख्याताः स्युरेवेतिभावः, ततोऽहमेकस्त्वामपास्य शिवे गमिष्यामि तदा का तव हानिर्जातेति ।।९.१७।।

**[२३२] पूतिश्रुतिश्चेव रतेर्विदूरे,**
**कुष्ठीव संपत्सु दृशामनर्हः ।**
**श्वपाकवत् सद्गतिमन्दिरेषु,**
**नार्हेत् प्रवेशं कुमनोहतोऽङ्गी ।।९.११।।**

**धनवि.–**अथानिगृहीतमनसः सद्गत्ययोग्यत्वं दृष्टान्तत्रयेण दर्शयन्नुपदिशति-'पूतिश्रुति' इति, **कुमनोहतो**-दुष्टमनसा पराभूतः, **अङ्गी**-प्राणी **पूती**-परिपाकतः कुथितगन्धौ कृमिजालाकुलत्वाद्युपलक्षणमेतत्, **श्रुती**-कर्णौ यस्य स तथा स

चासौ **श्वा** च तथा [स इव] **पूतिश्रुतिश्चेव**-दुष्टरोगा-ऽऽक्रान्तकुक्कुर इव, **रते**-रमणाल्लीलाविशेषात् सौख्याद् वा **विदूरे**-विशेषेण दूरे भवति, च पुनः कुमनोहतोऽङ्गी **कुष्ठी**व-कुष्ठरोगा-ऽऽक्रान्त **इव संपत्सु**-संपत्तिषु सतीषु **दृशां**-लोचनानां निन्द्यत्वेन, **अनर्हः**-अयोग्यो भवति, यद् वा **संपदो**-रूप-सौन्दर्यादयस्ता एव **सुदृशः**-स्त्रियो, यद् वा **संपद** एव **सुदृश**स्तासामनर्ह इत्यर्थः, च पुनः कुमनोहतोऽङ्गी **श्वपाकवत्**-चाण्डाल इव **सद्गतिमन्दिरेषु**-उत्तमगतिलक्षणगृहेषु **प्रवेशं**-मध्ये गमनं **नार्हेत्**-न योग्यो भवतीत्यर्थः, श्वपाकोऽपि **सताम्**-उत्तमानां **गतयो**-गमनानि येषु, तानि च तानि **मन्दिराणि,** तेषु प्रवेशा-ऽयोग्यो भवतीति ।।९.११।।

**रत्न.–पूतिश्रुतिः..**इति., व्याख्या-कुत्सितं मनः कुमनः, कुविकल्पैर्दुष्टमित्यर्थः कुमनसा हतः-संतापितोऽङ्गी-देही, श्वपाकवत्-चण्डालवत् सद्गतय एव मन्दिराणि-गृहाणि, तेषु प्रवेशं नार्हेत्-न योग्यो भवेत्, श्वपाकोऽपि सती शोभना गतिः-अवस्था येषां तानि सद्गतीनि, सद्गतीनि च तानि मन्दिराणि च सद्गति मन्दिराणि, तेषु, महेभ्यादिगृहेष्वित्यर्थः, प्रवेशं नार्हतीति, इव यथा पूतिश्रुतिः[1] श्वा-[2]क्वथितकर्णः कुक्कुरः रतेः-रागाद् विदूरे स्यात्, प्रेमकारी न स्यादित्यर्थः, इव-यथा कुष्ठी-कुष्ठरोगवान् पुरुषः संपत्सु सतीष्वपि दृशां-चक्षुषामनर्हः स्यात्, दर्शनाय योग्यो न भवेद्, अथवा संपद एव सुदृशः-स्त्रियस्तासामनर्हः स्यादित्यपि व्याख्याभेदः, रूप-सौभाग्यादिसंपदः[3], तं नाश्रयन्तीति ।।९.११।।

**[२३३] तपो-जपाद्याः स्वफलाय धर्मा,**
**न दुर्विकल्पैर्हतचेतसः स्युः ।**
**तत् खाद्य-पेयैः सुभृतेऽपि गेहे,**
**क्षुधा-तृषाभ्यां म्रियते स्वदोषात् ।।९.१२।।**

**धनवि.–**अथानिगृहीतमनसां पुंसां क्रियमाणा धर्माः स्वफलाय न प्रभवन्तीति दृष्टान्तपूर्वकं दर्शयन्नुपदिशति –

१. पूतिश्रुतिः 'पाठो प्रतौ मूलत्वेन स्वीकृतः । २. कुथित. मु० । ३. 'संपदां स नाश्रयो भवति - मु० ।

'तपो-जपाद्याः' इति **दुर्विकल्पैर्हतचेतसः**-अशुभध्यानैर्हतचेतसः-उपहतचित्तस्य पुंसः, **तपो-जपाद्या** आद्यपदात् स्वाध्यायप्रमुखा **धर्माः स्वफलाय**-तत्त्वतो मोक्षफलाय **न स्युः, तत्**-तस्मात् कारणात् स दुर्विकल्पहतचित्तः पुमान् **खाद्य-पेयैः**-अशन-पान-खादिम-स्वादिमैः [सुष्ठु] **भृते**-संपूर्णेऽपि गृहे, **स्वदोषात्**-स्वसमुत्थक्लेश-मान्द्य-प्रमादलक्षणदोषात्, **क्षुधा-तृषाभ्यां** प्रसिद्धाभ्यां **म्रियते**-प्राणत्यागं करोतीत्यर्थः, अत्र तपो-जपादीनां दार्ष्टान्तिकता खाद्य-पेयानां दृष्टान्तता, मोक्षलक्षणफलाभावस्य दार्ष्टान्तिकता क्षुधातृषाभ्यां मरणस्य दृष्टान्तिता, स्वसमुद्भूतदुर्विकल्पस्य दार्ष्टान्तिकता आत्मसमुत्थक्लेशमान्द्य-प्रमादादिदोषस्य दृष्टान्तता इति दृष्टान्तदार्ष्टान्तिकयोजना ।।९.१२।।

**रत्न.–तपो-जपाद्या** इति., व्याख्या-तपो-जपाद्याः-तपो-जपप्रभृतयो धर्माः स्वफलाय न स्युः-न भवेयुः, आद्यशब्देन ध्यानादिग्रहणम्, तेषां फलं परमार्थतो मोक्षः, तस्मै न भवेयुरित्यर्थः, कस्य ? - आत्मनः, कीदृशस्य ? - हतं-पीडितं चेतो यस्य स तस्य, कैः ? - दुर्विकल्पैः, अत्रार्थे दृष्टान्त[1]माह-तदिति दृष्टान्तोपन्यासे निष्पुण्यको जीवः खाद्य-पेयैः भक्ष्यपानैः-घृतपूर-दुग्धादिभिर्गेहे-गृहे सुष्ठु भृते सत्यपि स्वदोषात्-स्वस्य कार्पण्य-मान्द्यादिदोषतः क्षुधा-तृषाभ्यां म्रियते-मरणं प्राप्नोति, तेन तपो-जपादिषु धर्मेषु सत्स्वपि प्रेत्य-परभवे दुर्विकल्पहतचेता [2]जनो दुःखी स्यादित्यन्वयः ।।९.१२।।

**[२३४] अकृच्छ्रसाध्यं मनसो वशीकृतात्,**
**परं च पुण्यं न तु यस्य तद्वशम् ।**
**स वञ्चितः पुण्यचयैस्तदुद्भवैः,**
**फलैश्च ही ही हतकः करोतु किम् ? ।।९.१३।।**

**धनवि.–**अथ निगृहीतमनसः पुंसः सुखसाध्या पुण्यफलप्राप्तिर्भवति, अनिगृहीतमनसः पुंसश्च पुण्यफलवञ्चना भवतीति दर्शयन्नुपदिशति –

१. ०न्तफलमा० मु. । २. जीवो मु० ।

'अकृच्छ्रसाध्यं' इति **वशीकृतात्**-निगृहीताच्छुभयोगव्यापृताद् वा **मनसः अकृच्छ्रसाध्यम्**-अकष्टसाध्यं सुखसाध्यमित्यर्थः, **पुण्यं**-सुकृतं भवति, अशुभ-विषयान्तरसञ्चारादिना व्याघाताभावात्, **च** पुनर्वशी-कृतान्मनसः, **परं**-प्रकृष्टं स्वर्गादिप्रापणप्रवणं **पुण्यं** भवतीत्यन्वयः, मनसः शुभयोग-व्यापारणात् स्वर्गप्राप्तिप्रसिद्धेः श्रूयमाणत्वात्, मनसो निरोधेऽपवर्गप्राप्तिप्रसिद्धेः श्रूयमाणत्वाच्च; **तु** पुनर्यस्य पुंसस्-**तत्**-मनो **वशं**-निगृहीतं **नास्ति**, **स** पुमान् **पुण्यचयैः**-सुकृतसमूहैः, च पुनस्-**तदुद्भवैः**-पुण्यचयोद्भवैः **फलैः** स्वर्गादिभिः, **वञ्चितो**-वञ्चनाविषयीकृतः सन् **हतकः**-हत एव हतको निन्द्यो, ही **ही**ति खेदे, **किं करोत?** किं साधयतु, अपि तु न किञ्चिदपि करोतीत्यर्थः ।।९.१३।।

**रत्न.**–**अकृच्छ्रसाध्यम्** इति, व्याख्या-चेति विशेषोक्तौ वशीकृतात् मनसः परम्-अन्यत् पुण्यं तपोजपादिकं, कृच्छ्रेण-कष्टेन साध्यं, कृच्छ्रसाध्यं, न कृच्छ्रसाध्यमकृच्छ्रसाध्यं वर्त्तते, तु पुनर्यस्य तन्मनो वशम्-आयत्तं न वर्त्तते, स प्राणी वञ्चितः, कैः? - पुण्यचयैः-सुकृतसमूहैः, च पुनस्तेभ्यः-पुण्यचयेभ्यः उद्भवैः फलैरपि वञ्चितः, तेन हत एव हतकः-कर्मदण्डितो, हीहीति वीप्सायां खेदे, किं करोत?, अपि तु न किमपि, सर्वथा निर्गतिक इत्यर्थः, किमिति प्रश्ने निन्दार्थे वाऽव्ययम् ।।९.१३।।

**[२३५] अकारणं यस्य च दुर्विकल्पैर्-**
**हतं मनः शास्त्रविदोऽपि नित्यम् ।**
**घोरैरघैर्निश्चितनारकायुर्-**
**मृत्यौ प्रयाता नरके स नूनम् ।।९.१४।।**

**धनवि.**–अथाधीतस्यापि पुंसो मनोनिग्रहाभावेऽनिष्टफलं दर्शयन्नुपदिशति – - 'अकारणं' इति **यस्य शास्त्रविदः**-सिद्धान्तरहस्यज्ञस्य, **अपि सुदुर्विकल्पैः**-अतिशयेन दुश्चिन्तनै**र्नित्यं**-सर्वकालं **मनः**-चित्तम्, **अकारणं**-निष्कारणं निरर्थकं **हतं**-पराभवविषयीकृतं, अत्राकारणता च सर्वस्यापि दुश्चिन्तितस्य पदार्थस्य प्राप्तेरभावात्, **स** पुमान् **घोरैः**-भयङ्करैः, **अघैः**-पापैः पापकर्मभि**र्निश्चितनारकायुः**-

निकाचित-नरकायुष्कर्मा **मृत्यौ**-मरणे सति **नूनं**-निश्चितं **नरके**-नरकगतौ **याता**-गन्तेति ।।९.१४।।

**रत्न.–अकारणं यस्य** इति., व्याख्या-शास्त्राणि-जिनागमादीनि वेत्तीति शास्त्रवित्, तस्यापि यस्य मनः सुदुर्विकल्पैरतिशयेन दुष्टसङ्कल्पैः, हतं-पीडितं, कथम् ? - अकारणं कारणं विनापि, उपसर्गादिकारणमत्र गृह्यते, तेन तद्विनैवेत्यर्थः, कथ ? - नित्यं, स पुमान् नूनं-निश्चितं, नरके प्रयाता गन्ता, कस्मात्? मृत्योः[१]-मरणात् यतः किंलक्षणः निकाचितं नारकायुर्येन स, कैः? - अधैः पापैः, किंभूतैः ? - घोरैः-भयानकैः ।।९.१४।।

**[२३६] योगस्य हेतुर्मनसः समाधिः,**
**परं निदानं तपसश्च योगः ।**
**तपश्च मूलं शिवशर्मवल्ल्याः,**
**मनःसमाधिं भर तत् कथञ्चित् ।।९.१५।।**

**धनवि.–**अथ मनोनिग्रहस्यैव परंपरयाऽपि मोक्षकारणतां दर्शयन्नुपदिशति – - 'योगस्य' इति **मनसः समाधिः**-एकाग्रता, राग-द्वेषराहित्यमित्यर्थः, **योगस्य**-ज्ञान-दर्शन-चारित्रात्मकस्याष्टाङ्गस्य वा, **हेतुः**-कारणं भवति, **च** पुन**र्योगस्तपसो**-द्वादशविधस्य तपःकर्मणः **परं**-प्रकृष्टं **निदानं**-साधनं भवति, योगसहितस्यैव तपसः साध्यसाधकत्वात्, **तपश्च शिवशर्मवल्ल्या**-मोक्षसुखलताया, **मूलम्**-आदिकारणं भवति, **तत्**-तस्मात् **कथञ्चित्**-केनाप्युपायेन मनःसमाधिं-चेतःस्वास्थ्यं **भर**-धरेत्यर्थः ।।९.१५।।

**रत्न.–योगस्य हेतुर्** इति., व्याख्या–मनसः समाधिः-ऐकाग्र्यं, योगस्य-अष्टाङ्गयोगस्य हेतुः-बीजं, वर्त्तते इति सर्वत्र ज्ञेयं, च पुनर्योगस्तपसः परं-परमं निदानं-हेतुः, च पुनः शिवस्य-मोक्षस्य शर्म-सुखं, [२]तदैव वल्ली, तस्यास्तपो मूलं, तत्-तस्मात्, हे शिवसुखसंतानार्थिन् ! कथञ्चिद् येन तेनोपायेन, मनसः

१. मृत्योः 'इति पाठो मूलत्वेनापि गृहीतः० । - पञ्चमीवशात् 'अनन्तरम्' इत्यध्याहार्यम् । २. सैव मु० ।

समाधिं-स्वास्थ्यं भंज[1]-श्रय, परंपरया सर्वेषां मूलत्वादिति ।।९.१५।।

**[२३७] स्वाध्याय-योगैश्चरणक्रियासु,**
**व्यापारणैर्द्वादशभावनाभिः ।**
**सुधीस् त्रियोगीसदसत्प्रवृत्ति-**
**फलोपयोगैश्च मनो निरुन्ध्यात् ।।९.१६।।**

**धनवि.**—अथ मनोनिग्रहोपायं दर्शयन्नुपदिशति —

'स्वाध्याय-योगैः' इति **सुधीः**-पण्डितः **स्वाध्याय-योगैः**-स्वाध्यायाश्च—वाचना १-प्रच्छना २-परावर्त्तना ३-ऽनुप्रेक्षा ४-धर्मकथाभिधाः ५-पञ्चविधाः, योगाश्च-सिद्धान्ता-ऽध्ययनायोद्देशसमुद्देशाऽनुज्ञादिकापूर्वक्रियाविशेषाः संप्रदायगम्याः, यद् वा पञ्चविधानां स्वाध्यायानां योगा-व्यापाराः **तैर्मनो निरुन्ध्यात्**-चेतोनिग्रहं कुर्यादित्यर्थः, एतावताऽशुभवाग्व्यापारनिरोधेन मनोनिरोधः कर्त्तव्य इति प्रतिपादितं, **च** पुनश् **चरणक्रियासु**-प्रतिलेखन-प्रमार्जन-कायोत्सर्गादिषु शुभानुष्ठानेषु काय**व्यापारणैः**-प्रवर्त्तनैः सुधीर्मनो निरुन्ध्यादित्येतेना-ऽशुभकायव्यापारनिरोधेनापि मनोरोधः कर्त्तव्य इति प्रतिपादितं, च पुन**र्द्वादशभावनाभिः**-द्वादश च-द्वादशसङ्ख्याकास्ता भावनाश्च, १- अनित्यता २.-ऽशरण ३.-भव ४.-एकत्व ५.-अन्यता ६.-अशौच ९.-आश्रव ८.-संवर ९.-निर्जरा १०.-धर्म ११.-लोक १२.-बोधि लक्षणाः ताभिः सुधीर्मनो निरुन्ध्याद्, एतेन मनोयोगनिरोधेनापिं मनोनिरोधः कर्त्तव्य इति प्रतिपादितं, च पुनस्त्रयाणां मनो-वाक्-काययोगानां समाहारस्-**त्रियोगी**, तस्याः **सती** च **असती** च **सदसती** ते च ते **प्रवृत्ती** च, तयोः **फलं**-शुभाशुभं कर्म सुखदुःखं वा, तस्य, **उपयोगाः**-सत्प्रवृत्त्या शुभकर्मोपार्जना भवति, असत्प्रवृत्त्या चाशुभकर्मोपार्जना भवतीति चिन्तनरूपा तैर्मनोयोगं निरुन्ध्यादिति, यद् वा त्रयो योगा यस्य स **त्रियोगी** सुधीरित्यस्य विशेषणं, शेषं पूर्ववदिति ।।९.१६।।

१. धनवि. भर = धर तथा रत्नवि. मूलत्वेनापि भज = श्रय, - इतिपाठभेदः, भरणकार्यं तु बलवता भवति, श्रयणं तु बलवत्त्वे सत्यपि विनयवतैव भवति - इति भावार्थभेदः स्यादपि ।

**रत्न.**—अथ मनसः समाधेरुपायमाह-**स्वाध्याय-यौगैरिति.**, व्याख्या-सुधीः-सद्बुद्धिः पुमान्, मनः प्रति निरुन्ध्यात्-निरोधं कुर्यात्, कैः ? - सु-सुष्ठु आ-समन्तात् मर्यादया वा अध्यायः-अध्ययनं यस्य स स्वाध्यायो-जिनागमः, तस्य योगा-आचामाम्लादितपोविशेषाः, तैः, योगोद्वहनैरित्यर्थः, **योगोद्वहनपूर्वकं स्वाध्यायः कृतो महाफलदायको भवतीति** मूलकारणमुक्तं, अथवा सुष्ठु अध्याय-अध्ययनं द्वादशाङ्ग्याद्यध्ययनं, तस्य योगा योजनानि, तैः वारं वारं स्वाध्यायकरणैरित्यर्थः, च पुनर्व्यापारणैः-व्यापृतिभिः, अर्थात् मनस इत्यध्याहार्यं, कासु ? - चरणस्य-चारित्रस्य क्रियाः-प्रतिक्रमण-कायोत्सर्गादिकास्तासु, तथा काभिः ? - अनित्यत्वचिन्तनादिभिर्द्वादशभावनाभिः, पुनः कैः ? - त्रयाणां योगानां मनो-वचन-कायलक्षणानां समाहारस्-त्रियोगी, त्रियोग्याः सदसत्प्रवृत्ती, त्रियोगीसद सत्प्रवृत्ती, तयोः फलानि, तेषामुपयोगाः-चिन्तनानि तैः, त्रियोग्याः शुभप्रवृत्तेः फलानि कानि ? अशुभप्रवृत्तेश्च फलानि कानि ? इत्युपयोगदानैरित्यर्थः ।।९.१६।।

**[२३८] भावनापरिणामेषु, सिंहेष्विव मनोवने ।**
**सदा जाग्रत्सु दुर्ध्यानशूकरा न विशन्त्यपि ।।९.१७।।**

**धनवि.**—अथ मनोनिरोधद्वारमुपसंहरन् मनोनिरोधोपायभूतायाः पूर्वोक्ताया भावनाया माहात्म्यं प्रकाशयन्नाह —

'भावनापरिणामेषु' इति **मनोवने**-मन एव-चित्तमेव वनं-काननं मनोवनं, तस्मिन् मनोवने **भावनापरिणामेषु**-भावनाया अनन्तरोक्तायाः परिणामेषु-अध्यवसायेषु, **सदा**-सर्वकालं **जाग्रत्सु**-निद्रारहितेष्वर्थादनुभूयमानेषु **दुर्ध्यानशूकरा**-दुश्चिन्तनरूपा वराहा न **विशन्त्यपि**-प्रविशन्त्यपि नेति, अत्र **सिंहेष्विव'** इतीव-यथा, मनःसदृशे वने भावनापरिणामसदृशेषु सिंहेषु-पञ्चाननेषु सदा जाग्रत्सु दुर्ध्यानसदृशाः शूकरा न प्रविशन्तीत्युपमानयोजना, अत्र' अपिशब्दो मनोवने भावनापरिणामेषु जाग्रत्सु दुर्ध्यानशूकराणां प्रवेशोऽपि न भवति तदा तेषां तत्र स्थितिः कौतस्कुतीत्यर्थद्योतकः ।।९.१७।।

इति श्रीतपा० महोपाध्यायश्री**कल्याणविजय**गणिशिष्योपाध्याय श्री**धनविजय**-गणिविरचितायाम**ध्यात्मकल्पद्रुम**टीकायां मनोनिरोधनाम्नी नवमी पदपद्धतिः इति ।।९।।

**रत्न.**—सर्वेष्वेतेषु भावनानामाधिक्यं सूचयन्नाह-**भावनापरिणामेषु** इति., व्याख्या-मन एव वनं मनोवनं, तस्मिन् भावनापरिणामेषु सिंहेष्विव सिंहसदृशेष्वित्यर्थः सदा-निरन्तरं जाग्रत्सु-सावधानेषु सत्सु, दुर्ध्यानान्येव सूकरा विशन्त्यपि न, प्रवेशमपि न कुर्वन्ति, स्थितिविनाशादीनां वार्त्तैव क्वेति ।।९.१७।।

**[२३९]** श्री**शान्तिचन्द्र**वरवाचकदुग्धसिन्धु-
लब्धप्रतिष्ठवरवाचकरत्नचन्द्रः ।
**अध्यात्मकल्पफल**दस्य चकार वृत्तिं,
तत्राऽङ्कमान इति पूर्तिमितोऽधिकारः ।।३।।

---

इति नवमोऽधिकारः संपूर्णः ।।



# १०. वैराग्योपदेशाधिकारः

**[२४०] किं जीव ! माद्यसि हसस्ययमीहसेऽर्थान्,**
**कामांश्च खेलसि तथा कुतुकैरशङ्कः ? ।**
**चिक्षिप्सु घोरनरकावटकोटरे त्वा-**
**मभ्यापतल्लघु विभावय मृत्युरक्षः ।।१०.१।।**

**धनवि.**–अथानन्तरोक्तो मनोनिरोधो वैराग्याधीनो भवतीत्यवसरायातं सामान्यतो वैराग्योपदेशद्वारमुपदर्शयन्नाह-**अथ सामान्यतो वैराग्यधर्मोपदेशः** इति, सुगम् ।

तत्रापि प्रायः सांप्रतीनजनानां दुःखगर्भवैराग्यं भवतीति सकलदुःखमुख्यं मरणभयं दर्शयन्नुपदिशति –

'किं जीव' इति हे **जीव !** - हे प्राणिन् ! **अयं** मानसप्रत्यक्षसिद्धः त्वं, **किं माद्यसि ?** - मदं गच्छसीति, **च** पुनः **किं हससि ?** - किं हास्यं कुरुषे, **च** पुनः किम् **अर्थान्**-धन-कनकादीन् **ईहसे ?** - वाञ्छसि, **च** पुनः **कामान्**-कान्तालिङ्गनादीन् शब्दादीन् वा किम् **ईहसे ?** - वाञ्छसि, **च** पुनर् **अशङ्कः** सन्-निर्भयः सन्, **कुतुकैः**-कुतूहलजनकैर्द्यूतादिभिस्तथा-तेन प्रकारेण त्वं **खेलसि**-रमसे, यथा-येन प्रकारेण **घोरनरकावटकोटरे**-भयङ्करनरकगतिगर्त्तैकदेशशुषिरप्रदेशे **चिक्षिप्सु**-क्षेप्तुमिच्छु **त्वां**-भवन्तं प्रति **लघु**-शीघ्रम् **अभ्यापतद्**-अभिमुखमागच्छत्, **मृत्युरक्षो**-मरणलक्षणराक्षसं **विभावय**-विचिन्तयेति, अत्र रक्षःशब्दो नपुंसकलिङ्गे राक्षसवाचीति ।।१०.१।।

**रत्न.**–अथ सामान्यतो वैराग्यशुद्धिधर्मोपदेशाख्यो दशमोऽधिकारो विवरीतुं प्रारभ्यते । तत्रादौ जीवं प्रति मृत्योर्भयं दर्शयति-**किं जीव ! माद्यसि..**इति., व्याख्या-हे जीव ! त्वं किं माद्यसि ? - जात्याद्यष्टमदमत्तो भवसि, अपि तु मा माद्य, किमिति प्रश्नार्थकमव्ययं काकूक्तिसूचकं सर्वत्र योज्यं, तथा किं हससि, तथाऽयं त्वं किमर्थान्-हिरण्यादिद्रव्याणि ईहसे ? - वाञ्छसि, च पुनरर्थे सर्वत्र प्रथमं वाक्यं विना योजनीयः, त्वं किं कामान् खेलसि ?

कामक्रीडां करोषीत्यर्थः, तथा त्वं कुतुकैः-कुतूहलैः, अशङ्को-गतशङ्कः खेलसि, तथा कुतुकैरशङ्कः किं कामान् खेलसीत्येकमेव वाक्यं, परं त्वं मृत्युमेव रक्षो-राक्षसं लघु-शीघ्रमभ्यापतत्-संमुखमागच्छद्, विभावय-विचारय, किं चिकीर्षु ? - चिक्षिप्सु-प्रक्षेप्तुमिच्छु, कं ? - त्वां प्रति, कस्मिन् ? - घोरो-भीषणो नरक एवावटो-[1]गर्त्तः, तस्य कोटरं-मध्यभागः तस्मिन्, तेन मदादीनि मा कार्षीरिति, रक्षःशब्दो नपुंसकस्तेन मृत्युरक्ष इति जातम् ।।१०.१।।

**[२४१] आलम्बनं तव लवादिकुठारघाताश्-**
**छिन्दन्ति जीवितततरुं न हि यावदात्मन् ! ।**
**तावद् यतस्व परिणामहिताय तस्मिंश् - ?**
**छिन्ने हि कः क्व च ? कथं भविताऽस्यतन्त्रः ? ।।१०.२।।**

**धनवि.**—अथानन्तरोक्तमृत्युभयविभावनया किं कर्त्तव्यम् ? इत्याशङ्कायां कर्त्तव्यमुपदिशति —

'आलम्बनं तव' इति हे **आत्मन् ! तवालम्बनम्**-आधारं **लवादिकुठारघाता** "अष्टादश निमेषाः स्युः, काष्ठा काष्ठाद्वयं लव" इति [अभि० चिन्ता० १३६] वचनाल्लवः कालविशेषः, स आदौ येषां ते लवादयः, त एव कुठाराः, तेषां घाताः-प्रहाराः, ते-तव **जीविततरुम्**-आयुर्लक्षणं वृक्षं **यावद्**-यावत्कालं न **हि छिन्दन्ति**-छिदिक्रियाविषयं न कुर्वन्ति, अत्रादिपदात् प्रहर-दिना-ऽहोरात्रादिपरिग्रहः, **तावत्**-जीवितततरुच्छेदात् पूर्वकाले **परिणामहिताय**-आयतिहितार्थं तपः-संयमादौ **यतस्व**-यत्नं कुरुष्वेति, अत्र तपः-संयमाविति गम्यम्; **हि**-यतः कारणात् **तस्मिन्**-जीवितततरौ **छिन्ने**-छिदिक्रियाविषयीकृते **अतन्त्रः**-अस्वायत्तः परवशः सन्, **कः ?** - किंनामा नारकादिः, पुनः **क्व**-कुत्र नरकादिगतौ च पुनः **कथं**-केन प्रकारेण निराधारो **भविताऽसि ?** - भविष्यसीति ।।१०.२।।

**रत्न.**—अथायुषि सत्येव जीवस्य हितप्रवृत्तावुपदिशन्नाह —

---

१. गर्भः - मु० । 'गर्त्त-श्वभ्रा-ऽवटाऽगाध' इति अभि. चि. १३६४ ।

**आलम्बनं तव** इति., व्याख्या-हे आत्मन् ! अष्टादशनिमेषप्रमाणः कालः काष्ठा, काष्ठाद्वयं लवः-कालविशेषो भवति, लव आदौ येषां ते लवादयः, आदिशब्दात् कलालेशघटिकादीनां ग्रहणं, लवादय एव कुठाराणां घाताः-प्रहारा यावत् तव जीविततरुं-आयुर्वृक्षं न छिन्दन्ति हि निश्चितं, किंलक्षणं ? - आलम्बनम्-आधारं संसारस्थितये इत्यर्थः, तावत् परिणामहिताय-परिणामे हितं कर्त्तुं यतस्व-उद्यमं कुरु, अस्मिन् जीवितत्तरौ छिन्ने सति अस्य जीविततरोः पल्लवनायेति गम्यं, क्व कदा कथं मन्त्रो[1] भविता ?, क इति-किंनामा क्वेति कस्मिन् काले भरतादिक्षेत्रे वा, कथमिति-केन प्रकारेण, कियद्वर्णानुपूर्व्वीक इति, अपि तु न भवितेत्यर्थः, जीवितत्तरुर्लवादिकुठारघातैश्छिन्नः संश्छिन्न एवेति ।।१०.२।।

**[२४२] त्वमेव मोग्धा मनिता त्वमात्म-**
**ष्टाऽप्यनेष्टा सुख-दुःखयोस्त्वम् ।**
**दाता च भोक्ता च तयोस्त्वमेव,**
**तच्चेष्टसे किं न यथा हिताप्तिः ? ।।१०.३।।**

**धनवि.**—अनन्तरमुक्तं 'परिणामहिताय यतस्व'इति, स च यत्नो दैवायत्त इति कस्तत्र परिणामहिते यतते ? इत्याशङ्कायामुपदिशति —

'त्वमेव' इति हे **आत्मन् ! - त्वमेव मोग्धा**-मुह्यतीति मोग्धा, अज्ञाताऽसीत्यर्थः, च पुनस्त्वमेव **मनिता**-मन्यते जानातीति मनिता, ज्ञाताऽसीत्यर्थः, च पुनः **सुख-दुःखयोः** प्रतीतयोः, **एष्टा**-वाञ्छाकर्त्ता, च पुनर् **अनेष्टाऽपि**-द्वेष्टाऽपि त्वमेवासि, एतावता सुखस्यैष्टा दुःखस्य द्वेष्टाऽपि त्वमेव वर्तसे इत्यर्थः, अत्रैष्टेति ईषदिच्छायामित्यस्य तृच्प्रत्यये साधु, च पुन**स्तयोः** सुखदुःखयो**र्दाता**-दायकः च पुन**र्भोक्ता**-अनुभविता त्वमेवासि, यदुक्तम् — [उत्तराध्ययने]

**[२४३]** अप्पा नई वेअरणी, अप्पा मे कूडसामली ।
अप्पा कामदुधा धेणू, अप्पा मे नंदणं वणं ।। [७१६]।।
अप्पा कत्ता विकत्ता य[ ]इति,

१. मन्त्र इतिपाठः मूलत्वेनापि गृहीतः, यत्नो इति मु० ।

**तत्**-तस्माद् **यथाहितापि**-हितापिमनतिक्रम्य यथासुखं, **किं न चेष्टसे ?** - किं न यतसे इत्यन्वयः, अत्रायं भावः-सर्वमात्मायत्तं वर्त्तते, न तु दैवायत्तं, **तथा** च किं न यतसे ? ।।१०.३।।

**रत्न.**–अथ सर्वमात्मायत्तं प्ररूप्यात्मानं हितापतौ प्रेरयन्नाह –

**त्वमेव मोग्धा**..इति., व्याख्या-हे आत्मन् ! त्वमेव मोग्धा-मौढ्र्य प्राप्ता, तथा मनिता-ज्ञाता त्वमेव, तथा एष्टा-वाञ्छिता अनेष्टा-अवाञ्छिताऽपि त्वमेव, कयोः? - सुख-दुःखयोः, सुखस्यैष्टा दुःखस्यानेष्टेत्यर्थः, तयोः सुख-दुःखयोर्दाता-दायकः त्वमेव जीवं प्रति पोषणादिना सुखस्य, जीवं प्रति हननादिना दुःखस्येत्यर्थः, तयोश्च सुख-दुःखयोर्भोक्ता त्वमेव, तत्कारणाद् यथाहितापि-हितापिमनतिक्रम्य यथाहितापि किं न चेष्टसे ? - उद्यमं किं न कुरुषे, यथा हितापिः हितप्रापिः [इत्यर्थः] स्यात्, तदा हितापिरिति पाठः ।।१०.३।।

**[२४४] कस्ते निरञ्जन ! चिरं जनरञ्जनेन ?,**
**धीमन् ! गुणोऽस्ति ? परमार्थदृशेति पश्य ।**
**तं रञ्जयाशु विशदैश्चरितैर्भवाब्धौ,**
**यस्त्वां पतन्तमबलं परिपातुमिष्टे ।।१०.४।।**

**धनवि.**–अथान्यजनरञ्जनोद्यतमात्मानमुपदिशति –

'कस्ते' इति हे **निरञ्जन** ! - हे निर्लेप ! सम्यक्त्वतत्त्वेन विरतिमत्त्वेन च मिथ्यात्वा-ऽविरतिरूपाऽञ्जन-रहितत्वादिति संबोधनं, भाविसिद्धत्वावस्थायां सकलकर्मरूप-पापाऽञ्जनरहितत्वाद् भाव्यवस्थयेति वा संबोधनं, हे **धीमन्** ! धीः-हिताहितपरिज्ञानं, साऽस्यास्तीति तथेति संबोधनं, अत्र कोमलवचनसंबोधन-पदद्वयेनामन्त्रणं धर्मोपदेशश्रवणं प्रति श्रोतुराभिमुख्यापादनार्थं, **कोमलवचनेनामन्त्रितो हि श्रोता प्रसन्नचित्तः सम्यक् श्रोतुं प्रवर्त्तते, चिरं**-चिरकालम्, आबाल्याद् आवार्द्धक्यकालं याव**ज्जनरञ्जनेन**-मलिनाम्बरधरण-मधुरभाषण-मन्त्र-तन्त्र-यन्त्रौषधादिकरणैर्जनमनोवशीकरणेन **ते**-तवात्मनः **कः ?** - किंप्रकारोऽणुर्वा महान् वा **गुणः**-तात्त्विकोपकाररूपोऽ**स्ति**-विद्यते **इति**-अमुना प्रकारेणानन्तरमत्रैवोक्तम्,

त्वं **परमार्थदृ**शा-तत्त्वदृष्ट्या **पश्य**-विलोकय विचारयेत्यर्थः; अत्र विलोक्येतिगम्यं, तेनेति विलोक्य, **त** धर्मलक्षणं पदार्थम्-**आशु**-शीघ्रं, **विशदैः**-निष्कलङ्कैश्च**रितैः**-समाचरणै **रञ्जय**-स्ववशीकुर्वित्यर्थः, **यो** धर्मो **भवाब्धौ-सं**सारसागरे **पतन्तं**-निमज्जन्तम् **अबलं**-दानादिपुण्यशम्बलबलरहितं **त्वां परिपातुं**-त्रातु**मीष्टे**-समर्थो भवति, यदुक्तम्-

"दुर्गतौ प्रपतत्प्राणिधारणाद् धर्म उच्यते" [ ] इति, अत्र ईष्टे इति ईशिक् ऐश्वर्ये [है.धा.१११६] इत्यस्य प्रयोग इति ।।१०.४।।

**रत्न.**—अथ[1] पररञ्जनाय प्रवृत्तमात्मानमुपदिशति-**कस्ते निरञ्जनः** इति., व्याख्या-हे धीमन् ! - हे बुद्धिमन्, निर्गतमञ्जनम्-अक्तिरर्थाल्लेपो यस्य स निरञ्जनः, तस्य संबोधने – हे निरञ्जन ! आत्मनो रूपाभावान्निरञ्जनत्वमिति, चिरं-चिरकालं जनानां-लोकानां रञ्जनेन-रागोत्पादनेन ते-तव को गुणोऽस्ति? - अपि तु न कोऽपि गुणोऽस्ति, इति त्वं परमार्थदृशा-परमार्थो-मोक्षः, तस्मिन् दृग्-ज्ञानं, तया तत्त्वज्ञानेनेत्यर्थः पश्य विलोकय, विलोक्य च पररञ्जनं विमुच्य, तं रञ्जय-रागीकुरु, कैः? - विशदैः-निर्मलैर्दोषरहितैरित्यर्थः, चरितैः-[2]चरित्रैः कथं? - आशु-शीघ्रं, तं कमित्याह-यस्त्वां भवाब्धौ-भवसमुद्रे पतन्तं परिपातुं-रक्षितुमीष्टे-ईशो भवति, समर्थो भवतीत्यर्थः, त्वां किलक्षणं ? - अबलं-बलरहितं, निरर्थकेन पररञ्जनेन किमिति ?, केवलं जगदीश्वरमथवा तद्भाषितधर्मं रञ्जयेति भावः ।।१०.४।।

**[२४५] विद्वानहं सकललब्धिरहं नृपोऽहं,**
**दाताऽहमद्भुतगुणोऽहमहं गरीयान् ।**
**इत्याद्यहङ्कृतिवशात् परितोषमेषि,**
**नो वेत्सि किं परभवे लघुतां भवित्रीम् ? ।।१०.५।।**

**धनवि.**—ननु जनरञ्जनेन पाण्डित्यख्यात्यादिलक्षणो गुणः स्यादेवेति कथमनन्तरमुक्तं "जनरञ्जनेन को गुणः स्याद्" इत्याशङ्कायामुपदिशति—

'विद्वानम्' इति **अहं**-मल्लक्षणो जनो, वेत्तीति **विद्वान्**-पण्डितोऽस्मि, च पुनर् **अहं सकललब्धि**रस्मि सकलाः-समस्ता लब्धयः-पण्डितपदादिप्राप्तिरूपा

१. अथापर० मु० । २. आचरितैः मु० ।

धन-धान्य-वस्त्र-पात्र-घृतप्राप्तिरूपा वा आमर्शौषध्यादिका वा यस्य स तथेति, **च** पुनरहं **नृपो**-नराधीशोऽस्मि, **च** पुनरहं **दाता**-दानशौण्डोऽस्मि, **च** पुनर्, **अहमद्भुतगुणो**ऽस्मि, अद्भुता-आश्चर्यकारिणो गुणा ज्ञान-विज्ञानादयो यस्य स तथा, **च** पुनरहं **गरीयान्**-अतिशयेन गुरुः-महानस्मि, **इत्याद्यहङ्कृतिवशाद्**-इति-अनन्तरोक्ताः प्रकारास्ते आदौ-प्रथमं यत्र सा चासावहङ्कृतिश्च-अहङ्कारस्तद्वशात्-तद्वशत्वात्, तदायत्तत्वादित्यर्थो भावप्रधान-निर्देशः, **परितोषं**-संतोषमेषि-प्राप्नोषीत्यर्थः; **परं परभवे**-अग्रेतनभवे **भवित्रीं**-भविष्यन्तीं **लघुतां**-लाघवं **किं न वेत्सि ?** - किं न जानासि अत एवोक्तं **योगशास्त्रे**-

**[२४६]** "जाति-लाभ-कुलैश्वर्य-बलरूप-तपः-श्रुतैः ।
कुर्वन् मदं पुनस्तानि, हीनानि लभते जनः [३३९] इति

**रत्न.**—अथाहङ्कृतिनिराकृतिविषये उपदिशति —

**विद्वानहम्**-इति. व्याख्या-हे आत्मन्नहं विद्वानस्मि, पण्डितोऽस्मि अस्मीति सर्वत्र [१]ज्ञेयम्, सर्वत्र चकारोऽनुक्तोऽपि समुच्चयार्थो गृह्यते, तेन च पुनः सकला-अष्टाविंशतिभेदा लब्धयो यस्य सोऽहं, तथा नृपोऽहं-राजा अहं, दाता-दानी, तथा अद्भुता गुणा दुष्कालोद्धरणादिका औदार्य - धैर्यादिका वा यस्य सोऽहं, तथा अहमतिशयेन गुरुर्गरीयान्-अतिमहानित्यर्थः, हे आत्मन् ! त्वमित्याद्यहङ्कृतिवशाद्-अहङ्कारवशतः परितोषं-संतोषमेषि-प्राप्नोषि, परमेतन्मद-वशात् परस्मिन् भवे भवित्रीं-भाविनीं लघुतां किं न वेत्सि ? - किं न जानासीति काकूक्त्या जीवं प्रति प्रश्नः, **'यद्विषयकाहङ्कृतिस्तद्विषया परत्र लघुता भाविनी' इति** जानाहीत्यर्थः ॥१०.५॥

**[२४७] वेत्सि स्वरूप-फल-साधन-बाधनानि,**
**धर्मस्य तं प्रभवसि स्ववशश्च कर्तुम् ।**
**तस्मिन् यतस्व मतिमन्नधुनेत्यमुत्र,**
**किञ्चित् त्वया हि न हि सेत्स्यति भोत्स्यते वा ॥१०.६॥**

१. योज्यं - मु० ।

**धनवि.–**'परभवे लघुता भवित्री'त्यनन्तरमुक्तम्, सा च परभवे लघुता परभवे एव धर्मसाधनादिना विनिवारिता भविष्यतीति किं सांप्रतं संभावितभयगर्भोपदेशेन ? इत्याशङ्कायामुपदिशति –

'वेत्सि' इति **अधुना**-वर्त्तमानसमये **धर्मस्य**-यतिधर्मस्य श्राद्धधर्मस्य वा **स्वरूपं** च-धर्मस्य क्षान्त्यादिदशप्रकारं, **फलं** च-धर्मस्य स्वर्गापवर्गादि, **साधनं** च-धर्मस्य "चत्तारि परमंगाणि'[उत्तराध्ययनसूत्रम्]इत्यादि प्रतिपादितरूपं, **बाधनं** च-धर्मस्य प्रमादरूपम् ततो द्वन्द्वः, तानि त्वं **वेत्सि**-जानासि, तथा **च** पुनस्त्वमधुना **स्ववशः**-स्वाधीनः सन् **तं** धर्मं **कर्तुं प्रभवसि**-समर्थो भवसि, हे **मतिमन् !** - पण्डित ! इति हेतोः, **तस्मिन्**-धर्मेऽ**धुना**-वर्त्तमानसमये त्वं **यतस्व**-यत्नं कुर्वित्यर्थः; **हि**-यतो **अमुत्र**-भवान्तरे नरकादिलक्षणे **त्वया** करणभूतेन **न हि किञ्चित्** परलोकसाधनादिकं **सेत्स्यति**-सिद्धिं यास्यति, **वा**-अथवा **अमुत्र त्वया** कर्तृभूतेन **किञ्चिद्** धर्मस्य स्वरूपफलादि वस्तु न हि **भोत्स्यते**-ज्ञास्यते इति, तस्मादत्रैव भवे यत्नं कुरुष्वेत्यर्थः ।।१०.६।।

**रत्न.–**अथात्मानमिह भवे एव [१]धर्मार्थं प्रेरयन्नाह –

**वेत्सि स्वरूप०..**इति. व्याख्या-हे आत्मन ! धर्मस्य तत्त्वतो जिनधर्मस्येत्यर्थः, अपरेषां धर्माभासत्वात्, स्वरूपं-लक्षणं फलं-स्वर्गापवर्गावाप्त्यादि, साधनं-कारणं मनुजजन्म-धर्मश्रवण-श्रद्धान-वीर्यस्फोरण-पञ्चेन्द्रियपटुत्वादि तथा बाधनं-अनार्यदेशोत्पत्ति-पञ्चेन्द्रियापटुत्व-कुकुलोत्पत्यादि, द्वन्द्वसमासे, तानि प्रति त्वं वेत्सि-जानासि चतुरत्वादिति, च पुनस्त्वं तं धर्मं कर्तुं प्रभवसि-प्रभुर्भवसि-समर्थो भवसि । त्वं किलक्षणः ? - स्वस्य वशः स्ववशः स्वायत्त इत्यर्थः, हे मतिमन ! तस्मिन् धर्मे यतस्व-यत्नं कुरु, कथम ? - अधुना-इह भवे, हि यस्मात् कारणात्, अमुत्र परभवे त्वया हि निश्चितं किञ्चित्-किमपि नहि सेत्स्यति-न निष्पत्स्यते, वा पुनर्न-भोत्स्यते-न ज्ञास्यते इति, पारतन्त्र्याद् वीर्याभावाद् ज्ञानाभावाच्च किमपि कर्तुं न शक्यते इति ।।१०.६।।

---

१. धर्मे - मु० ।

**[२४८] धर्मस्यावसरोऽस्ति पुद्गलपरावर्त्तैरनन्तैस्तवा-ऽऽ-**
**यातः संप्रति जीव ! हे प्रसहतो दुःखान्यनन्तान्ययम् ।**
**स्वल्पाहः पुनरेष दुर्लभतमश्चास्मिन् यतस्वाऽर्हतो,**
**धर्मं कर्तुमिमं विना हि न हि ते दुःखक्षयः कर्हिचित् ।।१०.७।।**

**धनवि.**—अथानन्तरोपदिष्टमेवार्थं विशेषत उपदिशति—'धर्मस्य' इति हे **जीव!** - हे आत्मन् ! **अनन्तानि**-अतीतकालापेक्षयाऽन्तरहितानि **दुःखानि** प्रसिद्धानि **प्रसहतः**-प्रकर्षेण सहमानस्य तव, **संप्रति**-वर्त्तमानभवे, **अनन्तैः** अतीतकालापेक्षयाऽन्तरहितैः, **पुद्गलपरावर्त्तैः**-जैनागमप्रसिद्धैः सुबहुकालविशेषै**र्धर्मस्य**-जैनधर्मस्य, **अयं**-प्रत्यक्षोऽनुभूयमानो**ऽवसरः**-प्रस्तावः **स्वल्पाहः**-स्तोकदिन **आयातः**-समागतोऽस्ति, **च पुनरेष** धर्मावसरः **पुन**र्द्वितीयवारं **दुर्लभतमः**-दशभिर्दृष्टान्तैरतिशयेन दुष्प्रापोऽस्ति, **इत्यस्मिन्नवसरेऽर्हतो**-जिनस्य **धर्मं** कर्तुं, **यतस्व**-उद्यमं कुरुष्व; हि यतः कारणादिमं जिनधर्मं विना **ते**-तव **दुःखक्षयः**-सकलसांसारिकदुःखविनाशः **कर्हिचित्**-कदाचिद् **न ह्यस्ति**; अत्रानन्तस्वरूपं च **चतुर्थषडशीतिकनामककर्मग्रन्था**-ऽऽदिभ्योऽवसेयं, ग्रन्थगौरवभयाच्च नोक्तमिति; पुद्गलपरावर्त्तस्त्वनन्तोत्सर्प्पिण्यवसप्पिणी - प्रमाणः कालः, तत्स्वरूपसूचक**कर्मग्रन्थशतको**क्तं गाथात्रयं चेदम्,

**[२४९]** "दव्वे १ खित्ते २ काले ३ भावे ४ चउह दुह बायरो सुहुमो ।
होइ अणंतुस्सप्पिणिपरिमाणो पुग्गलपरट्टो [८६]

**[२५०]** उरलाइसत्तगेणं एगजिओ मुयइ फुसिय सव्वअणू ।
जत्तियकालि स थूलो दव्वो सुहुमो सगन्नयरा [८७]

**[२५१]** लोगपएसोसप्पणिसमया अणुभागबंधठाणा य ।
जह-तह कममरणेणं पुट्ठा खित्ताइ थूलियरा [८८]

१ एतस्य गाथात्रयस्यायं समुदायार्थः संक्षेपतो-यथा १-द्रव्य २-क्षेत्र ३-काल ४-भावभेदैश्चतुर्द्धा पुद्गलपरावर्त्तः, १-औदारिक २-वैक्रिय ३-तैजस ४-भाषा ५-श्वासोच्छ्वास ६-मनः ७-कार्मण ८-रूपतया सर्वपुद्गलान् परिणमय्य परिणमय्यैको

जीवो यदा मुञ्चति तदा १. बादरद्रव्यपुद्गलपरावर्त्तः, एतेषां सप्तानां मध्यादेकेन केनचिद् रूपेण सर्वान् पुद्गलान् परिणमय्य यदा मुञ्चति तदा २. सूक्ष्मद्रव्यपुद्गलपरावर्त्तः, ३. सर्वलोकाकाशप्रदेशानेक एव जीवो मरणैर्यथा तथा स्पृशति तदा बादरक्षेत्रपुद्गलपरावर्त्तः, ४. सर्वलोकाकाशप्रदेशाननुक्रमेण मरणैः स्पृशति, तदा सूक्ष्मक्षेत्रपुद्गलपरावर्त्तः, ५. उत्सर्पिणीकालस्य सर्वान् समयान् यथा तथा मरणैः स्पृशति तदा बादरकालपुद्गलपरावर्त्तः ६. अनुक्रमेण यदा स्पृशति तदा सूक्ष्मकालपुद्गलपरावर्त्तः सर्वाण्यसङ्ख्याताध्यवसायस्थानानि क्रमेणोत्क्रमेण चैको जीवो मरणेन स्पृशति तदा ७. बादरभावपुद्गलपरावर्त्तः सूक्ष्मो भावपुद्गलपरावर्त्तसु कश्चिज्जन्तुः सर्वजघन्ये कषायोदयरूपेऽध्यवसायस्थाने मृतस्ततो यदि स एवानन्तेऽपि काले गते सति प्रथमादनन्तरे द्वितीयेऽध्यवसायस्थाने वर्त्तमानो म्रियते तदा तन्मरणं गण्यते, न शेषाण्यनुक्रमभावीन्यपि मरणानि, एवं क्रमेण सर्वाण्यप्यनुभाग-बन्धा-ऽध्यवसायस्थानानि यावता मरणेन स्पृष्टानि स्युस्तावान् ८. काल इति अत्र क्षेत्रसूक्ष्मपुद्गलपरावर्त्तेनाधिकारः, शेषाः सर्वे प्रकाराः प्ररूपणामात्रमिति ।।१०.७।।

**रत्न.**—अथात्मानं प्रति धर्मस्यावसरं ज्ञापयन्नाह —

**धर्मस्यावसरोऽस्ति** इति. व्याख्या-हे जीव ! तवायं-संप्रति अधुना धर्मस्यावसरः आयातोऽस्ति, कैः ? - द्रव्य-क्षेत्र-काल-भावभेदैश्चतुर्भिरपि पुद्गलपरावर्त्तैः-अनन्तोत्सर्पिण्यवसर्पिण्यात्मककालविशेषैः, तव किं कुर्वतः सतः ? - प्रसहतः सतः-प्रकर्षेण सहमानस्य सतः, कानि प्रति, किंलक्षणानि ? - अनन्तानि, पुनरिति विशेषे, अयमवसरः स्वल्पान्यहानि-दिनानि यस्य स स्वल्पाहः, च पुनरतिशयेन दुर्लभो-दुर्लभतमो वर्त्तते, धर्मस्यावसरः स्वल्पदिनो [1]दुष्प्रापतमश्च भवतीति, ततश्चास्मिन्नवसरे [2]आर्हतं धर्मं कर्त्तुं यतस्व-उद्यमं कुरु, हि यतः कारणात् ते-तवेमं-आर्हतं धर्मं विना, हे आत्मन् ! - कर्हिचित्-कदाचिद् दुःखानामेकविंशतिप्रभेदानां क्षयं-आत्यन्तिकी निवृत्तिर्नास्तीति ।।१०.७।।

---

१. दुर्लभ० मु० । २. 'यतस्वाऽऽर्हतं' मूलत्वेन पाठः ।

**[२५२] गुण-स्तुतीर्वाञ्छसि निर्गुणोऽपि,**
**सुख-प्रतिष्ठादि विनापि पुण्यम् ।**
**अष्टाङ्गयोगं च विनाऽपि सिद्धीर्-**
**वातूलता काऽपि नवा तवात्मन् ! ।।१०.८।।**

**धनवि.**—अथानन्तरमुक्तं 'धर्मं विना दुःखक्षयो न भवति'इति, तेन तदुपरि निदर्शनत्रयदर्शनद्वारेण तमेवार्थं समर्थयन्नुपदिशति—'गुण-स्तुतीः इति, हे **आत्मन !** - त्वं **निर्गुणोऽपि**-तथाविधज्ञानादिगुणरहितोऽपि **गुण-स्तुतीः**-स्वगुणप्रशंसाः **वाञ्छसि**-इच्छसि, च पुनः **पुण्यं विना**-सुकृतमन्तरेण **सुख-प्रतिष्ठादि** वाञ्छसीति, अत्र सुखं च सुधन-धान्य-पुत्र-कलत्राऽऽदिप्राप्तिजनितं, प्रतिष्ठा च श्रेष्ठित्व-प्रधानत्व-नरनायकत्वादिरूपा, ते आदौ-प्रथमे यत्र तत् तथा, आदिपदात् स्वर्गा-ऽपवर्गादिपरिग्रहः; **च** पुनर् —

**अष्टाङ्गयोगं विनाऽपि सिद्धी**र्वाञ्छसीत्यन्वयः; अत्र योगस्याष्टावङ्गानि १-यम २-नियम ३-करण ४-प्राणायाम ५-प्रत्याहार ६-धारणा ७-ध्यान ८-समाधि-नामानि ।

**[२५३]** व्रतादान ....., .....।

१-अहिंसा २-सूनृता ३-ऽस्तेय, ४-ब्रह्मा-५-ऽऽकिञ्चनता यमाः-इत्यादिनाममाला-(अभि.८१) पाठतः स्पष्टार्थानि, सिद्धयश्चाष्टधा —

**[२५४]** "१-लघिमा २-वशिते ३-शित्वं ४-प्राकाम्यं ५-महमा ६-ऽणिमा ।
यत्र ७-कामावसायित्वं, प्राप्तिरैश्वर्यमष्टधा ।।१।। [अभि.२०२]

इत्यादिना प्रतिपादिताः; तेन कारणेन तव वातूलता-वातविकृतिजन्या संज्ञारहितता ग्रथिलतेत्यर्थः काऽपि अवक्तव्या नवा-अपूर्वा आश्चर्यकारिणी वर्त्तते; अत्रायं भावो-यथा गुणान् विना स्तुतिर्न भवति, यथा पुण्यं विना सुख-प्रतिष्ठादि न भवति, यथाऽष्टाङ्गयोगं विना सिद्धयो न भवन्ति, तथा धर्मं विना दुःखक्षयो न भवतीति दृष्टान्त-दार्ष्टान्तिकयोजनेति ।।१०.८।।

**रत्न.**—अथात्मनोऽयुक्तवाञ्छकत्वेन वातूलतां निरूपति-**गुण-स्तुतीर्** इति. व्याख्या-हे आत्मन् ! त्वं निर्गता लौकिक-लोकोत्तरभेदभिन्ना गुणा—औदार्य-धैर्य-शौर्यादयो ज्ञान-दर्शन-चारित्रादयश्च यस्मात्, एवंविधोऽपि सन् गुणानां स्तुतीः-स्तवान् वाञ्छति, तथा पुण्यं विनापि सुखानि प्रतिष्ठा-गौरवं ते आदौ यस्य तत्, सुख-प्रतिष्ठादि प्रति वाञ्छसि, आदिशब्देन लक्ष्म्यैश्चर्यादिग्रहणं, तथा यम-नियम-प्रभृत्यष्टाङ्गयोगं विनापि सिद्धीः-अष्टकर्मक्षयलक्षणाः प्रति वाञ्छसि, बहुवचनमष्टकर्मक्षयापेक्षया, **सिद्धि**मिति पाठे तु मोक्षमिति, अथवा —

[२५५] "लघिमा वशितेशित्वं, प्राकाम्यं महिमाऽणिमा।
यत्र कामावसायित्वं, प्राप्तिरैश्चर्यमष्टधा" ।।१।। [अभि.२०२]

इति अष्ट सिद्धीः प्रति वाञ्छसीत्यपि ज्ञेयं, तर्हि हे आत्मन् ! तवेयं वातूलता-वातरोगित्वं काऽप्यदृष्टपूर्वा नवा-नवीनैवास्ति, कारणं विना कार्यस्पृहयालुत्वं वातकित्वमेवेति भावः ।।१०.८।।

**[२५६] पदे पदे जीव ! पराभिभूतीः,**
**पश्यन् किमीर्ष्यस्यधमः परेभ्यः ? ।**
**अपुण्यमात्मानमवैषि किन्न ?,**
**तनोषि किंवा नहि पुण्यमेव ? ।।१०.९।।**

**धनवि.**—अथानन्तरं 'पुण्यं विना सुखप्रतिष्ठादि न भवति'इत्युक्तम्, तेनार्थात् पुण्याभावे पराभवो भवतीति दर्शयन् पुण्यमेव करणीयमित्युपदिशति —

'पदे पदे' इति हे **जीव !** - हे प्राणिन् ! **त्वमधमो**-निष्पुण्यः सन्, **पदे पदे**-स्थाने स्थाने **पराभिभूतीः**-परेभ्योऽभिभूतीः-पराभवान्, **पश्यन्**-विलोकयन्, **परेभ्यः**-आत्मव्यतिरिक्तेभ्यः **किं**-किमर्थम्-**ईर्ष्यसि** ? - क्रुध्यसीत्यर्थः; अथोत्तरार्धेनेर्ष्याया अकरण उपायं दर्शयति-**आत्मानमेव**-स्वमेवा**पुण्यं**-निष्पुण्यं **किं नाऽवैषि ?** - न जानासि, निष्पुण्यत्व-पराभवयोः साहचर्यात्, **वा**ऽथवा **पुण्यमेव**-सुकृतमेव **किं न हि तनोषि ?** - न कुरुषे, अत्रोत्तरार्धस्थ एवकार उक्तिद्वये योज्यः ।।१०.९।।

**रत्न.**—अथ जीवं प्रति परेभ्योऽभिभूतौ सत्यामीर्ष्यां मा कुर्विति प्रतिबोधयति—

**पदे पदे जीव !** - इति. व्याख्या-हे जीव ! त्वं पदे पदे स्थाने स्थाने परेभ्यः, **समर्थविशेषणाद् विशेष्यं लभ्यते** इतिन्यायाज्जनेभ्यः, पराः-प्रकृष्टा अभिभूतीः-अभिभवान् पश्यन् त्वं किमीर्ष्यसि ? - ईर्ष्यां करोषि, त्वं किंलक्षणः.? - अधमो-नीचः, पुण्यरहितत्वादिति, तर्ह्यात्मानं-स्वं न विद्यते पुण्यं यस्य स तं किं नावैषि ?, न जानासि, अपि तु आत्मानमपुण्यमेवाऽवैहि, वा पुनरात्मानम-पुण्यमवेत्य हि निश्चितं पुण्यमेव किं न तनोषि ?, एवकारोऽन्यव्यवच्छेदार्थः, अथवा परेभ्यः किमीर्ष्यसीति व्याख्येयं तदा परेभ्य इति चतुर्थीबहुवचनम् ।।१०.९।।

**[२५७] किमर्दयन् निर्दयमङ्गिनो लघून्,**
**विचेष्टसे कर्मसु ही प्रमादतः ? ।**
**यदेकशोऽप्यन्यकृतार्दनः सह-**
**त्यनन्तशोऽऽप्यङ्ग्ययमर्दनं भवे ।।१०.१०।।**

**धनवि.**—अथानन्तरोपदेशे पुण्यकरणमुपदिष्टं, तेन पुण्यकरणप्रतिपक्षे पापकरणे-ऽनिष्टफलं दर्शयन्नुपदिशति —

'किमदर्यन्' इति, **ही** इति खेदे, त्वं **प्रमादतो**-मद्यादिपञ्चविधाद्, अज्ञानाद्यष्टविधाद् वा **लघून्**-आत्मनोऽणून् बादरपृथ्वीकायिकादीन् **अङ्गिनो**-देहिनो **निर्दयं**-निष्कृपं यथा स्यात् तथाऽसमञ्जसवृत्त्येत्यर्थः **अर्दयन्**-पीडयन्, **कर्मसु**-कृष्यादिव्यापारेषु **किमिति** वितर्कप्रश्ने **विचेष्टसे** ? - प्रवर्त्तसे, **यद्**-यस्माद् **एकशः**-एकवारम् **अन्यकृतार्दनो**-विनिर्मितपरपीडः, **अयं** परपीडाकारी **अङ्गी**-प्राणी **भवे**-संसारे **अनन्तशः**-अनन्तवारम्, **अर्दनं**-पीडनं **सहति**-तितिक्षते, यदुक्तम् — [उपदेशमालायाम्]

**[२५८]** वह-मारण-अब्भक्खाणदाण-परधणविलोवणाईणं ।
सव्वजहण्णो उदओ दसगुणिओ इक्कसि कयाणं [१७७]।।

**[२५९]** तिव्वयरे उ पओसे सयगुणिओ सयसहस्सकोडिगुणो ।
कोडाकोडिगुणो वा हुज्ज विवागो बहुतरो वा [१७८] ।।१०.१०।।

**रत्न.–**अथात्मानं परपीडनप्रसक्तमवेत्य प्रतिबोधायाह-**किमर्दयन्..**इति. व्याख्या-हे आत्मन् ! त्वत्तो लघून्-बलेन शरीरेण वा तुच्छान्, अङ्गिनः-प्राणिनः प्रति निर्दयं यथा स्यात् तथा अर्दयन्-पीडयन्, हीति खेदे प्रमोदतो-हर्षतः कर्मसु अर्थात् पापकर्मसु मृगयादिषु त्वं किं विचेष्टसे ? - विरुद्धां चेष्टां करोषि, अपि तु मा विचेष्टस्व, यद्-यस्मात् कारणात्, एकशोऽपि-एकवारमपि अन्येषां कृतमर्दनं-पीडनं येन सोऽङ्गी-प्राणी भवे-संसारेऽनन्तशः-अनन्तवारानर्दनं-पीडनं सहति, यत उक्तम् – [उपदेशमालायाम्]

**[२६०]** "तिव्वयरे से पओउरे सयगुणिओ सयसहस्सकोडिगुणिओ अ ।
कोडाकोडिगुणो वा हुज्ज विवागो बहुतरो वा [१७८] इति।।१०.१०।।

**[२६१] यथा सर्पमुखस्थोऽपि,**
**भेको जन्तूनि भक्षयेत् ।**
**तथा मृत्युमुखस्थोऽपि,**
**किमात्मन्नद्दर्दसेऽङ्गिनः ? ।।१०.११।।**

**धनवि.–**अथानन्तरोक्ते एव परार्दने दृष्टान्तदर्शनपूर्वकं बीभत्सतां दर्शयंस्त-न्निवृत्ति-मुपदिशति –

'यथा' इति **य**थेति दृष्टान्तोपन्यासे, **सर्पमुखस्थः**-अहिवदनगतोऽपि **भेको**-मण्डूको **जन्तूनि**-जलस्थलगतप्राणिनो **भक्षयेत्**-खादयेत्, **आत्मन् ! तथा**-तेन प्रकारेण **मृत्युमुखस्थो**-दिनं दिनं प्रत्यायुषःक्षीयमाणत्वात् कृतान्तवदनप्राप्तोऽ**प्यङ्गिनः**-प्राणिनः **किमिति** प्रश्ने ? अद्दर्दसे-पीडयसीत्यर्थः, [२]जन्तुशब्दः पुं-नपुंसकलिङ्गे ।।१०.११।।

---

१. गुणो० मु० । २. जायते....'कृसि-कमि' [उणादि ७७३] - इति तुनि जन्तुः पुं-क्लीबलिङ्गः [अभि.चिन्ता.-१३६६-स्वोपज्ञवृत्तिः]

**रत्न.**—एतदेव दृष्टान्तने[१] दृढयति —

**यथा सर्पमुखस्थोऽपि.** इति, व्याख्या-यथेति दृष्टान्तोपन्यासे सर्पमुखस्थोऽपि भेको-मण्डूको जन्तूनि-क्षुद्रजीवान् भक्षयेत्-अश्नीयात्, तथेत्युपनये, हे आत्मन! मृत्युमुखस्थोऽपि त्वमङ्गिनः-प्राणिनः प्रति किमद्दर्दस ? - व्यथसे, अपि तु माऽदर्दस्वेति, अर्थतो युग्मम्" ।।१०.११।।

**[२६२] आत्मानमल्पैरिह वञ्चयित्वा,**
**प्रकल्पितैर्वा-तनु-चित्तसौख्यैः ।**
**भवाधमे किं जन ! सागराणि,**
**सोढाऽसि ही नारकदुःखराशीन् ? ।।१०.१२।।**

**धनवि.**—अथानन्तरोक्तोपदेशे 'परार्दनं न कर्त्तव्यम्'इत्युक्तम्, तेन परार्दनजन्यस्य किञ्चिद्दृश्यमानसुखस्य तुच्छतां परभवे चानन्तदुःखहेतुतां च दर्शयन् तन्निवृत्तिमुपदिशति —

'आत्मानम्' इति ही इति खेदे, हे **जन ! इह** भवे मनुष्यजन्मनि, **अल्पैः**-स्तोकैः स्तोककालैर्वा, **वा**-अथवा **प्रकल्पितैः**-आरोपितैः परमार्थतोऽसुखत्ववति पान-भोजन-ललनाऽलिङ्गनादौ सुखमिदमिति चिन्तनैस्-**तनुचित्तसौख्यैः**-कायिक-मानसिकसुखैर्-**आत्मानं**-स्वं **वञ्चयित्वा**-विप्रतार्य, **भवाधमे**-भवेषु-चतुर्गतिलक्षणेषु संसारेष्वधमे-नीचे नरकभवे इत्यर्थः, **सागराणि** सिद्धान्तप्रतीतानि यावत्,-**नारकदुःखराशीन्**-नरक-सत्कदुःखसमूहान् **किमिति** प्रश्ने, **सोढाऽसि ?** - क्षन्ताऽसीत्यन्वयः,

अत्राऽसुखत्ववति पानभोजनादौ सुखमिदमित्यारोपे **भर्तृहरिणा**ऽपि **वैराग्यशतके** प्रतिपादितं, यथा —

**[२६३]** "तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि,
क्षुधार्त्तः सन् शालीन् कवलयति शाकादिवलितान् ।

१. दृष्टान्तदानेनाह - मु० ।

प्रदीप्ते रागाग्नौ सुदृढतरमाश्लिष्यति वधूं,
प्रतीकारो व्याधेः सुखमिति विपर्यस्यति जनः ।।९१।।" इति ।

अत्र सागराणि-सागरोपमाणि, तानि च दशकोटाकोटीपल्योपमैरेकं सागरोपमं भवति, एवंविधानि त्रयस्त्रिंशत्सागरोपमाणि यावदित्यर्थः, पल्योपमस्वरूपं च संक्षिप्तमिदम् – [पञ्चमकर्मग्रन्थे]

**[२६४]** उद्धार १-अद्ध २-खित्ता ३-पलिय तिहा समय १वाससय २समया ३।
केसुवहारो दीवोदहि १-आउ २-तसाइ ३-परिमाणं [८५]

अत्रोद्धारपल्योपमं ग्राह्यं, विस्तरतस्तु **प्रवचनसारोद्धाराष्टपञ्चाशदधिक**-शतद्वारादिभ्योऽवसेयमिति ।।१०.१२।।

**रत्न.**–अथाल्पैः सुखैः करणैः परभवेऽनन्तदुखराशौ पतन्तं जीवं प्रति बोधायाह-**आत्मानमल्पैरिह..**इति., व्याख्या-हे जन ! इह-अस्मिन् भवे-संसारे, प्रकल्पितैः-औपचारिकैर्-**वाक्[१]-तनु-चित्तानां**-वचन-काय-मनसाम्, अल्पैः-तुच्छैः सौख्यैः करणैरात्मानं वञ्चयित्वा नारकाणां दुःखराशीन् प्रति **हा[२]..**इति खेदे, किं सोढाऽसि ? - किं सहिष्यसि, अपितु धर्मकरणेन सोढा मा भवेति, कस्मिन् ? - भवेषु-अवतारेष्वधमो नीचो भवो भवाधमस्तस्मिन् तन्नारकभवे इत्यर्थः, यावदित्यध्याहार्यं, कानि प्रति सागराणि, 'सत्या' इत्युक्ते सत्यभामेतिवत् सागरोपमाणि यावदित्यर्थः ।।१०.१२।।

**[२६५] उरभ्र-काकिण्युदबिन्दुका-ऽऽम्र-**
**वणिक्त्रयी-शाकट-भिक्षुकाद्यैः ।**
**निदर्शनैर्हारितमर्त्यजन्मा,**
**दुःखी प्रमादैर्बहु शोचिताऽसि ।।१०.१३।।**

**धनवि.**–अथ सामान्यतः प्रमादपरिहारं नानानिदर्शनदर्शनपूर्वकमुपदिशन्नाह – 'उरभ्र' इति **प्रमादैः**-मद्यादिभिर् हेतुभि**र्हारितमर्त्यजन्मा**-हारितं प्राप्तं सन्,

१. 'वाक्-तनु-'इति मूलत्वेन गृहीतः पाठः । २. हा इति मूलत्वेन गृहीतः ।

नाशितं मर्त्यजन्म-मनुष्यभवो येन स तथा **दुःखी**-नारकादिदुर्गति-दुःखवान् सन् **उरभ्र-काकिण्युदबिन्दुका-ऽऽम्र-वणिक्त्रयी-शाकटभिक्षुकाद्यैः निदर्शनैः**-दृष्टान्तैस्त्वं **बहु**-भूयो यथा स्यात् तथा **शोचिताऽसि**-पश्चात्तापकर्त्ताऽसीत्यर्थः । अत्र **उरभ्रश्च**-एडकः, **काकिणी** च-रूपकाशीतितमो भागः, क्वचित् तु विंशति[1]वराटकप्रमाणको नाणकविशेषः, लिङ्गानुशासनविवरणे तु 'काकिनिर्माषचतुर्भागः कपर्दश्चतुर्भागो वा [ ] इति, **उदबिन्दुश्च**-दर्भाग्रभागवर्त्ती जलकणः 'उदकस्योद' [सि.हे.३-३-१०४] इत्यनेन सूत्रेणोदबिन्दुरितिसिद्धेः; **आम्रश्च**-सहकारः, **वणिक्त्रयी** च-वाणिज्यार्थविनिर्गत-वणिग्जनत्रितयी, **शाकटश्च**-शाकटिकः शकटखेटक इतियावत्, **भिक्षुश्च**-भिक्षाजीविकः, ततो द्वन्द्वः, ते आद्याः-प्रथमा येषां तानि तथा तैः उरभ्र-काकिण्युदबिन्दुका-ऽऽम्रवणिक्त्रयी-शाकट-भिक्षुकाद्यैः, अत्राद्यपदेन यः कश्चन स्वहितकरणसमयेऽसावधानः पश्चात् पश्चात्तापरः स ग्राह्यः; अत्रायमाशयः-प्रमादपारवश्यादकृतसुकृतो मनुष्यभवभ्रष्टो दुर्गतिं गतः, एतैर्दृष्टान्तैः पश्चात्तापकर्त्ता भविष्यसीति, अस्मिन्नेव भवे तथा सुकृतं कुरु यथाऽग्रेऽपि सदानन्दोदयो भविता । अत्र **प्रथममुरभ्रदृष्टान्तो** यथा-कस्मिंश्चिद् ग्रामे कस्यचिद् गेहे एकोऽजोऽभ्यागतार्थं पोष्यते, स च पुष्टाङ्गः सुस्नातः कृतहारिद्र्याद्यङ्गरागो लाल्यमानः पाल्यमानः पीनश्च, तं तथा दृष्ट्वा कोऽपि वत्सो मात्राऽपत्यस्नेहेन गोपितं गोदुहापि दयया मुक्तं क्षीरं नापात्, मात्रा च पृष्टो रोषादित्याचष्टौ-अम्ब ! अयमजो यथेष्टौदन-[2]यवसाद्यैर्नानालङ्कारैश्च पुत्र इव मान्यते, अहं तु मन्दभाग्यः शुष्कतृणान्यपि पूर्णानि सुसमये न लभे, पानीयमपि मां सुसमये कोऽपि नो पाययेत्, न कोऽपि मां लालयेत्, तदा मात्रोचे-वत्स !

**[२६६]** 'आउरचिण्णाइं एयाइं, जाइं चरति नंदिओ ।
सुक्कत्तणेहिं लाढाहि, एयं दीहाउलक्खणं [ ]

"यथाऽऽतुरो मर्तुकामो यन्मार्गयति तत् पथ्यमपथ्यं वा दीयते, पुष्पाद्यैरर्च्यते, एवमस्याप्यजस्य पोषोऽर्चा च वध्यमण्डनमिव, यदा चैष घातयिष्यते तदा त्वं द्रक्ष्यसि, ततो वत्सस्तथैव स्थितः । ततस्तस्मिन्नुरभ्रे पुष्टे जाते प्राघूर्णके च

१. कपर्दः इति टीप्पणीपाठः । २. घासः तृण इति टीप्पणीपाठः ।

समागते, तमुरभ्रं हत्वा मांसखण्डानि कृत्वा पक्त्वा च स्वामिना सहैव प्राघूर्णकेन भुक्तम्, [तद्] दृष्ट्वा स वत्सस्तृषितोऽपि भयेन मातुः स्तन्यं नैच्छत्, तदा मात्रोचे-वत्स ! किं भयभीतो मम क्षरत्पयसोऽपि पयो न पिबसि ?, तदा वत्सोऽवग्-मातः ! स उरभ्रः प्राघूर्णकागमनेऽग्रे तेषां निर्गतजिह्वस्तरलनेत्रो विस्वरं रसन् हतो भक्षितश्च, तद्भयान्मे कुतः पयःपानेच्छा ?, तदा मात्रोचे-वत्स ! मया ते तदैवोचे-आतुरचिह्नान्येतानि, एष तेषां विपाकः प्राप्त इत्यादि,

अत्रायमुपनयो-यथा उरभ्रो जीवितेच्छया यथेष्टं खादन् पुष्टः सन् प्राघूर्णके आगते हारितजीवितः सन् शिरश्छेदादिक्रियायां क्रियमाणायां विस्वरं रसति तथा त्वमपि प्रमादैर्जीवितेच्छया यथेष्टं विचरन् पापैः पुष्टः सन् स्वायुःपूर्त्तौ हारितमर्त्यजन्मा सन्नरकादिदुर्गतौ गच्छन् बहु शोचसीति निगमनम् ।

अथ **द्वितीयः काकिणीदृष्टान्तो**, यथा-एकेन द्रमकेण भृतिं कुर्वता कार्षापणानां सहस्रमर्जित्वा स्वगृहागमनाय प्रस्थितेन शंबलार्थमेकरूपकस्य काकिणीः कृत्वा दिन दिनेऽभुञ्जत, अन्यदा मार्गे क्वाऽप्येका काकिणी विस्मृता, सार्थे प्रस्थिते मार्गे गच्छन् स द्रमकस्तां स्मृत्वा दध्यौ-मा मम रूपकान्तरभेदो भूयादिति स्वां [१]वासनिकामेकान्ते संगोप्य काकिण्यर्थं निवृत्तः, काकिणी त्वन्येन हृता, वासनिकापि केनचित् संगोप्यमाना दृष्टा हृता, स तूभयभ्रष्टो गृहे गत्वा क्षुधा पीड्यमानो जनैश्च परिभूयमनोऽशोचदित्यादि ।

अत्रायमुपनयो, यथा-स द्रमकः समुपार्जितकार्षापणसहस्रः आत्मनः स्मृतिभ्रंश-दोषेण विस्मारितकाकिणीको लोभेन तदर्थं प्रतिगच्छन् गतकाकिणीको गतवासनिक-श्चोभयभ्रष्टो, गृहे गत्वा क्षुधा पीड्यमानो जनैः परिभूयमानश्च शोचति, तथा त्वमपि गृहीतसंयमः स्वीयान्तरायदोषेण पूर्वमप्राप्तकामभोगः प्रमाददोषेण पुनस्तमेव प्रार्थयमानश्चारित्रं मुक्त्वा कामभोगे प्रवर्त्तमानोऽप्राप्तकामभोगो गतचारित्रश्चोभयभ्रष्टः सन् नरके गच्छन् दुःखीभवन् शोचिताऽसीति निगमनम् ।

अथ तृतीय **उदकबिन्दुदृष्टान्तो**, यथा–कश्चित् तृषार्तस्तुष्टेन देवेन क्षीरसमुद्रं

१. 'वांसलिका' इति मु० ।

प्रापितः, तत्राऽपीतपयाः स्वग्रामसीमसत्ककूपोपकण्ठगतदर्भाग्रभागवर्त्ती जलकणो मा पतत्वितिधिया तत्प्राप्तये याचितदेवेन स्वस्थानं प्रापितः । तत्र निर्गलितजलकणं वीक्ष्य अपूरितस्वप्रतिज्ञं स्वस्थानप्राप्तं पुनः क्षीरसमुद्रादिप्रापणाप्रवणं च तं देवं मत्वा पिपासया कण्ठगतप्राण उभयतो भ्रष्टः शोचतीत्यादि ।

अत्रायमुपनयो, यथा स ग्रामिको देवसान्निध्यतः क्षीरसमुद्रं प्राप्य तत्रापीतपया लालसात उदबिन्दूद्देशेन धावन्नप्राप्तोदबिन्दुर्मुक्तक्षीरसमुद्रश्च सन्नुभयतो भ्रष्टः शोचति, तथा त्वमपि दैवयोगात् प्राप्ततपःसंयमः, तदाराधनमन्तरेण प्रमादत ऐहिकसुखोद्देशेन धावन्, अप्राप्तैहिकसुखो मुक्तपारलौकिकसुखोपायभूततपः-संयमश्चोभयतो भ्रष्टो हारितमर्त्यजन्मा शोचिताऽसीति निगमनम् ।

अथ चतुर्थ **आम्रदृष्टान्तो** यथा–कश्चिद् राजा अतिशयेनाम्रप्रियः, आम्राजीर्णेनैव संजात-विशूचिको महावैद्यैर्महता यत्नेन पटूकृतः, पुनराम्रभ्रक्षणे मरिष्यसीति विज्ञप्तः, तच्छ्रवणमात्रादेव स्वदेशे विहिताम्रवणोच्छेदः, अन्यदा प्रधानेन सहाश्वापहृतोऽटव्यां प्राप्तः, सहकारच्छायायां विश्रान्तः, तदधः पतितानि सुखास्वादान्याम्रफलानि गृह्णन् प्रधानैर्वार्यमाणोऽपि स्पर्शलाम्पट्यतः करे कृत्वा परामृशन्, क्रमेण गन्धलाम्पट्यतो जिघ्रन् रसलाम्पट्यतश्चास्ये क्षिप्त्वा गिलन् म्रियमाणः शोचतीत्यादि ।

अत्रायमुपनयो, यथा स राजा इन्द्रियपरवशस्सन्नाम्रास्वादलुब्धः आम्रफलास्वादं कुर्वन् अप्राप्ततदास्वादानन्दो राज्य-जीवितयोराशापरित्यक्तो म्रियमाणः शोचति, तथा त्वमपीन्द्रियपरवशः सन् प्रमादात् कामभोगसुखलुब्धः कामभोगे प्रवर्त्तमानो गतसंयमजीवितराज्यो हारितमर्त्यजन्मा उभयतो भ्रष्टो म्रियमाणः शोचिताऽसीति निगमनम् ।

**अथ पञ्चमो वणिग्दृष्टान्तो** यथा–एकस्य वणिजस्त्रयः पुत्राः, तेन तेषां कार्षापणानां सहस्रं सहस्रं दत्तं, उक्ताश्चैवम्-एतावता द्रव्येण व्यवहृत्य इयता कालेनागन्तव्यम् । ततस्ते [1]तन्मूलं लात्वा स्वपुरान्निर्गताः, पृथक् पृथक् पत्तनेषु

१. 'ते मूडी' इत्यर्थः, सं. ।

स्थिताः । तत्रैको भोजना-ऽऽच्छादनस्तोकव्ययो द्यूत-मद्य-मांसादिव्यसनवर्जितो युक्त्या व्यवहरन् भूयो लाभं लेभे, द्वितीयस्तु मूलमक्षिपन् लाभं भोजना-ऽऽच्छादन-माल्य-भूषादिषूपभुङ्क्ते, न चात्यादरेण व्यवहरते, तृतीयस्तु न किंचिद् व्यवाहरत्, किंतु द्यूत-मद्य-मांस-वेश्या-गन्ध-माल्य-ताम्बूल-शरीरसत्क्रियाभिरल्पेनैव कालेन सर्वं द्रव्यं भक्षितवान् । ततस्त्रयोऽपि यथोक्तकाले स्वपुरमागताः । तत्र यश्छिन्नमूलः स पितृभ्यां निष्कासितो जननिन्द्यः प्रेष्य एव जात इत्यादि ।

अत्रायमुपनयो-यथा तृतीयो वणिक् पञ्चेन्द्रियपरवशः सन् लाभमनिच्छन् भोगादि भुञ्जन् मूलव्ययेन गृहमागतः पितृभ्यां निष्कासितो जननिन्द्यः प्रेष्यतां प्राप्तः सन् शोचति तथा त्वमपि पूर्वभवात् सुकृतं लात्वा समागतः सन्, सकलसामग्रीं प्राप्य प्रमादपरवशः सन्, भोगाद्युपभोगं स्पृहयन् पारलौकिकसुखो-पायमनिच्छन्, प्राक्तनसुकृतव्ययेन दुर्गतिं गच्छन् शोचिताऽसीति निगमनम् ।

**अथ षष्ठः शाकटदृष्टान्तो** यथा–कश्चिच्छाकटिकः समविषममार्गज्ञाता सममुपलादिरहितं महापथं त्यक्त्वा विषममुपलादिसंकुलं मार्गं गन्तुमुपक्रान्तः, तदाऽक्षे भग्ने शोचति यथा धिग् मां यज्जानन्नप्यपायमापमित्यादि ।

अत्रायमुपनयो-यथा स शाकटिकः सम-विषमभूमिभागं जानन्नपि विकथादि-पारवश्यादक्षे भग्ने शोचति तथा त्वमपि पुण्य-पापादिकं जानन्नपि विकथादिप्रमादपरवशः सन्, भ्रष्टसम्यग्दर्शन-ज्ञान-चारित्रो दुर्गतौ गच्छन् 'धिग् मां यज्जानन्नप्यहं दुर्गतौ यामि'इत्यादि शोचिताऽसीति निगमनम् ।

**अथ सप्तमो भिक्षुकदृष्टान्तो** यथा–एक ग्राम्यो दारिद्र्येण गृहान्निर्गत्य पृथ्वीं परिभ्रमन् कुदैवयोगाद् भिक्षाया अपि अप्राप्त्या, पुनर्गृहं प्रति व्यावृत्तः सन्नेकस्मिन् ग्रामे पाणपाटकपार्श्वे[1] देवकुले रात्रौ स्थितः । ततो देवकुलादेकः पाणश्चित्रघटहस्तो निर्गत्यैकदेशे स्थित्वा घटमूचे-शीघ्रं गृहं कुर्वित्युक्ते गृहं जातम्, एवं यद्यत् सोऽवक् तत् तद् घटोऽकरोद्, यावच्छय्यायां सः स्त्रीभिः सह भोगान् भङ्क्ते, प्रातश्च सर्वं संजह्रे । तदा स ग्राम्यस्तद् दृष्ट्वा दध्यौ-मुधाऽहं क्ष्मामभ्रमं, अथैनं सेवे इति विचिन्त्य स तमेवाश्रयत् । स च

१. चाण्डलपाटके. इत्यर्थः ।

पाणस्तद्भक्त्या प्रीत ऊचे-किं ते ददे ?, तदा स ग्राम्य ऊचे-त्वत्प्रसादेनाहमप्येवं भोगान् भुञ्जे । तेन–किं विद्यां लासि उत विद्याभिमन्त्रितं घटम्-इत्युक्ते स विद्यासाधनादिकष्टभीरुतयोचे-अभिमन्त्रितं घटं देहि । तेनाभिमन्त्र्य घटो दत्तः। स तं लात्वा स्वग्राममेत्य सौधं विकुर्व्य बंधुयुग् यथेच्छं भोगान् भुङ्क्ते। तेनान्यैश्च तदा सर्वे स्वजीवनोपायाः शिथिलिताः गवाद्याश्चाऽसारिताः गताः। सोऽन्यदाऽतिहर्षाद् घटं स्कन्धे कृत्वा पीतासवोऽनृत्यद्, तदा प्रमादात् पतितो घटो भग्नः, स विद्याकृतोपभोगो नष्टः, पश्चात् स स्वजनैः सह परप्रेष्यतादि-दुःखान्यनुभवन्, चेद् घटविद्या ततो गृहीता स्यात्, त्दा भव्यमभविष्यदिति शोचतीत्यादि ।

अत्रायमुपनयो-यथा स ग्राम्यभिक्षुकः पृथिव्यां परिभ्रमन्, संप्राप्तकामकुम्भोऽपि मद्यपारवश्यात् पतितकामकुम्भः परप्रेत्यताद्यैर्दुःखान्यनुभवन् शोचति तथा त्वमषि संसारे भ्रमन् संप्राप्तश्रीजिनधर्मोऽपि मद्यादिप्रमादपारवश्यात् त्यक्तश्रीजिनधर्मो हारितमर्त्त्यजन्मा नारकादिदुःखान्यनुभवन् शोचिताऽसीति निगमनम् ।

इत्येवं सप्त दृष्टान्ता भाविताः । तत्र पूर्वदृष्टान्तपञ्चकं **श्रीउत्तराध्यनसप्तमौर-भ्रीयाध्ययनानुसारेण,** शाकटनामा षष्ठो दृष्टान्तः **श्रीउत्तराध्ययनपञ्चमाकाम-मरणीयाख्याध्ययनानुसारेण,** भिक्षुकनामा सप्तेमो दृष्टान्तश्च **श्रीउत्तराध्ययनषष्ठ-चुल्लकनिर्ग्रंथीयाध्ययनानुसारेण,** अत्र भाविताः, सुधिया स्वधिया परम्परया वा यथासंप्रदायं प्रकारान्तरेणापि सम्यग् भावनीयाः ।

अत्र आद्यपदेनान्येऽपि दृष्टान्ताः **श्रीउत्तराध्ययनानुसारेणा-ऽत्र** भाविताः । [दरिद्रकुटुम्ब दृष्टान्तः] यथा क्वचिद् ग्रामे दरिद्रकुटुम्बं वसति, तस्य कस्मिंश्चित् पर्वणीभ्यगृहेषु पच्यमानं भुज्यमानं च पायसं दृष्ट्वा, तद्भोजनमनोरथे समुत्पन्ने, तन्मध्यगेन केनचिद् यादृशे तादृशे पयसि केनचित् तन्दुले केनचिद् घृते, केनचिन्मधुधूलि[1]प्रमुखे [2]मृष्टद्रव्ये याचिते, प्राप्ते सति, यादृशे तादृशे पायसे निष्पन्ने सति सर्वैरपि याचितद्रव्यानुसारेण भागमार्गणे कृतेऽज्ञानित्वेन परस्परं विवदमानेषु राजद्वारं गतेषु, तत् पायसं सर्वत्र सञ्चरद्भिः श्वानैर्भक्षितम् ।

१. खाण्ड इति प्रतिटीप्पणी । २. 'मृष्ट' इति ह.प्र. पाठः ।

तदनु तद्दरिद्रकुटुम्बकं स्वगताऽनवगमतादोषेण पायसभोजनाप्राप्त्या तन्मनोरथेनैव मृतम् ।

अत्रायमुपनयो, यथा-तद्दरिद्रकुटुम्बकं कलहकरणादिना श्वानेन नाशितं बह्वायासेन निष्पादितं पायसमप्राप्य शोचति, तथा त्वमपि निष्पुण्यः सन् पुण्यवद्गेहे धर्मकर्म क्रियमाणं, तत्फलं चानुभूयमानं दृष्ट्वा, कथञ्चिद् धर्मसामग्रीं प्राप्य तद् यादृशं तादृशं कुर्वन्नपि, मत्सरादिदोषेण कलहं कुर्वाणो, राग-द्वेषाभ्यां तद्धर्मकर्मनाशात् तत्फलरहितः परभवे शोचिताऽसीति निगमनमिति दरिद्रकुटुम्बदृष्टान्तः ।

वणिग्द्वय दृष्टान्तः- एकस्मिन्नगरे प्राक्कृतकर्मणा क्षीणधनं वणिग्द्वयं वसति। तेन धनार्जनाय बहूपायेऽपि कृते, तदप्राप्त्या क्वचित् कस्यचिदुपदेशात् सप्रत्ययो यक्षो बह्वाराधनतः प्रसन्नीकृतः, तदनु तत्पार्श्वे धनयाचने । यक्षेणोक्तं-कृष्णचतुर्दशीरात्रौ शकटसामग्रीं कृत्वा, सावधानतया स्थेयं, रत्नद्वीपे युवां प्रापयिष्यामि, तत्र प्रहरद्वयं यावत् स्वस्वशकटं यथेष्टं रत्नमणिसुवर्णैः पूरणीयं, प्रहरद्वयानन्तरं स्वस्थानं प्रापयिष्यामीति । तदनु ताभ्यां तथेति प्रपद्य स्वस्वगृहं प्राप्य यथोक्तरात्रौ समग्रशकटसामग्रीं विधाय स्थितम्, तदनु देवेन यथोक्तसमये समागत्य सशकटौ तौ रत्नद्वीपे मुक्तौ । तदनु तयोर्मध्यगेनैकेनाप्रमत्ततया रत्न-सुवर्णैः स्वशकटं भृतं, अपरेणापूर्वां सुखशय्यां प्राप्य सुप्तम् । तदनु देवेन स्वप्रतिज्ञानिर्वाहाय तौ सशकटौ स्वगृहे मुक्तौ । तदनु येन रत्नद्वीपं प्राप्य स्वशकटं भृतं, स प्रतिदिनं नवनवभोगसामग्र्या सुखी जज्ञे । येन सुप्तं, स परर्द्धिं दृष्ट्वा दृष्ट्वा दुःखी जज्ञे,

अत्रायमुपनयो-यथा स शयालुः शुद्धोपदेशकं पुरुषं प्रसन्नं च देवं सुसमयं रत्नद्वीपं च प्राप्येन्द्रियपरवशः सन् शकटसदृशमात्मानं धर्मधनेनापूरयन् दुर्गतिं गतः परेषां दिव्यर्द्धिं दृष्ट्वा शोचिताऽसीति निगमनम्, इति वणिग्द्वयदृष्टान्तः।

विद्याधरद्वयदृष्टान्तः—अथान्यदा वैताढ्यवासिनौ विद्याधरौ सुबहुसेवया परंपरागतदुष्करसाधनविधिपूर्वकं स्वपितृदत्तजगज्जयिविद्यासाधनाय भूचरौ भूत्वा,

भूमौ चाण्डालपाटके चाण्डालस्य यौवनस्थां कन्यां पाणिग्रहणार्थं प्रार्थ्य, गृहजामातृत्वं च प्रतिपद्य, परिणीय चैकशय्यास्थौ पृथक् पृथक् पाटके विद्यां साधयामासतुः, तदनु यौवनमदोन्मत्ततया तुच्छजातितया निर्लज्जतया तया स्त्रिया हाव-भावालिङ्गनादिना क्षोभनायां क्रियमाणायामप्य-क्षोभ्येनैकेन षण्मासं यावन्निरतिचार-ब्रह्मव्रतपालनेन सा जगज्जयिविद्या साधिता, अन्येन तु ब्रह्मव्रतभ्रष्टेन चाण्डालपुत्रीसंगत्या खेचरशेषविद्यावर्जितेन चाण्डालत्वं प्राप्य दुःखमनुभूतम् ।

अत्रायमुपनयो, यथा भ्रष्टविद्यासाधनविधिः खेचरो जगज्जयकारिविद्यासाधन-सामग्रीप्राप्तावपीन्द्रियपारवश्यात् तत्फलाप्राप्या शोचति एवं त्वमप्यङ्गीकृतधर्मभ्रष्टः, कर्मजयकारिधर्मसामग्रीप्राप्तावपीन्द्रियपारवश्याद् धर्म-प्राप्तिफला-ऽप्राप्त्या शोचिताऽसीति निगमनमिति विद्याधरद्वयदृष्टान्तः ।

निर्भाग्यदृष्टान्तः—अथान्यदा केनचिन्निर्भाग्येन पर्यटता बह्वायाससाध्याद् यक्षाच्चिन्तामणिरत्नं प्राप्तम्। तदनु तेन समुद्रमार्गेण यानपात्रेण स्वगृहं गच्छता निर्धनेन धनप्राप्त्या मत्तेन, रत्नस्य कान्त्या चन्द्रेण समतां पश्यता, चक्षुरिन्द्रिय-पारवश्येन तद् रत्नं समुद्रे पातितं, तदनु स यावज्जीवं शोचति स्म ।

अत्रायमुपनयो, यथा स निर्भाग्यः स्वदारिद्र्यनाशकः, बह्वायाससाध्य-देवदत्तचिन्तामणिप्राप्तावपीन्द्रियपारवश्येन समुद्रपातितचिन्तामणिः, तत्प्राप्ति-फलाप्राप्त्या शोचति तथा त्वमपि बहुसेवासाध्यगुरुप्रदत्तचिन्तामणिसमश्री-जिनधर्मप्राप्तावपीन्द्रियपारवश्येन धर्मभ्रष्टः, तत्प्राप्तिफलाप्राप्त्या बहु शोचिताऽसीति निगमनमिति निर्भाग्यदृष्टान्तः । इत्यादयः शोचनायां भावनीया इति ।।१०.१३।।

**रत्न.**—अथैतदेवोत्तराध्ययनसूत्रगतदृष्टान्तैर्द्रढयति-**उरभ्रकाकण्युदबिन्दु** इति. व्याख्या-हे आत्मन् ! त्वं प्रमादैः कृत्वा, दुःखी सन्, परभवे बहु-घनं यथा स्यात् तथा शोचिताऽसि, शोकं कर्त्तासि, यतस्त्वं किंलक्षणः. ? - हारितं मर्त्यस्य-मनुष्यस्य जन्म येन सः, कैः ? - निदर्शनैः-दृष्टान्तैः, कैः ? - उरभ्रो-मेण्ढकः, काकिणी-रूपकाशीतितमभागरूपा, उदबिन्दुरिति-उदकबिन्दुः, आम्र इत्याम्रवातकी राजा, वणिजां त्रयी वणिक्त्रयी, शाटक इति-शकटानां वाहको वणिग्, भिक्षुक

इति-रङ्क, द्वन्द्वसमासे उरभ्र... भिक्षुकास्ते आद्या येषां तानि तथा तैः, एतेषां निदर्शनानां विस्तरः श्रीउत्तराध्ययनलघुवृत्तितोऽवसेयो भावनीयश्चेति ।।१०.१३।।

**[२६७] पतङ्ग-भृङ्गैण-खगा-ऽहि-मीन-**
**द्विप-द्विपारि-प्रमुखाः प्रमादैः ।**
**शोच्या यथा स्युर्मृति-बन्ध-दुःखैश्-**
**चिराय भावी त्वमपीति जन्तो ! ।।१०.१४।।**

**धनवि.**—अथानन्तरोपदेशे 'सामान्यतः प्रमादः परिहर्त्तव्य' इत्युक्तम्, अथ च पञ्चेन्द्रियजन्यविषयरूपप्रमादविशेषपरिहारं दृष्टान्ताऽष्टकदर्शनपूर्वमुपदिशन्नाह --'पतङ्ग' इति **पतङ्गा**श्च-शलभाः, **भृङ्गा**श्च-षट्पदाः, **एणा**श्च-हरिणाः, **खगा**श्च-शुकादयः पक्षिणः, **अहय**श्च-भुजङ्गाः, **मीना**श्च-मत्स्याः, **द्विपा**श्च-गजाः, **द्विपारय**श्च-सिंहाः, ततो द्वन्द्वः, ते **प्रमुखा**-मुख्या येषु ते **पतङ्ग-भृङ्गैण-खगा-हि-मीन-द्विप-द्विपारिप्रमुखाः** प्राणिनो **यथा**-येन प्रकारेण **प्रमादैः** पञ्चभिरष्टभिर्वा तत्फलभूतैश्च **मृतिः**-मरणं **बन्ध**श्च-वागुरा-रज्जु-निगडादिनियन्त्रणं, दुःखं च-छेदन-भेदन-क्षुत्-तृट्-ऽऽशीता-तपादिभिः प्रतिकूलवेदनीयम्, ततो द्वन्द्वः, **तैर्मृतिबन्धदुःखैः शोच्याः**-शोचनीयाः **स्युः, 'यथा'**इतिदृष्टान्तोपन्यासग्रहणादत्रेत्यमुना प्रकारेणेति दार्ष्टान्तिकोपन्यासः, तेनेति-अमुना प्रकारेण हे **जन्तो ! त्वमपि** प्रमादैर्हेतुभूतैस्तत्फल-भूतैश्च मृतिबन्धदुःखै**श्चिराय**-चिरकालं नरकादिषु शोच्यः-शोचनीयो **भावी**-भविष्यसीत्यर्थः।

अत्रायं भावः-प्रमादपतिताः प्राणिनो दुःखपात्रीभूताः सन्तः पतङ्गादिवत् सर्वे सर्वत्र शोचनीया भवन्तीति त्वं प्रमादं परिहरेति ।

अत्र पतङ्गादयश्चाष्टौ दृष्टान्ता निर्दिष्टाः । तत्र प्रथमं चक्षुर्विषयलक्षणे प्रमादे **पतङ्गदृष्टान्तो** यथा —

**[२६८]** "रूवेसु जो गिद्धिमुवेइ तिव्वं, अकालिअं पावइ से विणासं ।
रागाउरे से जह वा पयंगे, आलोअलोले समुवेइ मच्चुं" [ ]

इति श्रीउत्तराध्ययने **प्रमादस्थाननाम्नि** द्वात्रिंशदध्ययने, एवं श्रीयोगशास्त्रेऽपि

[२६९] "कनकच्छेदसंकाश-शिखाऽऽलोकविमोहितः ।
रभसेन पतन् दीपे, शलभो लभते मृतिं ।।४.३।।

अथ घ्राणेन्द्रियविषयलक्षणे प्रमादे द्वितीयो **भृङ्गदृष्टान्तो** यथा–

[२७०] "निपतन्मत्तमातङ्गकपोले गन्धलोलुपः ।
कर्णतालतलाघातान्मृत्युमाप्नोति षट्पदः ।। इति श्रीयोगशास्त्रे [ ]

अथ श्रोत्रेन्द्रियविषयलक्षणे प्रमादे तृतीयो **हरिणदृष्टान्तो** यथा–

[२७१] सद्देसु जो गिद्धिमुवेइ तिव्वं, अकालियं पावइ से विणासं ।
रागाउरे हरिणमुवेइ गिद्धे, सद्दे अतित्ते समुवेइ मच्चुं ।।[ ]।।

इति पूर्वोक्ते **एवोत्तराध्ययने,** एवं **श्रीयोगशास्त्रेऽपि –**

[२७२] हरिणो हारिणीं गीतिमाकर्णयितुमुद्धरः ।
आकर्णाकृष्टचापस्य याति व्याधस्य वेध्यतां ।।[ ]।।

अथ रसनेन्द्रियविषयलक्षणे प्रमादे चतुर्थः **खगदृष्टान्तो** यथा–

[२७३] कूटधान्यकणादानलौल्यतो मतिवर्जिताः ।
पतन्ति पक्षिणः पाशे, शुकपारापतादयः ।।**[उपदेशरत्नाकरे]**।।

इत्यर्थतः

अथ पुनरपि घ्राणेन्द्रियविषयलक्षणे प्रमादे एव पञ्चमः **सर्पदृष्टान्तो** यथा-

[२७४] "गंधस्स जो गिद्धिमुवेइ तिव्वं, रागाउरे ओसहिगंधगिद्धे ।
अंकालियं पावइ से विणासं, सप्पे बिलाओ विव निक्खमंतो"।।[ ]।।

इति **पूर्वोक्तोत्तराध्ययने** एव; अथ पुनरपि रसनेन्द्रियविषयलक्षणे प्रमादे षष्ठो **मीनदृष्टान्तो** यथा –

[२७५] "रसस्स जो गिद्धिमुवेइ तिव्वं, रागाउरे बडिसविभिन्नकाये ।
मच्छे जहा आमिसभोगगिद्धे, अकालियं पावइ से विणासं" ।।[ ]।।

इति **पूर्वोक्तोत्तराध्ययने** एव, एवं **श्रीयोगशास्त्रेऽपि** –

**[२७६]** पयस्यगाधे विचरन्, गिलन् गलगतामिषम् ।
मैनिकस्य करे दीनो, मीनः पतति निश्चितम् ।।[ ]।। इति,

अथ स्पर्शनेन्द्रियलक्षणे प्रमादे सप्तमो **द्विपदृष्टान्तो** यथा –

**[२७७]** फासस्स जो गिद्धिमुवेइ तिव्वं, रागाउरे कामगुणेसु गिद्धे ।
करेणुमग्गावहिए व नागे, अकालियं पावइ से विणासं ।।[ ]।।

इति तत्रैवो**त्तराध्ययने**, एवं **श्रीयोगशास्त्रेऽपि** –

**[२७८]** वशास्पर्शसुखास्वादप्रसारितकरः करी ।
आलानबन्धनक्लेशमासादयति तत्क्षणात् ।।[ ]।। इति ।

अथ पुनरपि रसनेन्द्रियविषयलक्षणे प्रमादेऽष्टमो **द्विपारिदृष्टान्तो** यथा –

**[२७९]** द्विपारातिरपि व्याघ्रो, मांसास्वादस्य लिप्सया ।
किरातैः क्षिप्यते क्लृप्तकूटले काष्ठपञ्जरे ।।[इत्यर्थत **उपदेशरत्नाकरे**]।।

अत्र प्रमुखग्रहणान्महिषादयः पञ्चेन्द्रिय द्वीन्द्रियादयोऽन्येऽपि यथासंभवं ग्राह्याः, अत्र **महिषदृष्टान्तः** स्पर्शनेन्द्रिये यथा –

**[२८०]** फासस्स जो गिद्धिमुवेइ तिव्वं, रागाउरे सीयजलावसन्ने ।
गाहग्गहीए महिसे व रन्ने, अकालियं पावइ से विणासं ।।[ ]।।

इति पूर्वोक्त **एवोत्तराध्ययने** । अत्र पद्येऽष्टौ दृष्टान्ता साक्षाद् दर्शिताः, तत्र १-पतङ्ग २-भृङ्ग ३-एण ४-अहि ५-मीन ६-द्विप नामानः षट् दृष्टान्ताः श्री**उत्तराध्ययन-योगशास्त्रा**नुसारेण स्पष्टा एव, खग-द्विपारिनामानौ द्वौ दृष्टान्तौ तथाविधसंप्रदायाभावाद् ग्रन्थान्तरे साक्षादनुपलब्धेश्च संभावनया योजितौ स्तः, सति संप्रदाये ग्रन्थान्तरे वा साक्षात् तदुपलब्धौ च यथावद् योजनीयौ; न चैषा संभावना स्वचित्तमात्रकल्पितेतिवाच्यं, **उपदेशरत्नाकरे** द्वितीयतटे प्रथमाधिकार-

षष्ठगाथावृत्तौ एतदर्थाऽन्वाख्यानदर्शनात् । तदेकदेशो यथा कामसेवनाद्याश्रवास्तु,-

**[२८१]** प्रायः स्वजातिविष्ठासु, संमूर्च्छन्त्युरगेन्द्रियाः ।
स्वजातिलालासु पुनर्मूर्च्छन्ति चतुरिन्द्रियाः ।।[ ]।।

**[२८२]** मूर्च्छासंज्ञानुभावेन, तेऽपि त्रि-चतुरिन्द्रियाः ।
सेवन्ते जन्तवो जन्तून् मलामृतकलाभवान् ।।[ ]।।

इति वचनादसंज्ञिनां मैथुनसंज्ञानुभावादिना, संज्ञिनां तु वेदोदयादिना स्पष्टा एव, गजा हस्तिनीलुब्धा गजान्तरादीन् घ्नन्ति, मत्स्या गलामिषलुब्धा म्रियन्ते, शाल्यादिकणलुब्धाः पक्षिणो जाले पतन्ति, हरिण-सर्प-गजादयो गीत-वंशस्वर-श्रवणरसलुब्धा घ्रियन्ते, गजाश्च हस्तिनीलुब्धाः, गन्धलुब्धा भृङ्ग-कीटिका-सर्पादयः, आमिषलुब्धाः समुद्रान्तर्गतप्रतिसंतापस्थलवासिजलमनुष्याः, [१]बर्करभक्षणार्थं यन्त्रप्रविष्टव्याघ्रादयश्च, रूपलुब्धाः शलभादयश्च म्रियन्तेऽपि, द्रव्यादिनिधिं सर्पा अधितिष्ठन्ति, निधौ दृष्टे खञ्जरीटा नृत्यन्ति, गोधेरक-शिवादयश्च शब्दायन्ते, कीटिकाद्या अपि कणान् सङ्गृह्णन्ति-इत्यादि, अत्र च दृष्टान्तदार्ष्टान्तिकयोजना स्पष्टैवेति ।।१०.१४।।

**रत्न.**—पुनरप्यकृतपुण्यस्य प्रमादिनो जीवस्य दृष्टान्तदानेन भावीनि दुःखानि कथयति-**पतङ्ग-भृङ्गैण-खगा-ऽहिमीन** इति व्याख्या-हे जन्तो ! यथा पतङ्गः-शलभो रुपमोहितो दीपशिखापाताद्, भृङ्गो गन्धमोहितो रात्रौ कमलकर्णिकायां बन्धनाद्, एणो-मृगः शब्दमोहितो बंधनात्, खगः-पक्षी कृत्रिमनीलपत्रवृक्षमोहितः पाशपतनाद्, अहिः-सर्पः शब्दादाहितुण्डिकवशपतनात्, मीनो-मत्स्यो मांसखण्डलुब्धो धीवरजालपतनात्, द्विपो-हस्ती हस्तिनीयोनिस्पर्शमोहितः कृतवंशकटकाच्छादित-गर्तपतन-तृट्-क्षुत्-सहनात्, द्विपारिः सिंहः, पञ्जरमध्यमुक्ताजलोभात् पञ्चरपतनात्-द्वन्द्वसमासे-पतङ्ग... द्विपारयस्ते प्रमुखा-आद्या येषां ते पतङ्ग... द्विपारिप्रमुखाः, प्रमुखशब्दादन्ये चित्रकादयो ग्राह्याः, एते प्रमादैः कृत्वा यथा शोचनीयाः स्युः,

१. 'बकरो' इति, सं. ।

कैः? - मतिश्च[1] बन्धश्च मृति-बन्धौ तयोर्दुःखानि तैः, केचित् पङ्तगादयो मरणदुःखैर्हस्त्यादयस्तु बन्धनदुःखैरित्यर्थः, तद्वत् त्वमपि चिराय-चिरकालं शोच्यो भावी-भविता, प्रमादैरित्यत्रापि ज्ञेयमिति ।।१०.१४।।

**[२८३] पुराऽपि पापैः पतिताऽसि दुःख-**
**राशौ पुनर्मूढ ! करोषि तानि ।**
**मज्जन् महापङ्किलवारिपूरे,**
**शिलां निजे मूर्ध्नि गले च धत्से ।।१०.१५।।**

**धनवि.**—अथ प्रमादानां पापरूपतां दर्शयन् तत्परिहारमुपदिशन्नाह —

'पुरापि' इति, हे **मूढ !** - हे मूर्ख ! **पुरापि**-पूर्वमप्येतद्भवेऽन्यभवे वा, **पापैः**-विषय-कषायादि-लक्षणप्रमादैर्हेतुभूतै**र्दुःखराशौ**-दुःखसमूहे **पतितासि**-पतनकर्त्तासि, **पुनस्तानि** प्रमादाचरणलक्षणानि पापानि **करोषि**-आचरसि । एवं प्रमादाचरणं कुर्वन् किं करोषि ? - इति दृष्टान्तपूर्वकं दर्शयति-पङ्कोऽस्यास्तीति **पङ्किलः,** स चासौ **वारिपूर**श्च पङ्किलवारिपूरः **महां**श्चासौ पङ्किलवारिपूरश्च स तथा तस्मिन् **महापङ्किलवारिपूरे, मज्जन्**-ब्रूडन् **निजे**-स्वे **मूर्ध्नि**-मस्तके **गले च**-कण्ठे **शिलाः**-स्थूलोपलान् **धत्से**-धरसीति ।।१०.१५।।

**रत्न.**—अथ पूर्वं पापैः दुःखराशौ पतितोऽसि, अथापि मा पतेति दृष्टान्तेन ज्ञापयति —

**पुराऽपि पापैः** इति., व्याख्या-हे आत्मन् ! पुरापि-पूर्वजन्मन्यपि पापैर्हेतुभिः, दुःखराशौ पतितोऽसि, हे मूढ ! पुनरिह-जन्मनि तान्येव पापानि करोषीति दृष्टान्तदानेन कथयति-हे जीव ! त्वं महान् पङ्किलः-पङ्कवान् यो वारिपूरस्तस्मिन् मज्जन्-ब्रूडन् शिलां निजे स्वकीये मूर्ध्नि मस्तके, च पुनर्गले-कण्ठे धत्से-दधासीति, ततस्त्वमेवं दृष्टान्तं सफलयसीति भावः ।।१०.१५।।

---

१. धनवि.-छेदनादिजं दुःखं स्वतन्त्रतया व्याख्याति, रत्नवि.-मृति-बन्धयोः जातं दुःखं इति मृति-बन्धयोः फलत्वेन व्याख्याति, वागुरादिभिः काभिश्चित् बन्धने सति छेदन-भेदन-क्षुधा-तृषादीनि दुःखानि जायन्ते-अतो न तात्विको भेदोऽत्र वृत्त्योः।

**[२८४] पुनः पुनर्जीव ! तवोपदिश्यते,**
**बिभेषि दुःखात् सुखमीहसे च चेत् ।**
**कुरुष्व तत् किञ्चन येन वाञ्छितं,**
**भवेत् तवास्तेऽवसरोऽयमेव यत् ।।१०.१६।।**

**धनवि.**–अथ प्रमादपरिहारावसरमुपदिशन्नाह –

'पुनः पुनर्' इति हे **जीव ! तव पुनः पुनः**-वारंवारम्, **उपदिश्यते**-हितवचनमादिश्यते, **चेद्**-यदि **दुःखाद् बिभेषि**-भयं यासि, च पुनः **सुखम्** इष्टवेदनीयम्, **ईहसे**-वाञ्छसि, **तत्**-तस्मात् प्रमादपरिहारेण तत् **किञ्चन**-तपः-संयमादि सुकृतकर्म **कुरुष्व**-समाचर **येन** सुकृतकर्मणा **तव वाञ्छितं**-समीहितं **भवेत्, यद्**-यस्माद् **अयमेव**-मनुष्यभवा-ऽऽर्यदेशोत्तम-जातिसर्वेन्द्रियपटुता-शुद्धदेव-गुरु-धर्मप्राप्ति-शास्त्रश्रवण-श्रद्धानादिसामग्रीसहितः प्रत्यक्षः, **अवसरः**-प्रस्तावो वर्त्तते, अत्रैवकार एतत्प्रस्तावातिरिक्तप्रस्तावप्रतिषेधक इति ।।१०.१६।।

**रत्न.**–अथात्मानं धर्मस्यायमवसरोऽस्तीति ज्ञापयति-**पुनःपुनर्** इति., व्याख्या-रे जीव ! मया पुनःपुनस्तवोपदिश्यते-उपदेशो दीयते, किम् ? इत्याह-चेद्-यदि त्वं दुःखाद् बिभेषि-भयमाप्नोषि तथा सुखमीहसे-वाञ्छसि । तत्-तर्हि किञ्चनापूर्वं सुकृतं कुरुष्व, येन सुकृतेन वाञ्छितं अर्थात् सुखमिति गम्यते भवेद्, यद्-यतो हेतोरयमेवावसरो-वेला आस्ते अर्थात् सुकृतस्येति ।

**[२८५]** "सज्झाय-झाण-तव-ओसहेसु उवएस-थुई-पयाणेसुं ।
संतगुणकित्तणेसुं न हुंति पुनरुत्तदोसा उ"।। [आवश्यक नि.५/१८]।।

इति वचनात्, पुनःपुनरुपदेशदानेऽपि पुनरुक्तदोषो नैवेति ।।१०.१६।।

**[२८६] धना-ऽङ्ग-सौख्य-स्वजनानसूनपि,**
**त्यज त्यजैकं न च धर्ममार्हतम् ।**
**भवन्ति धर्माद्धि भवे भवेऽर्थिता-**
**न्यमून्यमीभिः पुनरेष दुर्लभः ।।१०.१७।।**

**धनवि.**–अथानन्तरोक्तं धर्मावसरमेव धर्मस्य दुर्लभतादर्शनेन दृढयति –

**धनं** च-कनकादि **अङ्गं** च-शरीरं, **सौख्यं** च-स्रक्-चन्दना-ऽङ्गना-ऽऽदिस्पर्श-जन्यमनुकूलवेदनीयं, **स्वजनाश्**च-माता-पितृ-भ्रातृ-पुत्र-कलत्रादयः, ततो द्वन्द्वः, तान् **धनाऽऽगसौख्य-स्वजनान्, त्यज**-मुञ्च, च पुनः **असूनपि**-प्राणानपि त्यज, च पुनर् **आर्हतं**-जैनं **धर्मं** श्रुतसम्यक्त्वलक्षणं विरतिलक्षणं वा **एकम्**-अद्वितीयं न **त्यज**-मा मुञ्चेति । **हि** यतः कारणाद्, **धर्मात्**-तीर्थकृता प्रतिपादिताचाराद् **भवे भवे** जन्मनि जन्मनि, अमूनि धना-ऽङ्ग-सौख्य-स्वजन-प्राणलक्षणानि वस्तून्यर्थितानि-मनोऽभिलषितानि भवन्ति-स्युः; पुनर्द्वितीयवारमेष धर्मोऽमीभिः धना-ऽङ्गा-ऽऽदिभिर्दुर्लभो-दुष्प्रापोऽस्ति ।।१०.१७।।

**रत्न.**–अथैहिकं प्राप्तं धनादिकं मुक्त्वा, अप्राप्ताय तस्मै सुखाय कथं धर्मं करोमि? इत्याशङ्कामपाकर्तुमाह –[1]

**धना-ऽङ्गसौख्य..**इति. व्याख्या- हे आत्मन् ! धनं-द्रव्यम्, अङ्गं-शरीरं, सौख्यं-सुखं, स्वजना-बन्धवः, तान् तथा असू-प्राणान् त्यज त्यजेतिवीप्सायां द्विर्भावः, वीप्सा चात्यन्तं हेयतासूचनार्थं, यथा अरे सर्प्पः.. अरे सर्प्प.. इति, च पुनरेकमार्हतं धर्मं न त्यज, न त्यज इत्यत्र तु अत्यन्तमुपादेयतासूचनार्थं वीप्सावचनं, यथा अरे सुवर्णं.. अरे सुवर्णमिति । उभयत्रापि हेतुमाह-हि-यतः कारणाद् धर्मादमूनि-धनादीन्यर्थितानि-वाञ्छितानि भवे भवे-जन्मनि जन्मनि भवन्ति, पुनरिति विशेषे अमीभिर्धनादिभिरेष धर्मो भवे भवे दुर्लभो-दुष्प्राप इति ।।१०.१७।।

**[२८७] दुःखं यथा बहुविधं सहसेऽप्यकामः,**
**कामं तथा सहसि चेत् करुणादिभावैः ।**
**अल्पीयसाऽपि तव तेन भवान्तरे स्या-**
**दात्यन्तिकी सकलदुःखनिवृत्तिरेव।।१०.१८।।**

**धनवि.**–अथाकामनिर्जरातः सकामनिर्जराया विशेषफलं दर्शयन्नुपदिशति –

---

१. कुर्वन्नाह - मु० ।

'दुःखम्' इति, **यथाऽकामोऽपि**-निर्जरावाञ्छारहितोऽपि चतुर्गतिषु, **बहुविधं**-छेदन-भेदन-शीता-ऽऽतप-क्षुत्-तृट्-पारवश्यादि नानाप्रकारं दुःखं **सहसे**-क्षमसे, **तथा चेद्**-यदि **कामं** निर्जरावाञ्छासहितं यथा स्यात् तथा, **करुणादिभावैः**-मैत्री-प्रमोद-कारुण्य-माध्यस्थ्यपरिणामैः **सहसि,** अत्र मैत्र्यादिस्वरूपं चेदम् –

**[२८८]** "परहितचिन्ता मैत्री परदुःखविनाशिनी तथा करुणा ।
परसुखतुष्टिर्मुदिता परदोषोपेक्षणमुपेक्षा" ।।[ ]।। इति

**तदाऽल्पीयसाऽपि**-अतिस्तोकेनापि, **तेन** सकामसहनेन, **भवान्तरे**-परभवे **तवात्यंतिकी**-पुनःप्रादुर्भावरहिता **सकलदुःखनिवृत्तिः**-समस्तजन्म-जरा-मरणाद्यनेक-दुःखोच्छित्तिरेव स्यात् ।।१०.१८।।

**रत्न.–**अथात्मानं प्रत्यकामदुःखसहनाद् वरं सकामदुःखसहनमित्युपदिशति–

**दुःखं यथा..**इति. व्याख्या-हे आत्मन् ! यथा त्वं, न विद्यते कामः-इच्छा यस्य सः, अकामः सन् बहुविधमपि दुःखं **सहसे**, एकेन्द्रियादिजन्मस्वित्यर्थः, तथा त्वं कामं यथा स्यात् तथा चेद्-यदि करुणादिभावैः-कृपादिपरिणामैः, आदिशब्दात् परदुःखनिवृत्ति-परसुखोत्पादनादिग्रहणं, सहसि-क्षमसे, अथवा काममिति दुःखविशेषणं, सकाममित्यर्थः, तदा [1]तेनाल्पीयसाऽपि सकामदुःखसहनेनात्यन्तिकी-सकलानामेक-विंशतिभेदभिन्नानां दुःखानां निवृत्तिरेवेति निश्चयेन स्यादित्यर्थः, कस्मिन् -भवान्तरे पञ्चमाऽऽरकोत्पन्नस्यास्मिन् जन्मनि मुक्तिगमनानर्हत्वं तेन भवान्तरे इत्युक्तम्, 'षहि मर्षणे' [है.धा ९९०] इत्यस्य सहसे इति, षहण् मर्षणे [है.धा १९८२] इति तु चुरादौ युजादेर्नवा [सि.हे ३.४.१८] इति णिचो वैकल्पिकत्वात् सहसीति रूपमिति ।।१०.१८।।

**[२८९] प्रगल्भसे कर्मसु पापकेष्वरे !,**
**यदाशया शर्म न तद् विनाऽनितम् ।**
**विभावयंस्तच्च विनश्वरं द्रुतं,**
**बिभेषि किं दुर्गतिदुःखतो न हि ? ।।१०.१९।।**

१. तवाऽ० मु० ।

**धनवि.**—अथ सांसारिकसुखवाञ्छया धर्मकर्मपरिहारेण पापकर्मसु ये प्रवर्तन्ते तान् प्रत्युपदिशति —

'प्रगल्भसे' इति **अरे**! इति तिरस्कारपूर्वकं संबोधने, यस्य सुखस्या-ऽऽ**शया**-अभिलाषेण **पापकेषु**-पापजनकेषु **कर्मसु**-प्राणातिपातादिषु व्यापारेषु **प्रगल्भसे**-पण्डितो भवसि, **तत्छर्म**-सुखं **अनितं**-जीवितं **विना न** भवति, अत्र अनितमिति 'अन-श्वसक् प्राणने' [है.धा.१०८९-९०] इत्यस्य प्रयोगो द्वितीयान्तः, पुन**स्तज्**जीवितं **द्रुतं**-शीघ्रं **विनश्वरं**-विनाशशीलं **विभावयन्**-विचिन्तयन् **दुर्गतिदुःखतो**-नरकादिवेदनातः **किम्** इति प्रश्ने **न हि बिभेषि ?** - न भयं गच्छसीति ।।१०.१९।।

**रत्न.**—अथ सुखाशया पापकर्मसु मा धार्ष्ट्यं कुर्विति भङ्ग्योपदिशति —

**प्रगल्भसे कर्मसु.** इति. व्याख्या-अरे इत्याक्रोशार्थसंबोधने, आत्मन् ! पापकेषु कर्मसु, प्रगल्भसे-धृष्टो भवसि, कया ? - यस्य सुखस्याशया वाञ्छया, तत् त्वया शर्म-सुखं न [१]**विनाऽशित** तत्-शर्मणो भोगग्रहणादित्यर्थः, चेति विशेषे, तत् सुखं द्रुतं-विनाशशीलं विभावयन् सन् त्वं हि निश्चितं दुर्गतीनां-तिर्यग्-नरकादीनां दुःखतो-दुःखेभ्यः किं न बिभेषि ?, अपितु भेत्तुं युक्तमित्यर्थः, द्रुत-विनश्वरा-ऽल्पसुखाय कृतपापकर्मणः पापकर्मसमुत्थदुर्गतिदुःखेभ्यस्तव भयं कर्तुं युक्तमिति भावः ।।१०.१९।।

**[२९०] कर्माणि रे जीव ! करोषि तानि,**
**यैस्ते भवित्र्यो विपदो ह्यनन्ताः ।**
**ताभ्यो भिया तद्-दधसेऽधुना न किं,**
**संभाविताभ्योऽपि भृशाकुलत्वम् ? ।।१०.२०।।**

**धनवि.**—अथ यः शास्त्रश्रवणादिना पापकर्मकरणजनितविपद्भ्यो भीतिं प्राप्नोति पापकर्माण्यपि च न त्यजति, तं प्रत्युपदिशन्नाह —

'कर्माणि' इति, रे **जीव !** यदि त्वं **तानि कर्माणि** सावद्यमार्गप्रवृत्तिलक्षणानि,

१. **'विनाशितं'** इति मूलत्वेनापि पाठः, **विनानेतं** मु० ।

**करोषि हीति** निश्चितं, **यैः** पापकर्मभिः, **ते**-तवा**नन्ता**-बहुकालमप्यन्तरहिता **विपदः**-आपदो **भवित्र्यो,** भविष्यन्तीति भवित्र्य इत्यर्थः, **तत्**-तदा **संभाविताभ्यः**-संभावनाविषयीकृताभ्यः, **ताभ्यो** विपद्भ्यो **भिया**-भयेनाधुना-सांप्रतं **किम्** इति प्रश्ने **भृशाकुलत्वं ?** - भृशम्-अत्यर्थमाकुलत्वं-व्यग्रत्वं **दधसे ?** इत्यन्वयः, दधि धारणे [हे.धा. ७४५] इत्यस्य दधसे इति प्रयोगः । भावार्थस्तु यदि त्वं पापकर्मफलं जानन्नपि पापकर्माणि कुरुषे तदा, शास्त्रादिश्रवणात् तत्कर्मफलभूताभ्यः संभावितविपद्भ्यः किं व्याकुलो न भवसीति ।।१०.२०।।

**रत्न.**—अथ तदेव प्रकारान्तरेण कथयति —

**कर्माणि रे! जीव !** इति. व्याख्या-रे! इति निन्द्यसंबोधने जीव ! त्वं तानि कर्माणि करोषि, यैः कर्मभिस्ते-तव, विपदो-विपत्तयः अनन्ता-अन्तरहिता भवित्र्यो-भाविन्यः, तत्-तस्मात् कारणात्, अधुना-इह भवे ताभ्यः संभाविताभ्योऽपि-चिन्तिताभ्योऽपि भृशाकुलत्वं किं दधसे ?, अपि तु परभवेऽपि विपदनुभवनसमये भृशाकुलत्वं दधिष्यसे इति भावः ।।१०.२०।।

**[२९१] ये पालिता वृद्धिमिताः सहैव,**
**स्निग्धा भृशं स्नेहपदं च ये ते ।**
**यमेन तानप्यदयं गृहीतान्,**
**ज्ञात्वाऽपि किं न त्वरसे हिताय ? ।।१०.२१।।**

**धनवि.**—अथ पुनः परलोकभीतिं[1] दर्शयन्नुपदिशति —

'ये पालिता' इति, **ये** पुत्र-सेवकादयस्त्वया **पालिता**-हितप्रवर्त्तनादिना रक्षिताः, **च** पुनर्, **ये** भ्रातृ-भगिन्यादयस्ते-तवात्मना **सहैव वृद्धिं**-शरीरपुष्टिम्, इताः-प्राप्ताः। **च** पुनर्ये तव **भृशम्**-अत्यर्थं **स्निग्धा**-मित्राणि, **च** पुनर्ये पितृ-कलत्रादयः, ते-तव **स्नेहपदं**-प्रेमपात्रं, आसन्निति सर्वत्र योज्यं, **तान**पि सम्बन्धिनो **यमेन**-कृतान्तेन् **अदयं**-निर्दयं यथा स्यात् तथा **गृहीतान्**-स्वायत्तीकृतान् **ज्ञात्वाऽपि**-साक्षाद् दृष्ट्वाऽपि श्रुत्वाऽपि वा **हिताय**-तत्त्वत आत्मनः सुखोपायाय तपःसंयमाय, **किम्** इति प्रश्ने

१. 'भीतं' मु० ।

न त्वरसे ? - किं न वेगवान् भवसीति ।।१०.२१।।

**रत्न.**—पुनरपि हितार्थे जीवं प्रत्युपदिशति —

**ये पालिता** इति. व्याख्या-हे आत्मन ! ये स्वजनादयस्त्वया पालिताः, च पुनर्, ये सहैव वृद्धिम् इता-गताः, ये च भृशम्-अत्यर्थं त्वयि स्निग्धाः-स्नेहवन्तः, ये च ते-तव स्नेहपदं स्थानं, तानपि यमेन, अऽदयं-दयारहितं यथा स्यात् तथा गृहीतान् ज्ञात्वाऽपि हितार्थं-हितं कर्तुमित्यर्थः किं न त्वरसे ? - त्वरां किं न करोषि, अपि तु त्वरस्वेत्यर्थः ।।१०.२१।।

**[२९२] यैः क्लिश्यसे बन्धन-बन्ध्वपत्य-**
**यशःप्रभुत्वादिभिराशयस्थैः ।**
**कियानिह प्रेत्य च तैर्गुणस्ते,**
**साध्यः ? किमायुश्च ? विचारयैवम् ।।१०.२२।।**

**धनवि.**—अथ पुत्र-कलत्रादिप्रतिबन्धेन ये पापकर्मकारिणः, तान् प्रत्युपदिशन्नाह—

'यैः क्लिश्यसे' इति, **यैराशयस्थैः**-स्वचित्तकल्पितैर् **बन्धन-बन्ध्वपत्य-यशःप्रभुत्वादिभिः** त्वं **क्लिश्यसे**-पापकर्मभिः क्लेशं यासीति, अत्र **बन्धनानि**-बन्धनरूपाणि च तानि **बन्धव**श्च-स्वगोत्रीया, **अपत्यानि** च-पुत्र-पुत्र्यादीनि, **यशांसि** च दानाद्युत्थानि, **प्रभुत्वानि** च गृहनायकत्व-कुटुम्बनायकत्व-देशनायकत्वादीनि तानि, **आदौ** येषु तानि तथा तैः; अत्र **आदि**पदात् कलत्रादीनि ग्राह्याणीति, **ते**-तव **तै**र्बन्ध्वपत्यादिभिः पदार्थैर्, **इह**-अत्र भवे **च** पुनः **प्रेत्य**-परभवे **कियान्**-कियन्मात्रो, **गुणः**-उपकारः, **साध्यः ?** - साधयितुं शक्य इति काकूक्त्या, **च** पुनरायुः-जीवितं च **किं**-कियन्मात्रमस्तीत्येवममुना प्रकारेणोक्तं त्वं **विचारय**-स्वहृदि विभावयेति, — **"यैः क्लिश्यसे त्वं-धनबन्ध्वपत्य'** इति पाठे तु धनानि च बन्धवश्चेत्यादिद्वन्द्वः ।।१०.२२।।

**रत्न.**—अथ यदर्थं त्वं क्लिश्यसे, तैस्तव गुणो नास्तीति प्रत्युपदिशति —

**यैः क्लिश्यसे त्वम्**[1] इति. व्याख्या-हे आत्मन् ! यैर्निमित्तभूतैस्त्वं क्लिश्यसे, यदर्थं त्वं क्लेशं प्राप्नोषीत्यर्थः, यैः कैरित्याह-**धन** च बन्धवश्च अपत्यानि च यशश्च प्रभुत्वं च तान्यादौ येषां तानि धन-बन्ध्वपत्य-यशः-प्रभुत्वादीनि, तैः किंभूतैः ? - आशये चित्ते तिष्ठन्तीति तानि तैः, चेति विशेषे, तैर्धनादिभिरिह लोके च पुनः प्रेत्य-परभवे ते-तव कियान् गुणः साध्यः ?, च पुनस्ते-तवा-ऽऽयुः-जीवितं किं ? - कियदित्येवं त्वं विचारय, विचार्य च तैरिहभवेऽपि परभवेऽपि न कश्चिद् गुणोऽस्तीति आयुरपि तुच्छं मत्वाऽऽत्महितं कुरुष्वेत्युपदेशः ।।१०.२२।।

**[२९३] किमु मुह्यसि गत्वरैः पृथक्-**
**कृपणैर्बन्धुवपुः-परिग्रहैः ।**
**विमृश स्वहितोपयोगिनोऽ-**
**वसरेऽस्मिन् परलोकपान्थ रे ! ।।१०.२३।।**

**धनवि.**—अथ स्वहिताचरणोपदेशमाह —

'किमु मुह्यसि' इति **रे! परलोकपान्थ! पृथग् गत्वरैः**-भिन्नभिन्नस्थानगमनशीलैः, **कृपणैः**-तुच्छैः स्वार्थसिद्धिं यावत् सुन्दरैस्-तदनन्तरमसुन्दरैरित्यर्थः, **बन्धु-वपुः-परिग्रहैः**-स्वजन-तनु-धनादिभिः **किमु** इति प्रश्ने **मुह्यसि ?** - मोहं यासि; **अस्मिन्** दृश्यमानमानुष्यादिसमग्रसामग्रीसहिते, **अवसरे**-प्रस्तावे, **स्वहितोपयोगिनो**-निजसुखोपायहेतून् पदार्थान् श्रीजिनधर्माचरण-लक्षणान् **विमृश**-विचिन्तय; अत्र 'परलोकपान्थ' रे ! इति संबोधनपदेन, 'पृथग्गत्वरैः' इतिपदेन चानित्यताभावना द्योत्यते ।।१०.२३।।

**रत्न.**—अथ स्वजनादिषु मोहं संत्यज्य हितोपयोगिषु विचारायोपदिशति-

**किमु मुह्यसि** इति. व्याख्या-रे ! परलोकपान्थ ! - रे ! परलोकपथिक ! बन्धवश्च वपुश्च परिग्रहश्च तैः, किमु इति ? - किं मुह्यसि-मोहं प्राप्नोषि, अपि तु मा मुह्य, यतः किंभूतैः ? - गत्वरैः-गमनशीलैः, कथं ? - पृथग्-

१. 'त्वं' इति पाठः मूलत्वेन गृहीतः ।

भिन्न-भिन्नस्थाने, पुनः कीदृशैः -कृपणैः - दीनैः परभवे सुखकरणासमर्थैः, अस्मिन्नवसरे परलोकगमनावसरे इत्यर्थः, स्वस्य हितोपयोगिनः प्रति विमृश-विचारय, परलोकहितोपयोगिनो ज्ञान-दर्शन-चारित्रादिगुणान् विचारयेत्यर्थः ।।१०.२३।।

**[२९४] सुखमास्से सुखं शेषे,**
**भुङ्क्षे पिबसि खेलसि ।**
**न जाने त्वग्रतः पुण्यैर्-**
**विना किं ते भविष्यति ? ।।१०.२४।।**

**धनवि.**—अथ पुराकृतपुण्यानुभावेन सुखमनुभवन्तमात्मानमुपदिशति —

'सुखमास्से' इति, हे आत्मन् ! त्वं **सुखं** यथा स्यात् तथा सुखासन-सिंहासन-भद्रासनादौ **आस्से**-उपविशसि, 'आसिक् उपवेशने' [हे. धा ११११९] इत्यस्यायं प्रयोगः, च पुनः **सुखं शेषे**-पल्यङ्क-पट्टिकादौ स्वपिषि, च पुनः **सुखं भुङ्क्षे**-शालिदाल्यादिकं भक्ष्यसि, च पुनः **सुखं पिबसि**-कर्पूरादिवासितं शीतलजलं मदिरादि वा पानविषयीकरोषि, च पुनः **सुखं खेलसि**-गज-तुरङ्गादिभिरक्ष-कन्दुकादिभिर्वा क्रीडसि; **तु** पुनरहमेवं **न जाने**-न वेद्मि **अग्रतः**-अग्रेतनभवे **पुण्यैः**-इहभवकृतसुकृतै**र्विना किं**-सुखासन-सुखशयनादिमध्ये किं वस्तु **ते**-तव **भविष्यति ?** ।।१०.२४।।

**रत्न.**—अथ सांप्रतं सुखेन विलसतस्तवाग्रे किं भविष्यतीति ज्ञापयति —

**सुखमास्से.** इति व्याख्या-हे आत्मन् ! त्वं सांप्रतं संपन्मुदितः सन्, सुखं यथा स्यात् तथा आस्से-उपविशसि, तथा सुखं शेषे-स्वपिषि तथा सुखं भुङ्क्षे भुक्तिं करोषि तथा पिबसि मद्यादि, सुखमिति क्रियाविशेषणं सर्वत्र योज्यं, तथा खेलसि-द्यूत-क्रीडा-मृगयादि रमसे, परमग्रतो भवे ते-तव पुण्यैर्विना किं ? भविष्यतीति अहं [१]न जाने आगमा-ऽनुमानाभ्यां महत् कष्टं भविष्यतीति,

१. तु - मु० ।

जानतोऽपि ग्रन्थकर्त्तुरिदमुदासीनं वचः, अथवा छद्मस्थत्वात् सम्यक्तया न जाने इत्यपि, तथेयताऽप्युपदेशेनाप्रतिबुध्यमानं जीवं प्रति निरादरतावचनं वा ।।१०.२८।।

**[२९५] शीतात् तापान्मक्षिका-कत्तृणादि-**
**स्पर्शाद्युत्थात् कष्टतोऽल्पाद् बिभेषि ।**
**तास्ताश्चैभिः कर्मभिः स्वीकरोषि,**
**श्वभ्रादीनां वेदना धिग् धियं ते ।।१०.२५।।**

**धनवि.**—पुनः प्रकारान्तरेण विमर्शं दर्शयन्नात्मैवात्मानमुपदिशति —

'शीतात्' इति, त्वम्, **अल्पात्**-स्तोकात् स्तोककालीनाद् वा, **शीतात्**-शीतर्तुप्रभवाच्छैत्याच्च पुन**स्तापाद्**-उष्णर्तुप्रभवाद् घर्मतः, च पुन**र्मक्षिका-कर्त्तृणादिस्पर्शाद्युत्थात् कष्टाद् बिभेषि**-भयं यासीति, अत्र **मक्षिका** प्रसिद्धा, **कत्तृणं** च-तृणविशेषः, ते **आदौ** येषां ते तथा तेषां, **स्पर्शः**-त्वगिन्द्रिय-ग्राह्योऽनिष्टगुणविशेषः स आदौ येषां ते तथा तेभ्य **उत्था**-उत्थानं यस्य स तथा तस्मात् मक्षिकाकत्तृणादिस्पर्शाद्युत्थात्, कत्तृणादि-इति, अत्र **आदि**पदात् कर्करादिकर्कशवस्तुपरिग्रहः, स्पर्शादि-इति अत्र **आदि**पदाद् दूरस-दुर्गन्धादिपरिग्रहः, **च** पुनर्, **एभिः** प्रत्यक्षतः क्रियमाणैः **कर्मभिः**-पापव्यापारैस्, **तास्ता** जगत्प्रसिद्धाः **श्वभ्रादीनाम्, आदि**पदात् तिरश्चां **वेदना**-दुस्सहपीडाः **स्वीकरोषि**-अङ्गीकरोषी-त्यन्वयः; तेन कारणेनाल्पकष्टाद् भीतस्य पापकर्मकरणेनाङ्गीकृत-नारकवेदनस्य **ते**-तव **धियं**-बुद्धिं प्रति **धिग्** अस्तु-तिरस्कारोऽस्तु ।।१०.२५।।

**रत्न.**—अथ स्वल्पात् कष्टाद् बिभेषि महत्कष्टमङ्गीकरोषीत्युपदिशति —

**शीतात् तापात्..**इति. व्याख्या-हे आत्मन् ! त्वं शीताद् बिभेषि-भयमाप्नोषि तथा तापात्, तथा मक्षिका कत्तृणानि च तान्यादौ येषां तानि मक्षिका-कत्तृणादीनि, तेषां स्पर्शाद्युत्थात्-स्पर्शादिजातात् कष्टतस्त्वं बिभेषि, किंलक्षणाद्? - अल्पाद्-अल्पतः, कुत्सितानि तृणानि कत्तृणानि-दुःस्पर्शानि दर्भादीनि, आदिशब्देना-ऽवनतोन्नतभूमिकाप्रस्तरादिग्रहणं, चेति विशेषे, एभिर्जीवहिंसादिपापकर्मभिस्तास्ता

वक्तुमशक्याः किं पुनरनुभवितुमित्यर्थः, श्वभ्रादीनां-नरकादीनां वेदनाः प्रति स्वीकरोषि, अर्जयसीत्यर्थः, आदिशब्देन तिरश्चां वेदनाग्रहणं, ततस्तवात्मन् ! धियं प्रति-बुद्धिं प्रति धिगस्त्विति ।।१०.२५।।

**[२९६] क्वचित् कषायैः क्वचन प्रमादैः,**
**कदाग्रहैः क्वापि समत्सराद्यैः ।**
**आत्मानमात्मन् ! कलुषीकरोषि,**
**बिभेषि धिग् नो नरकादधर्मा ।।१०.२६।।**

**धनवि.**—अथ सामान्यतो वैराग्यद्वारमुपसंहरन् तिरस्कारपूर्वकं कषायादिसकल-कलङ्कनिरासार्थमात्मानमुपदिशति —

'क्वचित्' इति, हे **आत्मन् !** त्वं **क्वचित्** परीषहसहनादौ, **कषायैः** क्रोधादिभिः, **आत्मानं**-स्वं **कलुषीकरोषि**-मलिनीकुरुषे, तथा **क्वचन** क्रियानुष्ठानादौ, **प्रमादैः**-मद्यादिभिरात्मानं कलुषीकरोषि, **क्वापि** शास्त्रार्थप्ररूपणादौ **समत्सराद्यैः कदाग्रहैः**-मिथ्याभिनिवेशाद्यैरसद्ग्रहैरात्मानं कलुषीकरोषि, अत्र **आद्य**पदेन क्वचिच्छास्त्रार्थ-श्रवणादौ मौढ्यादिभिराशातना-करणेनात्मानं कलुषीकरोषीत्यपि सूचितं, च पुनर्, **अधर्मा** सन् **नरकात्** प्रसिद्धान्न बिभेषि-न भयं प्राप्नोषीत्यर्थः, तत्र न विद्यते धर्मो-देशविरतिलक्षणः सर्वविरतिलक्षणः सम्यक्त्वलक्षणो दानादिलक्षणो वा यस्य सः अधर्मा, पाप्मानित्यर्थः, 'द्विपदाद् धर्माद् अन् [सि.हे ७-३-१४१] इति साधुः, अत एवात्मानं कलङ्कयन्तं धर्मविरहितं नरकेभ्यो निर्भयं त्वां धिगस्त्वित्यर्थः, एतावता तिरस्कारेण कषायादिप्रमादरहितः सन् धर्मं कुर्वित्यर्थतो दर्शितमिति ।।१०.२६।।

इति श्रीतपोगच्छनायकश्री**मुनिसुन्दरसूरि**निर्मितस्या**ध्यात्मकल्पद्रुमस्याधिरोहणी**-टीकायां महोपाध्यायश्री**कल्याणविजय**शिष्योपाध्याय-श्री**धनविजय**गणिविरचितायां सामान्यतो वैराग्योपदेशनाम्नी दशमी पदपद्धतिः ।।१०।।

**रत्न.**—एतदेव प्रकारान्तरेणाचष्टे —

**क्वचित् कषायैः** इति, व्याख्या हे आत्मन् ! त्वमात्मानं स्वं प्रति किं कलुषीकरोषि ? - मलिनीकरोषि, कैः ? - कषायैः-क्रोध-मान-माया-लोभैः, कथं ? - क्वचित्-क्वचन प्रमादैः-मद्यादिभिः, क्वापि च कदाग्रहैः-कुत्सितहठैः कुमतोपदेशादिभिरित्यर्थः, क्वापि च मत्सराद्यैः, डमरुकमणिन्यायेन क्वापि चेत्यत्रापि योज्यं, आद्यशब्देनाष्टादशपापस्थानकानां ग्रहणं, परं त्वं परभवे नरकान्नो बिभेषि, त्वं किंलक्षणः ? - न विद्यते धर्मो यस्य सोऽधर्मा, समासे धर्मशब्दात् अन्प्रत्यये सिद्धम्, ततस्त्वामविचारकत्वाद् धिगस्त्विति ।।१०.२६।।

**[२९७]** श्री**शान्तिचन्द्र**वरदुग्धसिन्धु-
लब्धप्रतिष्ठवरवाचकरत्नचन्द्रः ।
**अध्यात्मकल्पफल**दस्य चकार वृत्तिं,
तस्यां गतो विवृतितो दशमोऽधिकारः ।।

---

इति दशमोऽधिकारः ।।



# ११. धर्मशुद्ध्युपदेशाधिकारः

**[२९८] भवेद् भवापायविनाशनायः,**
**तमज्ञ ! धर्मं कलुषीकरोषि किम् ? ।**
**प्रमादमानोपधिकारणादिभिर्-**
**न मिश्रितं ह्यौषधमामयापहम् ।।११.१।।**

**धनवि.**—अथानन्तरमुक्तः सामान्यतो वैराग्यस्योपदेशः, तच्च वैराग्यं शुद्धधर्मवासनाधीनं भवतीत्यवसरायातं धर्मशुद्ध्युपदेशरमुपदर्शयन्नाह – **अथ धर्मशुद्ध्युपदेशः**-स्पष्टम् । तत्रापि प्रथमं शुद्ध एव धर्मो भवापायविनाशनाय भवतीति धर्मशुद्धिमुपदिशति –

'भवेद्' इति **यो** धर्मो **भवापायविनाशनाय**-भवः-संसारः, तत्संबन्धिनो येऽपाया-जन्म-जरा-मरणलक्षणा उपद्रवाः, तेषां विनाशनाय-विध्वंसाय **भवेद्** इति, हे अज्ञ ! - हे मूर्ख ! **तं धर्मं, प्रमादश्च** प्रसिद्धो, **मानश्च**-अहङ्कारः, **उपधिश्च**-माया, ततो द्वन्द्वः, ते एव कारणानि-निमित्तानि, आदौ-प्रथमं येषां तानि तथा तैः **प्रमाद-मानोपधिकारणादिभिः,** आदिपदाल्लोभप्रभृतिश्च, **किम** ? इति प्रश्ने **कलुषीकरोषि ?** - मलिनीकरोषि ?; **हि** यतः कारणात् **मिश्रितं**-रोगोत्पादकद्रव्येण संपृक्तम्, **औषधं**-रोगापहारि भेषजम् **आमयापहं**-रोगोच्छेदकं **न** भवतीति; भावार्थस्तु यथौषधं विरुद्धौषधमिश्रितं रोगापहाराय न भवति तथा प्रमादादिभिः कलुषितो धर्मः संसारविनाशाय न भवतीति ।।११.१।।

**रत्न.**—अथैकादशो धर्मशुद्ध्युपदेशाख्योऽधिकारो व्याख्यातुं प्रस्तूयते-अथेदृशं धर्ममेभिर्मा मलिनीकृर्वित्युपदिशति –

**भवेद् भवापाय..**इति. व्याख्या-**यो** भवे-संसारे अपाया-विघ्नाः, तेषां विनाशनाय भवेत्, हे अज्ञ ! - हे मूर्ख ! तं धर्मं किं कलुषीकरोषि ?, अपि तु मा

---

१. धर्मसदुम. मु० ।

कलुषीकुरु, कैः ? - प्रमादश्च मानश्च उपधिश्च [1]**मत्सरश्च**-प्रमाद-मानोपधि-**मत्सराः**, ते आदौ येषां तानि तैः, प्रमाद-मानोपधिमत्सरैः, प्रमादो-मद्यादिः, मानः-अहंकारः, उपधिः-छद्म, मत्सरः-परसंपत्त्यसहनं, तदादिकारणैरित्यर्थः, एतद्दष्टान्तेन दृढयति-हि निश्चितं विरुद्धद्रव्यै-रेण्वादिभिर्मिश्रितमौषधं, आमयापहं-रोगहन्तृ न स्यात् तथा प्रमादादिभिः कलुषितो धर्मो भवापायविनाशनाय न स्यादित्यर्थः ।।११.१।।

**[२९९] शैथिल्य-मात्सर्य-कदाग्रह-क्रुधो-**
**ऽनुताप-दम्भा-ऽविधि-गौरवाणि च ।**
**प्रमाद-मानौ कुगुरुः कुसङ्गतिः,**
**श्लाघार्थिता वा सुकृते मला इमे ।।११.२।।**

**धनवि.**–अथात्र चिरन्तनग्रन्थसम्मतिं दर्शयितुमाह–**यत** इति, यतः कारणात् पूर्वाचार्यैरिति प्रतिपादितमस्तीत्यर्थः, –

'शैथिल्य' इति **इमे** नामग्राहं वक्ष्यमाणाः **सुकृते**-पुण्यकर्मणि **मला**-मलप्राया वस्तुशोभापहारिणो भवन्तीत्यर्थः, तानेव नामग्राहं दर्शयति-**शैथिल्यं** च-क्रियायां शिथिलता प्रमादो वा, **मात्सर्यं** च-परगुणासहनं, **कदाग्रह**श्च-असद्ग्रहदार्ढ्यं, **क्रुच्च**-क्रोधः, ततो द्वन्द्वे **शैथिल्य-मात्सर्य-कदाग्रह-क्रुधः**, च पुनर्, **अनुताप**श्च-धर्मकर्मकरणानन्तरं पश्चात्तापो, **दम्भ**श्च-धर्मकर्मणि माया, विधिश्च-शास्त्रोक्तमर्यादया प्रवर्त्तनं, तदभावः **अविधिः, गौरवं** च-'मयेदं सुकृतं कृतं, ततोऽहं महान्'इति स्वयं चिन्तनं, लोके महत्त्वप्राप्तये परेषां पुरस्तात् प्रकाशनं वा, ततो द्वन्द्वे **अनुताप-दम्भाऽविधि-गौरवाणि; च** पुनः-प्रमादश्च मानश्च **प्रमाद-मानौ** प्रसिद्धौ; च पुनः-**कुगुरुः**-सम्यग्ज्ञान-दर्शन-चारित्ररहितो धर्माचार्यः, **कुसङ्गतिः**-नट-विटादि-भिरुत्सूत्रभाषिभिर्वा सह मिलनं, च पुनः-**श्लाघार्थिता**-परकृतस्वप्रशंसास्पृहालुता, **वा** इति पूर्वोक्तसर्वसमुच्चये । भावार्थस्तु इमे शैथिल्यादयः सर्वेऽपि पुण्यकर्मणि

१. मत्सरादि - इति पाठो मूलत्वेन गृहीतः, पाठोऽयं सुष्ठुभाति, दृश्यतां ११.३. तमे पद्ये 'मत्सरोज्झी' इति पदेन मत्स्यरस्य स्वतन्त्रतया त्यागोपदेशः (सं.) ।

कृते क्रियमाणे वा दोषाः यथेप्सितफलसाधका न भवन्तीति ।।११.२।।

**रत्न.**–अथ सुकृते मलानभिधित्सुराह –

**शैथिल्य-मात्सर्य..**इति. व्याख्या-सुकृते-धर्मे इमे मला भवन्ति, इमे के ? - इत्याह-शैथिल्यं-शिथिलता अर्थात् धर्मे अदाढ्र्यं, मात्सर्यं-गुणिषु मत्सरकरणं, कदाग्रहः-कुत्सितहठः, क्रुत्-कोपः, द्वन्द्वसमासे, ताः शैथिल्य-मात्सर्य-कदाग्रह-क्रुधः, तथा अनुतापः पश्चात्तापः दानादिधर्मं कृत्वा पश्चात्तापकरणं 'हा मया बहु दत्तं, वृथा तपः कृतम्' इत्यादि, च पुनर्-दम्भः–कपटम्, अविधिः-अनाचारः, गुरोर्भावो गौरवं गुरुत्वं, द्वन्द्वसमासे तानि, तथा प्रमादः-अनवधानता, मानः-चित्तोन्नतिः, तौ तथा कुत्सितो गुरुः-धर्मोपदेष्टा, प्रस्तरोपमानः स्वयं निमज्जन् परानपि निमज्जयतीतिलक्षणः, कु-कुत्सिता सङ्गतिः, मद्यप-कुमत्यादीनां सङ्गतिरित्यर्थः, श्लाघा-प्रशंसा, तस्या अर्थित्वं वाञ्छकत्वं-'दानादि ददानस्य मम कश्चित् श्लाघां करोति नवा'ति स्पृहयालुत्वं, वा पुनरर्थे, एभिर्धर्मो मलिनो भवतीति ।।११.२।।

**[३००] यथा तवेष्टा स्वगुणप्रशंसा,**
**तथा परेषामिति मत्सरोज्झी ।**
**तेषामिमां संतनु यल्लभेथास्-**
**तां नेष्टदानाद्धि विनेष्टलाभः ।।११.३।।**

**धनवि.**–अनन्तरं स्वश्लाघार्थिता समत्सरता च मलत्वेनोक्ता, तेन तत्परिहारेण धर्मशुद्धिमुपदिशति –

'यथा तव' इति **यथा**-येन प्रकारेण तव **स्वगुणप्रशंसा**-स्वस्य-निजस्य गुणा-ज्ञान-विज्ञानादयः, तेषां प्रशंसा-श्लाघा, **इष्टा**-स्पृहणीया वर्त्तते, **तथा**-तेन प्रकारेण **परेषां**-आत्मव्यतिरिक्तानामन्येषां स्वगुणप्रशंसा इष्टा वर्त्तते, **इति** हेतोस्त्वं मत्सरमुज्झति-त्यजतीति **मत्सरोज्झी**-गतमत्सरः सन्, **तेषां** परेषा**मिमां** गुणप्रशंसां **संतनु**-सम्यक्-प्रकारेण तनु-विस्तारय, **यद्**-यस्मात् त्वं **तां** गुणप्रशंसां **लभेथाः**-

प्राप्नुयाः, **हि** यतः कारणाद् **इष्टदानाद् विना**-अभिलषणीयवस्तुवितरणमन्तरेण, **इष्टलाभः**-स्पृहणीयवस्तुप्राप्तिर्न स्यादिति ।।११.३।।

**रत्न.**–अथ स्वगुणश्लाघेच्छुः परगुणप्रशंसां कुर्वित्युपदिशति –

**यथा तवेष्टा**..इति. व्याख्या-हे आत्मन् ! यथा तव स्वगुणप्रशंसा इष्टा-वल्लभा तथा परेषां जनानां स्वगुणप्रशंसा इष्टा वर्त्तते इति हेतोस्त्वं तेषां इमां गुणप्रशंसां संतनु-सम्यग् विस्तारय, कुर्वित्यर्थः, त्वं किंलक्षणः ? - मत्सरं-परगुणोत्कर्षासहनलक्षणमुज्झसि-त्यजसीत्येवंशीलो मत्सरोज्झी अर्थात् परेषामेवेति, यद्-यस्मात् कारणात्, तां स्वगुणप्रशंसां लभेथाः-प्राप्नुयाः, हि यस्मात् कारणादिष्टस्य-वाञ्छितस्य दानाद् विना इष्टस्य-वाञ्छितस्य लाभो न भवतीति ।।११.३।।

**[३०१] जनेषु गृह्णत्सु गुणान् प्रमोदसे,**
**ततो भवित्री गुणरिक्तता तव ।**
**गृह्णत्सु दोषान् परितप्यसे च चेद्,**
**भवन्तु दोषास्त्वयि सुस्थिरास्तव ।।११.४।।**

**धनवि.**–अथ स्वगुणप्रशंसां परनिन्दां च निषेधयन्नुपदिशति –

'जनेषु' इति **जनेषु**-लोकेषु तव **गुणान्**-दातृता-ज्ञातृता-तपस्विता-सुस्वरता-ऽऽदिधर्मान् **गृह्णत्सु**-स्तुतिकरणादिना स्वीकुर्वत्सु, **प्रमोदसे**-हृष्यसि, **ततो** गुणग्रहणजनितप्रमोदात्, **तव गुणरिक्तता**-गुणशून्यता **भवित्री**-भाविनी; **च** पुनश्**चेद्**-यदि तव **दोषान्**-अज्ञातृत्वादीन् **गृह्णत्सु**-निन्दाकरणादिना स्वीकुर्वत्सु **परितप्यसे**-परितापमाप्नोषि, परिपूर्वस्य तपिंच् ऐश्वर्ये [हे.धा.१२६७] इत्यस्य प्रयोगः, तदा **तव दोषास्त्वयि सुस्थिराः**-सुनिश्चला **भवन्तु**-इति ।।११.४।।

**रत्न.**–अथ कियत्सु काव्येषु स्वगुणप्रशंसेच्छायां दोषमाह –

**जनेषु गृह्णत्सु**..इति. व्याख्या-हे आत्मन् ! यतो-यस्मात् कारणात्, त्वं तव गुणान् प्रति जनेषु गृह्णत्सु प्रमोदसे-हर्षं प्राप्नोषि, ततो हेतोस्तव स्वगुणैः कृत्वा

रिक्तता-राहित्यं भवित्री-भवनशीला, च पुनश्चेद्-यदि तव दोषान्-अपगुणान् जनेषु गृह्णत्सु परितापमुपैषि ततो हेतोस्त्वयि दोषाः सुस्थिराः-सुनिश्चला भवन्तु, तेन स्वगुणप्रशंसायां प्रमोदं मा कुरु, स्वदोषजल्पने च परितापं मा कुर्वित्यर्थः ।।११.४।।

**[३०२] प्रमोदसे स्वस्य यथाऽन्यनिर्मितैः,**
**स्तवैस्तथा चेत् प्रतिपन्थिनामपि ।**
**विगर्हणैः स्वस्य यथोपतप्यसे,**
**तथा रिपूणामपि चेत्, ततोऽसि वित् ।।११.५।।**

**धनवि.**–अथ स्व-परस्तुतौ स्व-परनिन्दायां च समताभावकरणद्वारा मत्सरपरिहारोपदेशगर्भां धर्मशुद्धिमुपदिशति –

'प्रमोदसे' इति त्वं **यथा**-येन प्रकारेण, **अन्यनिर्मितैः**-परकृतैः, **स्वस्य**-निजस्य **स्तवैः [प्र]मोदसे**-हृष्यसि, **चेद्**-यदि **तथा**-तेन प्रकारेण परनिर्मितैः **प्रतिपन्थिनां**-त्वद्वैरिणाम**पि स्तवैः**-गुणप्रशंसनैः **प्रमोदसे,** च पुनर्-यथा **स्वस्य**-निजस्य **विगर्हणैः**-निन्दाकरणैर्, **उपतप्यसे**-खिद्यसे, **चेद्**-यदि **तथा**-तेन प्रकारेण **रिपूणामपि** विगर्हणैरुपतप्यसे, **ततः**-तदा त्वं **विद्**-वेत्तीति वित्-पण्डितोऽसीति ।।११.५।।

**रत्न.–प्रमोदसे स्वस्य..**इति. व्याख्या-हे आत्मन् ! स्वस्यान्यैर्निर्मितैः-कृतैः स्तवैः-स्तवनैः कृत्वा प्रमोदसे-हर्षं दधसे तथा चेद्-यदि प्रतिपन्थिनां-वैरिणामपि स्तवैः प्रमोदसे, अन्यच्च स्वस्य विगर्हणैः-निन्दाभिरुपतप्यसे तथा रिपूणामपि विगर्हणैरुपतप्यसे, ततः-तर्हि त्वं वेत्सीति विद्-विद्वानसीत्यर्थः, उपतप्यसे कर्मकर्त्तरिप्रयोगे साधुः ।।११.५।।

**[३०३] स्तवैर्यथा स्वस्य विगर्हणैश्च,**
**प्रमोद-तापौ भजसे तथा चेत् ।**
**इमौ परेषामपि तैश्चतुर्ष्व-**
**प्युदासतां वाऽसि ततोऽर्थवेदी ।।११.६।। इति वा पाठः।**

**धनवि.**—उक्तमेवार्थं प्रकारान्तरेण दर्शयितुमाह —

**'अथवा'** 'स्तवैर्' इति, **यथा स्वस्य स्तवैः,** च पुनः, स्वस्य **विगर्हणैः प्रमोद-तापौ**-हर्ष-विषादौ **भजसे**-प्रतिपद्यसे, **तथा**-तेन प्रकारेण **परेषां**-रिपूणामपि, **तैः** स्तवैर्विगर्हणैश्च **चेद्**-यदि, **इमौ** प्रमोद-तापौ भजसे, **वा**-अथवा **चतुर्ष्वपि**-स्वीयस्तव १-स्वीयगर्हण २-परकीयस्तव ३-परकीयविगर्हणेषु ४-**अप्युदासताम्**-औदासीन्यं भजसे, **ततः**-तदा भवान्, **अर्थवेदी**-अर्थं-परमार्थं वेत्तीत्यर्थवेदी, परमार्थज्ञोऽसीत्यर्थः, ।।११.६।। **इति वा पाठ** इति स्पष्टम् ।।

**रत्न.**—अथैनमेवार्थं पाठान्तरेणाह —

**स्तवैर्यथा** इति. व्याख्या-हे आत्मन् ! त्वं यथा स्वस्य स्तवैश्च पुनः स्वस्य विगर्हणैः प्रमोद-तापौ हर्ष-परितापौ भजसे तथा चेद्-यदि परेषां, तैः स्तव-विगर्हणैश्चेमौ प्रमोद-तापौ त्वं भजसे वा-अथवा स्तव-विगर्हण-प्रमाद-तापेषु चतुर्ष्वप्युदासतां-निःस्पृहितां भजसे, ततः-तर्हि त्वमर्थं वेत्सीत्यर्थवेद्यसीति पाठान्तरम् ।।११.६।।

**[३०४] भवेन्न कोऽपि स्तुतिमात्रतो गुणी,**
**ख्यात्या न बह्व्याऽपि हितं परत्र च ।**
**तदिच्छुरीर्ष्यादिभिरायतिं ततो,**
**मुधाऽभिमानग्रहिलो निहंसि किम् ? ।।११.७।।**

**धनवि.**—अथ श्लाघार्थितायां दोषं गुणाभावं च दर्शयन् धर्मशुद्धिमुपदिशन्नाह—

'भवेन्न कोऽपि' इति, **कोऽपि** पुमान् **स्तुतिमात्रतः**-केवलायाः परकृतप्रशंसाया, **गुणी**-गुणवान् न **भवेत्,** च पुनर्**बह्व्याऽपि**-भूयस्याऽपि, **ख्यात्या**-अयं गुणवानिति प्रसिद्ध्या **परत्र**-परभवे **हितं**-सुखोपायो **न** भवेत्; **ततः** कारणात् **तदिच्छुः**-तत् परत्रहितमेषणशीलस्त्वम् **ईर्ष्यादिभिः,** आदिपदादसूयादिभिश्च, **आयतिम्**-उत्तरकालं **मुधा**-निरर्थकम् **अभिमानग्रहिलः**-अहङ्कारग्रस्तः सन् **किं निहंसि ?** - किं विनाशयसीत्यर्थः ।।११.७।।

**रत्न.–भवेन्न कोऽपि** इति. व्याख्या-हे आत्मन् ! केवलं स्तुतिः स्तुतिमात्रं तस्माद् गुणी-गुणवान् न कोऽपि भवेत् स्यात्, तथा बह्व्याऽपि भूयस्याऽपि ख्यात्या-प्रसिद्ध्या परत्र-परस्मिन् जन्मनि हितं न भवेत्, ततो हेतोर्मुधा-वृथा अभिमानेन ग्रहिलः सन् आयतिम्-उत्तरकालं किं निहंसि ?, अपि तु मा जहीत्यर्थः, कैः ? - ईर्ष्यादिभिः, आदिशब्देन क्रोधादिग्रहणं, त्वं किंलक्षणः ? तद्-हितमिच्छसीति तदिच्छुरिति ।।११.७।।

**[३०५] सृजन्ति के के न बहिर्मुखा जनाः,**
**प्रमाद-मात्सर्य-कुबोधविप्लुताः ।**
**दानादिधर्माणि मलीमसान्यमू-**
**-न्युपेक्ष्य शुद्धं सुकृतं चरा-ऽण्वपि ।।११.८।।**

**धनवि.–**अथाऽशुद्धधर्मकर्त्तारो भूयांसः, शुद्धधर्मकर्त्तारश्चाल्पीयांस इति ख्यापयन् पुनर्धर्मशुद्धिमुपदिशति –

'सृजन्ति' इति, **प्रमाद-मात्सर्ये** च प्रसिद्धे, **कुबोध**श्च-मिथ्यात्वं, **तैर्विप्लुता**-उपद्रुताः प्रेरिता वा **बहिर्मुखाः**-प्राकृतजना बाह्यदृष्टयो, **दानादिधर्माणि मलीमसानि**-अतिशयेन मलिनानि, **के के न सृजन्ति ?** - न कुर्वन्ति-अपि तु प्रायः सर्वेऽपि कुर्वन्तीत्यर्थः, धर्माणीत्यत्र धर्मशब्दस्य नपुंसकता 'धर्मं दानादिके' इति लिङ्गानुशासन[ ]वचनात्; तेन हेतुना-**अमूनि मलीमसानि** दानादिधर्माणि, **उपेक्ष्य**-उपेक्षाविषयीकृत्य, **शुद्धं**-प्रमादादिदोषरहितं **सुकृतं**-पुण्यं, **अण्वपि**-स्तोकमपि **चर**-समाचरेति ।।११.८।।

**रत्न.–**अथ दानादिधर्मं मलिनं मा कुर्वित्याह –

**सृजन्ति के के न** इति., व्याख्या-हे आत्मन् ! के के बहिर्मुखं येषां ते बहिर्मुखा, यत्-तत् प्रलापिन इत्यर्थः, दानादिधर्माणि प्रति मलीमसानि, न सृजन्ति ? - न कुर्वन्ति, अपि तु सर्वेऽपि बहिर्मुखाः सृजन्तीत्यर्थः, यतः किंलक्षणाः ? - प्रमादो मद्यादिः पञ्चधा, मात्सर्यं-परसंपदुत्कर्षासहनत्वं, कुबोधः-

अज्ञानं तेषु विप्लुता-व्यसनिनः, हे आत्मन् ! अमूनि दानादिधर्माणि मलीमसानि, उपेक्ष्य मुक्त्वेत्यर्थः, अण्वपि-स्तोकमपि शुद्धं-निर्मलं सुकृतं-पुण्यं चर-कुरु 'धर्मं दानादिके' इति लिङ्गानुशासनवचनात् 'दानादि धर्माणि' अत्र न पुंसकत्वमिति ।।११.८।।

**[३०६] आच्छादितानि सुकृतानि यथा दधन्ते,**
**सौभाग्यमत्र न तथा प्रकटीकृतानि ।**
**व्रीडा-ऽऽनता-ऽऽननसरोज-सरोजनेत्रा-**
**वक्षःस्थलानि कलितानि यथा दुकूलैः ।।११.९।।**

**धनवि.**—अथ धर्मकरणे श्लाघार्थितालक्षणदोषनिवृत्तये दृष्टान्तदर्शनपूर्वकं धर्मशुद्धिमुपदिशति —

'आच्छादितानि' इति, **यथा**-येन प्रकारेण **आच्छादितानि**-अप्रकटीकृतानि परेषामग्रेऽप्रकाशनेन गूढानि, **सुकृतानि**-पुण्यकर्माणि, **अत्र** जगति, **सौभाग्यं**-सुभगतां **दधन्ते**-धारयन्तीति, **तथा** तेन-प्रकारेण **प्रकटीकृतानि**-परेषामग्रे प्रकाशनेन व्यक्तीकृतानि सौभाग्यं **न** दधति; अत्र दृष्टान्तमाह-**यथे**ति दृष्टान्ते **व्रीडा**-लज्जा तया [आ] समन्तान्नतं-नम्रम्, **आननं**-मुखं तदेव **सरोजं**-कमलं यासां ताः, तथा ताश्च ताः **सरोजनेत्रा**श्च-ललनाः, तास्तासां **वक्षःस्थलानि**-कुचप्रदेशाः, **व्रीडा-ऽऽनता-ऽऽननसरोज-सरोजनेत्रावक्षःस्थलानि, दुकूलैः कलितानि**-सहितानि जगति सौभाग्यं यथा दधन्ते तथा प्रकटीकृतानि-दुकूलरहितानि न सौभाग्यं दधतीति ।।११.९।।

**रत्न.**—अथ प्रच्छन्नं कृतेषु सौभाग्यमाह —

**आच्छादितानि**-इति., व्याख्या-हे आत्मन ! अत्र जिनशासने यथा सुकृतानि-पुण्यान्याच्छादितानि कृतानि सन्ति सौभाग्यं-सुभगत्वं चारुत्वमित्यर्थः दधन्ते, तथा प्रकटीकृतानि न सौभाग्यं दधन्ते, अत्रार्थे दृष्टान्तमाह-यथेति दृष्टान्तदर्शने, व्रीडया लज्जया नतं-नम्रम् आननसरोजं-वदनकमलं यासां ताश्च ताः, सरोजनेत्राः-

कमलनयनाः कामिन्यः, तास्तासां वक्षःस्थलानि, दुकूलैः-देशविशेषोत्पन्नांशुकैः, कलितानि-सहितानि तैराच्छादितानीत्यर्थः, सौभाग्यं दधन्ते तथा न प्रकटीकृतानि-अनाच्छादितानीति, तेन गुण-स्तुतीच्छामन्तरेण तान्याच्छादितान्येव सुकृतानि कुरुष्वेत्युपदेश इति ।।११.९।।

**[३०७] स्तुतैः श्रुतैर्वाऽप्यपरैर्निरीक्षितैर्-**
**गुणस्तवात्मन् ! सुकृतैर्न कश्चन ।**
**फलन्ति नैव प्रकटीकृतैर्भुवो,**
**द्रुमा हि मूलैर्निपतन्त्यपि त्वधः ।।११.१०।।**

**धनवि.**–अनन्तरोक्तमेवार्थं दृष्टान्तान्तरेण दर्शयति –

'स्तुतैः' इति, हे **आत्मन्नपरैः**-स्वव्यतिरिक्तैः **स्तुतैः**-स्तुतिविषयीकृतै**र्वा**–अथवा **श्रुतैः**-अपरैराकर्णितै**र्वाऽ**थवा, परै**र्निरीक्षितैः**-विलोकितैः, **तव सुकृतैः कश्चन**-कोऽपि **गुण**-उपकारो **न** भवति, प्रत्युत दोषः स्यात्, 'पुण्यनाशा[त?]पारगमाद् धर्मः क्षरति कीर्त्तनाद् [ ] इति वचनादर्थतोऽवसेयम । अत्र दृष्टान्तमाह–**हि** यतः कारणाद् **भुवः**-पृथिव्याः, **प्रकटीकृतैः**-मृत्तिकाद्यावरणराहित्येन प्रकाशितैरुद्घाटितै**र्मूलैः**-बुध्नै**र्द्रुमा**-वृक्षा **नैव फलन्ति**-नैव फलवन्तो भवन्ति-**अपि तु** भुवः प्रकटीकृतैर्मूलैर्द्रुमा **अधो निपतन्ति** । अत्र सुकृतस्य दार्ष्टान्तिकता, मूलस्य दृष्टान्तता, आत्मनो दार्ष्टान्तिकता द्रुमस्य दृष्टान्तता, स्तवन-श्रवण-निरीक्षणानां दार्ष्टान्तिकता प्रकटीकरणस्य दृष्टान्तता, गुणाभावस्य दार्ष्टान्तिकता फलाभावस्य दृष्टान्तता, धर्मक्षरणस्य दार्ष्टान्तिकता अधःपतनस्य दृष्टान्तता इति दृष्टान्त-दार्ष्टान्तिकयोजनेति भावः ।।११.१०।।

**रत्न.**–पुनरेतदेव प्रकारान्तरेणाह –

**स्तुतैः श्रुतैः**..इति., व्याख्या-हे आत्मन्नेवंविधैः कृतैः सुकृतैः, तव कश्चन गुणो नास्ति, कीदृशैः ? - स्तुतैः-स्तुतिविषयीकृतैः तथा श्रुतैः-श्रुतिविषयीकृतै**र्वा** अपि पुनरर्थे, अपिः परैर्निरीक्षितैः-दृष्टैः, तत्रार्थे दृष्टान्तमाह-हि यस्मात् कारणाद्

भुवः-पृथिव्याः सकाशात् प्रकटीकृतैर्मूलैः सद्भिर्द्रुमा वृक्षा, न-नैव फलन्ति, न फलन्त्येव [न] अपि तु अधोनीचैर्निपतन्ति, तद्वत् प्रकटीकृतैरपि सुकृतैरपि तव न कश्चिद् गुणोऽस्ति, किंतु सुकृतहानिरेवास्तीति ।।११.१०।।

**[३०८] तपः-क्रिया-ऽऽवश्यक-दान-पूजनैः,**
**शिवं न गन्ता गुणमत्सरी जनः ।**
**अपथ्यभोजी न निरामयो भवेद्-**
**रसायनैरप्यतुलैर्यदातुरः ।।११.११।।**

**धनवि.**–अथ च स्वगतमत्सररूपदोषनिवृत्तये दृष्टान्तं दर्शयन् धर्मशुद्धिमुपदिशति –

'तपस्-क्रिया' इति, **गुणमत्सरी**-गुणेषु परकीयज्ञानादिषु मत्सरो यस्य स, तथा **जनो**-लोकः, **तप**श्च-षष्ठाष्टमादि **क्रिया** च-योगोपधानादिरूपा, **आवश्यकानि** च-सामायिक-चतुर्विंशतिस्तवादीनि, **दाना**नि च-[1]अन्नादिदानान्यभयदानादीनि वा, **पूजनानि** च-अष्टप्रकार-सप्तदशप्रकारादीनि, ततो द्वन्द्वः, तैः **शिवं**-मोक्षं **न गन्ता**-न याता। इत्युक्तमर्थदृष्टान्तेन समर्थयति-**यद्**-यस्मात् कारणाद् **अपथ्यभोजी**-वैद्यप्रतिषिद्ध-भक्ष्यभोक्त **आतुरो**-रोगी, **अतुलैः**-निरुपमैरपि **रसायनैः**-सुवर्णभस्म-सूतादिभि**र्निरामयो**-नीरोगो **न भवेत्** । अत्र तपःप्रभृतीनां दार्ष्टान्तिकता रसायनानां दृष्टान्तता, गुणमत्सरस्य दार्ष्टान्तिकता अपथ्यभोजनस्य दृष्टान्तता, शिवगमनस्य दार्ष्टान्तिकता निरामयताया दृष्टान्तता, जीवस्य दार्ष्टान्तिकताऽऽतुरस्य दृष्टान्तता इति भावः ।।११.११।।

**रत्न.**–अथ गुणमत्सरे विषये उपदिशति –

**तपस्-क्रिया-ऽऽवश्यक**..इति., व्याख्या-गुणानामर्थात् परसम्बधिनां, मत्सरोऽस्यास्तीति गुणमत्सरी जनो-लोकः, तपः-चतुर्थ-षष्ठादि, क्रिया-कायोत्सर्गादिका, आवश्यकं-प्रतिक्रमणमन्यदप्यवश्यकरणीयं वा, दानं-सुपात्रदाना-ऽभयदानलक्षणं,

१. 'अशना०' मु० ।

पूजनं जिनबिम्बानां, गुरु-पुस्तकादीनां, तैः करणैः शिवं-मोक्षं न गन्ता-न गमिष्यति, तत्रार्थे दृष्टान्तमाह-यद्-यस्मात् कारणादातुरो-रोगी, अतुलैः-अनुपमैः रसायनैः-औषधमिश्रित-पक्वसुवर्णादिधातुचूर्णैः करणैः अपथ्यं-रोग्यहितं[1] भुङ्क्त इत्येवंशीलः अपथ्यभोजी सन् न निरामयो-नीरुग् भवेत्, तपःप्रभृतीनां रसायनोपमानं गुणमत्सरस्यापथ्यभोजनोपमानमिति **'गुणि मत्सरी'** इति वा पाठः ।।११.११।।

**[३०९] मन्त्रप्रभा-रत्न-रसायनादि-**
**निदर्शनादल्पमपीह शुद्धम् ।**
**दाना-ऽऽर्चना-वश्यकऽऽपौषधादि,**
**महाफलं पुण्यमितोऽन्यथाऽन्यत् ।।११.१२।।**

**धनवि.**—अथोक्तमेवार्थं पुनर्दृष्टान्तेन निर्दिशति —

'मन्त्रप्रभा' इति, **इह** जगति मन्त्रः-चिन्तामण्यादिः, **प्रभा** च चन्द्र-सूर्यादीनां दीप्तिः, **रत्नानि** च-मौक्तिकादीनि, **रसायनानि** च-पक्वपारदादीनि, तान्यादौ येषां ते, तथा तेषां **निदर्शन**-दृष्टान्तस्तस्मात् **मन्त्र-प्रभा-रत्न-रसायना-ऽऽदिनिदर्शनात्,** अत्र **आदि**पदाद् दिव्यास्त्रादिपरिग्रहः, **दानानि** च-सुपात्रदानादीनि, **अर्चनं** च-पुष्पादिभिर्जिनार्चनम्, **आवश्यकानि** च-सामायिकादीनि, **पौषधाश्च** - १-आहार २-शरीरसत्कार ३-अब्रह्म ४-सावद्यव्यापारनिवृत्तिरूपास्ते आदौ यस्य तद्-**दाना-ऽर्चना-ऽऽवश्यक-पौषधादि, अल्प**मपि-स्तोकमपि **शुद्धं**-मत्सरादिदोषरहितं **पुण्यं महाफलं**-स्वर्गा-ऽपवर्गादिप्राप्तिलक्षणं भवति, **इतः**-उक्तप्रकाराच्छुद्धधर्मादे **अन्यथा**-विपरीतं बह्वप्यशुद्धं पुण्यम्, **अन्यद्**-अल्पफलमफलं वा सदोषमन्त्रप्रभा-रत्न-रसायनादिवद् भवतीति । भावार्थस्तु यथा शुद्धे मन्त्र प्रभा-रत्न-रसायनादिके महान् गुणो भवति तथा शुद्धे पुण्ये फलं भवति, अशुद्धे पुण्ये अशुद्धे मन्त्रादाविव निष्फलता भवतीति ।।११.१२।।

**रत्न.**—एतदेव प्रकारान्तरेण निदर्शयति —

---

१. ...रोग्यहित-वैद्यानुपदिष्टं भु... मु० ।

**मन्त्र-प्रभा..**इति., व्याख्या-दानं च अर्चनं चावश्यकं च पौषधश्च, ते आदौ यस्य तद् दानार्चनावश्यकपौषधादि, पुण्यमिह जिनशासनेऽल्पमपि शुद्धं-निर्मलं सन् महत् फलं-स्वर्गापवर्गप्राप्तिलक्षणं यस्य तत् स्यात्, कस्मात् ? - मन्त्रो-जाङ्गुल्यादिः, प्रभा चन्द्र-दीपादीनां, रत्नं चन्द्रकान्तादि - रसायनं-पक्वं सुवर्णादिधातुभिः, एतान्यादौ येषां तानि, तेषां निदर्शनं-दृष्टान्तः, तस्मात्, यथैतान्यल्पान्यपि शुद्धानि सन्ति विषापहारादि-तमोनाश-निर्मलजलश्र(स्र)-वणोद्योतकरण-रोगापहारादिमहाफलानि भवेयुः तथा दानादिधर्मोऽपीति, इतः-अस्माद् अन्यथा पुण्यं महदप्यशुद्धं सदमहाफलं स्यादिति ।।११.१२।।

**[३१०] दीपो यथाऽल्पोऽपि तमांसि हन्ति,**
**लवोऽपि रोगान् हरते सुधायाः ।**
**तृण्यां दहत्याशु कणोऽपि चाग्नेर्-**
**धर्मस्य लेशोऽप्यमलस्तथांऽहः ।।११.१३।।**

**धनवि.–**अनन्तरमल्पस्यापि शुद्धधर्मस्य महाफलत्वमुक्तं, तदेव दृष्टान्तत्रयेण समर्थयन्नुपदिशति –

'दीपः' इति, **यथाऽल्पोऽपि**-गृहगततमसोऽपेक्षया स्तोक-परिमाणोऽपि. **दीपः**-प्रदीपः, **तमांसि**-अन्धकाराणि **हन्ति**-विनाशयति, **च** पुनर्-**यथा सुधाया**-अमृतस्य, **लवोऽपि**-जलकणप्रमाणलेशोऽपि, **रोगान्**-कुष्ठ-दाघ-ज्वरादीन् **हरते**-अपनयति, च पुनर्-**अग्नेः कणो**-लवो यथा, **आशु**-शीघ्रं, **तृण्यां**-तृणगणं **दहति**-भस्मसात्करोति, तथा **धर्मस्य**-सुकृतस्य **लेशः-अंशोऽप्यमलो**-मात्सर्यादिदोषरहितः, **अंहः**-पापं हन्ति। अत्र १ दीपा २ ऽमृतलवा ३ ऽग्निकणानां दृष्टान्तता शुद्धधर्मस्य च दार्ष्टान्तिकतेति ।।११.१३।।

**रत्न.–**पुनरेतदेव प्रकारान्तरेणाचष्टे –

**दीपो यथाऽल्पोऽपि..**इति., व्याख्या-यथेति दृष्टान्ते, अल्पोऽपि दीपस्तमांसि-अन्धकाराणि हन्ति तथा सुधाया लवो-लेशोऽपि रोगान् हरते-अपनयति, च

पुनरग्नेः कणोऽपि आशु-शीघ्रं तृण्यां तृणगणं दहति, तथेत्युपनये ईर्ष्यादिमलरहितो धर्मस्य दानादेर्लेशोऽप्यंहः पापं हन्तीति, अमल इति विशेषणं दीपादीनामपीति ।।११.१३।।

**[३११] भावोपयोगशून्याः कुर्वन्नावश्यकीः[1] क्रियाः सर्वाः ।**
**देहक्लेशं लभसे फलमाप्स्यसि नैव पुनरासाम् ।।११.१४।।**

**धनवि.**—अथ धर्मशुद्धिद्वारमुपसंहरन् भावोपयोगरहितं बह्वपि पुण्यं निष्फलं भवतीति दर्शयति —

'भावोपयोग' इति, **भावोपयोगशून्याः-भाव**श्च-आवश्यकक्रियायां चित्तोत्साहः, **उपयोग**श्च-आवश्यकादिक्रियायां सूत्रार्थोभय-व्यञ्जन-दीर्घ-ह्रस्व-लघ्वक्षराद्युपयुक्तता, ताभ्यां **शून्या**-रहिताः **सर्वाः**-सकला **आवश्यकीः**-अवश्यकर्त्तव्याः **क्रियाः**-षडावश्यककरण-प्रतिलेखना-प्रमार्जनादिकाः, **कुर्वन्**-समाचरन् **देहक्लेशं**-मुधा शरीरप्रयासं **लभसे**-प्राप्नोषीत्यर्थः, अत्र सर्वा इत्यनेन परीषहसहनाऽऽतापनाग्रहणादिकाः शून्याः क्रिया ग्राह्याः, **पुनरि**त्युक्तक्रियासमुच्चयार्थे, तेन पुनर्-**आसाम्**-अनन्तरोक्तानां क्रियाणां **फलं**-मोक्षलक्षणं **नैवाप्स्यसि**-नाधिगच्छसि, भावशून्यत्वादिति ।।११.१४।।

इति श्रीतपागच्छनायक० **अध्यात्मकल्पद्रुम**टीकायां सकलशास्त्रारविन्दप्रद्योतन-महोपाध्यायश्री**कल्याणविजयगणि**शिष्यो श्री**धनविजयगणि**विरचितायां धर्मशुद्धि-नाम्न्येकादशी पदपद्धतिः ।।११।।

**रत्न.**—अथ सर्वासां क्रियाणां भावपूर्वककरणेन सफलतामुपदिशति —

**भावोपयोगशून्या** इति., व्याख्या-हे आत्मन् ! अवश्यं भवा आवश्यक्यः, **आवश्यक्यश्च ताः क्रियाश्चावश्यकीक्रियाः,** ताः सर्वाः प्रति कुर्वन् देहस्य क्लेशं लभसे, यतः किंलक्षणाः ? भावः श्रद्धा, तस्योपयोगः, तेन रहिताः, पुनरितिविशेषे, आसां क्रियाणां फलं-स्वर्गादिप्राप्तिलक्षणं नैवाप्स्यसि-नैव लप्स्यसे

१. ०वश्यिकीः इति पाठः प्रतौ मूलेऽपि, टीकायामपि ।

इति ।।११.१४।।

**[३१२] श्रीशान्तिचन्द्र**वरवाचकदुग्धसिन्धु-
लब्धप्रतिष्ठवरवाचकरत्नचन्द्रः ।
**अध्यात्मकल्पफल**दस्यचकार वृत्ति-
मेकादशोत्र गतवान् विमलोऽधिकारः ।।११।।

**इत्येकादशोऽधिकारः** ।।११।।



# १२. देव-गुरु-धर्मशुद्ध्यधिकारः

**[३१३] तत्त्वेषु सर्वेषु गुरुः प्रधानं,**
**हितार्थिधर्मा हि तदुक्तिसाध्याः ।**
**श्रयंस्तमेवेत्यपरीक्ष्य मूढ !,**
**धर्मप्रयासान् कुरुषे वृथैव ।।१२.१।।**

**धनवि.**—अनन्तद्वारे मात्सर्यादिदोषरहितः शुद्धधर्मो मोक्षफलो भवतीत्युक्तम्, स च धर्मः शुद्धदेव-गुरु-धर्मपरिज्ञाने तदाश्रयणे च विवक्षितफलसाधको भवतीति देव-गुरु-धर्मशुद्धिद्वारमभिधित्सुराह—**अथ श्रीदेव-गुरु-धर्मशुद्धिमधिकृत्य किञ्चिदुपदेश** इति, स्पष्टम् । नन्वनन्तरद्वारेऽपि धर्मशुद्धिरुक्ता, पुनरत्र धर्मशुद्धिप्रतिपादने पौनरुक्त्यं स्यादिति चेत् ? न, अनन्तद्वारे शुद्धस्यापि धर्मस्य मत्सरादिना कालुष्यं न कर्त्तव्यमिति धर्मशुद्धिरुक्ता, अत्र च षड्दर्शनसम्बन्धिशास्त्रप्रतिपादितधर्माणां मध्ये को धर्मः शुद्ध इति भेदप्रतिपादनेन पौनरुक्त्याभावात्; यद् वाऽनन्तद्वारे केवलाया धर्मशुद्धेः प्रतिपादनेऽपि देव-गुरुशुद्धिसाहचर्येण धर्मशुद्धेः प्रतिपादनेन पौनरुक्त्याभावादिति।

तत्रापि पूर्वं सांप्रतीनकाले गुर्वायत्तौ देव-धर्माविति गुरुशुद्धिमधिकृत्योपदिशति – **सर्वेषु**-समस्तेषु **तत्त्वेषु**-देव-गुरु-धर्मलक्षणेषु, **गुरुः**-गुरुतत्त्वं **प्रधानं**-मुख्यं भवति, **हि** यतः कारणात्, **हितार्थिधर्माः**-हितं-स्वोपकारकमर्थान्मोक्षः, स एवार्थः-प्रयोजनं येषां ते च ते धर्माश्चेति, यद्वा हितार्थिनां-मोक्षार्थिनां पुरुषाणां समाचरणीया धर्मा दानादयः, **तस्य** गुरो**रुक्तिः**-वचनं तेन **साध्याः** प्रायो भवन्ति; हे **मूढ** ! - हे मूर्ख ! **इति** हेतो**स्तमेव** गुरु**मपरीक्ष्य**-'अयं गुरुः शुद्धधर्मोपदेष्टा'अयं चाशुद्धधर्मोपदेष्टा'इति विवेकमकृत्वा, **श्रयन्**-भजन् **धर्मप्रयासान्**-धर्मकर्मश्रमान् **वृथैव कुरुषे** इति ।।१२.१।।

**रत्न.**—अथ देव-गुरु-धर्मशुद्धिमधिकृत्य द्वादशाधिकारे किञ्चिदुपदिश्यते,

अथ सांप्रतं **भरतक्षेत्रे** साक्षाज्जिनाभावे[1] गुरुतत्त्वशुद्धेर्देव-धर्मतत्त्वयोः शुद्धिर्भवतीति प्रथमं गुरुतत्त्वशुद्धिमाश्रित्याह –

**तत्त्वेषु सर्वेषु...**इति., व्याख्या- हे आत्मन् ! सर्वेषु तत्त्वेषु, गुरुः प्रधानं-मुख्यं तत्त्वं वर्त्तते, हि यस्माद्धेतोः, **हितायेति हितार्थाः, हितार्थाश्च ते धर्माश्च हितार्थधर्माः, तस्य** गुरोरुक्तिः-वचनं तदुक्तिः, तया साध्याः-साधनीया वर्तन्ते, तमेव गुरुमितिहेतोरपरीक्ष्य-परीक्षां विनैव, श्रयन् सन् त्वं [2]मूढो-मूर्खो धर्मे [3]प्रयासान् वृथैव कुरुषे, तेन गुरुं परीक्ष्य गृहाणेति ।।१२.१।।

**[३१४] भवी न धर्मैरविधिप्रयुक्तैर्-**
**गमी शिवं येषु गुरुर्न शुद्धः ।**
**रोगी हि कल्यो न रसायनैस्-**
**तैर्-येषां प्रयोक्ता भिषगेव मूढः ।।१२.२।।**

**धनवि.–**अथ गुरुसदोषतायां धर्मस्यापि सदोषता भवतीत्याह –

'भवी' इति, **अविधिप्रयुक्तैः**-वितथाचरणप्रयोगवद्भिर्, **धर्मैः**-दानादिकैर्, **भवी**-प्राणी **शिवं**-मोक्षं **न गमी**-न गमनशीलो भवतीति, **येषु** धर्मेषु **गुरुः शुद्धो**-निर्दोषो **नास्ति**; अत्र दृष्टान्तमाह-**हि** यतः कारणाद् **रोगी**-आतुरस्, तैः **रसायनैः**-औषधविशेषैर्न **कल्यो**-नीरोगो न भवति, **येषां** रसायनानां **प्रयोक्ता**-उपदेष्टा **भिषगेव**-वैद्य एव **मूढः**-अज्ञानोऽस्तीत्यन्वयः । अत्र संसारि-रोगिणोर्, धर्म-रसायनयोर्, गुरु-भिषग्वरयोः परस्परं दृष्टान्त-दार्ष्टान्तिकयोजना कार्येति भावः ।।१२.२।।

**रत्न.–**अथ गुरावशुद्धे धर्मोऽप्यशुद्ध एवेत्याह –

**भवी न धर्मैः..**इति., व्याख्या-भवी-संसारी जीवः, अविधिकृतैर्धर्मैर्, हेतुभिः शिवं-मोक्षं न गमी-न गमनशीलः, येषु धर्मेषु गुरुरुपदेष्टा शुद्धो-दोषरहितो नास्ति, एतदेव दृष्टान्तयति-हि यस्मात् कारणाद् रोगी तैः रसायनैः कल्यो

---

१. साक्षाद् भाव जिना० मु० । २. मूलेऽपि 'मूढो' इति पाठः । ३. धर्मे प्र० मु० ।

[1]नीरुग् न भवति । तैः कै ? - इत्याह-येषां रसायनानां प्रयोक्ता-कर्त्ता कथको वा भिषगेव-वैद्य एव मूढो-मूर्खोऽस्तीति, उपनययोजना सुगमैवेति ।।१२.२।।

**[३१५] समाश्रितस्तारकबुद्धितो यो,**
**यस्यास्त्यहो मज्जयिता स एव ।**
**ओघं तरीता विषमं कथं स ?,**
**तथैव जन्तुः कुगुरोर्भवाब्धिम् ।।१२.३।।**

**धनवि.**—अथ गुरुपरीक्षायामेव कुगुरोरभिलषितफलासाधकत्वं दर्शयन्नाह —

'समाश्रित' इति, यथा **यः** पुरुषो यं **तारक** इति **बुद्धितः समाश्रितः**-सेवितः, **स एव** पुरुषः, **अहो** इत्याश्चर्ये, **यस्य** पुरुषस्य **मज्जयिता**-[2]बोलयिताऽस्ति, **स** पुरुषो **विषमम्**-अतिशयेनागाधमतिशयेन चपलं वा **ओघं**-प्रवाहं **कथं तरीता?** - कथं तरिष्यतीत्यर्थः, **तथैव** इति दार्ष्टान्तिकोपन्यासे, **जन्तुः**-संसारी प्राणी **कुगुरोः**-उन्मार्गगामिन उन्मार्गप्ररूपिणश्च पुरुषाद् **भवाब्धिं**-संसारसमुद्रं कथं तरीतेत्यर्थः; अत्र विषमप्रवाहस्य संसारदृष्टान्तता, कुतारकस्य कुगुरुदृष्टान्तता वाच्येति ।।१२.३।।

**रत्न.**—अथ कुतारकदृष्टान्तेन कुगुरुः कथं निमज्जयिता भवतीत्याह-**समाश्रित** इति., व्याख्या-यो जन्तुस्तारक[3]बुद्धितोः-असौ मां तारयिष्यतीति बुद्धेर्यं तारकं समाश्रितः, अहो इति आश्चर्ये, स एव यस्य मज्जयिता भवति, स जन्तुर्विषममोघं-प्रवाहं अर्थादगाधजलाश्रयस्य कथं तरीता स्याद् ?, अपि तु न स्यात्, तथैव दृष्टान्तेन यो भवाब्धितारकबुद्ध्या यं गुरुं समाश्रितः स एव गुरुः परिणामतः कुगुरुर्यस्याश्रितस्य मज्जयिता वर्त्तते, स जन्तुस्तस्मात् कुगुरोः सकाशाद् भवाब्धिं-भवसमुद्रं अतीव विषमं कथं तरीता स्याद् ?, अपि तु न तरीतेति भावः ।।१२.३।।

---

१. कल्यो न-अरुग् न. मु० । २. બોળવું, ડુબાડવું - इति देश्योऽयं धातुः । ३. बुद्धेः मु० ।

**[३१६] गजा-ऽश्व-पोतो-ऽक्ष-रथान् यथेष्ट-**
**पदाप्तये भद्र ! निजान् परान् वा ।**
**भजन्ति विज्ञाः सुगुणान् भजैवं,**
**शिवाय शुद्धान् गुरु-देव-धर्मान् ।।१२.४।।**

**धनवि.**—अथ दृष्टान्तपूर्वकं स्व-परव्यवहारहठमकृत्वैव शुद्धा एव गुरु-देव-धर्माः श्रयणीया इत्युपदिशति —

'गजाऽश्व' इति, हे **भद्र !** - हे निर्माय ! **विज्ञा**-विवेकवन्तो जना, **यथेष्ट-पदाप्तये**-ईप्सितस्थानप्राप्तये, **सुगुणान्**-सुष्ठु-अतिशयेन, **गुणः**-सुखसञ्चारितादि-लक्षणो येषां ते तथा तान् **निजान्**-स्वकीयान्, **वा**-अथवा **परान्**-परकीयान्, **गजाश्च**-हस्तिनः, **अश्वा**-हयाः **पोता**श्च-यानपात्राणि, **उक्षाण**श्च-बलीवर्दाः, **रथा**श्च-शकट-गन्त्रीप्रभृतयस्, ततो द्वन्द्वस्, तान् **भजन्ति**-प्रतिपद्यन्ते, **एवम्**, एभिर्दृष्टान्तैस्, त्वं **सुगुणान्**-विशिष्टज्ञान-दर्शन-चारित्रादिगुणान् स्वकीयान् परकीयान् वा, **गुरव**श्च सम्यक्त्वसहितपञ्चमहाव्रतधराः, **देवा**श्चान्तरायाद्यष्टा-दशदोषरहिताः, **धमा**श्चाप्त-प्रणीताः, ततो द्वन्द्वस्, तान् **गुरु-देव-धर्मान् स्वेष्टपदाप्तये**-मुक्तिपदाप्तये **भजस्व**-श्रय । ननु देवगुरुधर्मशुद्ध्यधिकारेऽपि पौर्वापर्येण गुरुशुद्ध्यधिकारे प्रस्तुते देव-गुरु-धर्मशुद्धिप्रतिपादनमनर्थकमिति चेत् ? - न, प्रस्तुतगुरु-देव-धर्मशुद्ध्य-धिकारद्वारार्थस्मारणार्थत्वात् । अत्र सुगुणगजादीनां तु शुद्धगुर्वादिदृष्टान्तता इष्टपदप्राप्तेश्च परमपदप्राप्तिदृष्टान्तता भावनीयेति ।।१२.४।।

**रत्न.**—ततः शुद्धान् गुरु-देव-धर्मानाश्रय..इति कथयति —

**गजा-ऽश्व-पोतो-ऽक्ष-रथान्** इति., व्याख्या-हे भद्र ! - हे साधो ! विज्ञा-दक्षा यथेष्टपदाप्तये वाञ्छितस्थानप्राप्त्यै निजान्-स्वकीयान् वा - अथवा परान्-परकीयान् गजाश्चपोतोक्षरथान्-हस्ति-तुरग-वहन-गो-स्यन्दनान् भजन्ति, किंलक्षणान ? - सुगुणान्-लक्षणशास्त्रोक्त-स्वस्वगुणोपेतान्, एवमिति-तद्वत्, हे भद्रात्मन् ! त्वं देव-गुरु-धर्मान् योगशास्त्राद्युक्त-लक्षणणोपेतान्, शिवाय-मोक्षाय भज-श्रयेति ।।११.४।।

**[३१७] फलाद् वृथा स्युः कुगुरूपदेशतः,**
**कृता हि धर्मार्थमपीह सूद्यमाः ।**
**तद्-दृष्टिरागं परिमुच्य भद्र ! हे,**
**गुरुं विशुद्धं भज चेद्धितार्थ्यसि ।।१२.५।।**

**धनवि.**—अथ कुगुरुप्ररूपिता धर्मा अपि निष्फलाः स्युरित्याह —

'फलाद् वृथा' इति, **हि** यतः कारणाद्, **इह**-संसारे, **कुगुरूपदेशतः**-अगीतार्थ-पार्श्वस्थ-मिथ्यादृष्टिगुरुवचनतो धर्मार्थमपि-धर्मप्रयोजनमुद्दिश्यापि **सूद्यमाः**-सुष्ठु-अतिशयेनोद्यमाः-प्रयत्नाः **कृता**-विहिताः **फलात्**-स्वर्गापवर्गादिप्राप्तिफलमाश्रित्य, **वृथा**-मिथ्या **स्युः**-भवन्ति निष्फलाः स्युरित्यर्थः, यदुक्त **गच्छाचारादौ** --

**[३१८]** "[१]अगीयत्थस्स वयणेणं, अमीयं पि न घुंटए ।
गीयत्थस्स उ वयणेणं, विसं हालाहलं पिए" ।। [४६]।। इति

**हे भद्र !** - तीव्रकषायरहित ! **तत्**-तस्मात् कारणाद्, **दृष्टिरागं**-स्वस्वदर्शन-दृष्टिरागं **परिमुच्य**-परित्यज्य, **विशुद्धं गुरुं भज**-श्रय, **चेद्**-यदि त्वं **हितार्थी**-मोक्षकामोऽसीति ।।१२.५।।

**रत्न.**—अथ कुगुरूपदिष्टा धर्मा न फलदायका भवन्तीत्याह-**फलाद् वृथा स्युः** - इति, व्याख्या-हि यस्मात् कारणाद्, इह-जिनप्रवचने, कुगुरूणामुपदेशतो धर्मार्थं-धर्माय कृता अपि सूद्यमाः-शोभनोद्योगास्तपः-संयमादिकाः, फलात्-कार्याद् वृथा स्युः-फलप्रदा न भवन्ति, अथवा फलमुद्दिश्येति व्याख्येयं, तत्कारणाद्धे भद्र ! - हे सज्जन[२] ! त्वं दृष्टिरागं परिमुच्य, विशुद्धं, स्वयं[३]मवद्यमुक्तम्, अन्येषामवद्येभ्यो निवर्त्तकं, निःस्पृहं च गुरुं भज-श्रय, चेद्-यदि हितार्थी-हितेच्छुरसीति ।।१२.५।।

---

१. अगीतस्य वचनेनामृतमपि न पिबेत् । गीतार्थस्य तु वचनेन हालाहलं विषं पिबेत् । २. यो मन्दकषायोऽस्ति, स एव भाविभद्रः स्यात्, स एव च संसारे वर्तमानोऽपि सज्जनः - जनैः समादरणीयो जायते - इति द्वयोः विवरणयोरद्भुताऽर्थघटना । ३. दृश्यतां-'अवद्यमुक्ते पथि चः प्रवर्त्तते, प्रवर्त्तयन्यजनं च निस्पृहः । स एव सेव्यः स्वहितैषिणा गुरुः, स्वयं तरंस्-तारयितुं क्षमः परम् । [सिन्दूरप्रकर-१३]

**[३१९] न्यस्ता मुक्तिपथस्य वाहकतया श्रीवीर ! ये प्राक् त्वया,**
**लुण्टाकास्त्वदृतेऽभवन् बहुतरास्त्वच्छासने ते कलौ ।**
**बिभ्राणा यतिनाम तत् तनुधियां मुष्णन्ति पुण्यश्रियः,**
**पूत्कुर्म्मः किमराजके ह्यपि तलारक्षा न किं दस्यवः ? ।।१२.६।।**

**धनवि.**–अथ गुरुपरीक्षायां लोकविप्रतारककुगुरुस्वरूपं भृशं प्रायः स्थाने स्थाने पश्यन्नतीव व्याकुलितचेता उपदेष्टा पूत्कारपूर्वकं श्रीवीरभगवतः पुरस्तादित्याह-

'न्यस्ता' इति, हे **श्रीवीर** ! - हे श्रीवर्द्धमानस्वामिन् ! **प्राक्** सुधर्मादयो, **ये** गुरवो **मुक्तिपथस्य**-मोक्षमार्गस्य **वाहकतया**-प्रवर्त्तकतया **त्वया न्यस्ताः**-स्थापिताः सन्ति, तत्परम्परायाता अप्युपचारात्, त एवोच्यन्ते, अतस्तत्परम्परानामग्राहकाः शिथिलाचारा **बहुतरा**-अतिशयेन बहवो गुरवः, प्रायेणेति शेषः, **कलौ**-कलिकाले **त्वच्छासने**-जिनमते **त्वदृते**-त्वां विना, **लुण्टाका**-मार्गग्राहकतस्करा, **अभवन्**-आसन्; यद्-यस्मात् कारणाद् **यतिनाम**-यतिरित्यभिधानं **बिभ्राणा**-दधानास्ते गुरवः, **तनुधियाम्**-अल्पबुद्धीनां जनानां **पुण्यश्रियः**-सुकृतलक्ष्मीः **मुष्णन्ति**-चौर्येणापहरन्ति, अत्र कुगुरवो मन्दबुद्धीनां पुण्यलक्ष्मीमोषकाः स्वार्थसहितकुत्सितोपदेशकत्वोत्सूत्रभाषकत्वोत्सूत्रप्रवर्त्तकत्वादिना, यद् वा स्वयंकृति-कर्मा-ऽऽदिकारकत्वेन, यत उक्तम्-[आव.निर्युक्तौ]

**[३३९]** "[1]पासत्थाइ वंदमाणस्स नेव कित्ती न निज्जरा होइ ।
कायकिलेसो एमेव कुणइ तह कम्मबंधं च ।। [ ]।। इति, भावः

ततः कारणात् **किं पूत्कुर्मो**-वयं किं पूत्कारं कुर्मः ?, **हि** यतः कारणाद् **अराजके**-राजरहिते नगरे, **तलारक्षा अपि**-राजनियुक्तनगरोपद्रवनिवारकाः कोट्टपाला अपि **किं दस्यवः ?** - चौरा न भवन्ति, अपि तु भवन्त्येव ।।१२.६।।

**रत्न.**–अथ दृष्टान्तेन कुगुरून् ज्ञापयति –

**न्यस्ता मुक्तिपथस्य**..इति. व्याख्या-हे श्रीवीर ! प्राक्-पूर्वं त्वया, ये **सुधर्मादयो**

१. पार्श्वस्थादीन् वन्दमानस्य नैव कीर्त्तिः न निर्जरा भवति । कायक्लेश एवमेव करोति तथा कर्मबन्धं च । ०सो, बंधो कम्मस्स आणाए' [संबोधप्रकरण-३५५]

मुक्तिपथस्य वाहकतया-प्रवर्तकत्वेन न्यस्ताः-स्थापिताः, ते सुधर्मादिपट्टपरंपरायातसुविहिताचार्येभ्यः पृथग्भूय स्वाभिमानपुष्टये स्वनाम्ना मतप्रवर्त्तकाः, त्वदृते त्वया विना, त्वच्छासने लुण्टाका इव-लुण्टाका अभवन्, कस्मिन् ? - कलौ-कलियुगे, अथ लुण्टाकोपमानत्वेन लुण्टाकधर्ममाह-यत् कारणाद् यतिनाम बिभ्राणा दधानाः, तनुधियां-स्वल्पबुद्धीनां जनानां पुण्यश्रियो पुण्याण्येव श्रियो, [सुकृतं] मुष्णन्ति-चोरयन्ति, अत्रार्थे वयं किं पूत्कुर्मः-पूत्कारं कुर्मः ?, हि यस्मात् [1]हेतोः तलारक्षा अपि-कोट्टपाला अप्यराजके-राज्ञोऽभावे किं दस्यवः-चौरा न भवन्ति ?, अपि तु भवन्ति एव, अत्रोपनयः सुगमत्वाददर्शितोऽप्यूह्य इति ।।१२.६।।

**[३२१] माद्यस्यशुद्धैर्गुरु-देव-धर्मैर्-**
**धिग् दृष्टिरागेण गुणानपेक्षः ।**
**अमुत्र शोचिष्यसि तत्फले तु,**
**कुपथ्यभोजीव महाऽऽमयार्त्तः ।।१२.७।।**

**धनवि.**—अथ कुगुरु-देव-धर्माः आश्रिताः शोचनाय भवन्तीत्याह —

'माद्यसि' इति, **धिग्**-इति तिरस्कारे, त्वं **दृष्टिरागेण**-स्वदर्शनरागेण **गुणेषु**-ज्ञान-दर्शन-चारित्रेषु, **न विद्यतेऽपेक्षा**-'मया गुणिन एव गुरवो वन्दनीया, यत्र गुणो भवति स एव देवः सेव्यः, समग्रगुणवत्प्रणीत एव धर्मः समाचरणीय' इति बुद्धिर्यस्य स **गुणानपेक्षः** सन्, **अशुद्धैः**-सदोषै**र्गुरु-देव-धर्मैः**-इदानीमिति गम्यं, किं **माद्यसि ?** - मदवान् किं भवसि, **तु** पुनर्, **अमुत्र**-परलोके, **तत्फले**-कुगुर्वादिसेवनजनितमदफले दुर्गतिदुःखानुभवलक्षणे **शोचिष्यसि**-शोचनां करिष्यसि, अत्रोक्तमर्थं दृष्टान्तेन दृढयति-**इव**-यथा **कुपथ्यभोजी**-पूर्वं भिषग्निषिद्धाहारभोक्ता, उत्तरकाले **महामयार्त्तः** सन्-अतिशयेन रोगपीडितः पुमान् शोचते इत्यन्वयः । अत्राऽशुद्धदेवगुरुधर्माऽङ्गीकारेण मदकरण - कुपथ्यभोजनयोर्गुणानपेक्षदृष्टिरागिमहामयार्त्तयोर्दृष्टान्तदार्ष्टान्तिकतेति भावः ।।१२.७।।

१. कारणात् मु० ।

**रत्न.**—अथाऽशुद्धान् गुरु-देव-धर्मान् प्राप्य, मा [१]हर्षं प्राप्नुहि-इति कथयति—

**माद्यस्यशुद्धैः**-इति हे आत्मन् ! यस्त्वमशुद्धैः-सदोषैर्गुरु-देव-धर्मैः प्राप्तैः सद्भिर्माद्यसि-हृष्यसि, त्वं किंलक्षणः ? - गुणानां-योगशास्त्रादिशास्त्रोक्तानां न, विद्यते अपेक्षा यस्य सः, केन ? - दृष्टिरागेण, ततस्त्वां धिगस्तु, **क्वचिदध्याहारस्य व्याख्यानाऽङ्गत्वात् यत्-तच्छब्दावध्याहार्यौ,** पुनस्तस्य मदस्याथवा तु तस्य दृष्टिरागस्य, अमुत्र-परभवे तत्फले किल्बिषकावतारादिलक्षणे प्राप्ते सति, त्वं शोचिष्यसि-हा' मया किं कृतम्'इत्यात्मानं पश्चात्तापविषयीकरिष्यसि । तत्रार्थे दृष्टान्तमाह-इव-यथा पुमान्, महांश्चासौ आमयश्च महामयो-महान् रोगः तेन ऋतः-पीडितस्सन् कुपथ्यं भुङ्क्ते इत्येवंशीलः कुपथ्यभोजी शोचतीति ।।१२.७।।

**[३२२] नाऽऽम्रं सुसिक्तोऽपि ददाति निम्बकः,**
**पुष्टा रसैर् वन्ध्यगवी पयो न च ।**
**दुःस्थो नृपो नैव सुसेवितः श्रियं,**
**धर्मं शिवं वा कुगुरुर्न संश्रितः ।।१२.८।।**

**धनवि.**—अथ कुगुरुः सेवितो मोक्षप्रदो न भवति-इति दृष्टान्तत्रयदर्शन-पूर्वकमुपदिशति —

'नाऽऽम्रं' इति यथा निम्बको **निम्ब**वृक्षः प्रसिद्धः, **सुसिक्तोऽपि**-शोभनप्रकारेण दुग्धामृतादिना सिक्तोऽप्याम्रं-सहकारफलं **न ददाति**-नो दत्ते, च पुनर्यथा **वन्ध्यगवी**-सन्तानात्यन्ताभाववती धेनुः, **रसैः**-इक्षु-घृत-तैलप्रभृतिभिः **पुष्टाऽपि**-पुष्टिं प्रापिताऽपि न च **पयो**-दुग्धं ददाति, च पुनर्, यथा **दुःस्थो**-राज्यभ्रष्टः कष्टपतितो **नृपो**-राजा **सुसेवितः**-सम्यक्प्रकारेण सकलतत्समीहितसंपादनेनाराधितः, **श्रियं**-धनधान्यादिलक्ष्मीं **नैव** ददाति, तथा **कुगुरुः**-अशुद्धगुरुः **संश्रितः**-सेवितो, **धर्मं**-स्वर्गादिप्राप्तिबीजं, **वा**-अथवा **शिवम्**-अपवर्गं **न** ददाति, अत्र यथा तथेति पदद्वयमध्याहार्यं, तथा च दृष्टान्ति-दार्ष्टान्तिकभावः स्पष्ट एवेति ।।१२.८।।

---

१. हरणं... मु० ।

**रत्न.**—पुनः कुगुरोरनासेवनमाश्रित्योपदिशति —

**नाऽऽम्रं, सुसिक्तोऽपि**..इति. व्याख्या-निम्ब एव निम्बको निम्बवृक्षः, सुष्ठु यथा स्यात् तथा सिक्तोऽप्याम्रं-आम्रफलं न ददाति, तथाः पुष्टाऽपि वन्ध्यगवी-वन्ध्या गौः पयो न ददाति, चः पुनरर्थे, देशभ्रष्टत्वादुत्पन्नमात्रभक्षित्वाद् दुःस्थो-दुर्गतो राजा-राजेति नामधारी सुष्ठु सेवितः सन् श्रियं-लक्ष्मीं न ददाति, एतैर्दृष्टान्तैः कुगुरुः संश्रितः सन् धर्मं-स्वर्गादिसंपद्-दायकं वाऽथवा शिवं-मोक्षं सकलदुःखनिवृत्तिलक्षणं न ददाति, सुसिक्ताः सुपोषिताः सुसेविताः सुसंश्रिता अपि ये यादृशास्ते तादृशा एव भवन्तीति भावः ।।१२.८।।

**[३२३] कुलं न जातिः पितरौ गणो वा,**
**विद्या च बन्धुः स्वगुरुर्धनं वा ।**
**हिताय जन्तोर्न परं च किञ्चित्,**
**किं त्वादृताः सद्गुरु-देव-धर्माः ।।१२.९।।**

**धनवि.**—अथ देव-गुरु-धर्माः शुद्धा एव हिताय भवन्तीत्युपदिशति —

'कुलं' इति, **न कुलं**-पितृवंशः, न **जातिः**-मातृवंशो, न **पितरौ**-माता च पिता च पितरौ, न **गणो**-महाजनादिसमुदायो, **वा**-अथवा **न विद्या**-तर्कविद्या मन्त्रविद्या वा, **च** पुनर्, न **बन्धुः**-स्वजनश्च पुनर्न **स्वगुरुः**-विद्यागुरुः कुलगुरुः **वा**-अथवा **न धनं**-वित्तं च पुनर्न **परम्**-उक्तातिरिक्तमन्यत् **किंचिद्** वस्तु, **हिताय** भवतीति सर्वत्र योज्यम्; **तु** पुनः किं हिताय भवति ? - इति प्रश्ने प्रतिपादयति-**आदृता**-आराधिताः **सद्गुरु-देव-धर्मा**-निर्दोषगुरु-देव-धर्मा हिताय भवन्तीति योगः ।।१२.९।।

**रत्न.**—अथ सर्वेभ्यो गुरुदेवधर्माणामुत्कर्षमाह-**कुलं न जातिः**..इति. व्याख्या-एतानि जन्तोः-प्राणिनो हिताय न भवन्तीत्यन्वयः, तद्व्यक्तित आह-कुलम्-इक्ष्वाकुकुलादि, जातिः-मातृपक्षः, पितरः-पितामह-पितृ-वृद्धभ्रातृ-पितृत्वप्रपन्नादयः, गणः-समूहः स्वकीयत्वेन कल्पितः, चः पुनरर्थे, विद्याः-षडङ्ग्यादिकाः, बन्धुः-

स्वजनः [१]**च** पुनर्, गुरुः-विद्यापाठकः वा, पुनर्धनं-हिरण्यादि, एतानि सर्वाण्यपि कर्त्तुपदानीति यथार्हं वचनानि योज्यानि, **चे**ति विशेषे, परं-किञ्चिद् उक्तान्यतरदपि हिताय न भवतीति, किंत्विति विशेषे, आदृता-अङ्गीकृताः सम्यक् परीक्ष्य गृहीताः सन्तश्च-शोभनाः, ते देव-गुरु-धर्मा हिताय भवन्ति इति ।।१२.९।।

**[३२४] माता पिता स्वः स गुरुश्च तत्त्वात्,**
**प्रबोध्य यो योजति शुद्धधर्मे ।**
**न तत्समोऽरिः क्षिपते भवाब्धौ,**
**यो धर्मविघ्नादिकृतेश्च जीवम् ।।१२.१०।।**

**धनवि.**–अथ गुरु-देव-धर्मशुद्ध्यर्थं परमार्थतः सुगुरुस्वरूपं निर्दिशति –

'माता' इति, **तत्त्वात्**-परमार्थतः स जनो-**माता**-जननी, **च** पुनः-स जनः **पिता**-जनकः, च पुनः-स जनः **स्वः**-स्वकीयः, च पुनः-स जनः **सुगुरुः**-तत्त्वमार्गोपदेष्टा, भवतीति सर्वत्र योजनीयं, **यो** जनो **जीवं**-प्राणिनं **शुद्धधर्मे योजति**-योजयति; च पुनस्-**तत्समः**-तेन सदृशः, **अरिः**-वैरी **नास्ति**, **यो** जनो **धर्मविघ्नादिकृतेः**-सुकृतान्तरायनिष्पादनात्, अत्र **आदि**पदादुन्मार्गप्रवृत्तिकृतेः, **जीवं**-प्राणिनं **भवाब्धौ**-संसारसागरे **क्षिपते**-प्रक्षिपतीति ।।१२.१०।।

**रत्न.**–अथ शुद्धधर्मे योजयितारं प्रशंसति –

**माता पिता**..इति. व्याख्या-यो यं प्रति **तत्त्वा**दिति-[२]तत्त्वं समर्प्य, प्रबोध्य-बोधिदानं दत्त्वा शुद्धधर्मेऽर्हदुक्ते योजति-योजयति, 'युजादेर्नवा' [सि.हे.३.४.१८] इति णिचो विकल्पेन प्राप्तौ णिचोऽभावे रूपमिति, स मातेव हितकर्त्तुत्वात् माता, स पितेव, स स्वो ज्ञातिः, स गुरुः, चेति पुनरर्थे, तथा तेन समः-सदृशोऽरिः-रिपुर्नास्ति, यो धर्मे विघ्नादिकृतेः-अन्तरायादिकरणात्, जीवं प्रति भवाब्धौ-भवसमुद्रे क्षिपते-प्रक्षिपति, आदि-शब्देनोन्मार्गदर्शनतश्चेति, अथवा तत्त्वात्-परमार्थतः स मातेव माता इत्याद्यपि व्याख्येयम् ।।१२.१०।।

१. 'च' इति पदं मूलत्वेन गृहीतम् । २. 'गम्यपः कर्माऽऽधार' इति सि.हे.२।२।७४-सूत्रात् - 'समर्प्य' इति गम्ये तत्त्वात् इति साधुः ।

**[३२५] दाक्षिण्य-लज्जे गुरु-देवपूजा,**
**पित्रादिभक्तिः सुकृताभिलाषः ।**
**परोपकार-व्यवहारशुद्धी,**
**नृणामिहामुत्र च संपदे स्युः ।।१२.११।।**

**धनवि.**—अथ गुरु-देवाऽर्चनानां तत्सहचरितानामन्येषामपि गुणानां माहात्म्यं वर्णयन्नुपदिशति —

'दाक्षिण्य' इति, दा**क्षिण्य** च **लज्जा** च **दाक्षिण्य-लज्जे** प्रतीते, तथा **गुरु-देवयोः**-सद्गुरु-वीतरागयोः **पूजा**-अर्चा, सा च द्रव्य-भावभेदाभ्यां द्विधा, तत्र द्रव्यपूजा पुष्पा-ऽऽहारादिभिः, भावपूजा च स्तुति-स्तोत्रादिभिः, तथा **पित्रादिभक्तिः**-पित्रादीनां मातृ-पितृ-बृहद्भ्रातृ-प्रभृतीनां भक्तिः-सेवा, तथा **सुकृतस्य**-पुण्यकर्मणो-ऽ**भिलाषो**-मनोरथः, तथा **परोपकारश्च**-परेषामापत्पतितानामुपकार-उद्धरणं, **व्यवहार-शुद्धिश्च**-न्यायसंपन्नविभवादिना व्यवहरणं, ततो द्वन्द्वः - **परोपकार-व्यवहारशुद्धी,** एते उक्ता गुणा, **नृणां**-मनुष्याणां, **इह**-इहलोके च पुनर्-**अमुत्र**-परलोके **संपदे**-ऐहिक-पारलौकिकसुख-संपत्तये **स्युः**-भवन्तीत्यर्थः ।।१७५।।११।।

**रत्न.**—अथैतानि संपदे भवन्तीत्याह —

**दाक्षिण्य-लज्जे**..इति. व्याख्या-दाक्षिण्यं च लज्जा च दाक्षिण्य-लज्जे, दाक्षिण्यं-अनुकूलता तथा गुरु-देवयोः **पू**जनं तथा पिता आदौ येषां ते पित्रादयः, तेषां भक्तिः, आदिशब्देन मातृ-वृद्धभ्रातृ-भगिनी-पितृभ्रात्रादीनां ग्रहणं, तथा सुकृते-पुण्येऽभिलाषो-वाञ्छा तथा परोपकारश्च व्यवहारशुद्धिश्च परोपकार-व्यवहारशुद्धी, एतानीह लोके च पुनर्-**अमुत्र**-परलोके, संपदे-विभूतये भवन्ति, अर्थादेतद्वतः पुरुषस्येति ।।१२.११।।

**[३२६] जिनेष्वभक्तिर्यमिनामवज्ञा,**
**कर्मस्वनौचित्यमधर्मसङ्गः ।**
**पित्राद्युपेक्षा परवञ्चनं च,**
**सृजन्ति पुंसां विपदः समन्तात् ।।१२.१२।।**

**धनवि.**—अथानन्तरोक्तमेवार्थं व्यत्ययेनाह —

'जिनेष्वभक्तिः' इति **जिनेषु**-वीतरागेषु **अभक्तिः**-आशातनाकरणं, च पुनर्-**यमिनां**-सुसाधूनाम्-**अवज्ञा**-अवहेला, च पुनः, **कर्मसु**-व्यापारेषु **अनौचित्यं**-अनुचितप्रवृत्तिः, च पुनर्, न विद्यते धर्मः-सुकृतं येषां ते-**अधर्माणः**, तेषां **सङ्गः**-सङ्गतिर्-**अथवा** न धर्मोऽ**धर्मः**-'तदन्य-तद्विरुद्ध-तदभावेषु नञ् वर्त्तते' इति [ ] वचनात्, पापं, तस्य सङ्गः-सङ्गतिः, च पुनः **पित्राद्युपेक्षा**-पितृ-मातृ-प्रभृतीनामुपेक्षा-शुश्रूषायामुपेक्षणं, **च** पुनः **परवञ्चनं**-परेषामात्मव्यतिरिक्तानां वञ्चनं-विप्रतारणम्, एते उक्ता दोषाः **पुंसां**-पुरुषाणां **समन्तादिह**-परत्र च **विपदो**-वध-बन्धाऽऽदिका आपदः **सृजन्ति**-कुर्वन्तीत्यर्थः ।।११.१२।।

**रत्न.**—एतद् [पूर्वोक्तम्] अर्थं च व्यत्ययेन निर्दिशति —

**जिनेष्वभक्तिः** इति. व्याख्या-जिनेषु-वीतरागेष्वभक्तिस्, तथा यमिनां-यतीनामवज्ञा-अवगणनं तथा कर्मसु **श्राद्धदिन-कृत्य-यतिदिनकृत्यादि**शास्त्रेक्तेषु, अनौचित्यम्-औचित्याभावः यथायोग्यमकरणमित्यर्थः[1] तथा नञोऽत्र विरुद्धार्थवाचकत्वाद् धर्म-धर्मिणोरभेदोपचाराच्चाधर्मिभिः-मिथ्यादृष्टिभिः कुमत्यादिभिः सह सङ्गः-परिचितिः -अधर्मसङ्गः विवाहकरणेन व्यापारकरणेन मैत्रीकरणेन च, तथा पित्रादीनां वृद्धानामुपेक्षा-उपेक्षणमवगणनं तथा परेषां कूटतुला-कूटमान-तत्प्रतिरूपकरण-कूटलेखलिखनादिना वञ्चनं, च पुनरर्थे, एतानि पुंसां विपदः समन्तादिति समन्ततः सर्वप्रकारेण सृजन्ति-कुर्वन्ति ।।१२.१२।।

**[३२७] भक्त्यैव नाऽर्चसि जिनं सुगुरोश्च धर्मं,**
**नाकर्णयस्यविरतं विरतीर्न धत्से ।**
**सार्थं निरर्थमपि च प्रचिनोष्यघानि,**
**मूल्येन केन तदमुत्र समीहसे शम् ? ।।१२.१३।।**

**धनवि.**—अथ शुद्धदेव-गुरु-धर्मादिसमग्रसामग्रीं प्राप्य यो न यतते, तं प्रत्युपदिशति —

१. योग्याऽक० मु० ।

'भक्त्यैव' इति यदि त्वं **भक्त्यैव**-केवलया भक्त्या आराधनबुद्ध्या **जिनं**-वीतरागं **नार्चसि**-न पूजयसि, **च** पुनः **सुगुरोः**-सद्गुरोः सकाशाद् **धर्मं**-श्रुतधर्मरूपं **नाकर्णयसि**-न श्रुणोषि, **च** पुनर्, **अविरतं**-निरन्तरं **विरतीः**-आश्रवादिभ्यो निवृत्तीर्न **धत्से**-न बिभर्षीत्यर्थः, **च** पुनः, **सार्थं**-सप्रयोजनं **निरर्थं**-निष्प्रयोजनम्, **अप्यघानि**-पापानि हिंसादीनि **प्रचिनोषि**-प्रकर्षेण पुष्टिं नयसि, **तत्**-सदा **अमुत्र**-परलोके **केन मूल्येन**-निष्क्रयेण **शं**-सुखं स्वर्गापवर्गादिजं **समीहसे ?** - वाञ्छसीत्यर्थः ।।१२.१३।।

**रत्न.**—एतदेव प्रकारान्तरेण निर्दिशन्नाह —

**भक्त्यैव नार्चसि**..इति. व्याख्या-हे आत्मन् ! त्वं भक्त्या, एवेत्यवधारणे, जिनं नार्चसि-न पूजयसि, कदाचिदपि पूजयसि तदा लज्जा-कुलक्रमादिना पूजयसीत्येवकारेण सूचनं, च पुनः, सुगुरोः पार्श्वे धर्ममर्हत्प्रणीतं नाकर्णयसि-न श्रुणोषि, सुशब्देन कदाचित् श्रुणोषि तदा कुगुरोः पार्श्वे इति सूचनं, कथ ?, अविरतं-निरन्तरमिति सर्वत्र योज्यं, तथा विरतीः-अष्टादशपापस्थानकेभ्यः[1] विरमणानि न धत्से-न दधासि, च पुनः, सार्थं कुटुम्बादिदाक्षिण्यहेतुना निरर्थं-निरर्थकम् अपध्यानाचरित-पापोदेश-हिंस्रप्रदान-प्रमादाचरितभेदाद् यथा स्यात् तथा त्वमधानि-पापानि प्रति प्रचिनोषि-प्रचयं नयसि, तत्-तस्मात् कारणात्, केन मूल्येन-मूल्यप्रदानरूपेणैव कर्मणा सुकृताचरणलक्षणेन शं-सुखं समीहसे ? - [2]वाञ्छसीति ।।१२.१३।।

**[३२८] चतुष्पदैः सिंह इव स्वजात्यैर्-**
**मिलन्निमांस्तारयतीह कश्चित् ।**
**सहैव तैर्मज्जति कोऽपि दुर्गे,**
**शृगालवच्चेत्यमिलन् वरं सः ।।१२.१४।।**

**धनवि.**—अथ सुगुरुसङ्गत्यां गुणं कुगुरुसङ्गत्यां च दोषं दृष्टान्तपूर्वक-मुपदर्शयन्नुपदिशति —

'चतुष्पदैः' इति, **इह** संसारे **कश्चित्** सुगुरुः **स्वजात्यैः**-पञ्चेन्द्रियसंज्ञिमनुष्यादिभिः

१. ०भ्यः पञ्चदशकर्मादानेभ्यश्चधि. इति मु० । २. 'सम्यग्' इति पदं मुद्रितेऽधिकम् ।

सह **मिलन्**-सङ्गतिं कुर्वन्, **इमान्** स्वजात्यान् **तारयति**-पारं प्रापयति, **इव**-यथा **सिंहः** स्वजात्यैश्चतुष्पदत्वजात्या स्वजातीयैश्चतुष्पदैर्मृग-गवयादिभिर्मिलन् स्वजातीयान् मृग-गवयादीन् पारं प्रापयति, **च** पुनः **कोऽपि** कुगुरुः स्वजातीयैर्मनुष्यैः सह मिलन् **तैः सहैव** दुःखेन गम्यते इति **दुर्गो**-नरकः, तस्मिन् **मज्जति**-अधो गच्छतीत्यर्थः, **इव**-यथा **शृगालो**-मृगधूर्त्तः, स्वजात्यैः शशकादिभिश्चतुष्पदैर्-**मिलन् तैः** शशकादिचतुष्पदैः सहैव दुर्गेऽगाध-त्वरितगतिसरित्प्रवाहे **मज्जति,** ब्रुडतीत्यर्थः;–भावार्थः पुनः **पञ्चाख्याना**-ऽऽदिकथानकादवसेयः, तच्च कथानकं लोके प्रसिद्धमपि स्मृत्यर्थं किञ्चिदुच्यते, यथा कस्मिंश्चित् तरुगणाकीर्णेऽरण्ये कुतश्चिदागतसिंहाद् बिभ्यद्भिः सर्वैश्चतुष्पदैः संभूय, 'सिंहो योगक्षेमकारी'इति मत्वा, स्वामित्वेन प्रपन्नः। तदनु तत्रारण्ये कदाचिद् दावानले उत्थिते सर्वस्वजातीयचतुष्पदविज्ञप्तेन सिंहेन, सर्वे स्वजातीया यथाक्रमं स्वलाङ्गूले लग्ना एकफालया महानदीमुल्लङ्घ्य परं पारं प्रापिताः, पुनः कालान्तरेणारण्ये पल्लविते तथैव ते स्वस्थानं प्रापिताः। इति सिंहविलसितं दृष्ट्वा केनचिद् दुर्धिया सिंहस्पर्धिना शृगालेन केचिद्धीनपुण्याः स्वसेवकीकृता-श्चतुष्पदाः, कालान्तरेणान्यदा तत्र दावानले प्रज्वलिते, ते तल्लाङ्गूले लग्नाः, शशकादयश्चतुष्पदा एकफालयैव तेन शृगालेन महानदीप्रवाहे पातिता निमग्नाः इति, अत्र सुगुरूणां सिंहदृष्टान्तता, कुगुरूणां शृगालदृष्टान्तता च स्पष्टैव इति । इति कारणात्, **अमिलन्**-सङ्गतिमकुर्वन् स-कुगुरुर्वरं-सम्यग् भवन्तीत्यर्थः ।।१२.१४।।

**रत्न.**–अथ सुगुरुं सिंहेन सदृशीकृत्य, कुगुरुं च शृगालेन सदृशीकृत्य चोपदिशति –

**चतुष्पदैः**..इति., व्याख्या-कश्चित् सुगुरुरिमान् निजाश्रितान् भव्यान् मिलन् सन् तारयति, इव-यथा सिंहः, स्वजातौ भवाः स्वजात्याः, तैश्चतुष्पदैः सह मिलनिमान् निजपृष्ठलग्नान् चतुष्पदान् तारयति । अन्यच्चेह कश्चित् कुगुरुरिमानाश्रितान् मिलन् सन् तैर्निजाश्रितैः सह मज्जति-ब्रुडति, कस्मिन् ? - दुर्गे-जलविषमस्थाने कूपादौ, किंवत् ? - कश्चिच्छृगालवद्, यथा शृगालः स्वजात्यैश्चतुष्पदैः सह मिलन् तैर्निजाश्रितैः सहैव निमग्नः इति हेतोः सः कुगुरुः शृगालवन्निर्बलः, **अमिलन्** सन्, **वरं**-श्रेयो भवति, अत्र कूपपतितचन्द्राकर्षक-

सिंह-शृगालयोपञ्चाख्यानोक्तं ज्ञातं ज्ञातव्यमिति ।।१२.१४।।

**[३२९] पूर्णे तटाके तृषितः सदैव,**
**भृतेऽपि गेहे क्षुधितः स मूढः ।**
**कल्पद्रुमे सत्यपि ही दरिद्रो,**
**गुर्वादियोगेऽपि हि यः प्रमादी ।।१२.१५।।**

**धनवि.**—अथ गुर्वादियोगे सत्यपि प्रमादवतां जनानां दृष्टान्तपूर्वकं शोचनीयतां सूचयन्नुपदिशति —

'पूर्णे' इति, **स** जनो **मूढो**-मूर्खः, **पूर्णे**-आकण्ठं जलेन भृतेऽपि, **तटाके**-सरसि **सदैव**-निरन्तरं **तृषितः**-तृषाऽऽक्रान्तो **ज्ञेयः,** च पुनः, **स मूढः** पुमान् **भृतेऽपि**-सिद्धाऽन्नादिना भरितेऽपि, **गेहे क्षुधितः**-क्षुधाऽऽक्रान्तो ज्ञेयः, **ही** इति सर्वत्र खेदे, च पुनः, **स मूढः** पुमान् **कल्पद्रुमे**-कल्पवृक्षे, **सत्यपि दरिद्रो** ज्ञेयः, सः क ? - इत्याह-**यः** पुमान् **हि** निश्चितं **गुर्वादियोगेऽपि** देव-गुरु-धर्मसामग्र्यां सत्यामपि, **प्रमादी**-प्रमादवान् भवतीति ।।१२.१५।।

**रत्न.**—अथ गुर्वादीनां योगे मा प्रमादीरिति दृष्टान्तदानेनोपदिशति-

**पूर्णे तटाके** इति, व्याख्या-स पुमान् पूर्णे तटाके सत्यपि सदैव नित्यं तृषितोऽस्ति, स मूढो गेहे सुखभक्षिकादिना भृते सति क्षुधितोऽस्ति, ही इति खेदे, अङ्गणे कल्पद्रुमे सत्यपि दरिद्रोऽस्ति, स कः ? - यो गुर्वादीनां-गुरु-देव-धर्माणां योगे सत्यपि प्रमादी-प्रमत्तोऽस्तीति ।।१२.१५।।

**[३३०] न धर्मचिन्ता [१]गुरु-देवभक्ती,**
**येषां न वैराग्यलवोऽपि चित्ते ।**
**तेषां प्रसूक्लेशफलः पशूना-**
**मिवोद्भवः स्यादुदरम्भरीणाम् ।।१२.१६।।**

१. गुरुश्च देवश्च गुरु-देवौ-तयोः भक्तिः-इति विग्रहे कृते गुरु-देवभक्तिः' पाठः युक्तः, भक्त्याः द्वित्वं तदायुज्यते यदा वृत्त्योः द्रव्य-भावादिना भेदेन विवरणं स्यात्, अतः मूले वृत्त्योश्च 'भक्तिः' इत्येकवचनं युक्तम् ।

**धनवि.**–अथ देव-गुरु-धर्मेष्वान्तरप्रीतिमन्तरेण संपूर्णस्यापि जन्मनोऽसारतां दर्शयन्नुपदिशति –

'न धर्मचिन्ता' इति, **येषां** पुरुषाणां **चित्ते** न **धर्मचिन्ता**-किमद्य सुकृतं कृत? किमद्य करणीयम् ? इत्यादिचिन्तनरूपा न जायते, पुन**र्येषां चित्ते गुरु-देवभक्ती**-गुरु-देवयोर्भक्ती-आन्तरप्रीत्याऽशन-पान-वसना-ऽऽदिप्रदान-प्रासाद-प्रतिमाप्रतिष्ठा-पर्युपासनादिरूपा न भवतः, पुन**र्येषां चित्ते वैराग्यलवोऽपि**-संसारविरक्ततालेशोऽपि नास्ति, **तेषां** पुंसाम्, **उदरम्भरीणां**-केवलं स्वोदरपूरकाणाम्, **उद्भवो**-जन्म उत्पत्तिः, **पशूनामिव**-काक-श्वानादीनामिव, **प्रसूः**-जननी, तस्याः **क्लेशो**-यौवनविनाश-गर्भवासप्रसवादिपरिश्रमः, स एव **फलं**-प्रयोजनं यस्य स **प्रसूक्लेशफलः स्याद्**-भवतीत्यर्थः ।।१२.१६।।

**रत्न.**–एतदेव प्रकारान्तरेणाचष्टे –

**न धर्मचिन्ता**...इति., व्याख्या-येषां पुंसां धर्मस्य चिन्ता-चिन्तनम्,-अहं प्रतिदिनं – कं धर्मं करोमि, न करोमि..इति लक्षणा नास्ति, तथा गुरु-देवयोर्भक्ती-भजने न स्तः, तथा विरागस्य भावो वैराग्यं, तस्य लवोऽपि-लेशोऽपि नास्ति, कस्मिन् ? - चित्ते, तेषां पुंसामुद्भवो-जन्म स्यात्, किंलक्षणः? - प्रस्वाः-जनन्याः, क्लेश एव-कष्टकरणमेव फलं यस्य सः, केषामिव ? - पशूनामिव, यथा पशूनाम्-शूकरादीनामुद्भवः केवलं जननीक्लेशकरः स्यात्, यतः किंलक्षणानाम् ? उभयेषां - उदरं बिभ्रतीति तेषाम् ।।१२.१६।।

**[३३१] न देवकार्ये न च सङ्घकार्ये,**
**येषां धनं नश्वरमाशु तेषाम् ।**
**तदर्जनाद्यैर्वृजिनैर्भवान्धौ,**
**पतिष्यतां किं न्ववलम्बनं स्यात् ? ।।१२.१७।।**

**धनवि.**–अथैनं द्वारमुपसंहरन् शुद्धदेव-गुरु-धर्मार्थं यस्य धनं नोपयुज्यते, तस्य धनस्य दौर्गत्यहेतुतां दर्शयन्नुपदिशति –

'न देवकार्ये' इति, **आशु**-शीघ्रं **नश्वरं**-विनाशि, **येषां** पुरुषाणां **धनं**-द्रव्यं, **देवकार्ये**-देवप्रासाद-प्रतिमाप्रतिष्ठादिप्रयोजने **न** आयाति, **च** पुनः **सङ्घकार्ये**-सङ्घः-साधु-साध्वी-श्रावक-श्राविकासमुदायः, तस्य कार्ये-प्रयोजने येषां धनं **ना**याति, **तेषां** पुंसां, **तदर्जनाद्यैः**-धनोपार्जनप्रमुखैः, आद्यपदेन पञ्चाश्रवप्रवृत्ति-परिग्रहो, **वृजिनैः**-पापै**र्भवान्धौ**-संसारकूपे **पतिष्यतां**-पतनं करिष्यतां, **नु** इति वितर्के **किमवलम्बनम्**-अवष्टम्भः स्याद्-भवतीति ।।१२.१७।।

इति श्रीतपागच्छ० शिष्योपाध्यायश्री**धनविजय**गणिविरचितायां गुरु-देव-धर्मशुद्धिनाम्नी द्वादशी पदपद्धतिः ।।१२।।

**रत्न.**—अथ सुपात्रे धनव्ययं प्रकारान्तरेणोपदिशति —

न **देवकार्ये** इति., व्याख्या-येषां धनिनां धनं देवकार्ये-नवीनप्रासादनिर्मापण-बिम्बप्रतिष्ठा-जीर्णप्रासादोद्धारादि-लक्षणे च पुनः सङ्घकार्ये-साधर्मिकवात्सल्य-दीनसाधर्मिकोद्धरणादौ अथवा साधु-साध्वी-श्रावक-श्राविकालक्षणे न भवति-नोपयोगी भवतीत्यर्थः, किंलक्षणं ? - नश्वरं-नाशशीलं, कथम् ? - आशु-शीघ्रं, तेषां धनस्यार्जनाद्यैर्वृजिनैः-पापैर्भवान्धौ-संसारकूपे पतिष्यतां सतां, नुरिति विशेषे, अवलम्बनम्-आधारः किं स्याद् ?, अपि तु किं न स्यादिति, धर्महीनाः संसारकूपे पतिष्यन्त्येवेति ।।१२.१७।।

**[३३२] श्रीशान्तिचन्द्र**वरवाचकदुग्धसिन्धु-
लब्धप्रतिष्ठवरवाचकरत्नचन्द्रः ।
**अध्यात्मकल्पफल**देऽत्र चकार वृत्तिं,
तत्राऽऽस्तिकव्रतमितो विवृतोऽधिकारः ।।१२।।

इति द्वादशोऽधिकारः ।।



# १३. यतिशिक्षोपदेशाधिकारः

**[३३३] ते तीर्णा भववारिधिं मुनिवरास्, तेभ्यो नमस्कुर्म्महे,**
**येषां नो विषयेषु गृद्ध्यति मनो, नो वा कषायैः प्लुतम् ।**
**रागद्वेषविमुक् प्रशान्तकलुषं साम्याऽऽप्तशर्माऽद्वयं,**
**नित्यं खेलति चाप्तसंयमगुणाऽऽक्रीडे भजद् भावनाः ।।१३.१।।**

**धनवि.**—अथानन्तरद्वारे गुरु-देव-धर्मशुद्धिरुक्ता, सा च गुर्वधीना, गुरुश्च विरतिधार्येव, विरतिश्च यत्यधीनेति विरतिधारिणो यतीन् प्रति शिक्षामुपदिशन्नाह - **अथ यतिं प्रति शिक्षोपदेशः** इति, स्पष्टम् । अत्रापि विरतिधारिणां मङ्गलार्थं नमस्कारमुपदेशद्वारेणाह —

'ते तीर्णा' इति, **ते**ऽग्रेऽत्रैव यच्छब्देन वक्ष्यमाणा, **मुनिवरा**-मुनिषु-यतिषु वराः-प्रधानाः महामुनय इत्यर्थः, **भववारिधिं**-संसारसमुद्रं **तीर्णाः**-पारं प्राप्ताः, पुनस् **तेभ्यो** मुनिवरेभ्यो वयं **नमस्कुर्म्महे**-नमस्कारं कुर्मो, **येषां** मुनिवराणां **मनः**-चित्तं **विषयेषु**-शब्दादिषु **नो गृद्ध्यति**-आसक्तिं नो याति, **वा**-अथवा येषां मनः **कषायैः**-क्रोधादिभिर्नो **प्लुतं**-नाऽऽप्लावितं, च पुनर्, येषां मनो **राग-द्वेषौ** विमुञ्चति-त्यजतीति **राग-द्वेषविमुक्,** च पुनर्, येषां मनः **प्रशान्तकलुषं**-प्रकर्षेण शान्तं-निःसत्ताकीभूतं कलुषं-पापकर्म यत्र तत् तथा, च पुनर्, येषां मनः **साम्याप्तशर्माद्वयं**-साम्येन-समतया आप्तं-प्राप्तं शर्मणा-सुखेन सहाऽद्वयम्-ऐक्यं येन तत् तथा, च पुनर्, येषां मनो **भावना**-अनित्यतादिका द्वादश **भजत्**-आश्रयत्, **आप्तसंयमगुणाक्रीडे** आप्तः-प्राप्तो यः संयमलक्षणो गुणः स एवाऽऽक्रीडः-उद्यानं तत्र **खेलति**-क्रीडतीत्यन्वयः ।।१३.१।।

**रत्न.**—अथ यतिं प्रति शिक्षोपदेशाख्यस्त्रयोदशोऽधिकारो [1]प्रस्तूयते-तत्र प्रथमं यतिस्वरूपमेवोपदिशति —

**ते तीर्णा** इति., व्याख्या-ते मुनिवरा भववारिधिं तीर्णाः, तथा तेभ्यो

---

१. ०ऽधिकारो विवरीतुं प्र० मु० ।

मुनिवरेभ्यो वयं नमस्कुर्महे, ते के ? - येषां मनो विषयेषु-शब्दादिषु न गृध्यति-न गार्ध्यं भजते, वा पुनः, कषायैः-क्रोधाद्यैर्न प्लुतं-न निमग्नं, न व्याप्तमित्यर्थः, च पुनर्, **आप्तैः-अर्हद्भिरुपदिष्टा ये संयमस्य गुणाः-क्षान्त्यादयस्ते** एवाऽऽक्रीड-उद्यानं तस्मिन् खेलति-क्रीडति, अथवा आप्तः-प्राप्तः संयमगुणा एवाऽऽक्रीड-उद्यानं तत्र खेलतीति व्याख्येयं, किं कुर्वन् ? - भजत्-श्रयत्, का ? - भावनाः-पञ्चविंशतिं व्रतस्य, एकैकस्य पञ्च-पञ्च-सद्भावाद्, अथवा अनित्यत्वादयो द्वादश ताः, किंलक्षणं मनः ? - रागो-द्वेषौ विमुञ्चतीति रागद्वेषविमुक्, पुनः कीदृक् ? - प्रशान्तानि कलुषानि-पापानि यस्मात् तत्, पुनः कीदृक् ? - साम्येन-समतया आप्तं शर्मणां-सुखानामद्वयम्-ऐक्यं येन तत्, समभाव-सुखस्यानुपमत्वादिति, एतद्विशेषणत्रययुक्तस्यैव मनसो भावनाश्रयणमिति ।।१३.१।।

**[३३४] स्वाध्यायमाधित्ससि न प्रमादैः,**
**शुद्धा न गुप्तीः समितीश्च धत्से ।**
**तपो द्विधा नार्जसि देहमोहा-**
**दल्पेऽपि हेतौ दधसे कषायान् ।।१३.२।।**

**[३३५] परीषहान् नो सहसे न चोप-**
**सर्गान् न शीलाङ्गधरोऽपि चासि ।**
**तन्मोक्षमाणोऽपि भवाब्धिपारं,**
**मुने ! कथं यास्यसि वेषमात्रात् ? ।।१३.३।।**

**धनवि.**–अथोद्दिष्टमेवार्थं पद्यद्वयेनाह –

**'स्वाध्यायम्' इति, 'परीषहान्' इति, हे मुने !** - व्रतिन् ! **प्रमादैः**-मद्यादिभिर्हेतुभूतैः, **स्वाध्यायं**-वाचना-प्रच्छनादिपञ्चविधं **नाधित्ससि**-नो आधातुं-कर्तुमिच्छसि; आङ्पूर्वकडुधांगक् धारणे [है.धा ११३७] इत्यस्य धातोः सनि आधित्ससि-इति, **क्रियाकलापे** उत्पत्त्यर्थे उक्तोऽपि प्रयोगो, धातूनामनेकार्थत्वात् करणार्थे साधुः; देहलीप्रदीपन्यायेन प्रमादैरित्युभयत्र योज्यं, तेन प्रमादैः **शुद्धा-**

निरतिचारा **गुप्तीः**-मनोगुप्त्यादिकाः, च पुनः **समितीः**-ईर्यासमित्यादिका **न धत्से**-न धरसि; च पुनर्, **देहमोहाद्**-देहे-शरीरे **मोहो**-'ममेदं शरीरं मा दुर्बलं भवतु' इति मौढ्यं, तस्माद् **द्विधा**-बाह्याभ्यन्तरभेदेन द्विप्रकारं **तपः**-तपःकर्म **नार्जसि**-न करोषीत्यर्थः, च पुनर्, **अल्पेऽपि**-तुच्छेऽपि **हेतौ**-कषायकारणे, **कषायान्**-क्रोधादिकान् **दधसे,** दधि धारणे [है.धा ७४५] इत्यस्य धातोः प्रयोगः ।।१३.२।।

**धनवि.**—च पुनः, **परीषहान्**-क्षुत्-तृट्-प्रमुखान् **उपसर्गांश्च**-देव-मनुष्य-तिर्यक्कृतान् पराभवान् नो-नैव **सहसे,** षहि मर्षणे [है.धा ९९०] इत्यस्य क्षमसे इत्यर्थः; च पुनः **शीलाङ्गधरोऽपि**-अष्टादशसहस्रशीलाङ्गरथधारकोऽपि **नासि**-न भवसि; तानि चाष्टादशशीलाङ्गसहस्राण्येवम् । [दशवैकालिक निर्युक्तौ]

**[३३६]** "[1]जोए करणे सन्ना इंदियभोमाइ समणधम्मे य ।
सीलंगसहस्साणं अट्ठारसगस्स निप्फत्ती ।। [१७७] इत्येवं स्थापनाम्नायः,

भावना त्वियम् —

**[३३७]** "[2]मणेणं ण करेइ आहारसन्नाविप्पजढो ।
इंदियसंवुडो खंतिसंपन्नो पुढविकायसंरक्खओ ।। [ ]

इत्यादि द्रष्टव्यमिति **यतिप्रतिक्रमणसूत्रावचूर्णौ** । **तत्**-तस्मात् कारणात् **मोक्षमाणोऽपि**-मुक्तिं गमिष्यन्नपि 'मुचृ(च्लृ)न्ती मोक्षणे' [है.धा.१३२] इत्यस्य, **वेषमात्रात्**-तपःसंयमादिरहितत्वेन केवलवेषाद् **भवाब्धिपारं**-संसारसमुद्रतीरं त्वं **कथं ?** - केन प्रकारेण **यासि**-प्राप्स्यसि ।।१३.३।।

**रत्न.**—अथ वेषमात्रेण मा रज्यस्वेति प्रकारान्तरेणोपदिशति —

**स्वाध्यायमाधित्ससि., परीषहान् नो सहसे** इति., युग्मम्,-व्याख्या-हे मुन! त्वं प्रमादात् स्वाध्यायं-जिनागमस्य पठितस्यापि गुणनं नाधित्ससि-न कर्त्तुमिच्छसि,

---

१. योगाः करणानि संज्ञाः इन्द्रियाणि भूम्यादि श्रमणधर्माः । शीलाङ्गसहस्राणामष्टा-दशकस्य निष्पत्तिः ।।१।। २. मनसा न करोति विप्रत्यक्ताद्दारसंज्ञः संवृतेन्द्रियः क्षान्तिसंपन्नः पृथ्वीकाय-संरक्षकः ।

तथा शुद्धा-निर्मला गुप्तीः-मनो-वाक्-कायनिरोधरूपाः न धत्से-न दधासि, च पुनः समितीः-ईर्याभाषैषणादाननिक्षेपपारिष्ठापनिकाः पञ्चापि ताः प्रति, न धत्से इति योज्यं, तथा तपो बाह्याभ्यन्तरभेदाद् द्विधा नार्जसि-स्वकीयत्वेन न करोषि, कस्माद् ? - देहे मोहो-मौढ्यं तस्मात्, 'मदीयो देहो मा कृशो भवतु'इति देहमोहादित्यर्थः, तथा [1]हि निश्चितं अल्पे हेतौ-निमित्ते कषायान् प्रति दधसे-धत्से, तथा परीषहान्-क्षुत्-तृषा-शीतोष्णादिलक्षणान् नो सहसे-न क्षमसे, तथा च पुनरुपसर्गान् परैः कृतान् ताडना-ऽऽक्रोशादिकान् न सहसे, देहमोहादितिग्राह्यम्, तथा

"जे नो करंति मणसा निज्जिये" इत्याद्यार्योक्तानामष्टादशसहस्रप्रमाण-शीलाङ्गानां धरोऽपि नासि, तत्-तस्माद्धेतोस्त्वं मोक्षमाणोऽपि-मुक्तिमिच्छुरपि भवाब्धिपारं-संसारसमुद्रपरतटं लोकाग्रभागलक्षणं सिद्धस्थानं कथं यास्यसि ?, अपि तु न यास्यसि, कस्मात् ? - केवलं वेषो वेषमात्रं तस्माद्, भावचरणशून्यादित्यर्थः ।।१३.३।।

**[३३८] आजीवकार्थमिह यद्यतिवेषमेष,**
**धत्से चरित्रममलं न तु कष्टभीरुः ।**
**तद् वेत्सि किं न ? न बिभेति जगज्जिघृक्षुर्-**
**मृत्युः कुतोऽपि, नरकश्च न वेषमात्रात् ।।१३.४।।**

**धनवि.**—पुनः केवलवेषस्याकिञ्चित्करत्वं दर्शयन्नुपदिशति —

'आजीविकार्थम्' इति, **यद्**-यस्माद्, एष त्वम्, **इह**-जगति **आजीविकार्थम्**-जठरमात्रपूर्त्तये **यतिवेषं**-रजोहरणादि लिङ्गं **धत्से**-धरसि, **न तु कष्टभीरुः** सन्-उपसर्ग-परीषहसहन-लक्षणकष्टभीरुकः, **अमलं**-निरतिचारं **चरित्रं**-चारित्रं न धत्से, तत्-तर्हि **किं न वेत्सि ?** - न जानासि यत् **जगज्जिघृक्षुः**-विश्वं ग्रहीतुमिच्छु**मृत्युः**-यमः **कुतोऽपि** [2]पुरुषविशेषान्न बिभेति-न भीतिं प्राप्नोति, च पुनर्, **नरको**-निरयो

१. 'हि' पाठोयं मूलत्वेनापि गृहीतः । २. 'वेषान्न' मु० ।

**वेषमात्राद्**-ज्ञान-दर्शन-चारित्ररहितकेवलरजोहरणादिलिङ्गमात्रान्न बिभेतीति ।

**रत्न.**—पुनर्वेषमाश्रित्यैवोपदिशति —

**आजीविकार्थम्**...इति., व्याख्या-हे नामसाधो ! इह जिनप्रवचने एष त्वं आजीविकायै-आजीविकार्थं, यद् यतिवेषं धत्से-दधसे, तुरिति विशेषे, कष्टेभ्यो-लोचोष्णनीरपानादिभ्यो भीरुः सन् अमलं-निरतिचारमलं चरित्रं-चारित्रं न धत्से, तत्-तर्हि त्वं न वेत्सि-न जानासि ?, काकूक्त्या व्याख्यानं, यत् एष मृत्युः कुतोऽपि न बिभेति, धावमान आयास्यत्येव, च पुनर्, नरकः केवलं वेषो वेषमात्रं तस्माद्, धर्मग्रहणे धर्मिग्रहणमिति न्यायात् केवलवेषधारिण इत्यर्थः, न बिभेति, किंलक्षणः ? - जगन्ति प्रति जिघृक्षुः-ग्रहीतुमिच्छुः, नरकोऽपि तथैव, प्रायेण भूयान् जनो नरकगाम्येव, तेन मृत्युरकाङ्क्षमाणोऽपि आयास्यत्येव, वेषेण मुग्धजनविप्रतारणसमुत्थपापभरादकाङ्क्षमाणोपि नरकोऽप्यायास्यत्येवेति केवलं वेषधारणं निरर्थकमेवेति ।।१३.४।।

**[३३९] वेषेण माद्यसि यतेश्चरणं विनाऽऽत्मन् !,**
**पूजां च वाञ्छसि जनाद् बहुधोपधिं च।**
**मुग्धप्रतारणभवे नरकेऽसि गन्ता,**
**न्यायं बिभर्षि तदजागलकर्त्तरीयम् ।।१३.५।।**

**धनवि.**—अथ विरतिविरहिते केवलवेषधारणे प्रत्युत दोषं दर्शयन्नुपदिशति—

'वेषेण माद्यसि' इति, **हे आत्मन् !** त्वं **चरणं**-चारित्रं **विना, यतेर्वेषेण**-मुनिलिङ्गेन **माद्यसि**-हृष्यसि, तच्च, 'मदैच् हर्षे' [है.धा १२३६] इत्यस्य 'शमसप्तकस्य' [सि.हे. ४-२-१११] इति दीर्घत्वे माद्यसीति साधुः, **च** पुनः, **पूजां**-चन्दनादिनाऽर्चां **जनाद्**-भक्तलोकाद्, **बहुधा**-बहुप्रकारं नानाप्रकारं, वस्त्र-पात्रलक्षणम्, **उपधिं वाञ्छसि;**

अनन्तरोक्ते फलं दर्शयति-**मुग्धप्रतारणभवे**-निर्विवेकवञ्चनोत्पन्ने **नरके**-दुर्गतिरूपे त्वं **गन्ता**-याताऽसि, **तत्**-तस्मात्-त्वम् **अजागलकर्तरीयम्**-अजागलकर्त्तरीसत्कं

**न्यायं**-पण्डितलोकप्रतिपादनव्यवहारं, **बिभर्षि**-पुष्णासि धरसि **वा** । अजागल-कर्त्तरीन्यायस्त्वयम्- यथा-काचिदजा शौनिकेन हननार्थं सज्जीकृता सहसा च भूपतितां धूलिपटलान्तः-प्रच्छन्नीभूतां कर्त्तरीं जातिस्वभावेन पादजनितभूखननादिना स्वयमेव स्वघातिकां, प्रकटीकरोति, तथा त्वमपि चारित्रं विना केवलेन वेषेण पूजास्पृहयोपधिस्पृहया च स्वयमेव नरकमर्जसीति भावः ।।१३.५।।

**रत्न.**—पुनः **केवलो वेषो न प्रमाण**मिति भङ्ग्योपदिशति —

**वेषेण माद्यसि**..इति., व्याख्या-हे आत्मन् ! त्वं यतेर्वेषेण माद्यसि-हृष्यसि, कथं ? - विना, किं ? - चरणं-चारित्रं, च पुनस्, त्वभिगम-वन्दन-नमस्यन-सत्कारादिकां पूजां वाञ्छसि, च पुनर्, बहुधा-बहुप्रकारेणोपधिं-वस्त्रपात्रकम्बलादिकं वाञ्छसि, कस्माद् ? - जनाद् भक्तादित्यर्थः, परं त्वं पश्चान्नरके गन्ताऽसि, किंलक्षणे ? - मुग्धानां श्राद्धानां प्रतारणं-वञ्चनं बकवत् कपटेर्यापथगमन-मुखवस्त्रिकादान[1]-रजोहरणप्रमार्जन-बाढस्वरप्रतिक्रमणकरण - स्वाध्यायकरणादिकं तस्माद् भवतीति मुग्धप्रतारणभवस्-तस्मिन्, तत्-तर्हि त्वं अजागलकर्त्तरीति न्यायं बिभर्षि-धत्से, यथाऽजा नीलतृणादिकं भुञ्जाना कण्ठे घुर्घरकं दधाना पादयोर्नूपुरे बिभ्राणा सती माद्यति, परं कदाचित् प्राघूर्णकेष्वागतेषु मम [2]कन्दले कर्त्तरी पतिष्यतीति न वेत्ति, तथा त्वमपि निर्मलरजोहरण-मुखवस्त्रिका-तादृक्कल्प-चोलपट्टादिवेषेण माद्यसि, राज-महेभ्याभिगमनादिसत्कारं वाञ्छसि, मुग्धजन-प्रतारणेनोपधिं मेलयसि, परं धावदायास्यन्तं नरकं न पश्यसीत्युपनयमात्रं, तथा क्वचिद् अजवधकेन वधस्थानं नीता, स वधकोऽजापार्श्वे अजोवधोपकरणं कर्त्तरीं मुक्त्वा, कार्यार्थं गृहान्तर्गतः, तयाऽजया पादाभ्यां भूमिं खनित्वा कर्त्तरी भूम्यन्तर्निक्षिप्ता, परं कर्त्तरीधारोपरि स्थिता, अथ वधक आगतस्सन्, 'निक्षिप्तामिमां मा पश्यतु'इति धिया तदुपरि शयानायास्तस्या गले एव कर्त्तरी समागता, सा मृता, कश्चिदनया रीत्या अजागलकर्त्तरीन्यायं वदति । अथोपनय उच्यते-त्वमजावदज्ञानान्नरकमाच्छादयसि परमवश्यंभाविभावत्वात् तव नरक आयास्यत्येवेति,

१. मुखवस्त्रिकाकरण - मु० । २. कंदलः देश्योऽयं शब्दः (दे.२.४) कपालपर्यायः ।

ततस्त्वं प्रथममेवाजावदज्ञानो मा भव, किंतु सावधानो भवेति तात्पर्यार्थः ।।१३.५।।

**[३४०] जानेऽस्ति संयम-तपोभिरमीभिरात्मन्-**
**नस्य प्रतिग्रहभरस्य न निष्क्रयोऽपि ।**
**किं दुर्गतौ निपततः शरणं तवास्ते ?,**
**सौख्यं च दास्यति परत्र किमित्यवेहि ? ।।१३.६।।**

**धनवि.**–अथ प्रत्यक्षेण प्रतिदिनानुष्ठेयमपि तपःसंयमादि बहु सातिचारमकिञ्चित्करमित्युपदिशति –

'जाने' इति, **हे आत्मन् !** अहमेवं **जाने**-मन्ये, तदेव ज्ञानं प्रकटीकरोति-**अमीभिः**-मनःशुद्धिरहितैः सातिचारैः, लोकरञ्जनार्थं क्रियमाणैर्वा प्रत्यक्षेण दृश्यमानैः **संयम-तपोभिः, अस्य** प्रत्यक्षेण दृश्यमानस्य, **प्रतिग्रहभरस्य**-मनोवाञ्छिता-ऽशन-पान-वस्त्र-पात्र-पीठफलक-वसत्यादिग्रहणरूपस्य, **निष्क्रयोऽपि**-भाटकमपि **नास्ति,** कुतस्तन्मूल्यस्य संभावनेति भावः; अत्र तदेति गम्यम्, तेन तदा **दुर्गतौ**-नरकादौ **पततः**-अधोगमनक्रियां कुर्वतस् **तव किं**-किंनामकं **शरणं**-तत्र पतननिवारणसमर्थं वस्तु, **आस्ते ?, च** पुनः **परत्र**-परलोके, **सौख्यं**-सुखं **किं**-किंनामकं सुकृतं **दास्यति ? इति**-अमुना प्रकारेणोपदिष्टम्, **अवेहि**-सम्यग् जानीहि ।।१३.६।।

**रत्न.**–पुनरेतदेवाचष्टे –

[1]**जातोऽस्ति**..इति., व्याख्या-अमीभिर्लोकरञ्जनार्थं किञ्चिद्-ईषत् संयमतपोभिर्-अस्य प्रतिग्रहभरस्य-अशन-पान-खादिम-स्वादिम-वस्त्र-पात्र-कम्बल-पादप्रोञ्छन-पूजा-सत्कारादिकस्य मुग्धजनवञ्चनप्राप्तस्य निष्क्रयोऽपि-मूल्यमपि न **जातोऽस्ति,** येन गृहस्थेभ्यो गृहीतप्रतिग्रहभरस्य ऋणमपि शुद्ध्यतीत्यर्थः, तत् तव दुर्गतौ निपततः सतः किं शरणमास्ते ?, अपि तु न किमपि, च पुनः, परत्र-परभवे सौख्यं किं दास्यति ?, निष्क्रयादधिकं सुकृतमित्यध्याहार्यं, हे आत्मन् !

१. जातो० पाठः मूलत्वेनापि गृहीतः ।

इत्यवेहि ।।१३.६।।

**[३४१] किं लोकसत्कृतिनमस्करणार्चनाद्यै-**
**रे मुग्ध ! तुष्यसि विनाऽपि विशुद्धयोगान्।**
**कृन्तन् भवान्धुपतने तव यत् प्रमादो,**
**बोधिद्रुमाश्रयमिमानि करोति पर्शून् ।।१३.७।।**

**धनवि.**—ननु सत्कारादिकमैहिकमेव तपः-संयमफलमस्तु ? - इत्याशङ्कायामाह —

'किं लोके' इति, **हे मुग्ध !** - हे अज्ञान ! **विशुद्धयोगान्**-सुप्रवृत्तमनो-वाक्-काययोगान् **विना लोकसत्कृति-नमस्करणा-ऽर्चनाद्यैः**-जनकृतसत्कार-वन्दन-पूजनादिभिः **किं तुष्यति ?** - हृष्यसि, **यद्**-यस्मात् **प्रमादः** क्रियाशैथिल्यलक्षणो मद्यादि वा, **भवान्धुपतने**-संसारकूपपतने **तव** बोधिः-सम्यक्त्वावाप्तिः, स एव द्रुमो-वृक्षः स एवाश्रयः-पतनसमयेऽवलम्बनलक्षणः तं **बोधिद्रुमाश्रयं कृन्तन्**-छिन्दन् **इमानि** लोकसत्कृति-नमस्करणादीनि **पर्शून्**-कुठारोपमानि **करोति**-सृजतीत्यर्थः; भावार्थस्तु अत्र प्रमादश्छेदकपुरुषस्थानीयो बोधिर्द्रुमस्थानीयो लोकसत्कृत्यादि पर्शुस्थानीयमित्यादि-योजनया — [संबोधप्रकरणे]

**[३६१]** "जे बंभचेरभट्ठा पाए पाडंति बंभचारीणं ।
ते हुंति टुंटमुंटा, बोही य सुदुल्लहा तेसिं" ।। [ ]।।

[1]इति गाथाभावनया च स्पष्ट एवेति ।।१३.७।।

**रत्न.**—अथ लोकसत्क्रियादिभिर्-'मा तुष्य'इत्युपदिशति —

**किं लोकसत्कृति..**इति., व्याख्या-हे मुग्ध ! हे वेषयते ! लोकानां-वेषदर्शनरञ्जितानां सत्कृतिः-सत्कारोऽभ्युत्थानादिः नमस्करणं-क्षमाश्रमणादिना पञ्चाङ्गप्रणामः, अर्चनं-श्रीखण्ड-घुसृणादिना सुवर्ण-[2]रूप्यादिनाणकैश्च तान्याद्यानि

१. ये ब्रह्मचर्यभ्रष्टाः पादौ स्थापयन्ति ब्रह्मचारिणाम् । ते भवन्ति टुंटमुंटा बोधिरपि सुदुर्लभस्तेषाम्।
२. सुवर्णपुष्पादि - मु० ।

येषां, तैः किं तुष्यसि ? - किं तोषं प्राप्नोषि, कथ ? - विना, कान् ?,- विशुद्धा-दोषरहिता योगाः, प्रशस्त-मनो-वाक्-कायप्रयोगलक्षणास्तान्, यद्-यस्मात् कारणात् प्रमाद इमानि लोकसत्कृति-नमस्करणा-ऽर्चनाद्यानि पर्शून्-कुठारान् करोति, किं कुर्वन् ? - कृन्तन्-छिन्दन्, कं ? - बोधिरेव द्रुमस्तस्याश्रयम्-आलम्बनं प्रति, कस्मिन् ? - भव एवान्धुः-कूपस्तस्मिन् पतनं तस्मिन्, यथा कस्यचित् कूपे पततस्तटस्थद्रुमोऽवलम्बनं भवति, तथा जीवस्य संसारे पततो बोधिरालम्बनं भवति, तं बोधिद्रुमाश्रयं प्रमादः कृन्तन्निमानि पर्शून् करोतीति भावः ।।१३.७।।

**[३४३] गुणांस्तवाश्रित्य नमन्त्यमी जना,**
**ददत्युपध्यालय-भैक्ष्य-शिष्यकान् ।**
**विना गुणान् वेषमृषेर्बिभर्षि चेत्,**
**ततष् [१]ठकानां तव भाविनी गतिः ।।१३.८।।**

**धनवि.**–अथ केवलवेषधरणे धूर्त्तसाम्यं दर्शयन्नुपदिशति –

**अमी** प्रत्यक्षसिद्धा गुणानुरागिणो **जना**-लोकाः, **तव गुणानाश्रित्य**-ज्ञान-दर्शन-चारित्रादिगुणवन्तं त्वां ज्ञात्वेत्यर्थः **नमन्ति**-नमस्यन्ति, तथा **उपध्यालय-भैक्ष्यशिष्यकान्**–वस्त्र-पात्र-वसत्यशन-पान-खादिम-स्वादिम-विनेयान्, स्वार्थे कप्रत्यये, अमी गुणानुरागिणो **ददति**-प्रयच्छन्तीत्यर्थः, **चेद्**-यदि **गुणान् विना ऋषेः**-मुनेर्वेषं-रजोहरणादिलिङ्गं **बिभर्षि**-धरसि, **ततस्-तव** ठकानां-धूर्त्तानां **गतिः** नरकादिलक्षणा भाविनी-भवित्रीत्यन्वयः । अत्र ठकेति लोकप्रसिद्धो देशीशब्दो वा भावनीय इति ।।१३.८।।

**रत्न.**–पुनरेतदेव दृढयति –

**गुणांस्तवाश्रित्य**..इति., व्याख्या-हे द्रव्ययते ! अमी धर्मार्थिनो जनाः संयमगुणानाश्रित्य तुभ्यं नमन्ति, तथोपधिः-वस्त्रादिकः, तथा आलयो-वसतिः,

१. ठग (दे० २.५८) धूर्त्तः, देशीशब्दस्य संस्कृतीकरणं - ठकानां ।

भिक्षाणां समूहो भैक्ष्यं, शिष्या एव शिष्यकाः, शिष्यत्वेन पुत्रा इत्यर्थः, द्वन्द्वसमासे, तान् प्रति ददति, हे ऋषे ! चेद्-यदि त्वं गुणान् विना वेषं बिभर्षि-धत्से, ततः-तस्मात् कारणात्, तव **ठगानां**-लोकोक्त्या **ठगारा** इति प्रसिद्धानां गतिः-अवस्था भाविनीति, यथा ते वेषैर्लोकान् वञ्चयित्वा दुर्गतौ यान्ति तथा त्वमपीति ।।१३.८।।

**[३४४] नाऽऽजीविका-प्रणयिनी-तनयादिचिन्ता,**
**नो राजभीश्च भगवत्समयं च वेत्सि ।**
**शुद्धे तथाऽपि चरणे यतसे न भिक्षो !,**
**तत् ते प्रतिग्रहभरो नरकार्थमेव ।।१३.९।।**

**धनवि.**–पुनश्चारित्राभावे प्रतिग्रहोऽपि नरकायैवेत्युपदिशति –

'नाजीविका' इति, हे यते ! तवाऽऽ**जीविका-प्रणयिनी-तनयादिचिन्ता** **ना**स्तीत्यन्वयः, अत्रा-ऽऽजीविका-उदरपूरणोपायः, प्रणयिनी च-कलत्रं, तनयाश्च-अङ्गजाः, ते आदौ येषां ते तथा तेषां चिन्ता-'को व्यापारः कर्त्तव्यः ? कथं वा पाणिग्रहणं कर्त्तव्य? कथं वा ते आज्ञायां रक्षणीयाश्च'इत्यादिका मानसी पीडा - नास्ति, अत्रादिपदाद् हट्ट-गृहा-ऽऽदिकरण-कुटुम्बभरण-पोषणा-ऽऽदिपरिग्रहः, **च** पुनः, **राजभी-**'राजा सर्वस्वं ग्रहीष्यति राजदेयं वा-दातव्यं च'इत्यादिका भीतिः नास्ति, **च** पुनर्, **भगवत्समयं**-जैनसिद्धान्तं **वेत्सि**-जानासि, **'नो राजभीर्धरसि चागमपुस्तकानि'**इति पाठे आगमपुस्तकानि-सिद्धान्तपुस्तकानि **धरसि**-धत्से, **तथापि**-एवं सत्यपि **शुद्धे चरणे**-निरतिचारचारित्रे **न यतसे**-न यत्नं कुरुषे इत्यर्थः; **तत्**-तस्मात् ते-तव भिक्षादिलक्षणः **प्रतिग्रहभरो**-दत्तस्वीकारभारो **नरकार्थमे**वावसेय इति ।।१३.९।।

**रत्न.**–अथ यतित्वे सुखं दर्शयति –

**नाजीविकाप्रणयिनी**..इति., व्याख्या-हे यते ! तवाजीविका-उदरभरणं, प्रणयिनी-स्त्री, तनयाः-पुत्राः, ते आदौ येषां ते आजीविका-प्रणयिनी-तनयादयः, तेषां चिन्ता नास्ति, आदिशब्देन भ्रात्रादिस्वजनग्रहणं, तथा राज्ञो भीः-भयं नास्ति,

सकलपरिग्रहमुक्तत्वात्, च पुनर्भगवतः-अर्हतः समयम्-आगमं वेत्सि-जानासि, तथा **आगमा**नां-जिनागमानां **पुस्तकानि धरसि-इति** पाठान्तरं, हे भिक्षो ! तथापि त्वं शुद्धे-निरतिचारे चरणे-चारित्रे न यतसे-न यत्नं करोषि, तत्-तर्हि ते-तव प्रतिग्रहस्य भरः-समूहो गुणवद्बुद्ध्या भक्तजनसमर्प्पिता-ऽशन-पान-वस्त्र-पात्रा-ऽऽदिको नरकाय-नरकार्थमेव वर्त्तत इति ।।१३.९।।

**[३४५] शास्त्रज्ञोऽपि धृतव्रतोऽपि गृहिणीपुत्रादिबन्धोज्झितो-**
**ऽप्यङ्गी यद् यतते प्रमादवशगो न प्रेत्यसौख्यश्रिये ।**
**तन्मोहद्विषतस्-त्रिलोकजयिनः काचित् परा दुष्टता,**
**बद्धायुष्कतया स वा नरपशुर्, नूनं गमी दुर्गतौ ।।१३.१०।।**

**धनवि.**–अथ चरणसामग्र्यां सत्यामपि तत्राप्रवृत्तौ विकल्पेन कारणद्वयं दर्शयन्नुपदिशति[1] –

'शास्त्रज्ञोऽपि' इति, **यच्छास्त्रज्ञोऽपि**-सिद्धान्तवेत्ताऽपि **धृतव्रतोऽपि**-प्रतिपन्नमहाव्रतोऽपि **गृहिणी-पुत्रादिबन्धोज्झितोऽपि**-कलत्र-पुत्र-पुत्रीप्रभृतिबन्धनमुक्तोऽपि, **प्रमादवशगो**-मद्यादिप्रमादपरवशं गतः, **अङ्गी**-प्राणी **प्रेत्यसौख्यश्रिये**-पारभविक-सौख्यसुखसंपदे **न यतते**-नोद्यमं कुरुते, **तत् त्रिलोकजयिनः**-त्रैलोक्यजयनशीलस्य **मोहद्विषतो**-मोहनीयकर्मवैरिणः, **काचिद्**-अनिर्वाच्या **दुष्टता**-दुष्कर्मकारिता, **परा**-सर्वोत्कृष्टा वर्त्तते इत्येकं, **वा**-अथवा **स नरपशुः**-नर एव पशुर्मनुष्यरूपेण गौरित्यर्थः, **बद्धायुष्कतया**-निकाचितनरकाद्यायुष्कतया, **नूनं**-निश्चितं **दुर्गतौ**-नरकादिदुर्योनौ **गमी**-गमनशीलोऽवसेय इति द्वितीयं कारणमिति ।।१३.१०।।

**रत्न.**–अथ जीवं प्रति मोहवैरिणो दुष्टत्वं ज्ञापयन्नाह –

**शास्त्रज्ञोऽपि**..इति., व्याख्या-यदङ्गी-प्राणी प्रमादवशवर्त्ती सन्, प्रेत्य-परभवे सौख्यश्रिये सुखसंपदे न यतते-न यत्नं करोति प्रेत्यसुखाय, धर्मकर्मणीत्यर्थः? किंलक्षणः ? - शास्त्राणि लौकिकानि लोकोत्तराणि च जानातीति शास्त्रज्ञः,

१. ज्ञापयति - मु० ।

अनेन बाह्यजडत्वं निरस्तं, पुनः कीदृशः ? - धृतानि व्रतानि-अहिंसादीनि पञ्च येन स धृतव्रतः, अत एव गृहिणी-स्त्री पुत्रो-नन्दनः आदिशब्दात् पुत्री-भ्रातृ-भगिन्यादिग्रहणं, गृहिणी च पुत्रश्च गृहिणी-पुत्रौ तावादी येषां ते गृहिणी-पुत्रादयस्ते एव बन्धा इव बन्धा-बन्धनानि तैरुज्झितः-त्यक्तः, अत्र'अपि'शब्दा विशेषार्थद्योतकाः, ततो मोह एव द्विषन्-वैरी, तस्य मोहद्विषतः, काचिदवाच्यस्वरूपा परा-प्रकृष्टा दुष्टता-[1]दुष्टत्वं वर्त्तते, किंभूतस्य ? - त्रिलोकजयिनः-स्वर्ग-मृत्य-पाताललोकजयिनः, वेति विशेषे, स नर एव पशुः-तिर्यङ् नररूपेण पशुरित्यर्थः नूनमिति संभावनायां, दुर्गतौ-नरकादौ गमी-गन्ता, कया ? - बद्धमायुर्येनार्थाद् र्दुगतेरेव स बद्धायुष्कस्तस्य भावो बद्धायुष्कता तया, अत्रार्थे मोहवराकः किं कुर्याद् ?, येनायुर्बद्धं तदन्यथा न भवतीत्यर्थः, स पुमान् **वा**[2]**नर**श्चासौ पशुश्च वानरपशुः, यथा **वानरपशुः** काञ्चन मनुष्यचेष्टां कुर्वन्नपि पशुरेव भवति तथाऽसावपि, शेषं तथैवेत्यपि व्याख्यानं कर्त्तव्यं, क्वचिद् **बन्धूज्झित** इति वा [प्रथमपादे] पाठः ।।१३.१०।।

**[३४६] उच्चारयस्यनुदिनं 'न करोमि सर्वं-**
**सावद्यमित्यसकृदेतदथो करोषि ।**
**नित्यं मृषोक्ति-जिनवञ्चनभारितात् तत्,**
**सावद्यतो नरकमेव विभावये ते ।।१३.११।।**

**धनवि.**—अथानन्तरमुक्तं 'धृतव्रतोऽपी'ति तेन धृतव्रतत्वे तदनाचरणे दोषं दर्शयन्नुपदिशति —

'उच्चारयसि' इति, हे आत्मन् ! त्वम्, **अनुदिनं**-प्रतिदिनं प्रतिक्रमणादि क्रियासमये **इति**-अमुना प्रकारेण, **उच्चारयसि**-भणसि, अत्र'उत्पूर्वस्य 'चरण् असंशये' [है.धा.१७४८] इत्यस्य चौरादिकस्य 'उच्चारयसीति साधुः, **इती**ति किं ? - हे भगवन् ! **अहं सर्वं सावद्यं**-सपापं कर्म **न करोमि, अथो**

१. दौष्ट्यं - मु० । २. धनवि.-टीकायां नरः समग्रतया पशुत्वेन विवृतः, गौः इति भावार्थे किंतु रत्नवि.टीकायां 'वानरपशुः' विवृतो, वानरपशोः मतुष्पवच्चेष्टा दृष्टा, अतोऽयमर्थोधिकसमुचितो भाति ।

इत्यनन्तरोक्त-भणनानन्तरम्, **असकृद्**-वारं वारम्, **एतत्** सावद्यकर्म **करोषि; तत्**-तस्मान्नित्यं-प्रतिदिनं **सावद्यतः**-सावद्यव्यापारतः, **ते**-तव **नरकमेव**-परभवे नरकगमनमहं **विभावये**-संभावयामि, **सावद्यतः** कथंभूतात् ? - **मृषोक्त्या**-अलीकवचनेन, **जिनवञ्चनेन**-'भगवन् ! सर्वं सावद्यं यावज्जीवं न करोमि'इति भणित्वा पुनः पुनस्तत्करणेन भगवद्वञ्चनं, तेन **भारिताद्**-भारः संजातोऽस्येति भारितस्-तस्मात् तथेति ।।१३.११।।

**रत्न.**–अथ द्रव्ययतेः प्रतिदिनं मृषावादित्वं सूचयन्नाह –

**उच्चारयस्यनुदिनम्**..इति. व्याख्या-हे वेषयते ! त्वं **लोकरञ्जनार्थ**मपि अनुदिनं प्रतिक्रमणं कुर्वन्, सर्वं सावद्यं-सपापं [१]कर्म न करोमीत्युच्चारयसि, चुरादेश्चर् धातोरयं प्रयोगः, आलापकपाठतः पठसीत्यर्थः, अथो अथार्थेऽव्ययम्, एतत् सावद्यं कर्म सचितारम्भादिकमसकृद्-वारंवारं करोषि, तदेव सावद्यं तत्सावद्यं तस्मात् तत्सावद्यत एव मृषाजल्पनसावद्यत इति, अन्यानि सावद्यानि दूरे आस्तामित्यर्थः, ते-तवाहं नरकं विभावये-संभावयामि, तत्सावद्यतः किंलक्षणात ? - नित्यम्-अहरहर्मृषोक्तिः-मृषा जल्पनं तया च [२]**जनवञ्चन**-लोकविप्रतारणं, तेन भारितात-पुष्टीकृतान्निचयीकृताद् वेति ।।१३.११।।

**[३४७] वेषोपदेशाद्युपधिप्रतारिता,**
**ददत्यभीष्टानृजवोऽधुना जनाः ।**
**भुङ्क्षे च शेषे च सुखं विचेष्टसे,**
**भवान्तरे ज्ञास्यसि तत्फलं पुनः ।।११.१२।।**

**धनवि.**–अथ **जिनविप्रतारणफलं** दर्शयित्वा **जनविप्रतारणफलं** दर्शयन्नुपदिशति-'वेषोपदेषादि' इति, हे आत्मन् ! **वेषोपदेशाद्युपधिप्रतारिताः**-वेषश्च-यतिलिङ्गम्, उपदेशश्च-दानादिषु प्रवृत्त्युत्साहजनकं वचः, तौ आदौ-प्रथमं येषां ते तथा, आदिपदाद् बाह्यसमिति-गुप्तिपालन-दर्शनादिपरिग्रहः, ते च ते उपधयश्च-

१. कर्म सचित्तारम्भादिकं, - मु० । २. 'जनवञ्चन' रत्नवि. टीका पाठान्तरः । - जिनस्तु सर्वज्ञः, केनापि न वञ्च्यते, तथा मृषोक्त्या जनस्तु सुतरां वावञ्च्यते, अतः 'जन'... इति पाठः सुष्ठु भाति ।

दम्भास्तैः प्रतारिता-वञ्चिता इत्यर्थः, **जना ऋजवः**-सरलाः, **अधुना**-सांप्रतं वर्त्तमानभवे **अभीष्टान्**-मनोवाञ्छितान् आहारोपध्यादीन् **ददति**, प्रयच्छन्तीत्यर्थः, **च** पुनस्त्वं **सुखं** यथा स्यात् तथा **भुङ्क्षे**-खादसि, **च** पुनः सुखं **शेषे**-स्वपिषि, सुखं **विचेष्टसे**-क्रीडसि; **तत्फलं पुनः**-जनवञ्चनजनितं दुःखानुभवफलं तु नरकादि-वेदनालक्षणं **भवान्तरे**-परभवे **ज्ञास्यसि**-अनुभविष्यसीति ।।१३.१२।।

**रत्न.**—पुनर्वेषमाश्रित्योपदिशति —

**वेषोपदेशाद्युपधि**..इति. व्याख्या-हे वेषधूर्त्त ! अधुना ऋजवो जनास्ते-तवाभीष्टानि-वाञ्छितानि शर्करापान-पयःपान-सुगन्धिशालि-निस्तुषमुद्ग-दालि-हैयंगवीन-जीवंतीशाक-प्रक्षिप्तमरिचचूर्ण-प्रलेपभोजन-तत्तद्देशोद्-भवांशुक-निजबालकपुत्रपुत्र्यादीनि वस्तूनि ददति, किंलक्षणाः ? - वेषश्चार्थोद्यतेरेवो-पदेशो-धर्मोपदेशः सुस्वरत्वेन **वसंतरा**गाद्यालापपूर्वकमित्यर्थः तावादी येषां ते वेषोपदेशादयः, आदिशब्देन बकवृत्त्येर्यापथगमनप्रवर्त्तनादिग्रहणं, ते एवोपधयः-छद्मानि, तैः प्रतारिताः सन्तः, तत एव च पुनस्, त्वं सुखं भुङ्क्षे शर्करागुडादीनि, च पुनः, शेषे-स्वपिषि बहूपधिमत्तया [1]विस्तीर्णायामपि, नवनीतवन्मृदुसंस्तारके इत्यर्थः, तथा सुखं यथा स्यात् तथा विचेष्टसे-व्यवहरसि, एतत् सुखशब्दप्रयोगेण व्यञ्जितं, पुनस्तेषां सुखं भोजन-शयन-विचेष्टनानां फलं भवान्तरे ज्ञास्यसि, यदा नरके तिस्रोऽपि गाढवेदनाः प्रत्यनुभविष्यसि तदेत्यर्थः, सांप्रतं प्रमादपतितस्य तव किं ब्रूम इति ? ।।१३.१२।।

**[३४८] आजीविकादिविविधार्त्तिभृशाऽनिशाऽऽर्त्ताः,**
**कृच्छ्रेण केऽपि महतैव सृजन्ति धर्मान् ।**
**तेभ्योऽपि निर्दय ! जिघृक्षसि सर्वमिष्टं,**
**नो संयमे च यतसे भविता कथं ही ? ।।१३.१३।।**

१. शय्यायामित्यर्थः, विपूर्वक स्तृ धातोः क्त प्रत्ययेन 'विस्तीर्णः शब्दः, तस्य विशेष्यार्थकत्वे 'विस्तीर्णा' इति' स्त्रीलिङ्गी शब्दः जातः, हिंदीभाषायामेवं 'बिस्तरा' तथा गुर्जरभाषायां 'पथारी' इति शब्दस्य मूले 'स्तृ' धातुरेवास्ति ।

**धनवि.**—अथानन्तरोक्तार्थमेव प्रकारान्तरेण विशेषतो दृढयति —

'आजीविकादि' इति, **केऽपि** महानुभावा जना, **महतैव कृच्छ्रेण**-गुरुतरकष्टेन **धर्मान्**-दानादिधर्मान् प्रतिक्रमण-पौषधादिधर्मान् **वा सृजन्ति**-कुर्वन्तीति, जनाः किंलक्षणाः ? - आजीविका-जीवनोपायः, सा आदौ यासां ता, आजीविकादयस्ताश्च ता विविधा-नानाप्रकाराश्चाऽऽजीविकादिविविधास्ताश्च ता अर्त्तयश्च-**आजीविकादि-विविधार्त्तयः**, ताभि**र्भृशम्**-अत्यर्थम्, **अनिशं** च-निरन्तरम्, **आर्त्ताः**-पीडिताः, हे **निर्दय !** - हे दयारहित ! **तेभ्योऽपि**-श्राद्धजनेभ्यः सर्वं वस्त्रपात्रादीष्टं वस्तु **जिघृक्षसि**-ग्रहीतुमिच्छसि, **च** पुनः, **संयमे**-चारित्रे सप्तदशभेदे **नो यतसे**-न यत्नं कुरुषे, अत्र तत इत्यध्याहार्यं, तेन ततः कारणाद्, **ही** इति खेदे, त्वं **कथं भविता ?** - केन प्रकारेण परभवे भविष्यसि ।।१३.१३।।

**रत्न.**—पुनरेतदेव प्रकारान्तरेणोपदिशति —

**आजीविकादि**..इति. व्याख्या-केऽपि श्रावकाः महता एव कृच्छ्रेण-कष्टेन, धर्मान्-दानप्रभृतीन् चतुरः, सृजन्ति-कुर्वन्ति, यतः किंलक्षणाः ? - आजीविका-उदरभरणमादौ यासां ताः आजीविकादयः, आदिशब्दाद् वस्त्र-पात्र-पुत्री-भगिनी-परिणयना-ऽऽदयो गृह्यन्ते, आजीविकादयश्च ता विविधार्त्तयश्च ताभिर्भृशम्-अत्यर्थमनिशं-निरन्तरम्, ऋताः-पीडिताः व्याकुला इत्यर्थः, हे निर्दय ! हे वेषधूर्त्तयते ! तेभ्योऽपि सर्वमिष्टं-वाञ्छितं जिघृक्षसि-ग्रहीतुमिच्छसि, च पुनस्, तेभ्यो गृहीतत्वाद् ऋणशुद्ध्यै संयमे-चारित्रे न यतसे, ही इति पश्चात्तापे, त्वं कथं भविता ? - भविष्णुः, परभवे इति पूर्वस्माद् ग्राह्यमिति ।।१३.१३।।

**[३४९] आराधितो वा गुणवान् स्वयं तरन्,**
**भवाब्धिमस्मानपि तारयिष्यति ।**
**श्रयन्ति ये त्वामिति भूरिभक्तिभिः,**
**फलं तवैषां च किमस्ति ? निर्गुण ! ।।१३.१४।।**

**धनवि.**—ननु श्राद्धेभ्योऽन्नादिग्रहणे श्राद्धा निस्तरिष्यन्ति, तन्निस्तरणजनितं

फलमस्माकमपि भविष्यतीत्यहङ्कारवतां वेषमात्रधारिणामहङ्कारतिरस्कारायाह—

'आराधितो वा' इति, अत्र **वा**शब्द एवकारार्थः संभावनार्थो वा, तेन-**आराधित** एव-आहारादिनोपचरित एव, **गुणवान्**-ज्ञानादिगुणवान् मुनिः, **स्वयम्**-आत्मना **भवाब्धिं**-संसारसागरं **तरन्**-संसारपारं गच्छन्-**अस्मानपि-आराधकान्, तारयिष्यति**-संसारपारं प्रापयिष्यति **इति**-एवं बुद्ध्या **ये** जना**स्त्वां भूरिभक्तिभिः**-बहुप्रकाराराधनैः **संश्रयन्ति**-सेवन्ते, एवं हे **निर्गुण !** - गुणवर्जित ! **एषाम्** आराधकानां **च** पुन**स्तव** निर्गुणाराध्यस्य **फलम्**-आयतिहितलक्षणं साध्यं **किमस्तीति ?** ।।१३.१४।।

**रत्न.**—अथ त्वमीदृशः सन् भवाब्धौ निमज्जसि, तदा परान् दीक्षादानादिना कथं निमज्जयसीत्याह —

**आराधितोऽयम्**..इति. व्याख्या-हे यतिवेषनट ! अयं ज्ञान-दर्शन-चारित्रैर्गुणवान् संसाराब्धिं स्वयं तरन्, आराधितः-पूजितः सन्, अस्मानपि तारयिष्यति इतिहेतोः, ये त्वां भूरिभक्तिभिः श्रयन्ति, हे निगुण ! - हे ज्ञानादिगुणरहित ! तव च पुनरेषामाश्रितानां-शिष्यत्वेन श्रावकत्वेन वा प्रपन्नानां फलं किमस्ति ?, विचारयेति गम्यं, अपि तु न किमपीत्यर्थः, ततस्त्वं निमग्नः परानपि निमज्जयसीति भावः ।।१३.१४।।

**[३५०] स्वयं प्रमादैर्निपतन् भवाम्बुधौ,**
**कथं स्वभक्तानपि तारयिष्यसि ? ।**
**प्रतारयन् स्वार्थमृजून् शिवार्थिनः,**
**स्वतोऽन्यतश्चेति विलुप्यसेऽङ्हसा ।।१३.१५।।**

**धनवि.**—अनन्तरं निर्गुणानां मुनीनां सगुणश्राद्धेभ्योऽन्नादिग्रहणे निष्फलत्वं पुण्योपार्जनलक्षणफलवर्जितत्वं च दर्शितम्; अथ तत्रैव प्रत्युत पापोपार्जनलक्षणं फलं दर्शयन्नुपदिशति —

'स्वयं प्रमादैर्' इति, **स्वयम्**-आत्मना, **प्रमादैः**-मद्यादिभिः **भवाम्बुधौ**-संसारसागरे

**निपतन्**-निमज्जन् **स्वभक्तान्**-स्वकीयाराधकान्, **अपि कथ ?** - केन प्रकारेण त्वं **तारयिष्यसि**-पारं प्रापयिष्यसि; **च** पुनः, **शिवार्थिनो**-मोक्षार्थिनः **ऋजून्**-सरलचित्तान् जनान्, **स्वार्थं**-स्वसुखार्थं स्वाहाराद्यर्थं वा, **इति**-अनया रीत्या **प्रतारयन्**-वञ्चयन् **स्वतः**-आत्मसकाशात् प्रमादाचरणैः, **च** पुनर्, **अन्यतः**-परतः शिवार्थिवञ्चनादिना जनितेन, **अंहसा**-पापेन **विलुप्यसे**-'वि लुप् मोहने' [है.धा.११३५] इति धातोः कर्मणि विलुप्यसे, इति साधुः, सद्गतिस्त्रीसङ्गायोग्यो भविष्यसीत्यर्थः ।।१३.१५।।

**रत्न.**—अथ परमोपकारनिष्णातः कविरेतदेवोपदिशति —

**स्वयं प्रमादैर्**..इति. व्याख्या-हे वेषविडम्बक ! स्वयं-आत्मना प्रमादैर्भवाम्बुधौ निपतन् स्वभक्तानपि त्वं कथं तारयसि ?, अपि तु न तारयिष्यसि, इति हेतोस्त्वं स्वतोऽन्यतपरेभ्यश्चांहसा-पापेन विलुप्यसे, त्वं किं कुर्वन् ? - प्रतारयन्-वञ्चयन्, [1]कान् ? - जनान्, किंभूतान् ? - ऋजून्-निष्कपटान्, पुनः किंभूतान् ? - शिवं-मोक्षमर्थयन्ते इत्येवं-शीलास्तान्, किमर्थं ? - स्वार्थं-स्वस्मै, आहारोपधिपुस्तकशय्यापुत्रादिग्रहणलक्षण-स्वार्थायेत्यर्थः ।।१३.१५।।

**[३५१] गृह्णासि शय्या-ऽऽहृति-पुस्तकोपधीन्,**
**सदा परेभ्यस्तपसस् त्वियं स्थितिः ।**
**तत् ते प्रमादाद् भरितात् प्रतिग्रहैः,**
**ऋणार्णमग्नस्य परत्र का गतिः ? ।।१३.१६।।**

**धनवि.**—उक्तार्थमेव प्रकारान्तरेण दर्शयन्नुपदिशति —

'गृह्णासि' इति, **शय्याहृति-पुस्तकोपधीन् सदा**-सर्वकालं **परेभ्यो**-भक्तेभ्यस्त्वं **गृह्णासि**-लासि, तत्र **शय्या** च-वसतिः, **आहृतिश्च**-आहारः, **पुस्तकं** च-ज्ञानोपकरणादि, **उपधिश्च**-वस्त्र-पात्रादिः, तान् **शय्याहृतिपुस्तकोपधीन्**-इति, **तु पुनस्तपसो** बाह्याभ्यन्तरभेदभिन्नस्येयं-तदकरणलक्षणा प्रत्यक्षोपलभ्यमाना **स्थितिः**-व्यवस्था वर्त्तते; **तत्**-तस्मात् कारणात् **ते**-तव **प्रतिग्रहैः**-अन्नादिग्रहणैर्**भरितात्**-

१. कान् ? - भक्तान् जनान् मु० ।

निचितात् **प्रमादाद्**-विषय-कषायादिहेतोः **ऋणार्णमग्नस्य परत्र**-परभवे **का ?** - दुष्टानिष्टत्वेनानिर्वाच्या **गतिः** कुगतिर्भविष्यति, तत्र ऋणं-देयं, तन्मध्ये ऋणं-देयमृणार्णम्-अतिशयेन ऋणं, तत्र मग्नस्य-ब्रुडत इत्यक्षरयोजना; भावार्थस्त्वयं-चारित्रं गृहीत्वा प्रमादसेवनमेकमृणम्, अपरं च तपःकरणमन्तरेण परेभ्यः शय्यादिप्रतिग्रहकरणमिति ।।१३.१६।।

**रत्न.—गृह्णासि**..इति. व्याख्या-हे वेषधूर्त्त ! त्वं परेभ्यो गृहस्थेभ्यः शय्या-ऽऽहृति-पुस्तकोपधीन्, सदा-अहरहर्गृह्णासि, आहृतिराहारः, शेषं सुगमं, तुरितिविशषे, तपसो धर्मस्येयं प्रत्यक्षतो दृश्यमाना स्थितिः-मर्यादा वर्त्तते, अतीव निकृष्टेत्यर्थः, तत्-तस्मात् कारणात् ते-तव प्रमादात्-प्रमादाचरणाद् ऋणस्य ऋणं ऋणाणं, ऋणोपरि ऋणमित्यर्थः, तत्र मग्नस्य ते-तव परत्र-परलोके का गतिश्चतसृणां गतीनां मध्ये इत्यर्थः, अथवा का गतिः-अवस्था भाविनीति, प्रमादात् कथंभूताद् ? - भरितात्-निचितात्, कैः ? - प्रतिग्रहैः-गृहस्थगृहीत-शय्या-ऽऽहृति-पुस्तकोपधि-प्रभृतिकैः, प्रमादवतः सतः प्रतिग्रहग्राहिणः, तत एव ऋणार्णमग्नस्य तव का गतिर्भाविनीति कथनेनाचार्यो दुष्टा गतिरेव भाविनीति सूचयतीति ।।१३.१६।।

**[३५२] न काऽपि सिद्धिर्न च तेऽतिशायि,**
**मुने ! क्रिया-योग-तपः-श्रुतादि ।**
**तथाऽप्यहङ्कारकदर्थितस् त्वं,**
**ख्यातीच्छया ताम्यसि, धिग् मुधा किम् ? ।।१३.१७।।**

**धनवि.—**नन्वहं गुणवान् मम प्रमादिनोऽप्यनन्तरोक्तप्रतिग्रह ऋणं न भवति, पठितब्राह्मणस्य पापघटप्रतिग्रहवत्, 'परत्र च गुणैरेवाहमनन्तं सुखं लभे' इत्यहङ्कार-कदर्थितमुपदेष्टुमाह —

'न काऽपि' इति, **हे मुने ! ते**-तव **कापि** ज्ञायमानाऽज्ञायमाना वा **सिद्धिः**-सुवर्णादिसिद्धिरणिमादिसिद्धिर्वा नास्ति-न वर्त्तते; **च** पुनस्ते-तव **क्रिया-योग-तपः-श्रुताद्यतिशायि**-सर्वेभ्योऽतिशयितं नास्ति, अत्र **क्रियाश्च**-सम्यक्-क्षमाश्रमण-वन्दनादिका, **योगश्च**-कालिकोत्कालिकश्रुतोद्देशसमुद्देशानुज्ञा-

द्यनुष्ठानपूर्वकं तपश्चरणं **तपश्च**-नमस्कार-पौरिष्यादि-षाण्मासिकपर्यन्तं कालं यावदाहारादित्यागः, **श्रुतं** च-अष्टप्रवचनमातृज्ञानाद् द्वादशाङ्गीज्ञानादिपर्यंतं ज्ञानं, तान्यादौ यस्य तत् तथेति । **तथापि**-सिद्ध्यभावेऽपि क्रियाद्यभावेऽपि च त्वम्, **अहङ्कारकदर्थितः**-अभिमानविडम्बितः **ख्यातीच्छया**-'अयं गुणवान्' इति प्रसिद्धिवाञ्छया, **किं** प्रश्ने, **मुधा**-वृथा **ताम्यसि ?** - खिद्यसे इत्यर्थः, किं मुधा स्तवार्चादि वाञ्छसीत्यर्थः; अत एव त्वां धिगस्त्विति, भावार्थस्तु तव सिद्ध्यादि-गुणरहितत्वेन निर्गुणस्य प्रतिग्रहऋणमग्नस्य कथमुद्धारो भवितेति ?, अहं गुणवानिति कोऽहङ्कार इति ? ।।१३.१७।।

**रत्न.**—अथ तादृगतिशायिगुणान् विना, अहङ्कारवत्तया ख्यातिं किं वाञ्छसीत्युपदिशति —

**न काऽपि सिद्धिः**..इति. व्याख्या-हे मुने ! त्वयि अष्टसिद्धीनां [1]मध्ये कापि सिद्धिर्नास्ति तथा क्रिया-शीतातपादिसहनरूपा, योगो मनो-वाक्-कायानां शुभप्रवृत्तिलक्षणः, तपो-बाह्याभ्यन्तरभेदाद् द्वैधं, श्रुतं-श्रुतज्ञानमेकादशाङ्गीलक्षणं, तान्यादौ येषां तत्,-क्रिया-योग-तपः च श्रुतादि, आदि शब्देनात्र जिनप्रवचनोन्नतिकारणं राजप्रतिबोधादयो गुणा गृह्यन्ते, किं लक्षणं ? - अतिशेते इत्येवंशीलमतिशायि, अतिशायिक्रियादिमतोऽहङ्कारोऽपि युक्तः, यथा पयस्विन्या धेन्वा लत्ताप्रहारोऽपि युक्त इति, तदपि नास्ति, तथाप्यहङ्कारेण कदर्थितस्त्वं ख्यातेः-प्रसिद्धेरिच्छया-वाञ्छया धिग् मुधा-वृथा किं ताम्यसि ? - किं दुःखितो भवसि, अपि तु मा ताम्य, धिगिति तिरस्कारार्थमव्ययम् ।।१३.१७।।

**[३५३] हीनोऽप्यरे भाग्यगुणैर्मुधाऽऽत्मन् !,**
**वाञ्छन् स्तवार्चाद्यनवाप्नुवांश्च ।**
**ईर्ष्यन् परेभ्यो लभसेऽतितापं-**
**मिहापि याता कुगतिं परत्र ।।१३.१८।।**

---

१. मध्ये न कापि सिद्धिरस्ति. मु० ।

**धनवि.**—अनन्तरं 'स्तवार्चावाञ्छा मुधा न कार्या'इत्युक्तम्' तदेव दृढयन् निष्फलस्तवाऽर्चावाञ्छायां त्रैकालिकं दोषं दर्शयन्नुपदिशति —

'हीनोप्यरे' इति, **अरे आत्मन् !**, त्वं **भाग्यगुणैः**-पुराचीर्णदानादिप्रभवसुकृतलक्षण-गुणै**र्हीनः**-शून्योऽपि **स्तवा-ऽर्चादि**-स्तुति-पूजादि **वाञ्छन्**-अभिलषन् **च** पुनस्,-तम्, **अनाप्नुवन्**-अलभमानश्च पुनस्,-तदनवाप्त्या, **परेभ्यः**-आत्मव्यतिरिक्तेभ्य **ईर्ष्यन्**-क्रोधं कुर्वन्, **इहापि**-इहलोकेऽप्यति-**तापम्**-अतिशयेन संतापं **लभसे**-प्राप्नोषि, पुनः **परत्र**-परभवे **कुगतिं**-दुर्गतिं **याता**-गन्तेति ।।१३.१८।।

**रत्न.**—एतदेव प्रकारान्तरेणाचष्टे-**हीनोऽप्यरे**...इति. व्याख्या-अरे इति निन्द्यसंबोधने अरे [1]**अभाग** ! अरे भाग्यरहित ! हे आत्मन् ! त्वं गुणैः-ज्ञान-दर्शन-चरणैर्हीनोऽपि रहितोऽपि मुधा स्तवार्चादि स्तोत्रपूजादि वाञ्छन्, च पुनस्,-तत्प्रति अनवाप्नुवन्-अलभमानः, परेभ्यो-गृहस्थेभ्यो गुणवत्साधुभ्यो वा ईर्ष्यन्-ईर्ष्यां [2]कुर्वाणः सन्, अतितापं-अधिकसंतापमतिकष्टं वा लभसे-प्राप्नोषि, कथम? - इहापि-इहलोकेऽपि, अपेर्डमरुकमणिन्यायेन योजनात् परत्रापि-परलोकेऽपि कुगतिं-नरकतिर्यग्लक्षणां याता-गन्तेति ।।१३.१८।।

**[३५४] गुणैर्विहीनोऽपि जना-ऽऽनति-स्तुति-,**
**प्रतिग्रहान् यन्मुदितः प्रतीच्छसि ।**
**लुलाय-गो-ऽश्वोष्ट्र-खरादिजन्मभिर्-**
**विना ततस्ते भविता न निष्क्रयः ।।१३.१९।।**

**धनवि.**—अथ गुणविहीनस्य स्तवा-ऽर्चा-प्रतिग्रहेषु क्रियमाणेषु केवलमुत्तरकाले-ऽहितलक्षणं फलं दर्शयन्नुपदिशति —

'गुणैर्' इति, **यद्**-यस्मात् त्वं **गुणैर्विहीनोऽपि**-ज्ञानादिसद्गुणरहितोऽपि, **जनेभ्य आनतिश्च**-प्रणामः, **स्तुतिश्च**-गुणोत्कीर्त्तनं, **प्रतिग्रहश्च**-आहारादिग्रहणं, ते तथा

१. धनवि.-टीका 'भाग्यगुणैः... सुकृतैः इति समस्तं व्याख्याति-रत्नवि.-टीका तु 'अभाग' इति आत्मानं संबुध्य, गुणैः ज्ञानादिभिर्दीनः इति व्यस्तं व्याख्याति, अतः 'अभागः' हे अभागिया ! इति भाषामां, मूलत्वेन स्वीकरोति, तेन '...रेऽभाग ! पाठः स्यात्, । २. कुर्वन् मु० ।

तान् **जना-ऽऽनति-स्तुति-प्रतिग्रहान्, मुदितो**-हृष्टः सन् **प्रतीच्छसि** "इच्छियं पडिच्छियमेयं", इति वचनादौत्सुक्येन गृह्णासि, **ततः** कारणात् **ते**-तव **लुलायश्च**-महिषो, **गौश्च**-बलीवर्द्दो-**ऽश्वश्च**-तुरङ्गमः, **उष्ट्रश्च**-दीर्घग्रीवः **खरश्च**-गर्दभः, ते **आदौ**-प्रथमं येषां ते तथा, आदिपदाद् भारवाहक-गज-मनुजादिपरिग्रहः, तेषां **जन्मानि**-अवतारास्तैर्**विना**-अन्तरेण **निष्क्रयो**-जना-ऽऽनत्यादेर्भाटकं मूल्यं वा **न भविता**-न भविष्यतीत्यर्थः ।।१३.१९।।

**रत्न.**—अथ सामान्यतः 'कुगतिं याता'इत्युक्तौ अप्रतिबुध्यमानं यतिं प्रति कुगतिव्यक्तिप्रतिपादनेन प्रतिबोधयति-**गुणैर्विहीनोऽपि**..इति. व्याख्या-हे वेषवञ्चक ! त्वं गुणैः ज्ञानादिजन्यैर्विहीनोऽपि सन्, जनेभ्यो-लोकेभ्यः आनतिः-आनमनं पञ्चाङ्गप्रणामः, स्तुतिः-'गोयम-सोहम-जंबू-पभवो इत्यादिरूपा, प्रतिग्रहः-अन्न-पान-वस्त्र-पात्र-पुस्तका-ऽऽदिकः, तान् प्रति यन्मुदितः सन्-हर्षमापन्नस्सन् प्रतीच्छसि-गृह्णासि, ततः-तस्मात् कारणात्, तेषां-जना-ऽऽनति-स्तुतिप्रतिग्रहाणां ते-तव निष्क्रयो-मूल्यं धनिकानां मूल्यार्पणमित्यर्थः न भविता-न भविष्यति चारित्रादिगुणै-र्हीनत्वात्, कथं ? - विना, कैः ? - **लुलायो**-महिषो जलाहरणादिक्रियासमर्थः, **गौः**-बलीवर्दः कृषिक्रियाकरण-भारोद्वहनेक्षुपीलन-तिला-ऽऽदिपीलन-शकटादिवहना-ऽऽरघट्टयन्त्रवहना-ऽऽदिसमर्थः तथा **अश्वः**-संग्रामादिकर्मसूपयोगी तथा **उष्ट्रो**-भारवहन-बहुक्रोशगमनसमर्थः, तथा **खरः**-जलानयन-मृत्तिकेष्टकानयन-क्रियाकारी **वागडा**-ऽऽदिदेशे बहूपयोगी, ते आदौ येषां ते लुलाय-गो-ऽश्वोष्ट्र-खरादयः, आदिशब्देना-ऽजोरभ्रादिग्रहणं, तेषां जन्मानि तैः, तेषां गृहे एतदुपयुक्तकर्मकरणात्[1] तन्निष्क्रयो भावीत्यर्थः ।।१३.१९।।

**[३५५] गुणेषु नोद्यच्छसि चेन्मुने ! ततः,**
**प्रगीयसे यैरपि वन्द्यसेऽर्च्यसे ।**
**जुगुप्सितां प्रेत्य गतिं गतोऽपि तैर्,**
**हसिष्यसे चा-ऽभिभविष्यसेऽपि वा ।।१३.२०।।**

१. कार्य० मु० ।

**धनवि.**—उक्तमेवार्थं प्रकारान्तरेण दर्शयन्नुपदिशति —

हे **मुने ! चेद्**-यदि, **गुणेषु**-ज्ञान-दर्शन-चारित्रलक्षणेषु, श्रमणगुणेषु **नोद्यच्छसि**-नोद्यमं कुरुषे, **ततो** गुणेषूद्यमाभावाद्, **यैरपि**-यैरेव श्राद्धादिभिस्त्वमिदानीं **प्रगीयसे** गीतादिभिः, **वन्द्यसे** शिरोनमनप्रभृतिभिः, **अर्च्यसे** सुवर्ण-पुष्पादिभिर्वस्त्राहारादिभिर्वा, अत्र 'अपि' शब्द एवकारार्थः, तेन, च पुनस्,-**तैरेव** श्राद्धादिभिः, **प्रेत्य**-भवान्तरे **जुगुप्सितां**-कुत्सनीयां **गतिं**-नरक-तिर्यग्लक्षणां **गतोऽपि**-प्राप्त एव **हसिष्यसे**-'त्वमस्मद्विनिर्मितस्तुति-नति-पूजादिभिर्गौरवफलं प्राप्त' इत्यादिवचनैर्हासविषयीकरिष्यसे, **वा**-अथवा तैरेव-**अभिभविष्यसे**-पूर्वोक्तवचनैस्ताडन-भारवाहनादिभिर्वा पराभवविषयीकरिष्यसे; अत्र 'अपि' शब्द एवकारार्थो ज्ञेय इति ।।१३.२०।।

**रत्न.**—अथ विपरीतफलप्रतिपादने गुणोद्यमं कुर्वित्युपदिशति —

**गुणेषु**..इति. व्याख्या-हे यते ! चेद्-यदि, गुणेषु-ज्ञान-दर्शन-चारित्रसम्बन्धिषु नोद्यच्छसि-नोद्यमं करोषि, ततः-तर्हि यैः श्राद्धलोकैस्त्वं प्रगीयसे गीतादीना, यैरपि वन्द्यसे स्तूयसे 'गोयम-सोहम' इत्यादिना तथा अर्च्यसे घुसृण-चन्दनविलेपनादिना, तैस्त्वं प्रत्ये-परभवे जुगुप्सितां गतिं-कुरूप-निःस्वताद्युपेतां गतिं गतोऽपि सन्-प्राप्तोऽपि सन्, हसिष्यसे-हासविषयीकारिष्यसे, च पुनस्,-तैरभिभविष्यसे, दासत्वाद्यापन्नः सन् कार्यकरणालसः सन् आक्रोश-यष्टि-[1]लेष्टु प्रहारादिनेत्यर्थः, अनया रीत्या त्वं तेषां निष्क्रयमर्प्पयिष्यसीति भावः ।।१३.२०।।

**[३५६] दान-मान-नुति-वन्दनापरैर्,**
**मोदसे निकृतिरञ्जितैर्जनैः ।**
**न त्ववैषि सुकृतस्य चेल्लवः,**
**कोऽपि सोऽपि तव लुट्यते हि तैः ।।१३.२१।।**

**धनवि.**—पुनस्तत्रैव दोषान्तरमाह —

१. यष्टि-लत्ता मु० ।

'दान-मान' इति, **दानं** च-वस्त्रा-ऽऽहारादिवितरणं, **मानं** च-सौवर्णपुष्पादिभिः पूजनमभ्युत्थानादिकं वा, **नुतिश्च**-'गोयमसोहम'..इत्यादिभिः, **स्तुति**र्वन्दना च-द्वादशावर्त्तादिका, तत्र **पराः** दान-मान-नुति-वन्दनापराः, **तैः** तथाभूतैर्जनैर्हेतुभूतैस्त्वं **मोदसे**-हृष्यसीति, किंभूतैर्जनैः?-**निकृतिरञ्जितैः**-निकृतिः-मलिनवेषवहनादिलक्षणा माया, तया रञ्जिताः-स्ववशीकृतास्तैः, तथा **तु** पुनस्,-त्वमिति **नावैषि**-न जानासि, अत्रेतीत्यध्याहार्यम्, **चेद्**-यदि **तव कोऽपि सुकृतस्य** पुण्यस्य **लवो**-लेशो वर्त्तते **सोऽपि** सुकृतस्य **लव**स्तैर्जनैर्'हि'इति निश्चितं लुट्यते-निःसत्ताकीक्रियते ।।१३.२१।।

**रत्न.**–अथ दान-माना-ऽऽदिकरणैस्तवेषदपि [1]सुकृतं ते गृह्णन्तीति ज्ञापयति–

**दान-मान**..इति. व्याख्या-हे मुने ! त्वमेवविधैर्जनैर्मोदसे-हर्षं प्राप्नोषि, किंलक्षणैः ? - **दान**मन्नवस्त्रपात्रादीनां, **मानः**-पूजा, **नुतिः**-स्तुतिर्वन्दना, वन्दनकादिदानेन द्वन्द्वसमासे, ताः तासु परा-आसक्ताास्, तैः, पुनः किंलक्षणैः ? - निकृत्या-मायया तव वेषोपदेशादिकया रञ्जिता-रागमापन्नास्तैः, पुनस्त्वं नावैषि-न जानासि, किमित्याह-चेद्-यदि तव सुकृतस्य-पुण्यस्य कोऽपि लवो वर्त्तते, सोऽपि तैर्हि निश्चतं लुट्यते-आच्छिद्य गृह्यते, अधिकार्जने का वार्त्ता ?, सोऽपि तव यातीत्यर्थः, **वृद्धिमिच्छतो मूलक्षितिर्जायते**, इति ।।१३.२१।।

**[३५७] भवेद् गुणी मुग्धकृतैर्नहि स्तवैर्-**
**न ख्याति-दाना-ऽर्चन-वन्दनादिभिः ।**
**विना गुणान् नो भवदुःखसंक्षयस्-**
**ततो गुणानर्जय, किं स्तवादिभिः ? ।।१३.२२।।**

**धनवि.**–अथानन्तरोक्तोपदेशनिर्गलितार्थं दर्शयन्नुपदिशति –

'भवेद् गुणी' इति, **मुग्धकृतैः**-भद्रकजननिष्पादितैः **स्तवैः**-आरोपितगुणप्रशंसनैर्, **नहि** कश्चित् पुमान् **गुणी**-गुणवान् भवेत्-स्यात्, च पुनः **ख्याति-दाना-ऽर्चन-**

१. सुकृतं यत् तत् ते - मु० ।

**वन्दनादिभिर्न** कश्चिद् गुणी भवेद्, अत्र चशब्दोऽध्याहार्यः, **आदि**पदादभ्युत्थाना-ऽऽसनदाना-ऽऽदिपरिग्रहः; यतः कारणाद् गुणान् ज्ञान-दर्शन-चारित्रान् **विना**-अन्तरेण, **भवदुःखसंक्षयः**-सांसारिक-दुःखविध्वंसो **न** भवेत्, **ततः** कारणाद् **गुणान्**-ज्ञानादीन्, **अर्जय**-समुपार्जय; **स्तवादिभिः**-स्तव-ख्याति-दाना-ऽर्चनादिभिः किं भवतीति ?, अपि तु किमपि न भवतीत्यर्थः ।।१३.२२।।

**रत्न.**—अथ तेन स्तवादीच्छां विहाय, गुणोपार्जनं कुर्वित्युपदिशति —

**भवेद् गुणी**..इति. व्याख्या-हे मुने ! मुग्धैः-अनभिज्ञैः ऋजुभिरित्यर्थः कृतैः स्तवैः करणै**र्हि** निश्चितं गुणी-गुणवान् **न**[1] भवेत्, तथा ख्यातिः-ज्ञानादिगुणैः प्रसिद्धिः, ख्याति-दाना-ऽर्चना-ऽऽदिभिरपि गृहस्थकृतैर्गुणी गुणवान् न भवेत्, तथा गुणान्-ज्ञान-दर्शन-चारित्रादिसत्कान् विना भवस्य-संसारस्य दुःखानां संक्षयः-सर्वथा निवृत्तिलक्षणो नो-नास्ति, ततो हेतोस्त्वं तान् गुणानर्जय-स्वनिष्ठान् कुरु, स्तवादिभिः किं ?, न किमपीत्यर्थः, आपातरम्यत्वादिति ।।१३.२२।।

**[३५८] अध्येषि शास्त्रं सदसद् विचित्रा-**
**ऽऽलापादिभिस् ताम्यसि वा समायैः ।**
**येषां जनानामिह रञ्जनाय,**
**भवान्तरे ते क्व ? मुने ! क्व ? च त्वम् ।।१३.२३।।**

**धनवि.**—नन्वनन्तरोक्तो दुःखसंक्षयो मा भवतु, जनरञ्जनमेव भवतु, इत्याशङ्कायामुपदिशति —

'अध्येषि' इति, हे **मुने ! इह** भवे **येषां जनानां रञ्जनाय सच्छास्त्रं**-धर्मशास्त्रम्, **असद्**-वात्स्यायनादिशास्त्रं व्याकरण-प्रमाण-ज्योतिःशास्त्रलक्षणं वा, **ग्रन्थमध्येषि**-पठसि **वा**-अथवा येषां जनानां रञ्जनाय **समायैः**-सकपटै**र्विचित्रा-ऽऽलापादिभिः**-नाना-प्रकारसंभाषणादिभिः, **ताम्यसि-खिद्यसि,** अत्र**'आदि'**पदाद्-धर्मलाभाशीर्वाददानादिपरिग्रहः, ते जना **भवान्तरे**-परभवे, **क्व ?** - कुत्र, **च**

१. धन वि.-टीकायां 'नहि' इत्येकं पदं कृत्वा विवृतम् ।

.पुनस् **त्व क्व** ? इत्यक्षरयोजना, भावार्थस्त्वयम्-येषां जनानां रञ्जनाय त्वमेतावदिह भवे करोषि, ते जनाः स्वकृतकर्मवशगाः परभवे कस्यामपि गतौ गमिष्यन्ति, त्वं च कस्यामपि गमिष्यसीति किं जनरञ्जनेनेति ।।१३.२३।।

**रत्न.**—अथ जनरञ्जनार्थं शास्त्रं पठसि, परं भवान्तरे ते जनाः क्व ?, त्वं च क्वेति ज्ञापयति —

**अध्येषि शास्त्रम्**..इति. व्याख्या-हे मुने ? त्वमिह लोके येषां जनानां [1]**रञ्जनाथ** रञ्जनाय **सत**-शोभनं जिनागमादि अवितथवाक्यत्वाद्, **असद्**-अशोभनं शाक्यादिविरचितं परस्पराहतवाक्यत्वात्, शास्त्रमध्येषि-पठसि, च पुनर्विचित्रालापादिभिः-नानाजल्पनादिभिस्त्वं ताम्यसि-काङ्क्षसि, किंलक्षणैः ? - समायैः-मायासहितैरावर्जकार्थैरित्यर्थः, येषां जनानां रञ्जनायेति पदमिहापि योज्यं, परं भवान्तरे ते जनाः क्व ?, च पुनस्त्वं क्व ?, **द्वौ क्वशब्दौ अत्यन्तासङ्गतिं ब्रूतः**, न जाने ते जनाः परत्र कां गतिं गामिनः ? त्वं च कां गतिं गमीति, तेन पररञ्जनप्रवृत्तो मा भव, स्वरञ्जनप्रवृत्तो भवेति भावः, अथवा **सदसद्विचित्रालापादिभि**रित्यखण्डं पदं, अर्थतस्तु सुगममिति न व्याख्यातमिति ।।१३.२३।।

**[३५९] परिग्रहं चेद् व्यजहा गृहादेस्-**
**तत् किं नु धर्मोपकृतिच्छलात् तम् ।**
**करोषि ? शय्योपधिपुस्तकादेर्-**
**गरोऽपि नामान्तरतोऽपि हन्ता ।।१३.२४।।**

**धनवि.**—ननु भवान्तरे जनरञ्जनं निष्फलम्, अपीहभवे धर्मोपकरणकारणं भवतु-इत्याशङ्कायामुपदिशति —

'परिग्रहम्' इति, **चेद्**-यदि **गृहादेः**-मन्दिरादेर्यं **परिग्रहं व्यजहाः**-अत्याक्षीरित्यर्थः, अत्र **'आदि'**पदाद् द्विपद-चतुष्पदा-ऽऽदिपरिग्रहः, व्यजहा [2]इति-विपूर्वस्य ओहांक् त्यागे [है.धा११३१] इत्यस्य ह्यस्तनीयुष्मदर्थैकवचने साधु, तत्-तदा, **नु** वितर्के

१. रञ्जनार्थम् इति पदं मूलत्वेनापि गृहीतम् । २. अत्र 'पदं' इति गम्यम्, पदस्य च नपुंलिङ्त्वेन 'साधु' नपु. जाति र्योग्या।

**धर्मोपकृतिच्छलाद्**-धर्मोपकरणमिषेण **शय्योपधिपुस्तकादेः**-वसति-वस्त्र-पात्र-ज्ञानोपकरणादेस्,-तं परिग्रहं, **किं करोषि ?, हि** यतः कारणाद्, **गरो**-विषं **नामान्तरतोऽपि**-नामान्तरेण प्रतिपादितोऽपि **हन्ता**-मारयिता भवतीति; भावार्थस्त्वयम्-यथा मधुरादिनामान्तरेण प्रतिपादितो गरो वत्सनागादिर्हन्ता भवति तथा मूर्च्छया शय्यादिपरिग्रहो धर्मोपकरणमितिनाम्नाऽपि हन्ता भवतीति ।।१३.२४।।

**रत्न.**—अथ गृहादिपरित्यागीभूय बहुधर्मोपकरणरक्षणेन परिग्रही किं भवसीत्याह-

**परिग्रहम्**..इति. व्याख्या-हे मुने ! [1]**त्व** गृहादेः परिग्रहं व्यजहाः-अत्याक्षीः. नुर्वितर्के, तत्-तर्हि धर्मोपकृतिच्छलाद्-धर्मोपकरणमिषतः शय्योपधिपुस्तकादेः, तं परिग्रहं किं करोषि ?, शय्योपधिपुस्तकाद्यपि अधिकं निरर्थकं च ममतया रक्षितं सत् परिग्रह एवेति भावः, तत्रार्थे दृष्टान्तमाह-हि यस्मात् कारणात्; नामान्तरतोऽपि गरो-विषं, हन्ता-मारकः, विषस्य गुड इत्यादिनामान्तरन्यासेऽपि विषं हन्त्येवेति, अधिकस्य ममत्वेन रक्षितस्य[2] शय्योपधिपुस्तकादेः परिग्रहत्वेन परिग्रहस्य गरोपमानं, सोऽपि त्वां दुर्गतौ प्रक्षेप्तेत्युपनयः ।।१३.२४।।

**[३६०] परिग्रहात् स्वीकृतधर्मसाधना-**
**ऽभिधानमात्रात् किमु मूढ ! तुष्यसि ? ।**
**न वेत्सि हेम्नाऽप्यतिभारिता तरी,**
**निमज्जयत्यङ्गिनमम्बुधौ द्रुतम् ।।१३.२५।।**

**धनवि.**—अथ धर्मोपकरणबाहुल्यलक्षणपरिग्रहोऽनिष्टफलाय न भवति-इत्याशङ्कायामुपदिशति —

'परिग्रहात्' इति, हे **मूढ ! स्वीकृतधर्मसाधना-ऽभिधानमात्रात् परिग्रहात्, किमु** प्रश्ने-किं **तुष्यसि ?**, अत्र **स्वीकृतम्**-अङ्गीकृतं, **धर्मसाधन**मित्य**भिधानमात्रं**-नाममात्रं यस्य स तथा तस्मात् तथेति परिग्रहस्य विशेषणं, त्वमिति **न वेत्सि ?**- न जानासि, अत्र **'इति'**इत्यध्याहार्यं, **हेम्नाऽपि**-सुवर्णेनाप्य**तिभारिता**-अतिशयेन

१. 'त्वं' इति पदं मूलत्वेनापि गृहीतम् । २. ०स्य परिग्रहस्य गरो० मु० ।

भारो जातोऽस्यां सा, **तरी**-यानपात्रविशेषः, **अम्बुधौ**-सागरे, **अङ्गिनं**-देहिनं, **द्रुतं**-शीघ्रं **निमज्जयति**-ब्रुडयतीत्यर्थः; भावार्थस्तु–यथा सुवर्णेनातिभारिता तरी, तत्रारूढं नरं निमज्जयति तथा धर्मोपकरणेनातिभारितो यतिः स्वं परञ्च निमज्जयतीति ।।१३.२५।।

**रत्न.**–एतदेव दृष्टान्तान्तरेण व्याख्याति-**परिग्रहात्**..इति. व्याख्या-हे मूढमुने! त्वं परिग्रहात्-परिग्रहं प्राप्येत्यर्थः, किमु ? - किं तुष्यसि-हर्षं प्राप्नोषि, अपि तु मा तुष्य, किंलक्षणात् ? - केवलमभिधाननं-**अभिधानमात्रं, स्वीकृतं धर्मसाधनं**-धर्मस्य-चारित्रधर्मस्य साधनं-कारणमित्यभिधानमात्रं यस्य स तस्मात्, एतदेव दृष्टान्तदानेन दृढयति-हे मूढ ! त्वं न वेत्सि ?, अपि तु वेत्स्येव, हेम्ना-सुवर्णेनाप्यतिभारिता तरी बेडा अङ्गिनं-प्राणिनमम्बुधौ-समुद्रे द्रुतं निमज्जयति-बोलयति, धर्मोपकरणाभिधानान्तराधिकपरिग्रहस्य सुवर्णातिभारिततर्युपमानमिति, तेन त्वामपि धर्मसाधनाभिधानोऽप्यतिपरिग्रहो निमज्जयिष्यत्वेवेति धर्मोपकरणमप्यधिकं मा कुर्वित्यर्थः ।।१३.२५।।

**[३६१] येंऽहःकषायकलिकर्मनिबन्धभाजनं,**
**स्युः पुस्तकादिभिरपीहितधर्मसाधनैः ।**
**तेषां रसायनवरैरपि सर्पदामयै -**
**रार्त्तात्मनां गदहृतेः सुखकृन्नु किं भवेत् ? ।।१३.२६।।**

**धनवि.**–अथ धर्मोपकरणानामपि मूर्च्छादिदोषेण परिग्रहरूपतां समर्थयन्नुपदिशति-

'येंऽहः' इति, **ये** यतयः, **ईहितो**-वाञ्छितो, **धर्मो**-ज्ञानादिस्तस्य **साधनैः**-हेतुभिः धर्मोपकरणैः, **पुस्तकादिभिर्, अङ्हश्च**-लिखनाऽऽरम्भादिजन्यं पापं, पुस्तकादिबन्धने कुन्थ्वादिजीवघातजनितं वा पातकं, **कषायाश्च**-मूर्च्छोत्पन्नाः क्रोध-मान-माया-लोभाः, **कलिश्च**-कषायप्रभवो वाग्वादः, **कर्माणि** च-कलहप्रभवाण्यशुभकर्माणि, तेषां निबन्धनं **निबन्धो**-बीजं, मूर्च्छा, तस्य **भाजनं**-पात्रं **स्युः**-भवेयुरित्यर्थः, **तेषां** यतीनां, **नु** वितर्के **सुखकृत् किं भवेत् ?**, अपि तु न किञ्चिदिति; अत्र **यथा** इत्यध्याहारो, यथा **आर्त्तात्मनां**-रोगपीडितानां

**रसायनवरैः**-गन्धक-पारद-सुवर्णभस्मादिभिर्, **अपि** हेतुभूतैः स्वपुराकृतकर्मदोषेण, **सर्पदामयैः**-प्रसरद्रोगै**र्गदहृतेः**-रोगहरणात् **सुखकृत्**-सुखसाधनं, **नु** इति वितर्के **किं भवेत्** ? - स्यादिति; भावार्थस्तु-यथा येषां रोगिणां रसायनैरपि रोगवृद्धिर्भवति, तेषां सुखकृत् किमपि न भवति तथा येषां व्रतिनां धर्मोपकरणैः पुस्तकादिभिरपि मूर्च्छया पापवृद्धिर्भवति, तेषां सुखकृत् किमपि न भवतीति ।।१३.२६।।

**रत्न.**—अथाधिकधर्मोपकरण[1]रक्षणनिषेधविषये नानायुक्त्योपदिशति —

**येंऽहः-कषाय**..इति. व्याख्या-ये मुनयः पुस्तकादिभिः, अंहः-पापं, कषायाः-क्रोधादयः, कलिः-कलहः, तैर्हेतुभिः कर्मणां-ज्ञानावरणीयादीनामष्टानां, आयुषो बन्धस्य कादाचित्कत्वात् सप्तानां वा, निबन्धो-बन्धनं गाढनिकाचनादिः, तस्य भाजनं-पात्रं स्युः-भवेयुः, किंलक्षणैः ? - ईहितं-वाञ्छितं धर्मस्य-चारित्रधर्मस्य साधनं येभ्यस्तैः, कथमपि तेषां मुनीनां सुखकृत्, नु किं भवेत् ?, सुखकृत् किञ्चनापि न स्यादित्यर्थः, तेषां किंलक्षणानाम् ? - आर्त्तः-पीडितः आत्मा येषां ते आर्त्तात्मानस्तेषां नित्यं दुःखितानामित्यर्थः, अत्र दृष्टान्तमाह-यथा सर्प्पन्तो-व्याप्तिमन्तः आमया-रोगा येभ्यस्तै रसायनवरैरपि कृत्वा आर्त्तात्मनां रोगिणां **गदहृतेः**-रोगापनयनात् सुखकृन्नु किं स्याद् ?, अथ भावार्थो लिख्यते-यथा सर्प्पदामयै रसायनवरैरप्यार्त्तात्मनां रोगिणां पीडितचेतसां सुखकृन्नु किं भवेत्?, शास्त्रे अन्य[2]जानां रोगाणां प्रतीकारो वर्त्तते, परमविधिकृतरसायनोत्थरोगाणां प्रतीकारो नास्तीत्युपनयो भाव्यः[3] ।।१३.२६।।

**[३६२] रक्षार्थं खलु संयमस्य गदिता, येऽर्था यतीनां जिनैर्-**
**वासः-पुस्तक-पात्रकप्रभृतयो धर्मोपकृत्यात्मकाः ।**
**मूर्च्छन् मोहवशात् त एव कुधियां संसारपाताय धिक्,**
**स्वं स्वस्यैव वधाय शस्त्रमधियां यद् दुष्प्रयुक्तं भवेत् ।।१३.२७।।**

**धनवि.**—अथ धर्मोपकरणेषु मूर्च्छाकरणे दोषमुपदर्शयन्नुपदिशति —

'रक्षार्थम्' इति, **खलु..इति-निश्चये ये धर्मोकृत्यात्मका**-धर्मोपकरणरूपा **वासः-**

१. 'राखवानो निषेध' इत्यर्थः । २. अन्नजा० मु० । ३. स्वबुद्ध्या गम्यः ।

**पुस्तक-पात्रकप्रभृतयोऽर्थाः**-पदार्था, **यतीनां**-साधूनां **संयमस्य**-चारित्रस्य **रक्षार्थं जिनैः**-भगवद्भिरर्हद्भिर्, **गदिताः**-प्ररूपिताः, तत्र **वासांसि** च-वस्त्राणि, **पुस्तकं** च-लिखितपत्रसञ्चयः, **पात्रकाणि**-भाजनानि, तानि प्रभृतयः-प्रमुखा येषां ते तथा, अत्र **प्रभृतिपदेन** [1]स्थपनिका-स्थापनाचार्यादिपरिग्रहः, **त एव** धर्मोपकरणलक्षणाः पदार्थाः, **कुधियां**-कुबुद्धीनां, **मूर्च्छन्मोहवशात् संसारपाताय**-भवपतनाय भवेयुरित्यन्वयः, अत्र **मूर्च्छन्**-समुच्छ्रायं गच्छन् 'मूर्च्छा मोह-समुच्छ्राययोः'[ ]इति वचनाद् वृद्धिं गच्छन् यो **मोहो**-मोहनीयं कर्म, तस्य **वशः**-परतन्त्रता, तस्मादित्यर्थः, **"मूर्च्छामोहवशाद्"**इति पाठे तु मूर्च्छा-धर्मोपकरणेषु गृद्धिः, तज्जनितो मोहो-मौढ्यं तद्वशादित्यर्थः, अत एव **धि**गस्तु, **यद्**-यस्माद्-**अधियां**-निर्बुद्धीनां **दुष्प्रयुक्तम्**-अकुशलतया व्यापारितं, **स्वं**-स्वकीयं **शस्त्रं**-प्रहरणं **स्वस्य**-आत्मनो **वधाय**-विनाशाय **भवेत्**-स्यादित्यर्थः ।।१३.२७।।

**रत्न.**–पुनरेतदेव विवृणोति –

**रक्षार्थं खलु**..इति. व्याख्या-येऽर्थाः, खलु-निश्चितं, जिनैः-अर्हद्भिर्यतीनां संयमस्य-चारित्रस्य, रक्षार्थं गदिता-उक्ताः, अर्थाः के ? के ? इत्याह-**वासो**-वस्त्रं, **पुस्तकम्**-आगमवर्णलिपिरूपं, **पात्रं**-पतद्ग्रहादि, प्रभृतिशब्दात् कम्बलादीनां ग्रहणं, किंलक्षणाः ? - धर्मस्य-चारित्रधर्मस्योपकृतिः-उपकरणमेवात्मा-स्वरूपं येषां ते, धिग् यथा स्यात् तथा, त एवार्था वासः-पुस्तक-प्रभृतयः कुधियां-कुबुद्धीनां संसारपाताय भवेयुः, कस्मात् ? - मूर्च्छन्-वृद्धिं गच्छन्, यो मोहस्तस्य वशस्तस्माद्, एतदेव दृष्टान्तेन निर्दिशति-यदिति दृष्टान्तोपन्यासे, अधियां बुद्धिवर्जितानां स्वं-स्वकीयं शस्त्रं दुष्प्रयुक्तं सत् स्वस्यैव-आत्मन एव वधाय भवेत्, अयं दृष्टान्तोऽत्रापि ज्ञेय इति ।।१३.२७।।

**[३६३] संयमोपकरणच्छलात् परान्,**
**भारयन् यदसि पुस्तकादिभिः ।**
**गो-खरोष्ट्र-महिषादिरूपभृत्-**
**तच्चिरं त्वमपि भारयिष्यसे ।।१३.२८।।**

१. ठवणी.

**धनवि.**—अथ मूर्च्छयाऽधिकधर्मोपकरणरक्षणे दोषं दर्शयन्नुपदिशति —

'संयमोपकरण' इति, हे आत्मन् ! **संयमोपकरणच्छलात्**-चारित्रोपकरणमिषाद्, **यद्**-यस्मात् पु**स्तकादिभिः, आदि**शब्दात् [1]स्थपनिकादिभिः, **परान्**-भारवाहकादीन् **भारयन्**-भारवहनविषयीकुर्वन्नसि, **तत्**-तस्मात् कारणात्, **त्वमपि** तैः परभवे, **गौ**श्च-बलीवर्दः, **खर**श्च-रासभः, **उष्ट्र**श्च-करभो, **महिष**श्च-कासरः, ते आदौ येषां ते तथा, तेषां रूपं बिभर्त्तीति **गो-खरोष्ट्र-महिषादिरूपभृद्, आदि**पदाद् गज-तुरगादिपरिग्रहः, **चिरं**-चिरकालं **भारयिष्यसे**-भारवहनविषयीकरिष्यसे ।।१३.२८।।

**रत्न.**—अथ दुष्प्रयुक्तत्वमेव वासःप्रभृतीनां ज्ञापयन्नाह —

**संयमोपकरणच्छलात्**..इति. व्याख्या-हे मुने ! त्वं परान् भारवाहक-गोत्रमेलका-ऽश्वतरादीन् पुस्तकादिभिः हेतुभिर्भारयन्नसि-भारितान् कुर्वन्नसि, कस्मात् ? - संयमस्योपकरणानि संयमोपकरणानि तेषां छलं-मिषं तस्माद्, इमानि संयमस्योपकरणानि सन्तीति वाहितानि शुद्ध्यन्तीति दम्भतः, तत्-ततो हेतोस्त्वमपि भारयिष्यसे, त्वं किंलक्षणः ? - गो-खरोष्ट्र- महिषादीनां पशूनां रूपं बिभर्षि(र्ति) इति गोखरोष्ट्रमहिषादिरूपभृत्, तेषामवतारं प्राप्तस्सन्नित्यर्थः, कथं ? - चिरं-चिरकालं, बहूनवतारान् यावदित्यर्थः, मनुष्यत्वापन्नैस्तैरेवेति कर्त्तृपदं गम्यम् ।।१३.२८।।

**[३६४] वस्त्र-पात्र-तनु-पुस्तकादिनः-**
**शोभया न खलु संयमस्य सा ।**
**आदिमा च ददते भवं परा,**
**मुक्तिमाश्रय तदिच्छयैकिकाम् ।।१३.२९।।**

**धनवि.**—नन्वधिकं संयमोपकरणमधिकशोभायै स्यात्-इत्याशङ्कायामुपदिशति—

'वस्त्र-पात्र' इति, **वस्त्र-पात्र-तनु-पुस्तकादिनः**-चीवर-भाजन-शरीर-पुस्तकादि-वस्तुनः, **शोभया**-विभूषया, **खलु** निश्चितं **संयमस्य सा** शोभा **न** भवति-न

१. ठवणी, स्थापनाचार्य ।

स्यादिति;, **आदिमा**-प्रथमा वस्त्र-पात्र-तनु-पुस्तकादिशोभा **भवं**-संसारं **ददते**-ददाति, अत्र 'ददि दाने' [है.धा.७२७] इत्यस्य ददते इति साधुः । **च** पुनः **परा**-द्वितीया संयमस्य शोभा, **मुक्तिं**-निर्वृतिं ददते; **तत्**-तस्माद्-**इच्छया**-यथेच्छं, **एकिकां**-एकैवैकिका, तां वस्त्रादिशोभां संयमशोभां वा एकामाश्रय-भजेति ।

अत्रोत्तरार्द्धे **'तां तदत्र परिहाय, संयमे किं यते ! न यतसे ? शिवार्थ्यपि"** पाठान्तरं, पूर्वोक्तव्यक्त्यर्थमाह-वस्त्र-पात्र-तनु-पुस्तकादिनः शोभा,–**तां तदत्र** इति हे **यते !** - हे मुने! **तत्**-तस्मात् कारणाद्-**अत्र**-इह भवे, **तां** वस्त्रादिशोभां, [परि] **विहाय**-त्यक्त्वा, **शिवार्थ्यपि**-मोक्षर्थ्यपि सन्, **संयमे**-चारित्रमार्गे, **किं न यतसे ?** किं-न यत्नं कुरुषे;, अत्र **'अपि'**शब्दो विरोधाभासद्योतकः, स च विरोधो - यो मोक्षार्थी भवति, स संयमे **यतते**, त्वं मोक्षार्थ्यपि सन् संयमे न यतसे इतीति [1]**चोत्तरार्द्धपाठ** इति स्पष्टम् ।।१३.२९।।

**रत्न.**–अथ वस्त्रादिभिः संयमस्य शोभा न भवतीत्याह –

**वस्त्र-पात्र-तनु-पुस्तकादिन**.इति. व्याख्या-हे मुने ! वस्त्र-पात्र-तनु-पुस्तकादिनः सम्बन्धिन्या शोभया कृत्वा, खलु-निश्चितं, सा शोभा संयमस्य-चारित्रस्य नास्ति, किंतु अशोभैव वर्त्तते, अत्युद्भटवेषधरणमशोभैवेत्यर्थः, अमुमेवार्थं दृढयति-वेति विशेषे, आदिमा वस्त्र-पात्र-तनु-पुस्तकादिसम्बन्धिनी शोभा भवं-संसारं ददते, परा-अन्या संयमस्य शोभा अष्टप्रवचनमातृपालनादिका, मुक्तिं-मोक्षं ददते, **तत्** कारणात्, **इच्छया एकिकां**-द्वयोर्मध्ये एकां, मुने ! त्वं भज-श्रय, यदि भवमिच्छसि तदा प्रथमां भज, यदि च मुक्तिमिच्छसि तदाऽन्यां भजेत्यर्थः,

**तां तदत्र**...शिवार्थ्यपि इति चोत्तरार्द्धपाठः, पूर्वार्द्धं तदेव, तेन व्याख्यापि तथैव, **तत्** कारणात् **तां** वस्त्र-पात्र-तनु-पुस्तकादिनः शोभां, **परिहाय**-त्यक्त्वा, हे **यते !** - संयत ! **अत्र संयमे**ऽर्हत्प्ररूपिते **किं न यतसे ?**, किंलक्षणः ? - शिवं-मोक्षमर्थयसे इत्येवंशीलः **शिवार्थी**, कथम् ? - अपि, इत्युत्तरार्द्ध-पाठान्तरव्याख्या ।।१३.२९।।

---

१. 'वो०' मु० ।

**[३६५] शीता-ऽऽतपा-ऽऽद्यान् न मनागपीह,**
**परीषहाँश्चेत् क्षमसे [१]विषोढुम् ।**
**कथं ततो नारक-गर्भवास-**
**दुःखानि सोढासि भवान्तरे त्वम् ! ।।१३.३०।।**

**धनवि.**—नमु वस्त्रादिबाहुल्यं शोभार्थं मा भवतु, शीता-ऽऽतपादिदुःसहपरीषह-निवारणार्थं भवतु-इत्याशङ्कायामुपदिशति —

'शीता-ऽऽतपाद्यान्' इति, **चेद्**-यदि, इहभवे **मनागपि**-किञ्चनापि **शीता-ऽऽतपा-ऽऽद्यान् परीषहान्** "खुहा-पिवासा" [ ] आदिगाथा-सूचितान् **विषोढुं**-विशेषेण क्षन्तुं **न क्षमसे**-न समर्थो भवसि, **ततः** तदा **भवान्तरे**-परभवे, **नारक-गर्भवासदुःखानि**-नरक-जननीजठराभ्यन्तरस्थितिदुःखानि कथं ? - केन प्रकारेण, त्वं **सोढासि**-क्षन्तासि, सहिष्यसीत्यर्थः ।।१३.३०।।

**रत्न.**—अथ परीषहसहनमाश्रित्योपदिशति —

**शीता-ऽऽतपा-ऽऽद्यान्**..इति. व्याख्या-हे मुने ! त्वं **इह प्रवचने संयमे वा** चेद्-यदि मनागपि परीषहान् द्वाविंशतिं प्रति **विषोढुं**-सहनाय न क्षमसे-न शक्तो भवसि, परीषहान् कान् ? - शीतातपाद्यान्-शीतातपप्रमुखान् ततः-तर्हि नारकस्य तथा गर्भवासस्य च दुःखानि प्रति भवान्तरे त्वं कथं सोढासि ? - सहिष्यसि, इहत्यशीतातपेभ्यो [२]बहुगुणत्वात् तेषां, तत एव परीसहदुःखानां सहनमेव वरं मन्यस्वेति ।।१३.३०।।

**[३६६] मुने ! न किं नश्वरमस्वदेह-**
**मृत्पिण्डमेनं सुतपो-व्रताद्यैः ।**
**निपीड्य भीतीर्भवदुःखराशेर्-**
**हित्वाऽऽत्मसाच्छैवसुखं करोषि ? ।।१३.३१।।**

---

१. द्वयोरपि टीकयोः प्रतिषु मूलत्वेन, टीकायां च 'विसोढुं' पाठः । २. 'अनेक गणुं होवाथी ।

**धनवि.**—नन्वेवं परीषहसहने स्वशरीरदौर्बल्यं स्यादिति कः परीषहसहनादौ प्रवर्त्तते ? इत्याशङ्कायामाह —

'मुने ! न किं' इति, हे **मुने !** - हे साधो ! **एनं** प्रत्यक्षं, **नश्वरं**-विनाशशीलम्, **अस्वः**-अनात्मीयश्चासौ परभवे सहगमनाभावात् **देहमृत्पिण्डश्च**-शरीररूपमृत्तिकासङ्घातः, तम्-**अस्वदेहमृत्पिण्डं, निपीड्य**-नितरां पीडाविषयं विधाय, **भवदुःखराशेः**-सांसारिकदुःखसमूहाद् **भीतीः**-भयानि **हित्वा**-त्यक्त्वा **शैवसुखं**-मोक्षसम्बन्धि सुखम्, **आत्मसाद्**-आत्मायत्तं **किं न करोषि ?**, कैर्हेतुभूतैः ? - **सुतपांसि** च-षष्ठाष्टमादीनि, **व्रतानि** च-हिंसाविरमणादीनि, तानि **आद्यानि**-प्रथमानि येषां ते तथा तैः **सुतपो-व्रताद्यैः**, आचारैरितियावद्, अत्र **'आद्य'**पदेनोपसर्ग-परीषहादिसहनपरिग्रहः ।।१३.३१।।

**रत्न.**—अथ मुनिं प्रति तपो-व्रतादिषूद्यमयति —

**मुने ! न किम्**..इति. व्याख्या-हे मुने ! त्वं शिवस्येदं शैवं तच्च सुखं च शैवसुखं प्रति, आत्मसाद्-आत्मायत्तं किं न करोषि ?, अपि तु कुरु, किं कृत्वा ? - निपीड्य-पीडयित्वा, कं ? - देह एव मृत्पिण्डः, स्वः-स्वकीयः, न स्वः अस्वः, अस्वश्चासौ देहमृत्पिण्डश्च-अस्वदेहमृत्पिण्डः, तं, एनं प्रत्यक्षतो दृश्यमानं, कीदृशं ? - नश्वरं-नाशशीलमत एवास्वं, यः कश्चन स्वामिनं मुक्त्वा याति, स स्वः कथमुच्यते ? इति अस्वेति विशेषणं युक्तम्, कैः ?-तपश्च व्रतानि च तपो-व्रतानि, सु-सुष्ठु च तपो-व्रतानि च सुतपो-व्रतानि. सुतपो-व्रतानि आद्यानि येषु तैः, जिनाज्ञासंयुक्ततपो-व्रताद्यैरित्यर्थः, सुशब्दग्रहणेना-ऽज्ञानकष्टेन शरीरपीडनं निरस्तं, पुनः किं कृत्वा ? - त्यक्त्वा, काः प्रति ? - भीतीः-भयानि प्रति, कस्य ? - भवदुःखराशेः-संसारदुःखसमूहस्येति ।।१३.३१।।

**[३६७] यदत्र कष्टं चरणस्य पालने,**
**परत्र तिर्यग्-नरकेषु यत् पुनः ।**
**तयोर्मिथः सप्रतिपक्षता स्थिता,**
**विशेषदृष्ट्याऽन्यतरज्जहीहि तत् ।।१३.३२।।**

**धनवि.**—नन्वनन्तरं 'सुतपो-व्रता-ऽऽद्यैर्देहपीडनं विधेयम्'इत्युक्तम्, तच्चातीव दुस्सहमनिष्टं चेति कस्तत्र प्रवर्त्तत ? इत्याशङ्कायामुपदिशति —

'यदत्र कष्टम्' इति, **अत्र**-इह भवे, **चरणस्य**-चारित्रस्य **पालने**-आचरणे, **यत् कष्टं**-पीडोद्भवः, **पुनः परत्र**-परभवे **तिर्यग्-नरकेषु**-तिर्यग्-नरकभवेषु यत् कष्टं भवति, **तयोः**-चारित्र-व्रतपालनकष्ट-तिर्यग्-नरकभवभाविकष्टयो**र्मिथः**-परस्परं **सप्रतिपक्षता**-यत्र जीवे ऐहिकचारित्रपालनकष्टसहनं, तत्र पारभविककष्टसहनं न भवति, यत्र जीवे पारभविककष्टसहनं, तत्रैहिकचारित्रपालनकष्टं न भवतीतिरूपा विरोधिता स्थिता; **तत्**-तस्मात् कारणाद् **विशेषदृष्ट्या**-गौरव-लाघवपर्यालोचनरूपया विचार्य, **अन्यतरत्**-तयोरन्यतरदैहिकं पारभविकं वा कष्टं **जहीहि** त्यजेत्यर्थः ।।१३.३२।।

**रत्न.**—एतदेव प्रकारान्तरेणाचष्टे —

**यदत्र कष्टम्**..इति. व्याख्या-हे मुने ! अत्र जिनप्रवचने चरणस्य-चारित्रस्य पालने, यत् कष्टं वर्त्तते, च पुनर्, यत् परभवे-तिर्यग्-नरकेषु कष्टं वर्त्तते, तयोर्मिथः-परस्परं सप्रतिपक्षता स्थिताऽस्ति, यदि प्रथमं कष्टं तदा परं कष्टं न, यदि परं कष्टं, तदा प्रथमं कष्टं नेति सप्रतिपक्षतेत्यर्थः, तत्-तस्मात् कारणाद् विशेषदृष्ट्या-विशेषदर्शनेन, तयोर्मध्ये एकम्-अन्यरत् प्रति जहीहि-त्यजेत्यर्थः ।।१३.३२।।

**[३६८] शमत्र यद्-बिन्दुरिव प्रमादजं,**
**परत्र यच्चाब्धिरिव द्यु-मुक्तिगम् ।**
**यतोर्मिथः सप्रतिपक्षता स्थिता,**
**विशषदृष्ट्याऽन्तरद् गृहाण तत् ।।१३.३३।।**

**धनवि.**—अथ परीषहासहने ऐहिकसुखस्य, परीषहसहने च पारलौकिकसुखस्य च परस्परं विशेषमुपदर्शयन्नुपदिशति —

'शमत्र' इति, **अत्र**-इह भवे **यत् प्रमादजं**-विषयादिजनितं, **श**-सुखं **बिन्दुरिव**-

जलकण इव वर्त्तते, **च** पुनर्, **यत् परत्र**-परभवे **द्यु-मुक्तिगं**-स्वर्गा-ऽपवर्गगं **शं**-सुखम्, **अब्धिरिव**-समुद्र इव वर्त्तते, **तयोः**-प्रमादजसुख-स्वर्गापवर्गसुखयो**र्मिथः**-परस्परं **सप्रतिपक्षता,** यत्र प्रमादजं सुखं, न तत्र स्वर्गापवर्गगं सुखं, यत्र स्वर्गापवर्गगं सुखं, न तत्र च प्रमादजं सुखमितिरूपा विरोधिता **स्थिते**ति, **तत्**-तस्मात् कारणात्, **विशेषदृष्ट्या**-विवेकदृष्ट्या **अन्यतरत्**-प्रमादजं सुखं स्वर्गापवर्गगं वा सुखं **गृहाण**-स्वीकुर्वित्यर्थः ।।१३.३३।।

**रत्न.**—अथ दुःखयोर्हेयत्वेन जहीहीत्युक्तं, ततो वैपरीत्यदर्शनेन सुखयोरुपादेयतां प्रतिपादयन्नाह —

**शमत्र यद्बिन्दुव**..इति. व्याख्या-हे मुने ! अत्र जिनप्रवचनसंयमे यत् प्रमादजं शर्म-सुखं, तत् बिन्दुरिव वर्त्तते, तथा संयमपालनतः प्रमादपरित्यागतश्च परत्र-परभवे यच्छर्म सुखं तदब्धिरिव वर्त्तते, शर्म किंलक्षणं? - द्यु-मुक्तिगं-स्वर्ग-शिवसम्बन्धि, एतेन चारित्रस्य स्वर्ग-मुक्तिलक्षणे द्वे फले एवमुक्ते, अप्राप्तक्षपक-श्रेणिचारित्रं स्वर्गफलं प्राप्तक्षपकश्रेणिचारित्रं मुक्तिफलमित्यर्थः, तयोः शर्मणोर्मिथः सप्रतिपक्षता स्थिता, तद्धेतोर्विशेषदृष्ट्या अन्यतरद् गृहाणेति व्याख्या पूर्ववत् ।।१३.३३।।

**[३६९] नियन्त्रणा या चरणेऽत्र तिर्यक्-**
**स्त्रीगर्भ-कुम्भीनरकेषु या च ।**
**तयोर्मिथः सप्रतिपक्षभावाद्-**
**विशेषदृष्ट्याऽन्यतरां गृहाण ।।१३.३४।।**

**धनवि.**—अथोक्तार्थमेव प्रकारान्तरेणोपदिशति-**अथवा-अथवे**ति स्पष्टं, तदेव दर्शयति —

'नियन्त्रणा' इति, **अत्र**-इह भवे, **चरणे**-चारित्रे, **या नियन्त्रणा**-गाढव्रतबन्धनेनावस्थानरूपा वर्त्तते, **च** पुन**र्या** परभवे तिर्यञ्चो-गो-महिष्यादयः, स्त्रीगर्भश्च-स्त्रीजठरान्तस्तदङ्गजतया वसनं कुम्भीनरकाश्च-कुम्भीपाकोपलक्षिता

नरकावासास्ते तथा तेषु **तिर्यक्-स्त्रीगर्भ-कुम्भीनरकेषु** नियन्त्रणा वर्त्तते **तयो**र्नियन्त्रणयोर्मिथः-**परस्परं सप्रतिपक्षभावात्**-प्रतिपक्षतासाहित्याद् विरोधादित्यर्थः **विशेषदृष्ट्या**-विवेकदृष्ट्या, **अन्यतरां**-चरणनियन्त्रणां तिर्यगादिनियन्त्रणां वा **गृहाणेति** ।।२१५।।३४।।

**रत्न.**—सूत्रे अथवेतिकथनेन एतदेव भङ्ग्यन्तरेणाह —

**नियन्त्रणा य**..इति. व्याख्या-हे मुने ! अत्र जिनप्रवचनस्य चरणे[1]-चारित्रे चारित्रस्य पालने या नियन्त्रणा गुरुपारतन्त्र्यादिभवा वर्त्तते, च पुनस्,-तिर्यञ्चश्च स्त्रीगर्भश्च तथाऽतीव संकटमुखानि मृन्मयभाजनानि कुम्भ्य उच्यन्ते इति कुम्भ्याकारा नरकाः कुम्भीनरकाः ते च, तेषु तिर्यक्-स्त्रीगर्भ-कुम्भीनरकेषु या नियन्त्रणा वर्त्तते तयोर्नियन्त्रणयोर्मिथः सप्रतिपक्षभावाद् विशेषदृष्ट्या, अनन्तरां-तयोर्मध्ये त्वमेकां गृहाणेति सुगमं, तिर्यग्ग्रहणेन सूक्ष्मबादरनिगोदयोरपि नियन्त्रणा गृहीता ।।१३.३४।।

**[३७०] सह तपो-यम-संयमयन्त्रणां,**
**स्ववशतासहने हि गुणो महान् ।**
**परवशस्त्वतिभूरि सहिष्यसे,**
**न च गुणं बहुमाप्स्यसि कञ्चन ।।१३.३५।।**

**धनवि.**—माध्यस्थ्येन परीषहसहनमुपदिश्य, विशेषत उपदिशति —

'सह तपो-यम' इति, **तपांसि** च-बाह्याभ्यन्तरभेदभिन्नानि तपःकर्माणि, **यमा**श्च-व्रतानि, **संयमाश्च**-सप्तदशभेदाः, तैः, **यन्त्रणां**-बन्धनमिति **सह**-क्षमस्वेति, **हि** यतः कारणात **स्ववशतासहने**-स्वायत्ततया सहने **महान्**-मोक्षप्राप्तिलक्षणो **गुण**-उपकारो भवतीत्यन्वयः, **महान् गुण** इति स्थाने **'शिवं गुण'** इति पाठे **शिवं**-मोक्षः, शेषं पूर्ववत्, **तु** पुनः, **परवशः**-परायत्तः सन्, एकेन्द्रियादिष्वकामनिर्जरया, **अतिभूरि**-अतिशयेन प्रचुरं **सहिष्यसे, च** पुनः **कञ्चन**-कमपि **बहुं**-मनश्चिन्तितं

१. चरणे-चारित्रे या नि० - मु० ।

**गुणं**-मोक्षप्राप्तिलक्षणमुपकारं **नाप्स्यसि** ।।१३.३५।।

**रत्न.**—अथ परवशतया सहनतः स्ववशतया सहनस्य सुन्दरतां दर्शयति—

**सह तपो-यम-संयमयन्त्रणाम्**..इति. व्याख्या-हे मुने ! तपसां-चतुर्थादीनां, यमानां-विकृतिप्रत्याख्यानादिनियमानां, संयमः-पंचमहाव्रतरूपः, तेषां यन्त्रणां सह-क्षमस्व, हि यस्माद्धेतोः, स्ववशतया सहने सति महान् गुणो वर्त्तते, अथवा (पाठान्तरं) **शिवं** मोक्ष एव **गुणो** वर्त्तते, तुरिति विशेषे, त्वं परेषां वशः-अधीनः सन्नतिभूरि-अतिघनं यथा स्यात् तथा सहिष्यसि, च पुनः कञ्चन बहुं गुणं नाप्स्यसि-न लप्स्यसे ।।१३.३५।।

**[३७१] अणीयसा साम्यनियन्त्रणाभुवा,**
**मुन!-ऽत्र कष्टेन चरित्रजेन च ।**
**यदि क्षयो दुर्गति-गर्भवासगा-**
**ऽसुखाऽऽवलेस्तत् किमवापि नार्थितम् ? ।।१३.३६।।**

**धनवि.**—अथ परीषहातिसहने एव शुभफलं दर्शयन्नुपदिशति —

'अणीयसा' इति, हे **मुने ! अत्र**-इह भवे, अतिशयेन अणु **अणीय**स्तेन **अणीयसा**-अत्यल्पेनेत्यर्थः **साम्यनियन्त्रणाभुवा कष्टेन च** पुनश्,-**चारित्रजेन-अणीयसा कष्टेन** परीषहसहनलक्षणेन **यदि**-चेद्-**दुर्गतिगर्भवासगाऽसुखावलेः क्षयो**-विनाशो **भवेदि**ति, साम्यनियन्त्रणाभुवा-समतालक्षण-मनोनिरोधलक्षणनियन्त्रणाजन्येनेत्यर्थः, दुर्गति-गर्भवासगा-ऽसुखा-ऽऽवलेः-**दुर्गति**श्च-तिर्यग्-नरकगतिलक्षणा, **गर्भवास**श्च-स्त्रीकुक्षौ गर्भतया स्थितिः, तद्गता या **असुखानां**-दुःखानाम्, **आवलिः**-श्रेणिस्तस्या इत्यर्थः, तत्-तदाऽनन्तरोक्तेनाणीयसा कष्टेन **किमर्थितं**-वाञ्छितं **ना-ऽवापि**-न प्राप्तम् ?, अपि तु सर्वं प्राप्तमित्यर्थः ।।१३.३६।।

**रत्न.**—पुनः प्रकारान्तरेणैतदेवाचष्टे —

**अणीयसा साम्यनियन्त्रणाभुवा**..इति. व्याख्या-हे मुने ! अत्र भवे, अतिशयेनाणु-अल्पमणीयः, तेनाणीयसा कष्टेन दुर्गति-गर्भवासगा-ऽसुखा-ऽऽवलेः-दुर्गति-गर्भवासग-

दुःखावलेरित्यर्थः क्षयः-आत्यन्तिकी निवृत्तिलक्षणो वर्त्तते, कष्टेन किंलक्षणेन ? - साम्यं-समता तदेव नियन्त्रणा, अथवा तेन नियन्त्रणा तया भुवा-जनितेन, पुनः कीदृशेन ? - चरित्रात्-चारित्रपालनाज्जातं तेन, तत्-तर्हि अर्थितं-कामितं त्वया किं ना-ऽवापि ? - न प्राप्तं, अपि तु सर्वमप्यवापीति ।।१३.३६।।

**[३७२] त्यज स्पृहां स्वः-शिवशर्मलाभे,**
**स्वीकृत्य तिर्यग्-नरकादिदुःखम् ।**
**सुखाणुभिश्चेद् विषयादिजातैः,**
**संतोष्यसे संयमकष्टभीरुः ।।१३.३७।।**

**धनवि.**—अथ परीषहसहनाभावेऽशुभफलमुपदर्शयन्नुपदिशति —

'त्यज स्पृहाम्' इति, तदा **तिर्यग्-नरकादिदुःखं स्वीकृत्य. स्वः-शिवशर्मलाभे**-स्वर्गा-ऽपवर्गसुखप्राप्तौ **स्पृहाम्**-अभिलाषं **त्यज**-मुञ्च, अत्र तिर्यञ्चश्च-जलचर-स्थलचर-खेचरभेदा मत्स्य-श्वान-काकादयः, नरकाश्च-नारकः, ते आदौ येषां ते तिर्यग्-नरकादयः, तेषां **दुःखं, आदि**पदात् मनुष्यभवगतगर्भवास-जरा-मरणादिपरिग्रहः, **चेद्**-यदि **संयमकष्टभीरुः** सन्-चारित्रपालनजनितकष्टभीतः सन् त्वं, **विषयादिजातैः**-विषय-कषायप्रभवैः **सुखाणुभिः**-सुखलेशैः, **संतोष्यसे**-हृष्यसे इति कर्मोक्तौ ।।१३.३७।।

**रत्न.**—अथाचार्यः प्रमादिनं यतिं दृष्ट्वा असूयावचनमाह —

**त्यज स्पृहाम्**..इति. व्याख्या-हे यते ! त्वं तिर्यग्-नरकादीनां दुःखं स्वीकृत्य, स्वः-स्वर्गस्य, शिवस्य-मोक्षस्य शर्मणां-सुखानां लाभे स्पृहां-वाञ्छां त्यज-जहीहि, चेद्-यदि त्वं सुखाणुभिः संतोष्यसे-संतोषं प्राप्यसे, अतीवाऽल्पत्वादेवाणूनामुपमानं, यतः किंलक्षणैः ? - विषयः-शब्दादयस्ते आदौ येषां विषयादयः, तेभ्यो जातैः-समुत्पन्नैः, आदिशब्दाद् विषयसाधनवीणा-ललनारूप-कमल-शर्करा-दुकूलादीनां ग्रहणं, त्वं किंलक्षणः ? - संयमस्य-चारित्रस्य कष्टेभ्यो भीरुः-भयवान्, अनेन पूर्वोक्ता परस्परं सप्रतिपक्षता व्यञ्जितेति ।।१३.३७।।

**[३७३] समग्रचिन्तार्त्तिहृतेरिहापि,**
**यस्मिन् सुखं स्यात् परमं रतानाम् ।**
**परत्र चेन्द्रादिमहोदयश्रीः,**
**प्रमाद्यसीहापि कथं चरित्रे ? ।।१३.३८।।**

**धनवि.**–अथ परीषहसहने इहलोके परलोके च शुभफलं दर्शयन्नुपदिशति–

'समग्र' इति, **यस्मिन् चरित्रे रतानाम्**-आसक्तानां प्राणिनाम्, **इहापि**-इहलोकेऽपि, **समग्रचिन्तार्त्तिहृतेः परमं**-प्रकृष्टं **सुखं स्याद्**-भवति, अत्र **समग्राः** सकलाश्च ताश्, **चिन्ता**श्च-राजचौरादिभयलक्षणा **अर्त्तय**श्च-स्वपरोदरभरण-पूरणलक्षणाः, तासां **हृतेः**-हरणादभावादित्यर्थः, **च** पुनः, **परत्र**-परलोके **इन्द्रादिमहोदयश्रीः**-इन्द्र आदौ येषां ते **इन्द्रादयो**-महर्द्धिका देवाः, **आदि**पदादहमिन्द्रादयः, ते च **महोदय**श्च मोक्षस्,-तेषां **श्रीः**-संपत्तिः स्याद्, अत्र **तत** इत्यध्याहार्यं, तेन ततः कारणादिहापि-अस्मिन्नप्यैहिकपरमसुखसाधने पारलौकिकइन्द्रत्वा-ऽहमिन्द्रत्व-मोक्षसुखसाधने च **चरित्रे**-चारित्रे, **कथं**-कुतो हेतोः **प्रमाद्यसि ?** - प्रमादं गच्छसि, भावार्थस्तु -

**[३७४]** "न च राजभयं न च चौरभयं, वरकीर्त्तिकरं नरदेवहितम्[1] ।
इहलोकसुखं परलोकहितं, श्रमणत्वमिदं रमणीयतरम्" ।। [ ]

इति सूक्तभावनया स्पष्ट एवेति ।।१३.३८।।

**रत्न.**–अथ यत् पूर्वोक्तसाम्यसुखानामानन्त्यं-तदेव स्पष्टयति –

**समग्रचिन्ता**..इति. व्याख्या-यस्मिन् चारित्रे-चरणे रतानां-रागमापन्नानाम्, इहापि-इहलोकेऽपि परमम्-उत्कृष्टं सुखं स्यात्, कस्य हेतोः ? - **समग्रा**णां वस्तूनां चिन्तया कृत्वा आर्त्तीनां-पीडानां हृतिः-हरणं तस्याः, च पुनः, परत्र-परलोके इन्द्रादीनां, महोदयस्य च-मोक्षस्य च श्रीः-लक्ष्मीर्भवति हे यते ! तेनेहापि चरित्रे-संयमे कथं प्रमाद्यसि ? - प्रमादवान् भवसि, अपितु मा प्रमाद्य, यत उक्तम् -

१. 'नतम्' - मु० ।

**[३७५]** देवलोगसमाणो य, परियाओ महेसिणं ।
रयाणां अरयाणं च, महाणरयसालिसो त्ति[1] ।। [ ]

तथा केवलं रतानामित्युक्तम् –

**[३७६]** न च राजभयं न च चौरभयं, न च वृत्तिभयं न वियोगभयम् ।
इहलोकसुखं परलोकहितं, श्रमणत्वमिदं रमणीयतरम् ।। [ ]
इति ।।१३.३८।।

**[३७७] महातपो-ध्यान-परीषहादि,**
**न सत्त्वसाध्यं यदि धर्त्तुमीशः ।**
**तद् भावनाः किं समितीश्च गुप्तीर्-**
**धत्से शिवार्थिन् ! न मनःप्रसाध्याः ? ।।१३.३९।।**

**धनवि.**–अथ परीषहादिकष्टसहनासमर्थानां जनानां प्रकारान्तरेण सुखसाध्यं धर्मोपदेशमुपदर्शयन्नाह –

'महातप' इति, **यदि**-चेत्, **सत्त्वसाध्यं**-सत्त्वेन-शारीरमानस-पराक्रमेण, **साध्यं**-गम्यं **महातपोध्यानपरीषहादि धर्तुं न ईशो**-न समर्थो भवसि, अत्र **महान्ति** च तानि **तपांसि** च-मासक्षपणादीनि, **ध्यानानि**-महाप्राणादीनि च, **परीषहाश्च**-द्वाविंशतिसङ्ख्याकाः प्रसिद्धाः, ते आदौ यत्र तत् तथा, चरित्रमित्यर्थः, अत्र **'आदि'** पदादुपसर्गपरिग्रहः, हे **शिवार्थिन् !** - मोक्षार्थिन् ! **तत्**-तदा **मनःप्रसाध्या**-मनोमात्रगम्याः सुखसाध्या इत्यर्थः **भावना**-अनित्यताद्याः बोधिपर्यन्ता द्वादश, च पुनः, **समितीः**-ईर्याद्याः पञ्च, गुप्तीः-मनोगुप्त्याद्यास्तिस्रः, **किं न धत्स ?** - न धरसि ।।१३.३९।।

**रत्न.**–अथ बहुकष्टसाध्यं संयमकार्यं साधयितुमसमर्थं यतिं प्रति सुखसाध्ये कार्ये प्रवर्त्तयन्नाह –

---

१. देवलोकसमानः पर्यायो महर्षीणाम् । रतानां अरतानां च महानरकसदृशः ।।१।।

**महातपो-ध्यान**..इति. व्याख्या हे यते ! यदि महातपो-मासक्षपणादिकं, ध्यानं-प्राणायामादि, परीसहाः द्वाविंशति, ते आदौ यस्य तत् महातपो-ध्यान-परीषहादि प्रति धर्त्तुं-धरणाय ईशः-समर्थो न भवसि, किंलक्षणं? - सत्त्वेन– **धर्मग्रहणे धर्मिग्रहणम्** इतिन्यायात्-सत्त्ववता पुरुषेण साध्यं-साधनीयं, हे शिवार्थिन्! हे मोक्षाभिलाषिन् ! तत् तर्हि भावना द्वादशानित्यत्वादिकाः, तथैकैकस्य महाव्रतस्य पञ्चपञ्चसद्भावात् पञ्चविंशतिर्वा, ताः प्रति किं न धत्से ?, दधसे, तथा पुनः समितीः पञ्चेर्याप्रभृतीः, प्रति, चस्योभयत्रापि योजनात्, च पुनस्, तिस्रो गुप्तीः-मनोगुप्त्याद्याः प्रति किं न धत्से, यतः किंलक्षणाः ? - मनसा एव प्रसाध्यन्ते ता मनःप्रसाध्याः, एताश्चाल्पसत्त्ववताऽपि पुरुषेण साध्यास्ततः साधयेत्यर्थः ।।१३.३९।।

**[३७८] अनित्यताद्या भज भावनाः सदा,**
**यतस्व दुःसाध्यगुणेऽपि संयमे ।**
**जिघत्सया ते त्वरते ह्ययं यमः,**
**श्रयन् प्रमादान्, न भवाद् बिभेषि किम् ? ।।१३.४०।।**

**धनवि.**–अथानन्तरोक्तां मनःप्रसाध्यां भावनामादावुपदिशति –

'अनित्याद्या' इति, **अनित्यताद्या भावनाः सदा**-निरन्तरं **भज**-श्रय, [1]तत्र-**अनित्यता आद्या**-प्रथमा यासां ता, **भाव्यते**-वास्यते धर्मध्यानेन संस्क्रियते आत्मा याभिरिति **भावनाः**, अत्र **आद्य**पदेन शेषैकादशभावनापरिग्रहः, भावनाविस्तरो **योगशास्त्रा**दवसेयः; अत्र'अपि'शब्दः चाऽर्थः, तेन च पुन**र्दुःसाध्यगुणे**-दुःसाध्या मूलगुणा उत्तरगुणाश्च यस्य तस्मिन् **संयमे, यतस्व**-यत्नं कुरु; **हि** यतः कारणात्, **ते**-तव **जिघत्सया**-अत्तुमिच्छया,**अयं** सर्वलोकप्रसिद्धो **यमः**-कृतान्तः **त्वरते**-उत्सुको भवतीत्यर्थः, अत्र **अयं यम** इतिस्थाने **असंयम** इति पाठः, स च प्रसिद्धार्थ एवेति, ततः **प्रमादान्**-मद्यादीन् **श्रयन्**-भजन् **भवात्**-संसारात् किं न **बिभेषि ?** - किं न भयं यासि ।।१३.४०।।

१. 'अत्र०' - मु० ।

**रत्न.**—पुनरपि प्रकारान्तरेण तदेव ज्ञापयन्नाह —

**अनित्यताद्या...** इति. व्याख्या-हे यते ! अनित्यताद्या भावना द्वादश प्रति सदा-निरन्तरं भज, तथा मा सुकुमारो भव, अपि तु कर्कशो भूत्वा, दुःसाध्या मूलगुणा उत्तरगुणाश्च यस्य सः तस्मिन्नपि संयमे-चारित्रे यतस्व-यत्नं कुरु, हि यस्मात् कारणाद्-अयं यमो-मृत्युर्जैनमते आयुःक्षयलक्षणः, ते-तव जिघत्सया-[1]खादितुमिच्छया, त्वरते-त्वरां कुरुते, दिनं दिनं प्रति समीपमायातीति, हे यते! - त्वं प्रमादान्-निद्रादीन् प्रति श्रयन् किं न भवाद् बिभेषि ? - न भयमाप्नोषि, किं तु भेतुं युक्तमिति ।।१३.४०।।

**[३७९] हतं मनस्ते कुविकल्पजालैर्-**
**वचोऽप्यवद्यैश्च वपुः प्रमादैः ।**
**लब्धीश्च सिद्धीश्च तथापि वाञ्छन्,**
**मनोरथैरेव हहा हतोऽसि ।।१३.४१।।**

**धनवि.**—अथानन्तरोक्तं मनःप्रसाध्यं गुप्तित्रयमुपदिशति —

'हतं मनस्ते' इति, **ते**-तव **मनः**-चित्तं **कुविकल्पजालैः**-स्त्रीसेवाचिन्तनादि-दुर्ध्यानसमूहैर्-**हतं**-हतप्रायं जातं, **वचोऽपि** ते-तव-**अवद्यैः**-अलीकभाषणादिभिः पापैर्हतम्-अशुभं जातं, **च** पुनः, **शरीरं प्रमादैः**-प्रमादाचरणैर्हतम्-अशुभं जातं; **तथापि**-एवं गुप्तित्रयाभावेऽपि **लब्धीश्च-गौतमा**देरिवामर्षौषध्यादिकाः, **सिद्धीश्च**-लघिमादिका, **वाञ्छन्**-अभिलषन्, **हहा** इति खेदे **मनोरथैरेव**-लब्धि-सिद्धिवाञ्छालक्षणैरेव **हतः**-तिरस्कारविषयीभूतोऽ**सि**।।

अत्रोक्तार्थे पाठान्तरं दर्शयति —

**"दग्धं मनो मे कुविकल्पजालैर्वचोऽप्यवद्यैश्च वपुः प्रमादैः ।**
लब्धीश्च सिद्धीश्च तथापि वाञ्छन्, मनोरथैरेव हहा **विहन्य** ।।१३.४१।।

---

१. स्वादितु० मु० ।

इति रूपं पाठान्तरं ज्ञेयम्, अत्र **दग्धमिति**-विनष्टं, **विहन्य** इति हनंक् हिंसा-गत्योः [है.धा.११००]इत्यस्य वर्त्तमानात्मनेपदास्मदर्थैकवचनान्तस्य साधुरिति, शेषं स्पष्टं पूर्ववद्, अत्र पाठद्वयेऽपि युष्मदर्थाऽस्मदर्थकृतो विशेष इति ।।१३.४१।।

**रत्न.**—अथ **'वाञ्छा महती, सामग्री तु तथाविधा न'** इति यतिनं ज्ञापयन्नाह—

**हतं मनस्ते...**इति, व्याख्या-हे मुने ! ते-तव मनः कुविकल्पानां जालानि कुविकल्पजालानि, तैर्हतं, च पुनर्, वचोऽपि-वागप्यवद्यैः, अवद्यकारणत्वान्मृषाभाषाद्यैर्हतं तथा वपुः-शरीरं प्रमादैः-प्रमादासेवनैर्हतं-विनाशितमित्यर्थः, एतत्कथनेन तिसृणां गुप्तीनां खण्डनमुक्तं, तथा गुप्तीर्विनापि त्वं, आमर्षौपध्यादिका लब्धीः प्रति, च पुनर्मन्त्रविद्यादिकाः सिद्धीः प्रति वाञ्छन्, हाहा इति खेदे, मनोरथैरेव-मनोरथकरणैरेवेत्यर्थः, हतोऽसि-पीडितोऽसि, तन्दुल-दुग्ध-घृत-शर्करासामग्रीमन्तरा पायसभोजनेच्छावन्मुधैव लब्धि-सिद्ध्यादिवाञ्छेत्यर्थः । **दग्धं** मनो **मे** इति पाठान्तरव्याख्या-प्रथमा त्रिपदी दग्धं मनो मे इतिकथनात् अस्मच्छब्दप्रयोगेण व्याख्यातव्या, तथाऽप्यहं लब्धीः सिद्धीश्च वाञ्छन् हहा इति खेदे, मनोरथैरेव विहन्ये, विहतः-पीडितः परं लब्धि-सिद्धयो न प्राप्ताः इति चतुर्थपदव्याख्यानं, दग्धमितिकथनेन कविना कुविकल्पजालानामग्निवद् दुष्टत्वं ज्ञापितमिति ।।१३.४१।।

**[३८०] मनोवशस्ते सुख-दुःखसङ्गमो-**
**मनो मिलेद् यैस्तु तदात्मकं भवेत् ।**
**प्रमादचौरैरिति वार्यतां मिलच्-**
**छीलाङ्गमित्रैरनुषञ्जयाऽनिशम् ।।१३.४२।।**

**धनवि.**—अथ गुप्तित्रये मनोगुप्तिमेव केवलामुपदिशति —

'मनोवश' इति, **ते**-तव **सुख-दुःख-सङ्गमः**-सुख-दुःखप्राप्ति**र्मनोवशः**-चित्ताधीनोऽस्ति, मनसः शुभाशुभ-व्यापारैः शुभाशुभकर्मबन्धः, तेन च सुख-दुःखप्राप्तिरिति परम्परया मनोवशः सुख-दुःख-सङ्गम इत्यर्थः; **तु** पुन**र्मनो यैः**

१. धनवि० टीकाप्रतौ '०षङ्गय' इति पाठः मूलत्वेन, टीकायामपि विद्यते. सं. ।

पदार्थैः सह **मिलेत्**-संयुक्तं **भवेत्, तदात्मकं**-तत्पदार्थमयं भवेदिति हेतोः, **प्रमादचौरैः**-विषयादितस्करै**र्मिलत्**-संयुक्तं भवन्मनो **वार्यतां**-निवार्यतामिति कर्मोक्तौ, च पुनः, **शीलाङ्गमित्रैः** अष्टादशसहस्रशीलाङ्गलक्षणैः सुहृद्भिः सह-**अनिशं**-निरन्तरं स्वं मनो**ऽनुषञ्जय**-संयोजय, अष्टादशसहस्रशीलाङ्गानि च –

**[३८२]** जे नो करंति मणसा णिज्जियआहारसन्नसोइंदी ।
पुढवीकायारंभं खंतिजुआ ते मुणी वंदे ।। [ ]।।

**[३८२]** १ खंती-२ अज्जव-३ मद्दव-४ मुत्ती-५ तव-६ संजमे य बोद्धव्वे।
७ सच्चं-८ सोयं-९ आकिंचणं च-बंभं-१० च जइधम्मो ।।[दशवै.नि.२४८]।।

इत्यादिगाथासूचितानि, शीलाङ्गस्योपलक्षणत्वेन संयमादिशेषसप्तदशकपरिग्रहः तद्विस्तरश्च **पञ्चाशका**दिभ्योऽवसेयः ।।१३.४२।।

**रत्न.**–अथ सुख-दुःखयोर्मनसोऽधीनत्वेन तत्सङ्गतावेव मनो योजनीय-मित्युपदिशति –

**मनोवशस्ते** इति. व्याख्या-हे मुने ! सुख-दुःखाभ्यां सङ्गमो-मीलनं मनसो वशः-आधीनोऽस्ति, तुरितिविशेषे, तन्मनो यैः सह मिलेत्, तदात्मकं भवेत्-तत्स्वरूपकं भवेद्, दुष्टैः सह मिलद् दुष्टं भवेत्, साधुभिः सह मिलत् साधु भवेत्, अनिलवद्, यथाऽनिलः कनकतरुपुष्पैर्मिलन् तद्गन्धवासितो भवेत्, चम्पकादिपुष्पैश्च मिलन् तद्गन्धवासितो भवेदित्यर्थः, इतिहेतोस्तन्मनः प्रति, प्रमादा एव चौराः संयमधनापहारित्वात्, तैः सह मिलद् वार्यताम् । तद्वारणोपायमाह-तथा शीलस्य-संयमस्याङ्गानीव शीलाङ्गानि, तान्येव मित्राणि, तैः शीलाङ्गमित्रैः-अष्टादशसहस्रप्रमाणैः **सहानुषञ्जय**-सङ्गं-मैत्रीं कारय, कथं? - अनिशं-निरन्तरं, यथा तव सुखेनैव सङ्गमो भवेदिति ।।१३.४२।।

**[३८३] ध्रुवः प्रमादैर्भववारिधौ मुने !,**
**तव प्रपातः परमत्सरः पुनः ।**
**गले निबद्धोरुशिलोपमोऽस्ति चेत्,**
**कथं तदोन्मज्जनमप्यवाप्स्यसि ? ।।१३.४३।।**

**धनवि.**–अथ वचनगुप्तिमेव केवलामुपदिशति –

'ध्रुवः प्रमादैर्' इति, हे **मुन!** - हे साधो ! **प्रमादैर्,** हेतुभूतैः **भववारिधौ**-संसारसमुद्रे **तव प्रपातः**-पतनं **ध्रुवो**-निश्चलोऽस्ति, **चेद्**-यदि **पुनर्,** द्वितीयः **परमत्सरः**-परेषु-आत्मव्यतिरिक्तेषु मत्सरः-असूयाकरणम्, **उरुशिलोपमः**-उर्वी चासौ शिला च-स्थूलोपलः, तत्समानो **गले**-कण्ठे **निबद्धो**-नियन्त्रितोऽस्ति, **तदा** भववारिधौ, **उन्मज्जनमपि**-पुनरुपरि तरणमपि **कथं ?,** केन ? - **अवाप्स्यसि**-लप्स्यसे ।।१३.४३।।

**रत्न.**–अथ प्रमादपरिहारं भङ्ग्यन्तरेणोपदिशति –

**ध्रुवः प्रमादैः**-इति. व्याख्या-हे मुने ! तव प्रमादैर्हेतुभिर्भववारिधौ-संसारसमुद्रे प्रपातः-प्रपतनं ध्रुवो-निश्चितोऽस्ति, अवश्यंभावीत्यर्थः, प्रमाद-संसारपातयोर्धूम-वह्न्योरिव व्याप्तिमत्त्वात्, पुनरन्यः प्रमादोपरीत्यर्थः, चेद्-यदि परेषु, मत्सर-ईर्ष्या परमत्सरोऽस्ति, कस्य ? - तव, किंलक्षणः ? - गले-कण्ठे निबद्धा या उरुः-महती शिला, तया उपमीयते यः सः तदा, उन्मज्जने निमग्नस्य जलोपर्यागमनमपि कथं केन प्रकारेणा-ऽऽप्स्यसि ?, अपि तु न अवाप्स्यसि, तेन प्रमादं परमत्सरं च जहाहीत्युपदेशः ।।१३.४३।।

**[३८४] महर्षयः केऽपि सहन्त्युदीर्या-**
**ऽप्युग्रा-ऽऽतपादीन्यपि निर्जरार्थम् ।**
**कष्टं प्रसङ्गागतमप्यणीयो-**
**ऽपीच्छन्शिवं किं सहसे न ? भिक्षो ! ।।१३.४४।।**

**धनवि.**–अथ केवलां कायगुप्तिमुपदिशति –

'महर्षयः' इति, **केऽपि** जगदद्भुत-चरित्रा, **महर्षयो**-महामुनयः, **उदीर्यापि**-उदीरणं कृत्वाऽपि, **उग्रातपादीन्यपि** ग्रीष्मकाले, **आदि**पदाच्छीतकाले शीतवातादीन्यपि, कष्टानि **निर्जरार्थं**-कर्मक्षयार्थं **सहन्ति,** तदा हे **भिक्षो !** - मुन ! त्वं **शिवं**-मोक्षम्, **इच्छन्**-वाञ्छन् **प्रसङ्गागतमपि**-स्वभावत एवोपस्थितमपि,

अतिशयेनाऽपि अणु, **अणीयः, कष्टं**-शारीरं दंश-मशक-मलादिजनितं, **किं न सहसे ?** - किं न क्षमसे ।।१३.४४।।

**रत्न.**–अथ महत्कष्टसहना-ऽसामर्थ्ये सति प्रसङ्गागतकष्टसहनमुपदिशति–

**महर्षय** इति. व्याख्या-केऽपि महर्षयः पूर्वं श्री**भद्रबाहु**स्वामिप्रव्राजित-चतुर्महेभ्यपुत्राद्याः शीता-ऽऽतपादिसोढारः, उदीर्यापि उग्रा-ऽऽतप-शीतादीन्यपि निर्जरार्थं सहन्ति-क्षमन्ते, हे भिक्षो ! त्वं प्रसङ्गागतमणीयोऽपि कष्टं कदाचित् क्षुत्-तृषा-शीता-ऽऽतपादिकं किं न सहसे ?, अपि तु सहस्व, किं कुर्वन् सन्? - शिवं-मोक्षमिच्छन् कथमपि, तच्छिवं कथं प्राप्स्यसीति ।।१३.४४।।

**[३८५] यो दान-मान-स्तुति-वन्दनादिभिर्-**
**न मोदतेऽन्यैर्न तु दुर्मनायते ।**
**अलाभ-लाभादिपरीषहान् जयन्[1],**
**यतिः स तत्त्वादपरो विडम्बकः ।।१३.४५।।**

**धनवि.**–अथ परीषहसहने एव तत्त्वतो यतिस्वरूपं भवति-इति दर्शयन्नुपदिशति–

'दान-मान०' इति, **यः** पुमान् **दान-मान-स्तुति-वन्दनादिभिः** प्रसिद्धैः, **आदि**पदात् पादसंवाहनादिभिः, **न मोदते**-न हृष्यति, **तु** पुनर्, **अन्यैः**-तत्प्रतिपक्षभूतैरप्राप्ति-कर्कश-ऽऽहनन-गालिप्रदान-तिरस्कारादिभिर्न **दुर्मनायते**-अदुर्मना दुर्मना भवतीति, क्यङि दुर्मनायते इति साधुः, किं कुर्वन् ? - **अलाभ-लाभादिपरीषहान्,**

**[३८६]** १-'खुहा २-पिवासा ३,४-सी उण्हं ५-दंसा ६-चेला ७-रइ ८-त्थिओ ।
९-चरिया १०-निसीहिया ११-सिज्जा १२-अक्कोस १३-वह १४-जायणा ।।
[न.त.भाष्य.८६]।।

---

१. द्वयोष्टीकयोः 'जयन्' इति विवृतम्, रत्न० टीकाप्रतौ तु 'जयन्' पदं मूलत्वेनापि गृहीतम् । अस्माभिष्टीकामतुसृत्य 'जयन्' पदं मूलत्वेन स्वीकृतम् ।

**[३८७]** १५-अलाभ १६-रोग १७-तणफासा १८-मल १९-सक्कारपरीसहा ।
२०-पन्ना २१-अन्नाण २२-संमत्तं इय बावीस परीसहा ।।[न.त.भाष्य.८७]।।

इत्यादिगाथासूचितान् द्वाविंशतिपरीषहान् **जयन्-अभिभवन् सहन्नित्यर्थः**, **स** पुमान् **तत्त्वतः**-परमार्थतो यतिः-साधुर्भवतीति, **अपरः**-एतद्विपरीतलक्षणः पुमान् **विटम्बको**[1]-वेषमात्रधरणेन नरो भवतीत्यर्थः ।।१३.४५।।

**रत्न.**—अथ यतित्वा-ऽयतित्वयोर्भेदं निरूपयन्नाह —

**यो दान-मान..**इति. व्याख्या-यो दान-मान-स्तुति-वन्दनादिभिः श्राद्धकृतैः सद्भिर्न मोदते हर्षं न प्राप्नोति, किंत्वेतत् सर्वं चारित्रस्य करोति, यदि ममैव कुर्यात् तदा चारित्ररहितानामन्येषामपि कुर्यादिति भावयेत्, च पुनर्, अन्यैर्दान-मान-स्तुति-वन्दनादिभिरकृतैस्,-तथा तेभ्यो विपरीतैः कृतैर्, न दुर्मनायते-दुर्मना न भवति, दुः-दुष्टं मनो यस्य स दुर्मनाः, अदुर्मना दुर्मना भवतीति दुर्मनायते, च्व्यर्थे भृशादेः स्तोः [सि.हे.३-४-३१] इति सलोपे क्यङ्प्रत्यये दीर्घे च कृते दुर्मनायते इति सिद्धम्, किं कुर्वन् ? - अलाभः-अप्राप्तिर्लाभः-प्राप्तिस्तावादौ येषां ते अलाभ-लाभादयः, ते च ते परीषहाश्च तान् प्रति, **जयन् सन्** स तत्वात्-परमार्थतो यतिः स्याद्, परो दान-मान-स्तुति-वन्दनादिभिर्मोदमानः, तदभावे च तद्विपरीतकरणे च दूयमानः अलाभलाभादिपरीषहान् **अजयंश्च**, सर्वोऽपि विडम्बको यतिवेषभृन्नटवद् भवतीति ।।१३.४५।।

**[३८८] दधद् गृहस्थेषु ममत्वबुद्धिं,**
**तदीयतप्त्या परितप्यमानः ।**
**अनिर्वृतान्तःकरणः सदा स्वैस्-**
**तेषां च पापैर्भ्रमिता भवेऽसि ।।१३.४६।।**

**धनवि.**—अथ वाक्-कायगुप्तिमूलमनोगुप्तिरक्षणाय यतिभिर्गृहस्थतप्तिर्न विधेया-इति दर्शयन्नुपदिशति —

---

१. विडम्बको० मु० ।

'दधद्' इति, **गृहस्थेषु**-अगारिषु **ममत्वबुद्धिं,** 'ममायं भक्त' इत्यादिमतिं **दधत्**-धरन् **तदीयतप्त्या**-गृहस्थसुख-दुःखचिन्तया, **परितप्यमानः**-परितापं कुर्वन्, **अनिर्वृतान्तःकरणः**-अनिर्वृतम्-असुखितमन्तःकरणं-चित्तं यस्य स तथा सन्, **सदा**-सर्वकालं **स्वैः**-आत्मीयपापैः, च पुनस्,-तेषां गृहस्थानां **पापैः**-दुष्कृतैर्भवे-संसारे **भ्रमितासि**-भ्रमणकर्त्ताऽसीत्यर्थः ।।१३.४६।।

**[३८९] त्यक्त्वा गृहं स्वं परगेहचिन्ता-**
**तप्तस्य को नाम ? गुणस्तवर्षे ! ।**
**आजीविकाऽऽस्ते यतिवेषतोऽत्र,**
**सुदुर्गतिः प्रेत्य तु दुर्निवारा ।।१३.४७।।**

**धनवि.**–अथानन्तरोक्तायाः परतप्तेरकरणमेव दृढयन्नुपदिशति –

'त्यक्त्वा गृहम्' इति, हे **ऋषे !** - हे मुने ! **स्वम्**-आत्मीयं, **गृहम्**-अगारं **त्यक्त्वा**-विमुच्य **परगेहचिन्तातप्तस्य, नामे**ति कोमलामन्त्रणे, तव **कः ?** - किंनामा **गुणः**-उपकारः, स्वसुखदायक इत्यर्थः; नन्वाजीविकालक्षणो गुणोऽस्त्येव-इत्याशङ्कायामाह-**आजीविकेति,** यद्यप्याजीविका-उदरपूरणोपायलक्षणो गुणोऽत्र-इह भवे **यतिवेषतः**-रजोहरणादियतिलिङ्गधरणतः **आस्ते**-वर्त्तते, **तु** पुनस्तथापि **प्रेत्य**-परभवे सुष्ठु-अतिशयेन **दुर्गतिः**-नरकादिलक्षणा **दुर्निवारा**-दुःखेन नितरां वार्यते-निराक्रियते इति दुर्निवारा आस्त इति ।।१३.४७।।

**रत्न.**–अथ गृहस्थानां तप्तिं कुर्वाणं यतिं प्रति **काव्यद्वयेन** किञ्चिदुपदिशन्नाह–

**१. दधद् गृहस्थेषु**..इति. **२. त्वक्त्वा गृहम्**-इति. व्याख्या-हे यते ! गृहस्थेष्वर्थाद् भक्तेष्वित्यर्थः, त्वं ममत्वबुद्धिम्-'एते मदीया गृहस्थाः'-इति ममताधियं दधद्-दधानः सन्, तत एव तदीयया गृहस्थसंबन्धिन्या तप्त्या-कलत्र-सन्तान-धन-सद्भावा-ऽभावतज्जनितसुख-दुःखादिचिन्तया परितप्यमानः-सुख-दुःखकरण-निवारणासामर्थ्ये सति संतापं भजन्, तत एव सदा निरन्तरमनिर्वृतं-निर्वृत्तिमनापन्नमन्तःकरणं यस्य सः, एवंविधः सन् स्वैः-स्वकीयैः, **च** पुनस्,-

तेषां-गृस्थानां पापैर्भवे-संसारे भ्रमिताऽसीति, मुधा गृहस्थेषु ममत्वं, तेषां च तप्तिं मा कृथा इत्यर्थः ।।१३.४७।।

**रत्न.–'त्यक्त्वा गृहम्'** इति, व्याख्या–हे ऋषे ! त्वं स्वं-स्वकीयं गृहं त्यक्त्वा, परेषां-गृस्थानां, गेहानां-गृहाणां चिन्तया सुख-दुःखादिचिन्तनरूपया, तप्तस्य सतोऽपि, नामेति कोमलामन्त्रणे, तव को गुणो वर्त्तते ?, अपि तु न कोऽपीत्यर्थः, स्वं गृहं त्यक्त्वा बहूनां गृहाणां चिन्ताकरणं विडम्बनैवेति, ततस्तवात्र-इहलोके केवलं यतिवेषतः आजीविका-उदरभरणरूपा आस्ते-वर्त्तते, तुरिति विशेषे, प्रेत्य-परभवे सु-दुर्गतिः-अतिशयेन दुर्गतिः[सुदुर्गति] र्दुर्निवारा-वारयितुं दुःशक्या[1]-इत्यर्थः ।।१३.४७।।

**[३९०] कुर्वे न सावद्यमिति प्रतिज्ञां,**
**वदन्नकुर्वन्नपि देहमात्रात् ।**
**शय्यादिकृत्येषु नुदन् गृहस्थान्,**
**हृदा गिरा वाऽपि कथं मुमुक्षुः ? ।।१३.४८।।**

**धनवि.–**अथ कायगुप्तिमतामपि स्वार्थं सावद्ये चिन्तने भाषणे च दोषं दर्शयन्नुपदिशति –

'कुर्वे न सावद्यम्' इति, अहं **सावद्यं**-सपापं कर्म **न कुर्वे** "करेमि भंते ! सामाइयं सव्वं सावज्जं जोगं पच्चक्खामि जावज्जीवाए" इत्यादिपाठादिना, इति **प्रतिज्ञाम्**-अङ्गीकारं **वदन्**-मनःपूर्वं वचसा प्रतिपादयन्, **देहमात्रात्**-केवलकायात् सावद्यं योगम्, **अकुर्वन्नपि शय्यादिकृत्येषु**-उपाश्रयादिकार्येषु **गृहस्थान्**-सागारिकान् **हृदा**-मनसा **गिरा**-वाचा **नुदन्**-प्रेरयन्, **कथं ?** - केन प्रकारेण **मुमुक्षुः**-सत्यवक्ता यतिरसि-भवसीति ।।१३.४८।।

**रत्न.–**अथेतिहेतोस्त्वं कायेन मुमुक्षुरसि, न तु मनसा वाचा, इति यतिनं ज्ञापयन्नाह –

१. दुःशक्ता० मु० ।

**कुर्वे न सावद्यम्**-इति. व्याख्या-हे मुमुक्षो ! त्वं प्रत्यहमावश्यकं कुर्वन् सामायिकोच्चारे 'मनसा वाचा कायेन सर्वं सावद्यमहं न कुर्वे' इति प्रतिज्ञाम्-अङ्गीकारं वदन्, केवलं देहो देहमात्रं, तस्मादकुर्वन्नपि, सावद्यमिति ग्राह्यं, परं शय्या-वसतिः सा आदौ येषां तानि शय्यादीनि, तानि च तानि कृत्यानि, तेषु गृहस्थान्-याहि इदमानयेदं कुरु-इत्यादि नुदन्-प्रेरयन् सन् हृदा-मनसा गिरा-वचसा मोक्षमिच्छुर्मुमुक्षुरिति सान्वर्थनामा कथमसि ?, अपि तु तत्त्वदृष्ट्या विचार्यमाणे कायेन मुमुक्षुरसि, परं मनसा वाचा नास्येव, आदिशब्देन चैत्यादिग्रहणम्, अत्र नुदन्नित्यादेशविषयकं प्रेरणं ग्राह्यं, श्राद्धानामेतत् करणीयं दृश्यते, पूर्वमपि ये श्राद्धा अभूवन्, तैरपि कृतमिति विधिरूपं तु दृश्यत एवेति, यतः-

"१.जुत्तमेयं सूरियाभा ! २. पुराणमेयं सूरियाभा ! ३. करणिज्जमेयं सूरियाभा ! ४. आइण्णमेयं सूरियाभा ! ५. अब्भणुण्णायमेयं सूरियाभा ! ६. जीयमेयं सूरियाभा !" इति सूर्याभदेवताद्यधिकारे श्रीराजप्रश्नीयोपाङ्गे विधिवाक्यानां दृश्यमानत्वादिति ।।१३.४८।।

**[३९१] कथं महत्त्वाय ममत्वतो वा,**
**सावद्यमिच्छस्यपि सङ्घलोके ? ।**
**न हेममय्यप्युदरे हि शस्त्री,**
**क्षिप्ता क्षणोति क्षणतोऽप्यसून् किम् ? ।।१३.४९।।**

**धनवि.**—अथ मनोगुप्त्यधिकाराद् धर्मनिरपेक्षं परार्थं सावद्यचिन्तने दोषं दर्शयन्नुपदिशति —

'कथं महत्वाय' इति, **महत्त्वाय**-आत्मनो गौरवाय, **वा** अथवा **ममत्वतो**-ममत्वबुद्ध्या, **सङ्घलोकेऽपि**-साधु-साध्वी-श्रावक-श्राविकालक्षण-चतुर्विधसङ्घेऽपि **सावद्यं**-सपापं कर्म मूलकर्मादि-द्रव्यप्राप्ति-पुत्रप्राप्त्याद्युपायभूतं **कथमिच्छसि ?** - वाञ्छसि; **हि**-यतः कारणाद्, **हेममयी**-सुवर्णमयी **शस्त्री**-कृपाणिका **उदरे**-जठरे **क्षिप्ता**-प्रक्षिप्ता, **क्षणतोऽपि**-क्षणादपि, **असून्**-प्राणान् **किं न क्षणोति ?** - न हिनस्ति । अत्र सङ्घलोकः सुवर्णस्थानीयः, तस्य स्वमहत्त्वार्थं ममताबुद्ध्या

च सावद्यकर्मचिन्तनं शस्त्रीस्थानीयं, संयमजीवितं च प्राणस्थानीयमिति दृष्टान्त-दार्ष्टान्तिकयोजना ।।१३.४९।।

**रत्न.**–पुनरेतदेव विवृणोति –

**कथं महत्त्वाय**..इति. व्याख्या-हे यते ! त्वं सङ्घलोकेऽपि-श्रावक-श्राविकालक्षणेऽपि कथं सावद्यमिच्छसि ? - वाञ्छसि, कस्मै ? - महत्त्वाय, 'एते यदि चैत्यादि कुर्वन्ति, तदा मम महत्त्वं वर्द्धते, अस्मिन् सतीदं चैत्योपाश्रयसाधर्मिकवासल्यादिकं जातम्'इत्यर्थः । वा-अथवा ममत्वतः-ममत्वबुद्ध्या पूर्वमिदं मदीयं गृहमासीत्, तेन मदीयमेतच्चैत्यं भवतु, अथवा मया गृहिदशायां चैत्यादि कारितं, तेन मदीयं चैत्यादि सज्जीकारयाम्येव'इतिलक्षणतः, ननु पुण्यकार्यं कथं सावद्यं भवति ?-इति दृष्टान्तेनाह-हि यस्मात् कारणात्, हेममयी-सुवर्णविकारापि शस्त्री-असिधेनुरुदरे क्षिप्ता सत्यसून्-प्राणान् प्रति क्षणतः-क्षणमात्रतः किं न क्षणोति ? - न हिनस्ति, अपि तु क्षणोति, एतत् सर्वमादेश-दानेऽनधिकारित्वादसंयतिवद्, यथा तथा गृहस्थानां प्रवर्त्तनाकरणेन च सावद्यतयोक्तं, परं विधितयोपदिशतः सतः सावद्यं नेति प्रतिभाति ।।१३.४९।।

**[३९२] रङ्कः कोऽपि जनाभिभूतिपदवीं त्यक्त्वा प्रसादाद् गुरोर्-**
**वेषं प्राप्य यतेः, कथञ्चन कियच्छास्त्रं पदं कोऽपि च ।**
**मौखर्यादिवशीकृतर्जुजनताऽदाना-ऽर्चनैर्गर्वभा-**
**गात्मानं गणयेन्नरेन्द्रमिव, धिग् गन्ता द्रुतं दुर्गतौ ।।१३.५०।।**

**धनवि.**–अनन्तरं समिति-गुप्तिशिक्षामुपदिश्यात्मगतौद्धत्यपरिहारार्थमुपदिशति–

'रङ्कः कोऽपि' इति, गृहस्थावस्थायां **कोऽपि**-अनिर्दिष्टनामा **रङ्को**-दरिद्रः पुमान् **जनाभिभूतिपदवीं**-जनेभ्योऽभिभूतेः-पराभवस्य पदवीं-पद्धतिं विषयतामित्यर्थः, **त्यक्त्वा**-परिहृत्य **गुरोः प्रसादाद्**-गुरुकृपावशात् **कथञ्चन**-केनचिदुपायेन **यतेः**-मुनेर्**वेषं**-रजोहरणादिलिङ्गं प्राप्य-अधिगत्य, **मौखर्यादिवशीकृतर्जुजनतादानार्चनैर्गर्वभाग्**-मदवान्, **आत्मानं**-स्वं **नरेन्द्रमिव**-राजानमिव **गणयेत्**-चिन्तयेत्, **च** पुनः, **कोऽपि**

पुमान् गुरोः प्रसादात् **शास्त्रं**-व्याकरण-प्रमाण-सिद्धान्तादिग्रन्थानां सूत्रमर्थं च प्राप्य, मौखर्यादिवशीकृतर्जुजनतादानार्चनैर्गर्वभागात्मानं नरेन्द्रमिव गणयेत्, **च** पुनः, कोऽपि पुमान् गुरोः प्रसादात् **पदं** पण्डितादि**पदवीं** प्राप्य मौखर्यादिवशीकृत-र्जुजनतादानार्चनैर्गर्वभागात्मानं नरेन्द्रमिव गणयेत्, अत्र मुखरस्य भावो **मौखर्यं**-वाचालतेत्यर्थः, तद्, **आदौ**-प्रथमं यस्य तत् तथा, **आदि**पदात् सकपटवैराग्य-मुद्रादिपरिग्रहः, तेन **वशीकृता**-रञ्जिता चासौ **ऋजुजनता** च-भद्रकजनसमूहः, तया विहितानि **दाना-ऽर्चनादीनि** प्रसिद्धानि तैस्तथेति, तं पुरुषं **धिगस्तु,** यतः स पुरुषो **द्रुतं**-निश्चितं **दुर्गतौ**-नरकादिगतौ **गन्ता**-गमनशील **इति** ।।१३.५०।।

**रत्न.**—अथात्मनो रङ्कत्वादिदूषितां पूर्वावस्थां विलोक्य संयमावस्थायां संपदं प्राप्तोऽपि गर्वं कृत्वा दुर्गतौ गन्ताऽसीति कथयन्नाह —

**रङ्कः कोऽपि**..इति. व्याख्या-कश्चिद् गृहस्थवासमाश्रित्य निःस्वतया रङ्कः, स एवात्मानं नरेन्द्रमिव गणयन्, धिग्-निन्दितं यथा स्यात् तथा द्रुतं-शीघ्रं दुर्गतौ गन्ता, किं कृत्वा ? - वेषं प्राप्य, कस्य ? - यतेः, यतिसम्बन्धिनमित्यर्थः, किं कृत्वा ? - त्यक्त्वा, कां ? - जनानामभिभूतिः-पराभवो यस्यां सा चासौ पदवी च तां, तथा कथञ्चन-महता कष्टेन कियच्छास्त्रमिति-शास्त्राध्ययनं प्राप्य, तथा तन्मध्ये कोऽपि वाचनाचार्यः पण्डित उपाध्याय आचार्यः इतिरूपं पदं-बिरुदं प्राप्य, एतत् सर्वं गुरोः प्रसादात् प्राप्येत्यर्थः, गर्वं भजतीति गर्वभाक्, कैः ? - मुखरस्य भावो मौखर्यं, तदादि यस्य, तेन वशीकृता या ऋजुः-सरला, जनता-जनसमूहः, तया दानं वस्त्र-पात्रादीनां अर्चनं चन्दनादिभिस्तैरिति ।।१३.५०।।

**[३९३] प्राप्यापि चारित्रमिदं दुरापं,**
**स्वदोषजैर्यद् विषयप्रमादैः ।**
**भवाम्बुधौ धिक् पतिताऽसि भिक्षो !,**
**हतोऽसि दुःखैस्तदनन्तकालम् ।।१३.५१।।**

**धनवि.**—अथानन्तरोक्तं विशेषतो निर्दिशति —

'प्राप्याऽपि' इति, हे **भिक्षो !** - हे साधो ! **यद्**-यस्मात् कारणाद्, **दुरापं**-दुर्लभं चेदं पञ्चमहाव्रतादिरूपेण प्रत्यक्षं, **चारित्रं**-संयममार्गं **प्राप्यापि** लब्ध्वाऽपि **स्वदोषजैः**-स्वकीयरागद्वेषलक्षणदोषजन्यै**र्विषय प्रमादैः** प्रसिद्धैर्, **भवाम्बुधौ**-संसारसागरे **पतिता**-पतनशीलोऽसि, **तत्**-तस्माद् **अनन्तकालं** यावद्, दुःखैः-चातुर्गतिकैः प्रतिकूलवेद्यैः **हतोऽसि;** अतस्त्वां **धिग**स्त्विति ।।१३.५१।।

**रत्न.**—अथ चारित्रस्य दुष्प्रापतया विषय-प्रमादानां प्रकारान्तरेण त्यागमुपदिशन्नाह —

**प्राप्यापि**..इति. व्याख्या-हे भिक्षो ! इदं दुरापं दुष्प्राप्यं चारित्रं प्राप्यापि, **चेद्**[1]-यदि त्वं विषयैः प्रमादैश्च हेतुभिर्, **धिग्**-निन्दितं यथा स्यात् तथा, भवाम्बुधौ-संसारसमुद्रे पतिताऽसि पतिष्यसि, तत्-तर्ह्यनन्तं कालं यावत् त्वं दुःखैर्हतोऽसि, विषयप्रमादैः किंलक्षणैः ? - स्वस्य-आत्मनो दोषाः, तेभ्यो जायन्ते इति स्वदोषजास्तैरिति ।।१३.५१।।

**[३९४] कथमपि समवाप्य बोधिरत्नं,**
**युगसमिलादिनिदर्शनाद् दुरापम् ।**
**कुरु कुरु रिपुवश्यतामगच्छन्,**
**किमपि हितं लभसे यतोऽर्थितं शम् ।।१३.५२।।**

**धनवि.**—अथानन्तरोक्तामेव चारित्रस्य दुरापतां दृष्टान्तप्रदर्शनेन दृढयन्नुपदिशति-

'कथमपि' इति, **कथमपि**-कथञ्चित् कष्टसहनजनिता-ऽकामनिर्जरादियोगाद्, **युगसमिलादिदृष्टान्तात्** सिद्धान्तप्रसिद्धाद् **दुरापं**-दुर्लभं **बोधिरत्नं**-जिनधर्मप्राप्तिरूपं मणिविशेषं, **समवाप्य**-प्राप्य **रिपुवश्यतां**-वैरिवशताम्, **अगच्छन्**-अनाप्नुवन्, **किमपि हितं**-किञ्चित् सुखसाधनं **कुरु कुरु** - साधयेरिति; **यतो** हितसाधनाद् **अर्थितं**-प्रार्थितं **शं**-सुखं मोक्षलक्षणं **लभसे** अत्र बोधिकारणानि —

१. रत्नवि० टीकाप्रतौ पदमिदं मूलत्वेनापि गृहीतमस्ति 'चेद्' विषय०।

**[३९५]** "१-[१]अणुकंप २-ऽकामनिज्जर ३-बालतवे ४-दाण ५-विणय ६-विब्भंगे ।
७-संजोगविप्पओगे ८,९-वसणू-सव १०-इड्ढि ११-सक्कारे [आ.नि.उपो.७४५]

**[३९६]** १-विज्जे २-मिंठे तह ३-इंदनाग ४-कयउन्न ५-पुप्फसालसुए ।
६-सिव ७,८-महुरवणियभाउय ९-आभीर १०,११-दिसन्नि लापुत्ते [आ.नि.उपो.७४६]

"इति गाथाद्वयसूचितानि, सज्ञातान्या**वश्यकवृत्त्या**दिभ्यः समवसेयानि ।

युगसमिलादिदृष्टान्ताश्च –

**[३९७]** "१-[२]चुल्लग २-पासग ३-धन्ने ४-जूए ५-रयणे ६-य सुमिण ७-चक्के य।
८-चम्म ९-जुगे १०-परमाणू दस दिट्ठंता मणुअलंभे [आ.नि.उपो.७३२]

**[३९८]** पुव्वंते हुज्ज जुगं अवरंते तस्स हुज्ज समिला उ ।
जुगछिद्दम्मि पवेसो इय संसइओ मणुअलंभो [आ.नि.उपो.७३३]

**[३९९]** जह समिला पब्भट्ठा सायरसलिले अणोरपारम्मि ।
पविसिज्ज जुगच्छिद्दं कहवि भमंती भमंतम्मि [आ.नि.उपो.७३४]

**[४००]** सा चंडवायवीईपणुल्लिआ अवि लभिज्ज जुगछिद्दं।
न य माणुसाउ भट्ठो जीवो पडिमाणुसं लहइ [आ.नि.उपो.७४५]

इत्यादिगाथासूचिता **आवश्यकोपोद्घातनिर्युक्तिवृत्त्या**दिशास्त्रेभ्यः सविस्तरा ज्ञेया इति ।।१३.५२।।

**रत्न.**–अथ बोधिरत्नस्य दुःप्राप्यतां[३] वदन् यतिजनं हितार्थे प्रवर्त्तयन्नाह-

---

१. अनुकंपाऽकामनिर्जराबालतपोदानविनयविभंगाः । संयोगविप्रयोगव्यसनोत्सवर्द्धिसत्काराः ।।१।। वैद्यो मेंठस्तथेन्द्रनागः कृतपुण्यः पुष्पशालसुतः । शिवो मथुरावणिग्भ्रातरौ आभीरा दशार्ण इलापुत्रः ।।२।। २. चोल्लकः पाशका धान्यानि द्यूतं रत्नानि स्वप्नश्चक्रं । चर्म (कूर्मः) युगं परमाणुः दश दृष्टान्ता मनुजत्वलाभे ।।१।। पूर्वान्ते भवेद् युगं अपरान्ते भवेत् तस्य समिला तु । युगच्छिद्रे प्रवेश एवं संशयितो मनुजत्वलाभः ।।२।। यथा समिला प्रभ्रष्टा सागरसलिलेऽनर्वाक्पारे । प्रविशेत् युगच्छिद्रं कथमपि भ्राम्यन्ती भ्राम्यति ।।३।। सा चण्डवातवीचिप्रणुन्ना अपि लभेत युगच्छिद्रं । नतु मनुजत्वात् भ्रष्टो जीवः प्रतिमानुष्यं लभते ।।४।। ३. दुष्पापतां. मु० ।

**कथमपि**..इति. व्याख्या-हे यते ! त्वं कथमपि महता कष्टेन बोधिरत्नं-सम्यक्त्वरत्नं समवाप्य किमपि तत् हितं कुरु.. कुरु, अत्यन्तादरख्यापनार्थं वीप्सायां द्विर्वचनं, किंलक्षणं ? - दुरापं-दुष्प्राप्यं, कैः ? - युगसमिलादिनिदर्शनानि "चुल्लग-पासग-धन्ने" इतिगाथोक्तानि, तैः, किं कुर्वन् ? - अगच्छन्, कां ? - रिपूणाम्-अन्तरङ्गाणां षण्णां कषायादीनां, वश्यतां-पराधीनतां, यतो हि तावत् त्वमर्थितं शं-सुखं वाञ्छितं मोक्षसुखमित्यर्थः लभसे-प्राप्नोषि इति, ।।१३.५२।।

**[४०१] द्विषस् त्विमे ते विषय-प्रमादा-**
**असंवृता मानस-देह-वाचः ।**
**असंयमाः सप्तदशापि हास्या-**
**दयश्च बिभ्यच्चर नित्यमेभ्यः ।।१३.५३।।**

**धनवि.**–अनन्तरं 'रिपुवश्यतामगच्छन्'इत्युक्तमत एव तत्त्वतो रिपून् दर्शयन्नुपदिशति –

'द्विषस् त्विमे' इत्यादि, **तुः** पुनरर्थे वाक्यालंकारार्थे वा, **ते**-तव, **इमे** अनुभवप्रत्यक्षा, **विषय-प्रमादाः**-विषयाश्च प्रमादाश्च विषय-प्रमादाः, तथा **असंवृताः**-संवररहिता, **मानस-देह-वाचो**-मनो-वचन-कायाः, **च** पुनः, **सप्तदश**-सप्तदशभेदा, **असंयमाः**-पृथिव्याद्यसंयमव्यापाराः, **च** पुनः, **हास्यादयो**-हास्य-रत्यरति-शोक-भय-जुगुप्सारूपा, **द्विषः**-अन्तरङ्गारयस्सन्ति; **एभ्यः** अनन्तरेभ्यो द्विड्भ्यो, **नित्यं**-सर्वकालं, **बिभ्यद्**-भयं गच्छन्, **चर**-संयममार्गे गच्छेत्यर्थः ।।१३.५३।।

**रत्न.**–अथ [1]रिपूणां नामज्ञापनपूवमेतेभ्यो बिभ्यत्..तिष्ठेत्युपदिशति-**द्विषस्त्विमे ते.** इति व्याख्या-हे यते ! ते-तवैते, तुरिति विशेषज्ञापने, विषयाः प्रमादाश्च विषय-प्रमादाः, प्रत्येकं पञ्च पञ्च द्विषो-वैरिणः सन्ति, च पुनर्मानस-देह-वाचो-मनः-काय-वचनानि, किंलक्षणाः ? - असंवृताः-चपलतया मुक्ता[2] इत्यर्थः, संवृतास्तु धर्मसाधनं भवन्तीत्यसंवृता इति विशेषणं सार्थकं, च पुनः, सप्तदशाप्यसंयमाः-

१. द्विषां - मु० । २. 'मोकला' - छुट पामेला - ए अर्थ छे.

१. प्राणातिपात २. मृषावाद ३. अदत्तादान ४. मैथुन ५. परिग्रहाविरमण १. श्रोत्र २. चक्षुर् ३. घ्राण ४. रसन १०. स्पर्शनेन्द्रियानिग्रह ११. क्रोध १२. मान १३. माया १४. लोभाजय १७. मनो-वचः-कायदुष्प्रवर्त्तना लक्षणाः, तथा हास्यादयो १. हास्य २. रति ३. अरति ४. शोक ५. भय ६. जुगुप्सा लक्षणाः षट्, द्विषः सन्ति, तेन त्वमेतेभ्यो रिपुभ्यो बिभ्यद्-भयं गच्छन्, चर-विहर, बिभ्यदेव सर्वं कुर्विति ।।१३.५३।।

**[४०२] गुरूनवाप्याप्यपहाय गेह-**
**मधीत्य शास्त्राण्यपि तत्त्ववाञ्चि ।**
**निर्वाहचिन्तादिभराद्यभावे-**
**ऽप्यृषे ! न किं प्रेत्यहिताय यत्नः ? ।।१३.५४।।**

**धनवि.**–अनन्तरं 'चर'इत्यादिना भयजनिकाऽसंयममार्गप्रवृत्तिरुपदिष्टा, अथ च शेषसकलसामग्रीसन्निधानजनितां संयमप्रवृत्तिमुपदिशति –

'गुरूनवाप्य' इति, हे **ऋषे !** - हे साधो ! **गुरूनपि**-शुद्धमार्गोपदेशकान् अपि, **अवाप्य**-प्राप्य **गेहम्**-अपि सकलसङ्गमूलं गृहम्, अपि **अपहाय**-त्यक्त्वा **तत्त्ववाञ्चि**-तत्त्वप्रतिपादकानि **शास्त्राण्यपि**-आचाराङ्गादीन्य**धीत्य**-पठित्वा **निर्वाह-चिन्तादिभराद्यभावे** अपि **प्रेत्यहिताय**-परलोकसुखाय, **किं** प्रश्ने **यत्नः**-उद्यमोऽर्थात् संयमे नास्ति ?, अत्र निर्वाहः-सुखाजीविका, तस्याश्चिन्ता-चिन्तनं, **सा आदौ-प्रथमं यासां**, पुत्रचिन्ता-पुत्रीचिन्ता-कलत्रचिन्ता-गृहचिन्ता-राज्यचिन्तादीनां ता निर्वाहचिन्तादयः, तासां **भरः**-समूहः, स आदौ येषां ते निर्वाहचिन्तादिभरादयः, तेषाम् **अभावे**-असत्त्वेऽपि, अत्र-अपिशब्दाद् गृहव्यापार-राज्यव्यापार-यानपात्रव्यापार-भरादिपरिग्रहः ।।१३.५४।।

**रत्न.**–अथ सर्वस्यां सामग्र्यां सत्यां हितं किं न करोषीत्युपदिशति-**गुरूनवाप्य**..इति. व्याख्या-हे ऋषे ! त्वं निर्वाहो-निर्वहणमुदरभरणादिकः, तस्य चिन्ता-'कल्ये उदरभरणं कथं करिष्यामि'इत्यादिरूपा, **सैवादौ यस्य तत् निर्वाहचिन्तादि**,

तस्य भरः-समूहः, स आदौ यस्य तन्निर्वाहचिन्तादिभरादि, तस्याभावे सत्यपि, उदरभरण-वस्त्र-पात्र-पुस्तका-ऽऽदिचिन्ता-राजभय-चौरभयेहलोकभयाद्यभावे सतीत्यर्थः, प्रेत्य-परभवे हिताय यत्नः किं न क्रियते ?, अपि तु कर्त्तुं युक्त इति, किं कृत्वा ? - अवाप्य, कान ? - गुरून् प्रति, किं कृत्वा ? - अपहाय-त्यक्त्वा, किं ? - गेहम्, अपि पुनरर्थे, पुनः किं कृत्वा ? - अधीत्य-पठित्वाऽपीत्यर्थः, कानि ? - शास्त्राणि, किंलक्षणानि ? - तत्त्वप्ररूपिका वाचो येषु तानि तत्त्ववाञ्चि, आगमशास्त्राणीत्यर्थः, इयत्यां सामग्र्यां मिलितायां सत्यां, यन्न हितं करोषि, तदयुक्तं करोषीत्युपदेशः ।।१३.५४।।

**[४०३] विराधितैः संयमसर्वयोगैः,**
**पतिष्यतस्ते भवदुःखराशौ ।**
**शास्त्राणि शिष्योपधिपुस्तकाद्या,**
**भक्ताश्च लोकाः शरणाय नाऽलम् ।।१३.५५।।**

**धनवि.**—अनन्तरं 'प्रेत्यहिताय संयमे यत्नं कुरु'इत्यर्थादुपदिष्टं, तेन संयमविराधनायाः फलं दर्शयन्नुपदिशति —

'विराधितैः' इति, **संयमसर्वयोगैः**-संयमस्य सकलव्यापारैः समिति-गुप्तिसत्यापनप्रभृतिभिः, **विराधितैः**-खण्डितैर्, **भवदुःखराशौ**-सांसारिकदुःखसमूहे, **पतिष्यतः**-अधो गमिष्यतः. **ते** तव, **शास्त्राणि**-आचाराङ्गादीनि व्याकरणादीनि वा, पठितानीति गम्यम्, **च** पुनः, **शिष्योपधिपुस्तकाद्याः** प्रसिद्धाः, **च** पुनर्, **भक्ताः** श्रावक-श्राविकाः **शरणाय**-भवदुःखराशौ पतिष्यतस्त्राणाय, **नाऽलं-न** समर्था भवन्तीति ।।१३.५५।।

**रत्न.**—अथ 'संयमं गृहीत्वा संयमविराधनायै मा प्रवर्त्तस्व'इत्युपदिशति.-**विराधितैः**..इति. व्याख्या-हे यते ! विराधितैः-संयमस्य-चारित्रस्य सर्वयोगा-मूलगुणोत्तरगुणादिकाः, तैर्हेतुभिः, ते-तव, दुःखराशौ पतिष्यतः सतः, शास्त्राणि आगमादीनि, शिष्या, उपधयो-वस्त्रपात्रादयः, पुस्तकम्-अक्षरन्यासरूपं, तान्याद्यानि

येषां ते, आद्यशब्देन हिंगुल-हरिताल-मषी-झलमलि-डब्बक-पट्टिका-पृष्ठकादीनां पुस्तकोपकरणानां सङ्ग्रहः, च पुनर्, भक्ता लोकाः-श्रावक-श्राविकादयः शरणाय-शरणं दातुं **न अलं**-समर्थाः, किन्तु निःशरण एकाक्येव दुःखराशौ पतिष्यसीति भावः ।।१३.५५।।

**[४०५] यस्य क्षणोऽपि सुरधामसुखानि पल्य-**
**कोटीर्नृणां द्विनवतिं ह्यधिकां ददाति ।**
**किं हारयस्यधम ! संयमजीवितं तद् ?,**
**हा हा प्रमत्त ! पुनरस्य कुतस्तवाप्तिः ? ।।१३.५६।।**

**धनवि.**—अथ प्रमादेन संयमविराधानायामेतावती शुभफलहानिः स्यादित्युप-दिशति —

'यस्य क्षणोऽपि' इति, **नृणां**-मनुष्याणां, **यस्य** संयमजीवितस्य, **क्षणोऽपि**-मुहूर्त्तोऽपि, **सुरधामसुखानि**-देवलोकसुखानि, **अधिकां**-समधिकां **द्विनवतिं**-द्विनवति-सङ्ख्याः **पल्यकोटीः**-पल्योपमकोटीर्यावद्, **ददाति**-प्रयच्छति, एतंदुक्तार्थसंवादश्चायम्-

**[४०६]** "सामाइयं कुणंतो समभावं सावओ घडिअदुगं ।
आउं सुरेसु बंधइ इत्तियमित्ताइं पलिआइं ।। [संबोध प्र.१२३०]

**[४०७]** बाणवई कोडीओ लक्खा गुणसट्ठि सहस पणवीसं ।
नवसय पणवीसाए सतिहा अडभागपलिअस्स" ।। [संबोध प्र.१२३१]

अङ्कतोऽपि ९२,५९,२५,९२५ । ३/८, [ ] इति **प्रतिक्रमणसूत्रवृत्तौ** ।।

**हे अधम !** - हे नीच ! **तत् संयमजीवितं किं** कथं-कस्माद्धेतोः, **हारयसि ?** - अज्ञानतो मुधा त्यजसि; **हा हा** इति खेदे, **हे प्रमत्त !** - हे प्रमादिन् ! **पुनः**-द्वितीयवारमस्य संयमजीवितस्य, **आप्तिः**-लाभः, **कुतो हेतोः ?**, भविष्यतीति शेषः ।।१३.५६।।

**रत्न.**—अथ मुहूर्त्तमात्रं संयमजीवितस्य फलं वदन्, प्रमादं मा कार्षीरित्यु-

पदिशन्नाह –

**यस्य क्षणोऽपि**..इति. व्याख्या-हे यते ! यस्य संयमजीवितस्य क्षणोऽपि-मुहूर्त्तोऽपि घटिकाद्वयमपि, सुरधाम्नः-स्वर्गस्य सुखानि प्रति ददाति, कथं ? - यावत्, का ? कर्मतापन्नाः, 'भामा' इत्युक्ते सत्यभामा इत्यादिवत्, पल्यानां-पल्योपमानां कोटीः प्रति, कियतीः ? - द्विनवतिं-द्वाभ्यामधिका नवतिर्द्विनवतिस्तां, किंलक्षणाम् ? - अधिकां लक्षादिभिः, अङ्कैरित्यर्थः, यदुक्तमागमे –

**[४०८]** "बाणवई कोडीओ लक्खा गुणसट्ठि सहस्सपणवीसं ।
नवसय पणवीसाए सतिहा अडभागपलियस्स [सं प्र.१२३१]।।" इति,

हे अधम ! तत् संयमजीवितं त्वं किं हारयसि ?, अपि तु मा हारय, 'हा हा' इति खेदे, हे प्रमत्त ! - हे प्रमादिन् ! पुनरस्य संयमजीवितस्य कुतस्तवाप्तिः-लाभो वर्त्तते ?, अपि तु नास्तीति, दुष्प्रापा चेति ।।१३.५६।।

**[४०९] नाम्नाऽपि यस्येति जनेऽसि पूज्यः,**
**शुद्धात् ततो नेष्टसुखानि कानि ? ।**
**तत् संयमेऽस्मिन् यतसे मुमुक्षो !,**
**ऽनुभूयमानोरुफलेऽपि किं न ? ।।१३.५७।।**

**धनवि.**–अथैतद् द्वारमुपसंजिहीर्षुर्मङ्गलार्थं संयमाराधनायां शुभफलं दर्शयन्नुपदिशति –

*'नाम्नाऽपि'* इति, ***यस्य*** *संयमस्य* ***नाम्नाऽपि***-*संयमवानित्यभिधानेनापि*, **जने**-लोके, **इति**-अमुना प्रकारेण वस्त्र-पात्रादिभिः **पूज्यः**-अर्चनीयो**ऽसि, ततः शुद्धाद्**-भावसंयमात्-**इष्टसुखानि कानि न** भवन्ति ?, अपि तु सर्वाण्यभिलषितसुखानि स्वर्गापवर्गराज्यादीनि भवन्तीत्यर्थः; **तत्**-तस्मात् हे **मुमुक्षो** ! - हे मुने ! **अनुभूयमानोरुफलेऽपि**-प्रत्यक्षोपलभ्यमानमहाफलेऽपि, **अस्मिन्** प्रसिद्धे **संयमे**-चारित्रे **किं न यतसे ?** - कथं नोद्यमं कुरुषे ।।१३.५७।।

इति श्रीतपा. महोपाध्यायश्री**कल्याणविजय**गणिशिष्योपाध्यायश्री**धनविजय-गणि**विरचितायां यतिशिक्षानाम्नी त्रयोदशी पदपद्धतिः ।।१३।।

**रत्न.**—अथ यस्य नाम्नाऽपि पूजां प्राप्नुवन्नसि, तस्मिन् परिणामसुन्दरेऽपि किं संयमे नोद्यमं कुरुषे ?

**नाम्नाऽपि यस्य**..इति. व्याख्या-हे मुमुक्षो ! - हे यते, यस्य संयमस्य नाम्नाऽपि जने-लोके, इति-अमुना प्रकारेण प्रत्यक्षतो दृश्यमानेन पूज्योऽसि, तर्हि-ततः शुद्धात् संयमाद्, इष्टानि-वाञ्छितानि च तानि सुखानि चेष्टसुखानि, कानि न भवन्ति ?, अपि तु सर्वाण्यपि भवन्ति, तत्-तस्मात् कारणाद्, अस्मिन् संयमे किं न यतसे ? - यत्नं न करोषि ? अपि तु यत्नः कर्त्तुं युक्त इति, येन किंलक्षणैः ? - अनुभूयमानमरु-महत् फलं यस्य स तस्मिन्, किमपि यस्य फलं साक्षादनुभूयमानं महच्च भवति तस्मिन् शर्करादाविव यत्नः कर्त्तुं युक्त एवेति, मोक्षमिच्छो ! मुमुक्षो ! इति संबोधनं साभिप्रायमिति ।।१३.५७।।

**[४१०] श्रीशान्तिचन्द्र**वरवाचकदुग्धसिन्धु–
लब्धप्रतिष्ठवरवाचकरत्नचन्द्रः ।
**अध्यात्मकल्प**फलस्य चकारवृत्तिं,
तत्र त्रयोदश इति प्रथितोऽधिकारः।।१३।।

**इति त्रयोदशोऽधिकारः ।।**



# १४. मिथ्यात्वादिसंवरोपदेशाधिकारः

**[४११] मिथ्यात्व-योगा-ऽविरति-प्रमादा-**
**नात्मन् ! सदा संवृणु सौख्यमिच्छन् ।**
**असंवृता यद्भवतापमेते,**
**सुसंवृता मुक्तिरमां च दद्युः ।।१४.१।।**

**धनवि.**—अथानन्तरद्वारे केवलसर्वविरतिधारियतियोग्यमुपदेशमुपदिश्य सामान्यतः सर्वविरतिधारि-देशविरतिधारिणोर्योग्यमुपदेशमुपदेष्टुं मिथ्यात्वादिसंवरोपदेशद्वारं दर्शयन्नाह —

**अथ सामान्यतो यतीन् विशेष(तो)धर्मस्थगृहिणश्चाश्रित्य मिथ्यात्वादि-संवरोपदेशः**

**धनवि.—अथ-सामान्य** इति, अथ इत्यानन्तर्ये **सामान्यतः**-साधारण्येन **यतीन्**-संयमिनः, च पुन**र्विशेष-धर्मस्थगृहिणः**-सम्यक्त्वमूलद्वादशव्रतधारिश्रावकान्, **आश्रित्य**-उद्दिश्य **मिथ्यात्वादि-संवरोपदेशो**-मिथ्यात्वा-ऽविरति-कषाय-योगनिरोधोपदेशः, प्रदर्श्यते इति शेषः ।

अथास्मिन् द्वारे पूर्वोद्दिष्टत्वेन पूर्वं मिथ्यात्वादिसंवरमुपदिशन्नाह-

'मिथ्यात्व.' इति, हे **आत्मन् !** त्वं **सौख्यमिच्छन्**-सुखमभिलषन्, **मिथ्यात्व-योगा-ऽविरति-प्रमादान् सदा**-सर्वकालं **संवृणु**-सङ्कोचविषयीकुर्वित्यन्वयः, तत्र मिथ्यात्वं च — [संबोधप्रकरणे]

**[४१२]** "दुविहं लोइयमिच्छं देवगयं गुरुगयं मुणेयव्वं ।
लोउत्तरं च दुविहं देवगयं गुरुगयं चेव" ।। [१०२]।।

**[४१३]** 'चउभेयं मिच्छत्तं' ..... ।
अथवा मिथ्यात्वं पञ्चविधम्, यदाह ।।

**[४१४]** अभिगहियमणभिगहियं च तह अभिनिवेसियं चेव ।
संसइयमणाभोगं मिच्छत्तं पञ्चहा होइ ।। [१०५] इत्यादि

अत्र १. अभिग्रहिकं पाखण्डिनां स्वस्वशास्त्रनियन्त्रितविवेका-ऽऽलोकानां परपक्षप्रतिक्षेपदक्षाणां २. अनाभिग्रहिकं च प्राकृतजनानां सर्वे देवा वन्द्याः, न निन्द्याः, एवं सर्वे गुरवः सर्वे धर्माश्चाराध्या इति ३. आभिनिवेशिकं च यथास्थितं वस्तु जानतोऽपि दुरभिनिवेशप्लावितधियो **गोष्ठामाहिला**देरिवेति ४. सांशयिकं च देव-गुरु-धर्मेषु'अयमयं वा'इति संशयानस्येति ५. अनाभोगिकं च विचारशून्यस्यैकेन्द्रियादेर्विशेषज्ञानविकलस्येति **अविरति**श्च-विरतिराहित्यं; **योगा**श्च-अशुभमनो-वाक्-कायव्यापाराः; **प्रमादाश्च**-विषय-कषायादयः; ततो द्वन्द्वः । **यद्**-यस्मात् कारणाद्, **असंवृता**-अनिरुद्धा **एते** मिथ्यात्वादयो **भवतापं**-संसारस्य परितापं **दद्युः**-प्रयच्छन्ति स्म; **च** पुनः, **सुसंवृता**-निरुद्धा **एते** मिथ्यात्वादयो **मुक्तिरमां**-मोक्षलक्ष्मीं **दद्युः**-प्रयच्छन्ति स्म ।।१४.१।।

**रत्न.**–अथ सामान्यतो यतीन् विशेषतो [1]धर्मस्थगृहिणश्चाश्रित्य मिथ्यात्वा-ऽऽदिसंवरोपदेशाख्यश्चतुर्दशोऽधिकारो विवरीतुं प्रक्रम्यते, - तत्र प्रथमं बन्धहेतु-संवरमाह –

**मिथ्यात्व-योगा-ऽविरति**..इति. व्याख्या-हे आत्मन् ! मिथ्यात्व-योगा-ऽविरति-प्रमादान् चतुरोऽपि बन्धहेतून्, त्वं सदा संवृणु, किं कुर्वन् ? - इच्छन्, किं? - सौख्यं, यद्-यस्मात् कारणात्, एते चत्वारोऽप्यसंवृताः सन्तो भवस्य-संसारस्य, तापं-कष्टं दद्युः-ददति स्म, च पुनरेते सुसंवृताः सन्तो मुक्तिरमां-मोक्षलक्ष्मीं दद्युरिति ।।१४.१।।

**[४१५] मनः संवृणु हे विद्व-**
**न्नसंवृतमना यतः ।**
**याति तन्दुल[2]मत्स्यो द्राक्,**
**सप्तमीं नरकावनीम् ।।१४.२।।**

**धनवि.**–यति-श्रावकयोः प्रायो मिथ्यात्वासंभवेन मिथ्यात्वमुपेक्ष्य योगनिरोध-

१. धर्ममय० मु० । २. मुद्रित प्रतौ मूले टीकायां च 'तण्डुल' इति पाठः ।

मुपदिशन् पूर्वं मनोयोगनिरोधमुपदिशति –

'मनः संवृणु' इति, हे **विद्वन् !** - हे धीमन् ! त्वं **मनो**-मानसं **संवृणु**-दुष्टविषयेभ्यो निवर्तय; **यतः** कारणाद्-**असंवृतमना**-अनिरुद्धचित्तः, **तन्दुलमत्स्यः**-तन्दुलनाम्ना प्रसिद्धो मत्स्यो-मीनो **द्राक्**-शीघ्रं **सप्तमीं नरकावनीं**-महातमःप्रभानाम्नीं सप्तमनरकपृथ्वीं **याति**-गच्छति । अत्र तन्दुलमत्स्यस्वरूपं चेदम्; तन्दुलमत्स्यः पुनर्यो महामत्स्यस्य चक्षुःपक्ष्मणि तन्दुलप्रमाणोऽन्तर्मुहूर्त्तायुरुपजायते, तथाविधदारुणमपरिणामेन चान्तर्मुहूर्तेन तादृगायुर्बद्ध्वा सप्तमं नरकं गच्छतीति, **उयुपदेशरत्नाकरे** द्वितीयतटे तृतीयांशे नवमगाथायां; पुनर् **उपदेशरत्नाकरे** एव यथा तन्दुलमत्स्यः प्रसुप्तमहामत्स्यविकस्वरवदने जलोर्मिवशात् प्रविशतो निर्यतश्च बहून् मत्स्यान् वीक्ष्य तद्ग्रासाध्यावसायभृदिति मध्याधिकारे पञ्चमतरङ्गे इति ।।१४.२।।

**रत्न.**–अथ सर्वत्र मनसः प्राधान्यात् मनःसंवरमाह –

**मनः संवृणु**..इति. व्याख्या-हे विद्वन् ! - हे पण्डित ! त्वं मनः प्रति संवृणु, यतः कारणाद् **असंवृतं मनो** येन सोऽसंवृतमनाः, तन्दुलप्रमाणो मस्यः, तन्दुलमत्स्यो द्राक्-शीघ्रं सप्तमीं नरकावनीं-नरकपृथिवीं याति, तत्र मन एव मूलं निमित्तं, सप्तमपृथिव्यागतो महामत्स्याक्षिस्थितमत्सीगर्भजोऽन्तमुहूर्त्तायुष्को महामत्स्यप्रसारितास्यान्निर्गच्छतो बहून् मत्स्यान् दृष्ट्वा 'यद्येतादृश-महाकायोऽहमभवं तदिमान्[1] सर्वान् एकहेलमेवौष्ठपुटमीलनेन कवलीकरोमि'इति दुर्ध्यानपरो मृत्वा पुनरन्तर्मुहूर्तान्तरेण सप्तमीं नरकपृथिवीं यातीत्यागमः । एवं काय-वचोभ्यामशक्तो मनोव्यापारत एव दुर्गतिं यातीति ।।१४.२।।

**[४१६] प्रसन्नचन्द्रराजर्षेर्मनःप्रसर-संवरौ ।**
**नरकस्य शिवस्यापि, हेतुभूतौ क्षणादपि ।।१४.३।।**

**धनवि.**–पुनर्मनोयोगसंवरं दृष्टान्तपूर्वकमुपदिशति –

१. तदैतान् - मु० ।

'प्रसन्नचन्द्र.' इति, **प्रसन्नचन्द्रराजर्षेः**-श्रीसोमचन्द्रनृपसूनोर्**मनःप्रसर-संवरौ**-चित्तप्रवृत्ति-निवृत्ती **नरकस्य**-निरयस्य, **अपि**-पुनः **शिवस्य**-मोक्षस्य **क्षणादपि**-स्तोककालादपि **हेतुभूतौ**-हेतू एव हेतुभूतौ भवतः-स्याताम् । **प्रसन्नचन्द्र**राजर्षिचरितं चेदम् –

"**क्षितिप्रतिष्ठितपुरं**, जगच्चित्तप्रतिष्ठितम् ।
**प्रसन्नचन्द्रस्** तत्रासीत्, पृथिवीपाकशासनः ।।१।।

**श्रीवीरः** समवासार्षीत् तत्र नन्तुमगान्नृपः ।
श्रुत्वा धर्मं प्रबुद्धः सन्, सुतं राज्ये न्यवेशयत् ।।२।।

प्रव्रज्याऽऽदाय शिक्षे द्वे, स गीतार्थोऽभवन्मुनिः ।
अन्यदा जिनकल्पं स, प्रतिपित्सुर्महामुनिः ।।३।।

सप्तभिर्भावनाभिस्तं, भावयन् धर्मतत्त्ववित् ।
**राजगृह**श्मशाने स, कायोत्सर्गेण तस्थिवान् ।।४।।

तदा तमोरिपु**र्वीर**स् तत्रापि समवासरत् ।
वन्दारुर्निर्ययौ लोकः, कोकवत् प्रीतमानसः ।।५।।

**क्षितिप्रतिष्ठिता**त् तत्रायातौ द्वौ च वणिग्वरौ ।
**प्रसन्नचन्द्र**राजर्षिं, दृष्ट्वा मार्गसमीपगम् ।।६।।

एकोऽभाषिष्ट [1]वृद्धः सन्, धन्यात्मा प्रभुरेष नः ।
राज्यलक्ष्मीं परित्यज्य, स्वीचकार तपःश्रियम् ।।७।।

द्वितीयः स्माह धन्यत्वं, कुतोऽमुष्य महामुनेः ? ।
योऽसंजातबलं पुत्रं, कृत्वा राज्येऽग्रहीद् व्रतम् ।।८।।

---

१. बुद्धः - मु० ।

वराकः सोऽधुना डिम्भो, दायादैः परिभूयते ।
उपद्रुतं पुरं लोको, दुःखे बहुरपात्यत ।।९।।

तदद्रष्टव्य एवायमित्याकर्ण्याकुपन्मुनिः ।
दध्यौ पुत्रं मयि सति, दुर्धीरपकरोति कः ? ।।१०।।

महासङ्ग्राममारूढं, **श्रेणिकः** क्ष्माभृदीयिवान् ।
स दृष्ट्वा तमवन्दिष्ट, कायोत्सर्गधरं मुनिम् ।।११।।

तं नेषदपि दृष्ट्याऽपि, स पुनः समभावयत् ।
**श्रेणिको**ऽचिन्तयन्नूनं, शुक्लध्याने स्थितोऽस्त्यसौ ।।१२।।

ततः श्री**श्रेणिको वीरं,** नत्वाऽप्राक्षीज्जगत्प्रभो ! ।
**प्रसन्नचन्द्र**राजर्षिर्यादृग्ध्यानो मया नतः ।।१३।।

*तत्र कालं स चेत् कुर्यात् तस्य जायेत का गतिः ? ।*
बभाषे भगवान् **वीरः,** सप्तम्यामवनौ गतिः ।।१४।।

तच्छ्रुत्वा **श्रेणिको** दध्यौ, हा किमेतन्मया श्रुतम् ? ।
अत्रान्तरेऽस्य राजर्षेः, सङ्ग्रामारूढचेतसः ।।१५।।

प्रधानरिपुणैकेन, युद्ध्यमानस्य निर्भयम् ।
निष्ठां गतानि शस्त्राणि, शिरस्त्राणे करं [1]न्यधात् ।।१६।।

एतेनैतं हनिष्यामि, हताः सर्वे परेऽरयः ।
यावत् पस्पर्श मौलिं स, तावदग्रेऽस्ति लुञ्चितम् ।।१७।।

ततः संवेगमापन्नो, राजर्षिर्, दध्यिवानिदम् ।
'आः किं चक्रे मया धिग् धिग्, विराद्धं प्रथमं व्रतम्' ।।१८।।

१. 'व्यधात्' - मु० ।

शुद्ध्यमानाशयो भूपः, स्वं निन्दत्यतिचारिणम् ।
मनोबद्धानि कर्माणि, मनसैव क्षिपंस्तदा ।।१९।।

**श्रेणिकः** पुनरप्राक्षीत्, स राजर्षिः प्रभो ! ऽधुना ।
यादृग्ध्यानोऽस्ति तत्रैव, मृतो गच्छति कां गतिम् ? ।।२०।।

स्वाम्यूचे संप्रति मृतोऽनुत्तरेषु सुरो भवेत् ।
अथोचे **श्रेणिकः** स्वामिन् !, पूर्वमन्यत् प्र(न्य)रूपि किम् ! ।।२१।।

किं वाऽन्यथा मयाऽज्ञायि ?, स्वाम्याह न मयाऽन्यथा ।
ऊचे, त्वयाऽन्यन्नाश्रावि, **श्रेणिकः** स्माह तत् कथम् ? ।।२२।।

स्वाम्यथोवाच तद्वृत्तं, सर्वं **श्रेणिक**भूभुजे ।
**प्रसन्नचन्द्रराजर्षेः,** पार्श्वेऽभूद्दुन्दुभेर्ध्वनिः ।।२३।।

देवैः कलकलश्चक्रे, राजोचे किं महः ? प्रभो !
स्वाम्याह तस्य राजर्षेः, शुद्ध्यमानात्मनोऽधुना ।।२४।।

कुर्वन्ति केवलोत्पत्तौ, महिमानं सुरासुराः ।
दृष्टान्तोऽभूत् तदेकोऽयमुत्सर्गे द्रव्य-भावयोः ।।२५।।

इति **श्रीऋषिमण्डलवृत्त्य**नुसारेण लिखितम् ।।१४.३।।

**रत्न.**–पुनस्तत्र दृष्टान्तगर्भं श्लोकमाह –

**प्रसन्नचन्द्रराजर्षेः**..इति. व्याख्या-हे देहिन ! प्रसन्नचन्द्रराजर्षेर्मनसः प्रसरो-दुर्ध्यानतया व्याप्तिः, तथा संवरो-दुर्ध्यानप्रसरनिवारणलक्षणः, तौ क्षणादपि-क्षणमात्रतोऽपि यथाक्रमं नरकस्य सप्तमनरकस्य शिवस्य-मोक्षस्यापि हेतुभूतौ जाताविति, तत्र दृष्टान्तविस्तरः **श्रीहेमसूरिकृतत्रिषष्टिशलाकापुरुषचरित्रस्य-परिशिष्टपर्वतो**ऽवसेय इति ।।१४.३।।

**[४१७] मनोऽप्रवृत्तिमात्रेण,**
**ध्यानं नैकेन्द्रियादिषु ।**
**धर्म्य-शुक्लमनःस्थैर्य-**
**भाजस्तु ध्यायिनः स्तुमः ।।१४.४।।**

**धनवि.**—अथ पवनसाधनाधिकारिकृतमनोरोधस्यां-ऽकिञ्चित्करत्वं, धर्मध्यानाधिकारिकृतमनोरोधस्य च साधकत्वं दर्शयन्नुपदिशति —

'मनोऽप्रवृत्ति' इति, **मनोऽप्रवृत्तिमात्रेण**-चेतसः प्रवृत्त्यभावमात्रेण संज्ञिपञ्चेन्द्रियातिरिक्तेषु प्राणिषु मनसोऽभावान्मनःप्रवृत्त्यभावाद्-**एकन्द्रियादिषु**-पृथिवीकायिका-ऽप्कायिक-तेजः कायिक-वायुकायिक-वनस्पतिकायिकेषु, **आदि**पदाद् द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रियेषु मनोऽप्रवृत्तिरूपं **ध्यानं**-योगाङ्गं न भवति, किंच-प्रत्युत पवनसाधनेन मनोरोधस्य धर्मध्यान-शुक्लध्यानान्तरायकारित्वादकिञ्चित्करत्वम्, अत एव **श्रीहेमसूरिकृतश्रीयोगशास्त्रे** पञ्चमप्रकाशे —

"न च प्राणायामो मुक्तिसाधने ध्याने उपयोगी, असौमनस्यकारित्वाद्, यदाहुः — [चेइयवंदणमहाभासे]

**[४१८]** ऊसासं न निरुंभइ आभिग्गहिओ वि किमुय चेट्ठाए ? ।
सज्जमरणं निरोहे सुहुमोसासं तु जयणाए ।।
[४३१]।। [१]इत्यादि,

**तु** पुनर्, **धर्म्य-शुक्लमनःस्थैर्यभाजो**-धर्म्य-शुक्लध्यानाभ्यां मनःस्थैर्यं भजति (भजन्ति) तथा तान्, **ध्यायिनो**-ध्यानकर्तॄन् वयं **स्तुमः**-स्तुतिगोचरान् कुर्म इति, अत्र **धर्मेणोपेतं धर्म्यम्,** ध्यानस्वरूपं च — [ध्यानशतके]

**[४१९]** "जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं ।
तं हुज्ज भावणा वा अणुपेहा वा अहव चिंता ।। [२]।।

---

१. उच्छ्वासं न निरुणद्धि आभिग्रहीकोऽपि किमुत चेष्टायां ? ।
सद्योमरणं नीरोधे सूक्ष्मोच्छ्वासं तु यतनया ।।१।।

**[४२०]** अंतोमुहुत्तमित्तं चित्तावत्थाणमेगवत्थुम्मि ।
छउमत्थाणं झाणं जोगनिरोहो जिणाणं तु ।। [३]।।

**[४२१]** अंतोमुहुत्तपरओ चिंता झाणंतरं च हुज्जाहि ।
सुचिरं पि हुज्ज बहुवत्थुसंकमे झाणसंताणो ।। [४]।।

**[४२२]** १ अट्टं. २ रुद्दं. ३ धम्मं. ४ सुक्कं. झाणाइं, तत्थ अंताइं ।
निव्वाणसाहणाइं भवकारणमट्ट-रुद्दाइं ।। [५]।।

इत्यादिगाथास्वरूपं सप्रपञ्चं **श्रीआवश्यकवृत्तिगतध्यानशतक**वृत्तितोऽवसेयं, विस्तरभयान्नेह प्रतन्यते इति ।।१४.४।।

**रत्न.–मनोऽप्रवृत्तिमात्रेण**..इति. व्याख्या-मनसोऽप्रवृत्तिः-अप्रवर्त्तनं, केवलम-प्रवृत्तिरप्रवृत्तिमात्रं, तेन मनोऽप्रवृत्तिमात्रेण, एकेन्द्रियादिषु ध्यानम्-आर्त्त-रौद्र-**धर्म-शुक्लरूपं** नास्ति, आदिशब्देन द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिया-ऽसंज्ञि-पञ्चेन्द्रिया-ऽऽदिग्रहणं, तेन कारणेन, तुरिति विशेषे, तन्मनः प्रति प्राप्य धर्महेतुत्वाद् धर्मं शुक्लपुद्गलोपमानत्वाच्छुक्लं, धर्मं च शुक्लं च धर्म-शुक्ले, ताभ्यां हेतुभ्यां मनसः स्थैर्यं-मनोनिरोधलक्षणं भजन्तीति **धर्मशुक्ल**मनःस्थैर्यभाजः, तान् प्रति वयं स्तुमः-स्तुतिविषयीकुर्मः, किंलक्षणान् ? - ध्यायन्तीति ध्यायिनस्तान् ध्यायिनो, ध्यानवत इत्यर्थः ।।१४.४।।

**[४२३] सार्थं निरर्थकं वा यन्-**
**मनः सुध्यानयन्त्रितम् ।**
**विरतं दुर्विकल्पेभ्यः,**
**पारगांस्तान् स्तुवे यतीन् ।।१४.५।।**

**धनवि.–**अथ मनःस्थैर्याधिकाराऽऽगतं धर्मध्यानस्वरूपं निरूपयन् धर्मध्यायिनः स्तौति –

'सार्थम्' इति, **यन्मनो**-येषां चित्तं, **सार्थं**-सफलं, **वा**-अथवा **निरर्थकं**-निष्फलं,

**सुध्यानयन्त्रितं**-शुभकार्यकरणमनोरथेन नियन्त्रितं-सङ्कलितं सत्, **"सद्ध्यान"**पाठे तूत्तमं ध्यानं पूर्ववदेव, **दुर्विकल्पेभ्यः**-अशुभकार्यकरणमनोरथेभ्यो, **विरतं**-निवृत्तं भवति, अत्र सार्थकता निरर्थकता च शुभकार्यकरणमनोरथे समुत्पन्ने कार्यसिद्धौ सफलता, तत्कार्यासिद्धौ च निष्फलता, उभयत्रापि शुभकर्मानुबन्धिता, यदुक्तम्-

**[४२४]** "भवन्ति भूरिभिर्भाग्यैर्धर्मकर्ममनोरथाः ।
**फलन्ति यत्पुनस्ते तु, तत्सुवर्णस्य सौरभम्** ।।[ ]।।" इति ।

**तान्**-अनन्तरोक्ताऽन्वयोपदर्शितान् **पारगान्**-संसारपारगामिनो **यतीन्**-मुनीन् **स्तुवे**-स्तुतिगोचरान् कुर्वे इत्यर्थः ।।१४.५।।

**रत्न.—सार्थम्**..इति. व्याख्या-यन्मनः, सहार्थेन वर्त्तते तत् सार्थं, तथा निर्गतोऽर्थः-प्रयोजनं यस्मात् तन्निरर्थकं, प्रवृत्तिमदित्यध्याहार्यम्, अन्यथाऽर्थसङ्गतिर्न स्यात्, मनसः प्रवृत्तिर्द्विधा-सार्थका निरर्थका च, किञ्चिदात्मनः स्वजनस्य वा हेतोर्मनसः प्रवृत्तिः सार्थका, तथा वर्त्मनि गच्छन् कश्चिच्चिन्तयेद्-'ईदृक् क्षेत्रं हलीकृत्योप्तं भवति, तदा भूयसी शस्यनिष्पत्तिर्जायते, हा धिक् कश्चिन्नायको नास्ति, यत ईदृशी भूः शून्या पतिताऽस्ति'इत्यादिविषया प्रवृत्तिर्निरर्थका, सर्वथा प्रयोजनाभावादिति, तन्मनः सुध्यानेन-धर्म-शुक्ललक्षणेन यन्त्रितं-रुद्धं सत्, अत एव येषां दुर्विकल्पेभ्यो विरतं वर्त्तते तान् यतीन् प्रति स्तुवेऽहमिति, किंलक्षणान् ? - संसारसागरस्य पारगान्-पारं प्राप्तान्, अनेनेदृशानामपि महानुभावानां सत्ता ज्ञापिता, अत एव **गच्छो रत्नाकर** इति, यथा रत्नाकरे सत्यपि मकर-मत्स्यादियादसां समूहे परं प्रवाल-मौक्तिकादीनां महार्घवस्तूनां सद्भावाद् रत्नाकरत्वं न यातीति तथा गच्छरत्नाकरेऽप्युपनयोऽभ्यूह्य इति ।।१४.५।।

**[४२५] वचोऽप्रवृत्तिमात्रेण,**
**मौनं के के न बिभ्रते ? ।**
**निरवद्यं वचो येषां,**
**वचोगुप्तांस्तु तान् स्तुवे ।।१४.६।।**

**धनवि.**—अथ द्वितीयस्य वाग्योगस्य संवरमुपदिशति —

'वचो' इति, **वचोऽप्रवृत्तिमात्रेण**-वचनप्रवृत्त्यभावमात्रेण-वाक्प्रयत्नासामर्थ्येनेत्यर्थः **मौनं**-वाग्व्यापाररहित्यं, **के के** एकेन्द्रियादयो, रोगविशेषेण पञ्चेन्द्रियाश्च जन्तवो **न बिभ्रते**-न धरन्ति, अपि तु सर्वेऽपि धरन्तीति; **तु**-पुनर्, **येषां** मुनीनां **वचो**-वचनं **निरवद्यं**-निष्पापं वर्त्तते, **तान्**-वचोगुप्तान् वाग्गुप्तिधरान् मुनीन् **स्तुवे**-स्तुतिगोचरान् कुर्वे ।।१४.६।।

**रत्न.**—अथ मनःसंवरमुद्दिश्य चतुर्भिः श्लोकैर्वाक्संवरमाह —

**वचोऽप्रवृत्तिमात्रेण**-इति. व्याख्या-हे अङ्गिन् ! वचसोऽप्रवृत्तिरप्रवृत्तिमात्रं, तेन के के प्राणिन एकेन्द्रियादयो मूका वा मौनं न बिभ्रते ? - न धारयन्ति? वचनयोगाभावाद् द्रव्येन्द्रियोपघाताद् वा, अपि तु बहवो बिभ्रते, परं [1]वाग्योगे सति द्रव्येन्द्रियपाटवे सति वा, येषां महात्मनां निरवद्यं-सावद्यप्रवृत्तिरहितं वचो वर्त्तते, तान्-वचसा गुप्तान्-वाग्गुप्तिमतः स्तुवेऽहमिति ।।१४.६।।

**[४२६] निरवद्यं वचो ब्रूहि,**
**सावद्यवचनैर्यतः ।**
**प्रयाता नरकं घोरं,**
**वसुराजादयो द्रुतम् ।।१४.७।।**

**धनवि.**—अथ वाग्गुप्त्यभावेऽनिष्टफलं दृष्टान्तपूर्वकं दर्शयन्नुपदिशति —

'निरवद्यम्' इति, ततः कारणात्, **निरवद्यं**-निष्पापं **वचो**-वचनं **ब्रूहि**-वद, **यतः**-कारणात् **सावद्यवचनैः**-अलीकवचनैर्, **वसुराजादयो**-वसुनामनृपप्रभृतयः सपापवचनवक्तारो **द्रुतं**-शीघ्रं **घोरं**-रौद्रं सप्तमं **नरकं प्रयाताः**-प्रकर्षेण प्राप्ताः ।

भावार्थस्तु **वसुराज**कथातोऽवसेयः, तत्कथा चेयम् —

अस्ति **चेदिषु** विख्याता, नाम्ना **शुक्तिपुरी** पुरी ।
शुक्तिमत्याख्यया नद्या, नर्मसख्येव शोभिता[2] ।।१।।

---

१. वचो० - मु० । २. शोभना । मु० ।

पृथ्वीमुकुटकल्पायां, तस्यां तेजोभिरद्भुतः ।
माणिक्यमिव पृथ्वीशोऽभिचन्द्रो नामतोऽभवत् ।।२।।

सूनुः सूनृतवाक् तस्य, **वसु**रित्यभिधानतः ।
अजायत महाबुद्धिः, **पाण्डो**रिव **युधिष्ठिरः** ।।३।।

पार्श्वे **क्षीरकदम्बस्य,** गुरोः **पर्वतकः** सुतः ।
राजपुत्रो **वसु**श्छात्रो, **नारद**श्चापठंस्त्रयः ।।४।।

सौधोपरि शयानेषु, तेषु पाठश्रमान्निशि ।
चारणश्रमणौ व्योम्नि, यान्तावित्यूचतुर्मिथः ।।५।।

एषामेकतमः स्वर्गं, गमिष्यत्यपरौ पुनः ।
नरकं यास्यतस्तच्चाश्रौषीत् **क्षीरकदम्बकः** ।।६।।

तच्छ्रुत्वा चिन्तयामास, खिन्नः **क्षीरकदम्बकः** ।
मय्यप्यध्यापके शिशू, यास्यतो नरकं हहा ।।७।।

एभ्यः को यास्यति स्वर्गं, नरकं कौ च यास्यतः ? ।
जिज्ञासुरित्युपाध्यायस् तांस् त्रीन् युगपदाह्वयत् ।।८।।

यावपूर्णं समर्प्यैषामेकैकं पिष्टकुर्क्कुटम् ।
स[1] ऊचेऽमी तत्र वध्या, यत्र कोऽपि न पश्यति ।।९।।

**वसु-पर्वतकौ** तत्र, गत्वा शून्यप्रदेशयोः ।
आत्मनीनां गतिमिव[2], जघ्नतुः पिष्टकुर्कुटौ ।।१०।।

महात्मा **नारद**स्तत्र, व्रजित्वा नगराद् बहिः ।
स्थित्वा च विजने देशे, दिशः प्रेक्ष्येत्यतर्कयत् ।।११।।

गुरुपादैरदस्तावदादिष्टं वत्स ! यत् त्वया ।
वध्योऽयं कुर्क्कुटस्तत्र, यत्र कोऽपि न पश्यति ।।१२।।

---

१. र-विपुलाभिधानोऽनुष्टुब्भेदः । २. न-विपुलाभिधानोऽनुष्टुब्भेदः ।

असौ पश्यत्यहं पश्याम्यमी पश्यन्ति खेचराः ।
लोकपालश्च पश्यन्ति, पश्यन्ति ज्ञानिनोऽपि च ।।१३।।

नास्त्येव स्थानमपि[1] तद्, यत्र कोऽपि न पश्यति ।
तात्पर्यं तद्गरुगिरां[1], न वध्यः खलु कुर्क्कुटः ।।१४।।

गुरुपादा दयावन्तः, सदा हिंसापराङ्मुखाः ।
अस्मत्प्रज्ञां परिज्ञातुमेतन्नियतमादिशत् ।।१५।।

विमृश्यैवमहत्वैव, कुर्क्कुटं स समाययौ ।
कुर्क्कुटाहनने हेतुं, गुरोर्व्यज्ञपयच्च तम् ।।१६।।

स्वर्गं यास्यत्यसौ तावदिति निश्चित्य सस्वजे ।
गुरुणा **नारदः** स्नेहात्, साधु साध्वितिभाषिणा ।।१७।।

**वसु-पर्वतकौ** पश्चादागत्यैवं शशंसतुः ।
निहतौ कुर्क्कुटौ तत्र, यत्र कोऽपि न पश्यति ।।१८।।

अपश्यतां युवामादावपश्यन् खेचरादयः ।
कथं हतौ कुर्क्कुटौ[2] रे ?, पापावित्यशपद् गुरुः ।।१९।।

ततः खेदादुपाध्यायो, दध्यौ विध्यातपाठधीः ।
मुधा मेऽध्यापनक्लेशो, **वसु-पर्वत**योरभूत् ।।२०।।

गुरूपदेशो हि यथा[3] पात्रं परिणमेदिह ।
**अभ्राम्भः स्थानभेदेन, मुक्ता-लवणतां व्रजेत्** ।।२१।।

प्रियः **पवर्तकः** पुत्रः, पुत्रादप्यधिको **वसुः** ।
नरकं यास्यतस् तस्माद् गृहवासेन किं मम ? ।।२२।।

निर्वेदादित्युपाध्यायः, प्रव्रज्यामग्रहीत् तदा ।
तत्पदं **पर्वतो**ऽध्यास्त, व्याख्याक्षणविचक्षणः ।।२३।।

---

१. न-विपुलाभिधानोऽनुष्टुब्भेदः । २. र-विपुला । ३. स-विपुला० ।

भूत्वा गुरोः प्रसादेन, सर्वशास्त्रविशारदः ।
**नारदः** शारदाम्भोदशुद्धधीः स्वां भुवं ययौ ।।२४।।

नृपचन्द्रोऽभि**चन्द्रो**ऽपि, जग्राह समये व्रतम् ।
ततश्चासीद् **वसुराजो**[1], वासुदेवसमः श्रिया ।।२५।।

सत्यवादीति स प्राप, प्रसिद्धिं पृथिवीतले ।
तां प्रसिद्धिमपि त्रातुं, सत्यमेव जगाद सः ।।२६।।

अथैकदा मृगयुणा[2], मृगाय मृगयाजुषा ।
चिक्षिपे विशिखो विन्ध्यनितम्बे सोऽन्तराऽस्खलत् ।।२७।।

इषुस्खलनहेतुं स, ज्ञातुं तत्र ययौ ततः ।
आकाशस्फटिकशिलामज्ञासीत्[2] पाणिना स्पृशन् ।।२८।।

स दध्याविति मन्येऽस्यां, सङ्क्रान्तः परतश्चरन् ।
**भूमिच्छायेव शीतांशौ**[3], ददृशे हरिणो मया ।।२९।।

पाणिस्पर्शं विना नेयं, सर्वथाऽप्युपलक्ष्यते ।
अवश्यं तदसौ योग्या, **वसो**र्वसुमतीपतेः ।।३०।।

रहो व्यजिज्ञपद् राज्ञो, गत्वा तां मृगयुः शिलाम् ।
हृष्टो राजाऽपि जग्राह, ददौ चास्मै महद् धनम् ।।३१।।

स तया घटयामास, च्छन्नं स्वासनवेदिकाम् ।
तच्छिल्पिनोऽघातयच्च, **नात्मीयाः कस्यचिन्नृपाः** ।।३२।।

तस्यां सिंहासनं वेदौ, **चेदीश**स्य निवेशितम् ।
सत्यप्रभावादाकाशस्थितमित्यबुधज्जनः[4] ।।३३।।

सत्याद्धि तुष्टाः[4] सान्निध्यमस्य कुर्वन्ति देवताः ।
एवमूर्जस्विनी तस्य, प्रसिद्धिर्व्यानशे दिशः ।।३४।।

---

१. स-विपुला० । २. न-विपुला० । ३. सिद्धान्तविरुद्धं भाति. सं. । ४. म-विपुला० ।

तया प्रसिद्ध्या[1] राजानो, भीतास्तस्य वशं ययुः ।
**सत्या वा यदि वा मिथ्या, प्रसिद्धिर्जयिनी नृणाम्** ।।३५।।

आगाच्च **नारदो**ऽन्येद्युस्ततश्चैक्षिष्ट **पर्वतम्** ।
व्याख्यानयन्तमृग्वेदं, शिष्याणां शेमुषीजुषाम् ।।३६।।

**अजैर्यष्टव्य**मित्यस्मिन्, मेषैरित्युपदेशकम् ।
बभाषे **नारदो** भ्रातर् ! भ्रान्त्या किमिदमुच्यते ? ।।३७।।

त्रिवार्षिकाणि धान्यानि, न हि जायन्त इत्यजाः ।
व्याख्याता गुरुणाऽस्माकं, व्यस्मार्षीत् केन हेतुना ? ।।३८।।

ततः **पर्वतको**ऽवादीदं तातेन नोदितम् ।
उदिताः किंत्वजा मेषास्तथैवोक्ता निघण्टुषु ।।३९।।

जगाद **नारदो**ऽप्येवं, शब्दानामर्थकल्पना ।
मुख्या गौणी च तत्रेह, गौणी गुरुरचीकथत् ।।४०।।

गुरुर्धर्मोपदेष्टैव, श्रुतिर्धर्मात्मिकैव च ।
द्वयमप्यन्यथा कुर्वन्, मित्र ! मा पापमर्जय ।।४१।।

साक्षेपः **पर्वतो**ऽजल्पदजान् मेषान् गुरुर्जगौ ।
गुरूपदेशशब्दार्थोल्लङ्घनाद् धर्ममर्जसि ? ।।४२।।

**मिथ्याभिमानवाचो हि, न स्युर् दण्डभयान्नृणाम् ।**
स्वपक्षस्थापने तेन, जिह्वाच्छेदः पणोऽस्तु नः ।।४३।।

प्रमाणमुभयोरत्र, सहाध्यायी **वसुर्नृपः** ।
**नारदः** प्रतिपेदे तन्न **क्षोभः सत्यभाषिणाम्** ।।४४।।

रहः **पर्वत**मूचेऽम्बा, गृहकर्मरताऽप्यहम् ।
अजास्त्रिवार्षिका धान्यमित्यश्रौषं भवत्पितुः ।।४५।।

---

१. म-विपुला० ।

जिह्वाच्छेदपणोऽकार्षीर्यद् दर्पात् तदसांप्रतम् ।
**अविमृश्य विधातारो, भवन्ति विपदां पदम्** ।।४६।।

अवदत् पर्वतोऽप्येवं, कृतं तावदिदं मया ।
यथा तथा कृतस्याम्बा ! ऽकरणं नहि विद्यते ।।४७।।

साऽथ **पर्वत**काऽपायपीडिता हृदि शल्यिता ।
**वसुराज**मुपेयाय, **पुत्रार्थे क्रियते न किम् ?** ।।४८।।

दृष्टः **क्षीरकदम्बो**ऽद्य, यदम्ब ! त्वमसीक्षिता ।
किं करोमि प्रयच्छामि ?, किं वेत्यभिदधे **वसुः** ।।४९।।

साऽवादीद् दीयतां पुत्रभिक्षां मह्यं महीपते ! ।
धनधान्यैः किमन्यैर्मे, विना पुत्रेण पुत्रक ! ।।५०।।

**वसु**रूचे [1]मम मातः !, पाल्यः पूज्यश्च **पर्वतः** ।
**गुरुवद् गुरुपुत्रेऽपि, वर्त्तितव्य**मिति श्रुतिः ।।५१।।

कस्याद्य पत्रमुत्क्षिप्तं, कालेनाऽकालरोषिणा ? ।
को जिघांसुर्भ्रातरं[2] मे, ब्रूहि मातः ! किमातुरा ? ।।५२।।

अजव्याख्यानवृत्तान्तं, स्वपुत्रस्य पणं च तम् ।
त्वं प्रमाणीकृतश्चासीत् व्याख्या याऽर्थयते स्म सा ।।५३।।

कुर्वाणो रक्षणं भ्रातुरजान् मेषानुदीरय ।
**प्राणैरप्युपकुर्वन्ति, महान्तः किं पुनर्गिरा ?** ।।५४।।

अवोचत [3]वसुर् मातर्—! मिथ्या वच्मि वचः कथम् ? ।
**प्राणात्ययेऽपि शंसन्ति, नासत्यं सत्यभाषिणः** ।।५५।।

**अन्यदप्यभिधातव्यं, नासत्यं पापभीरुणा ।**
**गुरुवागन्यथाकारे, कूटसाक्ष्ये च का कथा ?** ।।५६।।

१. स-विपुला० । २. र-विपुला० । ३. वसुपतिर्मि० - मु० ।

बहूकुरु गुरोः सूनुं, यद् वा सत्यव्रताग्रहम् ।
तया सरोषमित्युक्तस्तद्वचोऽमंस्त पार्थिवः ।।५७।।

ततः प्रमुदिता **क्षीरकदम्ब**गृहिणी ययौ ।
आजग्मतुश्च विद्वांसौ, तत्र **नारद-पर्वतौ** ।।५८।।

सभायाममिलन् सभ्या, माध्यस्थ्यगुणशालिनः ।
वादिनोः सदसद्वादक्षीरनीरसितच्छदाः ।।५९।।

आकाशस्फटिकशिलावेदिसिंहासनं[1] **वसुः** ।
सभापतिरलङ्चक्रे, नभोमूलमिवोडुपः ।।६०।।

ततो निजनिजव्याख्यापक्षं **नारद-पर्वता** ।
कथयामासतू राज्ञे, सत्यं ब्रूहीतिभाषणौ ।।६१।।

विप्रवृद्धैरथोचेऽसौ, विवादस्त्वयि तिष्ठति ।
प्रमाणमनयोः साक्षी त्वं, रोदस्योरिवाऽर्यमा[2] ।।६२।।

**घटप्रभृतिदिव्यानि, वर्तन्ते हन्त सत्यतः ।**
**सत्याद् वर्षति पर्जन्यः, सत्यात् सिद्ध्यन्ति देवताः** ।।६३।।

त्वयैव सत्ये[3] लोकोऽयं, स्थाप्यते पृथिवीपते ! ।
त्वामिहार्थे ब्रूमहे[4] किं ?, ब्रूहि सत्यव्रतोचितम् ।।६४।।

वचोऽश्रुत्वैव तत्सत्यप्रसिद्धिं स्वां निरस्य च ।
अजान् मेषान् गुरुर्व्याख्यादिति[5] साक्ष्यं **वसु**र्व्यधात् ।।६५।।

असत्यवचसा तस्य, क्रुद्धास्तत्रैव देवताः ।
दलयामासुराकाशस्फटिकासनवेदिकाम् ।।६६।।

**वसु**र्वसुमतीनाथस्ततो वसुमतीतले ।
पपात सद्यो नरकपातं[6] प्रस्तावयन्निव ।।६७।।

---

१. न-विपुला० । २. ०रिव चन्द्रमाः । ३. म-विपुला० । ४. र-विपुला० । ५. 'व्याख्यादिति' मु० । ६. भ-विपुला० ।

कूटसाक्ष्यप्रदातुस्ते, श्वपचस्येव को मुखम् ।
पश्येदिति **वसुं** निन्दन् **नारदः** स्वास्पदं ययौ ।।६८।।

देवताभिरसत्योक्तिकुपिताभिर्निपातितः ।
जगाम नरकं घोरं, नरनाथो **वसु**स्ततः ।।६९।।

यो यः सूनुरुपाविक्षद् राज्ये तस्यापराधिनः ।
प्रजघ्नुर्देवतास्तं तं, यावदष्टौ निपातिताः ।।७०।।

इति **वसु**नृपतेरसत्यवाचः, फलमाकर्ण्य जिनोक्तिविद्धकर्णः ।
कथमप्युपरोधतोऽपि जल्पे-दनृतं प्राणितसंशयेऽपि नैव ।।७१।।

इति **योगशास्त्र**वृत्त्यनुसारेण लिखितेति ।।१४.७।।

**रत्न.–निरवद्यम्** इति. व्याख्या-हे देहिन् ! त्वं निरवद्यं वचो ब्रूहि-जल्प, यतः कारणात् सावद्यवचनैः-सावद्यवचनजल्पनैरित्यर्थः, वसुराजादयो द्रुतं शीघ्रं, घोरं भयानकं नरकं प्रयाता-गताः, वसुराजादीनां सम्बन्धस्तु बहुषु शास्त्रेषु विद्यमानत्वान्न लिखितोऽस्ति, परं ततस्तद् वाचकगीतार्थमुखाद् वाऽवसेय इति ।।१४.७।।

**[४२७] इहामुत्र च वैराय,**
**दुर्वाचो नरकाय च ।**
**अग्निदग्धाः प्ररोहन्ति,**
**दुर्वाग्दग्धाः पुनर्न हि ।।१४.८।।**

**धनवि.–**पुनर्वाग्गुप्त्यभावे ऐहिकमामुष्मिकं चानिष्टफलं दर्शयन्नुपदिशति –

'इहामुत्र च' इति, **दुर्वाचो**-दुष्टवचनानि, **इह**-इह भवे, **च** पुनर्, **अमुत्र**-परलोके, **वैराय**-विरोधाय भवन्तीति, **च** पुनर्, **नरकाय**-नरकदुःखाय भवन्ति; दुर्वाचो वैराय भवन्तीत्युत्तरार्द्धेन समर्थयति, **हि**-यतः कारणाद्-**अग्निदग्धा**-वह्निप्रज्वलिता वनस्पत्यादयः **प्ररोहन्ति**-अङ्कुरयन्ति, **पुनर्दुर्वाग्दग्धाः**-दुष्टवचनदग्धा

जना **न** प्ररोहन्ति-न सौमनस्यरूपाङ्कुरवन्तो भवन्तीत्यर्थः ।।१४.८।।

**रत्न.—इहामुत्र**-इति. व्याख्या-इहेति-इहलोके, दुः-दुष्टा वाचः परेषामप्रीतिकराः सावद्या वा वैराय-वैरहेतवे भवन्ति, च पुनर्, अमुत्रपरलोके नरकाय, चशब्दाद् वैरायापि भवन्ति, वैरस्य परभवेऽप्यनुगमनाद्, रावण-लक्ष्मण-शम्बूकानामिवेति, तत्रार्थे दृष्टान्तमाह-अग्निना दग्धाः 'समर्थविशेषणाद् विशेष्यं लभ्यते' इति न्यायाद् वृक्षादयः प्ररोहन्ति-अङ्कुरयन्ति, दुर्वाग्दग्धा, दग्धा इव दग्धाः, यथा दग्धा वृक्षा अङ्गारा वा श्यामीभवन्ति तथा मर्मवचस्ताडिता अपि श्यामवदना भवन्तीत्युपचारतो मनुष्या न प्ररोहन्ति-हर्षाङ्कुरान् न प्रादुर्भावयन्तीति ।।१४.८।।

**[४२८] अत एव जिना दीक्षा-**
**कालादाकेवलोद्भवम् ।**
**अवद्यादिभिया ब्रूयुर्-**
**ज्ञानत्रयभृतोऽपि न ।।१४.९।।**

**धनवि.—**अथ वचनगुप्तेस्तीर्थङ्कराणामप्युपादेयतां दर्शयन्नुपदिशति —

'अत एव' इति, यत एव सावद्यवचनप्रतिपादनमनिष्टफलाय भवतीत्यनन्तरमुक्तम्-**अत** एव हेतोः, **ज्ञानत्रयभृतोऽपि**-मति-श्रुता-ऽवधिज्ञानवन्तोऽपि **जिनाः**-तीर्थङ्करा **दीक्षाकालाद्**-व्रतप्रतिपत्तिसमयादारभ्य, **आकेवलोद्भवं**-केवलज्ञानोत्पत्तिसमयं यावद्, **अवद्यादिभिया**-जल्पने कदाचिदवद्यं मा भूयादितिभयेन, आदिपदाद् धर्मध्यान-विघातभिया च, **न ब्रूयुः**-न वदन्तीति ।।१४.९।।

**रत्न.—अत एव..**इति. व्याख्या-अत एव-अस्मादेव हेताः, जिना-तीर्थकृतो दीक्षाकालात् प्रारभ्याऽऽकेवलोद्भवं-केवलस्य ज्ञानविशेषस्योद्भवम्-उत्पत्तिं यावत्, अवद्यादीनां भिया-भयेन न ब्रूयुः, किंभूताः ? - ज्ञानानां त्रयं-मति-श्रुता-ऽधिलक्षणं बिभ्रतीति ज्ञानत्रयभृतः, कथमपि, सत्यपि तुर्ये मनःपर्यवज्ञाने ?-ज्ञानत्रयभृतोऽपीत्युक्तं तदस्य केवल-मनःपर्याययोर्ग्रहणशक्तिमत्त्वादग्रहणं संभाव्यतेऽन्यो विशेषस्तु कुशाग्रधीगम्य इति, "अर्थतो युग्मं" अर्थतो युग्मव्याख्या

।। इति ।।१४.९।।

**[४२९] कृपया संवृणु स्वाङ्गं,**
**कूर्मज्ञातनिदर्शनात् ।**
**संवृताऽसंवृताङ्गा यत्,**
**सुख-दुःखान्यवाप्नुयुः ।।१४.१०।।**

**धनवि.**–अथ काययोगसंवरमुपदिशन्नाह –

'कृपया' इति, **कृपया**-जीवदयया जीवदयालक्षणहेतुना **स्वाङ्गं**-स्वकायं **संवृणु**-निरुन्द्धि, **यद्**-यस्मात् **संवृता-ऽसंवृताङ्गाः**-संवृतं चासंवृतं च अङ्गं येषां ते तथा, **कूर्माः**-कच्छपाः **ज्ञातनिदर्शनाद्-ज्ञातधर्म-कथाङ्गो**क्तदृष्टान्तात् **सुख-दुःखान्यवाप्नुयुः**-प्राप्नुवन्ति, तत्र संवृताङ्गाः-संलीनगात्राः कूर्माः सुखं-स्वकुटुम्बमिलन-दीर्घजीवित्वादि शर्म अवाप्नुयुः, असंवृताङ्गाः-असंलीनगात्राश्च कूर्मा दुःखं-नानाप्रकारां मारणकदर्थनामवाप्नुयुरित्यर्थः; सुखं च दुःखं च **'सुख-दुःखम्'** इति पाठे-'विरोधिनामद्रव्याणां नवा द्वन्द्वः स्वैः [सि. ३-१-१३०] इत्यनेन समाहारद्वन्द्वः, सुखदुःखानि इति पाठे त्वितरेतरद्वन्द्व इति । अत्र **कूर्मदृष्टान्तो ज्ञाताधर्म-कथाङ्गा**दवसेयः, तत्सूचकं च गाथाद्वयं **ज्ञातावृत्ति**-गतम् –

**[४३०]** "विसयसुहं रुंभंता जीवा ते रागदोसनिम्मुक्का ।
पावंति निव्वुइसुहं कुम्मो व्व मयंगदहसोक्खं ।।[ज्ञा.वृ.१]।।

**[४३१]** इयरे उ अणत्थपरंपराउ पावंति पावकम्मवसा
संसारसागरागया गोमायुग-सियकुम्मो वा ।।[ज्ञा.वृ.२]।।

[१]तस्यायमुपनयः-संवृताङ्गाः पुरुषाः पापशृगालेभ्योऽसंवृताङ्गकच्छपा इव दुःखमाप्नुवन्तीति ।।१४.१०।।

---

१. विषयसुखं निरुन्धन्तो जीवास्ते निर्मुक्तरागद्वेषाः । प्राप्नुवन्ति निर्वृतिसुखं कूर्म इव मृतांगह्रदसौख्यम् ।।१।। इतरे त्वनर्थपरम्पराः प्राप्नुवन्ति पापकर्मवशाः संसारसागरगता गोमायुग्रस्तकूर्म इव ।।२।।

**रत्न.**–अथ क्रमायातं **द्वाभ्यां श्लोकाभ्यां** कायसंवरमाह –

**कृपया**..इति. व्याख्या-हे देहिन् ! त्वं कृपया-करुणया अर्थाज्जीवानां, स्वस्याङ्गं संवृणु, मा इतस्ततोऽविधिना चालयेत्यर्थः, कस्मात् ? - कूर्माणां ज्ञातं **ज्ञाताधर्मकथाङ्गोक्तमध्ययनं** तस्य निदर्शनाद्-दृष्टान्तात्, तं दृष्टान्तं परिभाव्येत्यर्थः । अत्रार्थे संवृताऽसंवृताङ्गयोः कूर्मयोर्द्वाभ्यां शृगालाभ्यां सकाशादप्राप्तमरणदुःख-प्राप्तमरणदुःखयोर्दृष्टान्तः षष्ठाङ्गतोऽवसेय इति । तमेव भावमुत्तरार्द्धेन सूचयति, यद्-यस्मात् कारणात् संवृतमङ्गमसंवृतं चाङ्गं यैस्ते संवृतासंवृताङ्गाः प्राणिनः क्रमेण सुखानि दुःखानि प्रति चावाप्नुयुः-प्राप्नुयुरिति ।।१४.१०।।

**[४३२] कायस्तम्भान्न के के स्युस्-**
**तरुस्तम्बादयो यताः ? ।**
**शिवहेतुक्रियो येषां,**
**कायस् ताँस्तु स्तुवे यतीन् ।।१४.११।।**

**धनवि.**–अथ केवलस्य कायसंवरस्यासारतां दर्शयन्नुपदिशति –

'कायस्तम्भात्' इति, **कायस्तम्भात्**-केवलकायसंवरात् **तरु-स्तम्बादयो**-वृक्ष-स्थाणुप्रभृतयः, **आदि**पदात् पर्वतादयः, **के के** पदार्था **यताः**-संयमिनो **न** भवन्ति?, अपि **तु** सर्वेऽपि भवन्तीत्यर्थः । **तु** पुनर्-**येषां कायः**-शरीरं **शिवहेतुः**-मोक्षहेतुः **क्रिया**-व्यापारो यस्य स **शिवहेतुक्रियो** भवति, **तान् यतीन्**-संयमिनोऽहं **स्तुवे**-स्तवीमि ।।१४.११।।

**रत्न.–कायस्तम्भाद्**..इति. व्याख्या–कायस्य-शरीरस्य स्तम्भात्-स्तम्भनात् नियमनात्, अचालनादित्यर्थः, के के ? - तरु-स्तम्भादयः-तरवः एव स्तम्भाकारत्वात्, स्तम्भास्ते आदौ येषां ते तरु-स्तम्भादयः, अथवा तरवश्च स्तम्भाश्च तरु-स्तम्भास्ते आदौ येषां ते तरु-स्तम्भादयः, स्तम्भादय इति कथनेनाचेतनाः काष्ठ-पाषाणादिनिष्पन्नाः स्तम्भा गृहीताः, आदिशब्दाद् ये कायव्यापारासमर्था

द्वीन्द्रियादस्तेऽप्यूह्याः, किंलक्षणाः ? - यतोऽविरताः कायव्यापारासामर्थ्याद् यता इव यताः, [1]तुः इति विशेषे, येषां यतानां-मनसा विरतानां **शिवस्य**-मोक्षस्य **हेतुः**-कारणं **क्रिया**-कायव्यापाररूपा वर्त्तते, **तान्** अ **कायगुप्तान्** कायगुप्तिमतः, **स्तुवे** इति, कायव्यापारवीर्ये परम्-अशुभं कायव्यापारं निरुध्य स्थितान् स्तुवे इत्यर्थः ।।१४.११।।

**[४३३] श्रुतिसंयममात्रेण,**
**शब्दान् कान् के त्यजन्ति न ? ।**
**इष्टानिष्टेषु चैतेषु,**
**रागद्वेषौ त्यजन् मुनिः ।।१४.१२।।**

**धनवि.**—अथेन्द्रियपञ्चकसंवरोपदेशे पूर्वं श्रोत्रेन्द्रियसंवरमुपदिशन्नाह —

'श्रुति०' इति, **श्रुतिसंयममात्रेण**-श्रोत्रेन्द्रियसंवरमात्रेण, **कान्**-इष्टानिष्टान्, **शब्दान्**-श्रोत्रेन्द्रियग्राह्यान् **के**-एकेन्द्रियादयश्चतुरिन्द्रियान्ता अनेकमूक-बधिर-पञ्चेन्द्रियाश्च **न त्यजन्ति ?** - न परिहरन्ति, अपि तु सर्वेऽपि त्यजन्तीत्यर्थः । **च** पुनर्-**इष्टानिष्टेष्वेतेषु** शब्देषु **राग-द्वेषौ**-प्रीत्यप्रीतिलक्षणौ **त्यजन्**-परिहरन् **मुनि**-र्भवतीति ।।१४.१२।।

**रत्न.**—अथ मनो-वचः-कायसंवरं निरूप्य पञ्चेन्द्रियसंवरमाह-तत्रापि प्रथमं श्रोत्रेन्द्रियमाश्रित्य कथयति —

**श्रुतिसंयममात्रेण**..इति. व्याख्या-श्रुत्योः-कर्णयोः संयमो-रोधो भावकर्णेन्द्रियजय इत्यर्थः, केवलं श्रुतिसंयमः श्रुतिसंयममात्रं, तेन श्रुतिसंयममात्रेण, के ? - प्राणिनः अकर्णादयः, कान् शब्दान् ? मनोज्ञा-ऽमनोज्ञलक्षणान् न त्यजन्ति ?, अपि तु सर्वेऽपि त्यजन्ति, अत्रोपलक्षणाद् एकेन्द्रिय-द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रियादयोऽपि ज्ञेयास्तेऽपि द्रव्यभावश्रोत्रेन्द्रियविकला इति मनोज्ञा-

१. 'शिवहेतुः क्रिया येषां कायगुप्तांस्तु तान् स्तुवे. इति २४९ तमस्य उत्तरार्धे पाठोऽयं प्रतौ मूलत्वेन गृहीतः ।

ऽमनोज्ञशब्दान् त्यजन्ति, अत्र कठिनभाषानिवारणार्थे संयमशब्दप्रयोगो ज्ञेयः, एवमग्रेतनेष्वपि सूत्रेषु ज्ञेयं, चेति विशेषे, एतेष्विष्टानिष्टेषु **कोकिल-काकप्र**भृतीनां शब्देषु राग-द्वेषौ त्यजन् मुनिः स्यादिति ।।१४.१२।।

**[४३४] घ्राणसंयममात्रेण,**
**गन्धान् कान् के त्यजन्ति न ? ।**
**इष्टानिष्टेषु चैतेषु,**
**रागद्वेषौ त्यजन् मुनिः ।।१४.१३।।**

**धनवि.**–अथ घ्राणेन्द्रियसंवरमुपदिशन्नाह –

'घ्राण' इति, **घ्राणसंयममात्रेण**-नासिकेन्द्रियसंवरमात्रेण **गंधा**निष्टाननिष्टान् वा **के**-एकेन्द्रिय-द्वीन्द्रिया दोषग्रस्ताः पञ्चेन्द्रियादयश्च न **त्यजन्ति ?**, अपि तु सर्वेऽपि परिहरन्तीत्यर्थः । अत्रोत्तरार्द्धं पूर्ववत्, 'शब्द'स्थाने 'गन्ध' इति विशेषः। ननु क्रमप्राप्तं चक्षुरिन्द्रियसंवरोपदेशमुपेक्ष्य घ्राणेन्द्रियसंवरोपदेशः कथं प्रतिपादित इति चेत् ? - न, 'विचित्रा सूत्राणां कृतिराचार्यस्ये'इति न्यायात् 'स्वतन्त्रेच्छायाः पर्यनुयोगानर्हत्वात्'इति न्यायाद् वा [१]सामञ्जस्यात्, अन्यथा वा सुधियाऽत्र शङ्का निराकरणीयेति ।।१४.१३।।

**रत्न.**–**घ्राण**..इति. व्याख्या-अत्रोपहतभावघ्राणेन्द्रियेद्वीन्द्रिया उपलक्षणा-देकेन्द्रिया- अपि ग्राह्याः, तेऽपि द्रव्य-भावघ्राणेन्द्रियविकला इति, इष्टाऽनिष्टान् गन्धान् त्यजन्तीति, कान् ? - शुभाऽशुभान्-मृगमद-लशुनादिसम्बन्धिनो न त्यजन्ति ?, अपि तु पूर्वोक्ताः सर्वेऽपि त्यजन्ति, उत्तरार्धं पूर्ववत् ।।१४.१३।।

**[४३५] चक्षुःसंयममात्रेण,**
**रूपालोकांस्त्यजन्ति न ।**
**इष्टा-ऽनिष्टेषु चैतेषु,**
**रागद्वेषौ त्यजन् मुनिः ।।१४.१४।।**

१. 'औचित्यात्' इति टिप्पणी. मु० ।

**धनवि.**–अथ चक्षुरिन्द्रियसंवरमुपदिशन्नाह च –

'चक्षुः' इति, **चक्षुःसंयममात्रात्**-केवलचक्षुरिन्द्रियसंवरात्, **रूपालोकान्**-रूपस्यावलोकनानि त्रीन्द्रियादयः चक्षुर्दोषदुष्ट-पञ्चेन्द्रियादयश्च, के जन्तवो न त्यजन्ति ?, अत्र के इत्यध्याहार्यं, अपि तु सर्वेऽपि रूपालोकान् परिहरन्तीत्यर्थः। उत्तरार्द्धमत्रापि पूर्ववदेवावसेयं, गन्धस्थाने रूपमिति विशेषः ।।१४.१४।।

**रत्न.–चक्षुः,** इति. व्याख्या-चक्षुःसंयममात्रादिति पूर्ववद्, अत्र भावचक्षुरिन्द्रियहीना गृह्यन्ते, उपलक्षणात्-एकेन्द्रियास् त्रीन्द्रियपर्यन्ताः, तेऽपि गृह्यन्ते, तेऽपि द्रव्य-भावचक्षुरिन्द्रियविकला इष्टा-ऽनिष्टानि रूपाणि त्यजन्ति, रूपालोकान्-रूपदर्शनानि के न त्यजन्ति ?, अपि तु सर्वेऽपि त्यजन्ति, चेति विशेषे, इष्टा-ऽनिष्टेषु युवति-जरतीरूपेषु राग-द्वेषौ त्यजन् सन् मुनिः स्यादिति। [1]अत्र केषुचिदादर्शेषु पूर्वं घ्राणसंयममात्रेणेति दृश्यते, तन्न जाने केन हेतुनेति, परमनुक्रमस्त्वयमेव घटत इति ।।१४.१४।।

## [४३६] जिह्वासंयममात्रेण, रसान् कान् के त्यजन्ति न ? । मनसा त्यज तानिष्टान्, यदीच्छसि तपःफलम् ।।१४.१५।।

**धनवि.**–अथ जिह्वेन्द्रियसंवरमुपदेष्टुमाह –

'जिह्वा संयम' इति, **जिह्वासंयम-मात्रेण**-केवलरसनेन्द्रियसंवरेण एकेन्द्रिया जन्तवः, **के कान्**-इष्टाननिष्टान् वा रसान् न त्यजन्ति ? । अथ तात्त्विकं जिह्वासंयमं दर्शयन्नुत्तरार्द्धं वक्ति-तदा **तानिष्टान्** रसान् प्राप्तान् **मनसा**-समतापरिणतचेतसा **त्यज, यदि** चेत् **तपःफलं**-तपसः फलं मोक्षम्, **इच्छसि** ।।१४.१५।।

**रत्न.–जिह्वासंयममात्रेण**..इति. व्याख्या-पूर्ववदत्रोपहतभावरसनेन्द्रिया ग्राह्याः, उपलक्षणादेकेन्द्रिया अपि ग्राह्याः, तेऽपि द्रव्यभावरसनेन्द्रियविकला इति, शुभाशुभरसान् त्यजन्तीति, कान् रसान् ? - शुभाशुभान् शर्करा-क्रियाकर्तृसम्बन्धिनो[2]

१. अत्र धनवि. टीकायामनुसृत्य क्रमः परिवर्त्तितोऽस्माभिः । २. करीयातुं इति सं. ।

न त्यजन्ति ?, अपि तु पूर्वोक्ताः सर्वेऽपि त्यजन्ति, परं हे आत्मन् ! यदि तपसः फलमिच्छसि तदा मनसा-मनोयोगपूर्वकं, तान् इष्टान् मधु-मांस-पुष्प-फलादीनां त्यजेति ।।१४.१५।।

**[४३७] त्वचः संयममात्रेण,**
**स्पर्शान् कान् के त्यजन्ति न ? ।**
**इष्टानिष्टेषु चैतेषु,**
**रागद्वेषौ त्यजन् मुनिः ।।१४.१६।।**

**धनवि.**—अथ स्पर्शनेन्द्रियसंवरमुपदेष्टुकाम आह —

'त्वचः' इति, **त्वचः संयममात्रेण**-केवलत्वगिन्द्रियसंवरेण **स्पर्शान्**-सुखस्पर्शान् **के** सूक्ष्मबादरनिगोदजीवाः सूक्ष्मबादर-पृथ्वीकायिकादयो नारकादयो वा न **त्यजन्ति ?**, अपि तु सर्वेऽपि सुखस्पर्शं परिहरन्तीत्यर्थः । उत्तरार्द्धमत्रापि पूर्ववद् भाव्यम् [स्पर्शस्थाने त्वचः इति] ।।१४.१६।।

**रत्न.—त्वचः संयममात्रेण**..इति. व्याख्या-पूर्ववत्, परं त्वचःसंयममात्रत्वं त्वग्रोगकृतमवसेयं, भावत्वगिन्द्रियोपघातजमित्यर्थः, एकेन्द्रियादीनां संज्ञिपर्याप्त-पञ्चेन्द्रियपर्यन्तानां त्वग्विषयस्तु दृश्यत एव, तेन रोगकृतस्त्वक्संयमोऽवसेयः, कान् ? - स्पर्शान्, के न त्यजन्ति ?, अपि तु सर्वेऽपि त्यजन्ति, चेति विशेषे, इष्टानिष्टेषु नवनीता-ऽर्कतूल-बूर-गोजिह्वा-क्रकच-शाकपत्रादिजेषु राग-द्वेषौ प्रति त्यजन् मुनिः स्यादिति ।।१४.१६।।

**[४३८] बस्तिसंयममात्रेण,**
**ब्रह्म के के न बिभ्रते ? ।**
**मनःसंयमतो धेहि,**
**धीर ! चेत् ? तत्फलार्थ्यसि ।।१४.१७।।**

**धनवि.**—त्वगिन्द्रियमुपदिश्य दुर्जयकामोद्दीपकत्वगिन्द्रिविशेषं बस्तिसंवर-

मुपदिशन्नाह –

'बस्ति' इति, **बस्तिसंयममात्रेण**-केवलमूत्राशयनिरोधेन **ब्रह्म**-व्रतं **के के** कृत्रिमनपुंसकीकृतनर-तुरग-बलीवर्दादयो नारकाः संमूर्छिमाश्च **न बिभ्रते ?** - न धरन्ति । अथ तात्त्विकं बस्तिसंयमं दर्शयन्नुत्तरार्द्धं वक्ति-तदा **मनःसंयमतो**-मनःसंवरतो **ब्रह्म धेहि**-धारय हे **धीर ! चेद्**-यदि **तत्फलार्थी**-ब्रह्मचर्यफलं मोक्षस्तदर्थी-तदभिलाषी असीत्यर्थः ।।१४.१७।।

**रत्न.**–त्वक्संवरेऽपि विशेषमाह –

**बस्तिसंवरमात्रेण**..इति. व्याख्या-बस्तिः-मूत्राशयो मूत्रस्थानमित्यर्थः, बस्तिरित्युक्तेऽपि, **स्थानात् स्थानी लक्ष्यते** इति न्यायाद् बस्तिः पुंसः पुंश्चिह्नं स्त्रियाश्च स्त्रीचिह्नं, तस्य संयममात्रेणेति पूर्ववद्, ब्रह्मेति-ब्रह्मचर्यं के के जनाः पुं-नपंसुकाः स्त्री-नपुंसकाश्च न ब्रिभ्रते ?, अपि तु बहवो बिभ्रते, मैथुनशक्तेरभावादित्यर्थः, परं हे धीर ! चेद्-यदि तस्य ब्रह्मणः फलं भाववेदाभावलक्षणं, तस्यार्थोऽस्तीति, तत्फलार्थी त्वमसि-विद्यसे तर्हि मनसः संयमो-रोधस्ततो ब्रह्मेति-ब्रह्मचर्यं धेहि-धरेति ।।१४.१७।।

**[४३९] विषयेन्द्रियसंयोगा-**
**ऽभावात् के के न संयताः ? ।**
**राग-द्वेषमनोयोगाऽ-**
**भावाद् ये तु, स्तवीमि तान् ।।१४.१८।।**

**धनवि.**–पृथग्-पृथगिन्द्रियपञ्चकसंवरमुपदिश्य समुदितेन्द्रियपञ्चक-संवरमुपदिशति –

'विषय' इति, **विषयाश्च**-वीणादिशब्दादयः, **इन्द्रियाणि** च-श्रोत्रादीनि, तेषां परस्परं सम्बन्धाभावात्, **के के** दारिद्र्याद्युपद्रुता जन्तवः **संयता न** भवन्ति ? अपि तु सर्वेऽपि भवन्तीत्यर्थः; **तु**-पुनः, **राग-द्वेषयोर्मनसश्च** परस्परं **योगः**-सम्बन्धस् तस्याभावाद् ये संयता भवन्ति **तान्** संयतान् **स्तवीमीति** ।।१४.१८।।

**रत्न.**–अथ विशेषतो निरूप्य, सामान्यतः सर्वेन्द्रियाण्याश्रित्य निरूपयति –

**विषयेन्द्रियसंयोगाभावात्-इति.** व्याख्या-विषयाः-शब्द-रूप-गन्ध-रस-स्पर्शाः, पञ्च, इन्द्रियाणि पञ्च, विषयाश्च इन्द्रियाणि च विषयेन्द्रियाणि, तेषां संयोग-एकत्र मिलनं, तस्याभावात्, के के न ये संयता-विरताः सन्ति-यमिनः सन्ति ?, अपि तु सर्वेऽपि संयता एवेति, तुरिति विशेषे, राग-द्वेष-मनो-योगानामभावाद् ये संयता-विरताः सन्ति, तान् प्रति स्तवीमि ।।१४.१८।।

**[४४०] कषायान् संवृणु प्राज्ञ !,**
**नरकं यदसंवरात् ।**
**महातपस्विनोऽप्यापुः,**
**करटोत्करटादयः ।।१४.१९।।**

**धनवि.**–अनन्तरोक्तराग-द्वेषसंवराधिकारात् तत्सहचरितानां तन्मूलभूतानां वा कषायाणां संवरमुपदिशन्नाह –

'कषायान्' इति, हे **प्राज्ञ !** - पण्डित ! **कषायान्**-क्रोध-मान-माया-लोभान् **संवृणु**-सम्यक् प्रकारेणाच्छादय, क्षयेणोपशमेन क्षयोपशमेन वाऽनुदयावस्थान् कुर्वित्यर्थः, **यदसंवराद्**-येषां कषायाणाम्, असंवराद्-उदयात् **करटोत्करटादयः**-करटोत्करटप्रमुखा **महातपस्विनः**-उग्रतपःकर्त्तारोऽपि **नरकमापुः**-प्रापुः ।

तत्र **करटोत्करट**चरितं चेदम् –

**करटोत्करटौ** साधू, मातृष्वस्रेयकौ मिथः ।
भ्रातरौ ब्राह्मणावध्यापकावात्तार्हतव्रतौ ।।१।।

अभूत् पुर्याः **कुणालाया**स्तयोर् [१]निर्धमनाग्रतः ।
वर्षासु वसतिर् नीरैः, प्लाव्यतां मेति देवता ।।२।।

---

१. 'णिद्धमण' (दे० ४.३९) इति देशीशब्दस्य संस्कृतीकृतोयं शब्दः, - मोरी, गटर इत्यर्थकः ।

अटालयत् **कुणालाया,** वृष्टिं ज्ञात्वा च तज्ज्ञनैः ।
निस्सार्येते स्म तौ साधू, क्रुद्धोऽथ **करटो**ऽवदत् ।।३।।

वर्ष देव ! **कुणालाया**मुवा**चोत्करट**स्ततः ।
दिनानि दश पञ्चाथ, पुनः **करट** ऊचिवान् ।।४।।

मुष्टिप्रमाणधाराभिः, पुन**रुत्करटो**ऽभ्यधात् ।
यथा दिवा तथा रात्रावित्युक्त्वा तौ निरीयतुः ।।५।।

**कुणाला**ऽपि पञ्च-दशदिनैरच्छिन्नवर्षणात् ।
सार्द्धं जनपदेनाम्भःपूरैः प्रवाह्यताखिला ।।६।।

तृतीये वत्सरे तौ च, साधू **साकेतपत्तन** ।
कालं कृत्वा सप्तमोर्व्यां, द्वाविंशत्यतरायुषौ ।।७।।

कालाख्यनरकावासे, संजायेते स्म नारकौ ।
**कुणालाया** विनाशस्य, कालाद् वर्षे त्रयोदशे ।।८।।

उत्पन्नं केवलं ज्ञानं, श्रीमद्**वीरजिने**शितुः ।। इति ।।१४.१९।।

**रत्न.**–अथेन्द्रियाण्याश्रित्य संवरमुक्त्वा कषायानाश्रित्याह –

**कषायान्**..इति. व्याख्या- हे प्राज्ञ ! त्वं कषायान्-क्रोध-मान-माया-लोभान् संवृणु, त्यजेति भावः, सर्वथा त्यक्तुमशक्तोऽल्पान् कुरु वा, येषामसंवराद्-अनिरोधान् महातपस्विनोऽपि **करटोत्करटा**दयो नरकं-निरयमापुः-प्राप्ताः –

वर्ष मेघ कुणालायां, दिनानि दश पञ्च च ।
युगधाराप्रमाणेन, यथा रात्रौ तथा दिवा ।।१।।

इतिवचसाऽखण्डधारावृष्टमेघप्लावित**कुणाला**नगरीपातकात् **करटोत्करट**नामानौ मुनी नरकं गतौ, अनयोर्द्दृष्टान्तविस्तरस्तु **कर्पूरप्रकरवृत्त्यादिभ्यो**ऽवसेयः, विस्तरभयान्न प्रतन्यत इति, एवमादयोऽन्येऽप्यूह्याः ।।१४.१९।।

**[४४१] यस्यास्ति किञ्चिन्न तपो-यमादि,**
**ब्रूयात् स यत् तत् तुदतां परान् वा ।**
**यस्यास्ति कष्टाप्तमिदं तु किं न,**
**तद्भ्रंशभीः संवृणुते स योगान् ? ।।१४.२०।।**

**धनवि.**–पूर्वमुपदिष्टमपि योगनिरोधं सिंहावलोकनन्यायात्, अनन्तरोक्तार्थ-समर्थनार्थं च प्रकारान्तरेणोपदिशति –

'यस्यास्ति' इति, **यस्य** पुरुषस्य **तपो-यमादि**-तपः-संयमादि सुकृतं **किञ्चित्**-किमपि नास्ति, स पुरुषो **यत् तत्** सावद्यं निरर्थकं वाऽसमञ्जसवृत्त्या वचो ब्रूयाद्-वदत्वित्यर्थः, **वा**-अथवा स पुमान् **परान्**-स्वव्यतिरिक्तान् **तुदतां**-अशुभमनो-वाक्-काययोगादिना व्यथा जनयतु; **तु**-पुनर्, **यस्य** पुसं इदं तपःसंयमादि सुकृतं **कष्टाप्तं**-बहुप्रयासेन प्राप्तमस्ति **तद्भ्रंशभीः**-तपःसंयमभ्रंशभीरुः **स** पुमान् मनो-वाक्-काय**योगान् किं न संवृणुते ?** - कथं न नियन्त्रयतीत्यर्थः ।।१४.२०।।

**रत्न.**–अथ मनोयोगादिसंवरमाह –

**यस्यास्ति**..इति. व्याख्या-हे संयमिन् ! यस्य किञ्चिदपि तपः-चतुर्थ-षष्ठा-ऽष्टमादिरूपं, यमा-अहिंसा-सूनृता-ऽस्तेय-ब्रह्मा-ऽकिञ्चनतालक्षणाः पञ्च, ते आदौ यस्य तत् तपो-यमादि नास्ति, सः पुमानविरत इत्यर्थः, यत् तद् असंबद्धं ब्रूयाद्-जल्पेद्, वा-अथवा परान् प्रति तुदतां-व्यथतां, तुरिति विशेषे, यस्येदं तपोयमादि कष्टेन-कायक्लेशेनाप्तं-प्राप्तं वर्त्तते, तस्य तपो-यमादिनो भ्रंशो-नाशः, तस्माद् भीः-भयं यस्य स तद्भंशभीः पुमान् यत्यादिर्योगान्-मनो-वाक्-कायसम्बन्धिनो व्यापारान् किं न संवृणुते ?, तस्य तु संवरीतुं युक्ता इति, यस्य किञ्चित् कांस्यादिभाजनमपि गन्तव्यं नास्ति, स कदाचिदनावृतद्वा निद्रातु, परं यस्य स्वर्ण-मण्यादिवस्तु गन्तव्यमस्ति सोऽनावृतद्वाः कथं निद्रात्वित्यर्थः ।।१४.२०।।

**[४४२] भवेत् समग्रेष्वपि संवरेषु,**
**परं निदानं शिवसंपदां यः ।**
**त्यजन् कषायादिजदुर्विकल्पान्,**
**कुर्यान्मनःसंवरमिद्धधीस्तम् ।।१४.२१।।**

**धनवि.**–सकलयोगसंवरेषु मनोयोगसंवरस्य प्राधान्यं ख्यापयन्नाह –

'भवेत्' इति, **समग्रेषु**-सर्वेषु, **अपि** कषाययोगादि**संवरेषु शिवसंपदां परम्**-उत्कृष्टं **निदानं**-परमं कारणं, **यो भवेत् तं मनःसंवरम्, इद्धधीः** समृद्धबुद्धिः पुमान्, **कषायादिज-दुर्विकल्पान्**-क्रोधादिजन्य-नानोल्लेखमयदुष्टचिन्तनानि **त्यजन्**-परिहरन् **कुर्यात्**-करोतु ।।१४.२१।।

**रत्न.**–तत्रापि मनःसंवरस्योत्कर्षमाह –

**भवे समग्रेषु**..इति. व्याख्या-यो मनःसंवरः समग्रेष्वपि संवरेषु सत्सु शिवसंपदां-मोक्षश्रीणां परं निदानं-हेतुर्भवेत्, मनःसंवरं विना सर्वेऽपि वचः-कायिकाः संवरा निरर्थकाः इत्यर्थः, इद्धा-दीप्ता धीर्यस्य स इद्धधीर्जनः, तं मनःसंवरं कुर्यात्, किं कुर्वन् ? - त्यजन्, कान् ? - कषायादिभ्यो जाता ये दुर्विकल्पा-दुष्टचिन्तनानि तान्, आदिशब्देना-ऽविरत्यादिग्रहणमिति ।।१४.२१।।

**[४४३] तदेवमात्मा कृतसंवरः स्यान्-**
**निःसङ्गताभाक् सततं सुखेन ।**
**निःसङ्गभावादथ संवरस्तद्**
**द्वयं शिवार्थी युगपद् भजेत ।।१४.२२।।**

**धनवि.**–अथैतद्द्वारमुपसंहरन्नुपदिशति –

'तदेवम्' इति, **तत्**-तस्मात् कारणाद् **एवम्**-उक्तेन प्रकारेण **कृतसंवरो**-निष्पादितसकलकषाययोगनिरोधः **सततं**-निरन्तरं **सुखेन**-अप्रयासेन **निसङ्गताभाक्**-पुत्र-कलत्रादिममताराहित्यवान्, **आत्मा**-जीवो भवेत्, **अथ** पुनर्, **निःसङ्गभावाद्,**

आत्मनः **संवरो** भवेदिति, अत्र संव्रियन्ते-निर्वार्यन्ते समागच्छन्ति कर्माणि यस्मात् स संवरः; ननु निःसङ्गतायां सत्यां संवरो भवति, सति च संवरे निस्संगता भवति, तथा चान्योऽन्याश्रय इति चेत् ? - न, क्वचित् कस्यचिन्निःसङ्गतायां सत्यां संवरो भवति, कस्यचित् क्वचित् संवरे सति निःसङ्गता जायते, इति पुरुषभेदेन कालभेदेन स्थानभेदेन वाऽन्योऽन्याश्रयस्यासत्त्वात्; न चैवमननुगमः, प्रामाणिकगौरववत्प्रामाणिकाननुगमस्याप्यदोषत्वात्; **शिवार्थी** पुरुष**स्तत्**-निःसङ्गता-संवरलक्षण**द्वयं युगपत्**-समकालं मोक्षसाधनं **भजेत**-श्रयेदिति ।।१४.२२।।

इति श्रीतपा० महोपाध्याय**कल्याणविजय**शिष्योपाध्याय**श्रीधनविजय**गणि-विरचितायाम**ध्यात्मकल्पद्रुम**टीकायां मिथ्यात्वादिसंवरोपदेशनाम्नी चतुर्दशी पदपद्धतिः ।।१४।।

**रत्न.**—अथैतदधिकारेपसंहारमाह —

**तदेवमात्मा** इति. व्याख्या-तत्-तस्मात् कारणादेवं अमुना प्रकारेण[1]ात्माकृतसंवरः सन् सततं-निरन्तरं सुखेन निःसङ्गतां भजतीति निस्सङ्गताभाक् स्याद्, अथ निःसङ्गभावात्-निरीहभावात् कृतसंवरः स्याद्, अन्योऽन्यं कार्यकारणव्यवहारोऽस्तीत्यर्थः, तत्कारणाच्छिवार्थी पुमान् द्वयं-संवर-निस्सङ्गभावौ[2] युगपत्-समकालं भजेतेति ।।१४.२२।।

**[४४४] श्रीशान्तिचन्द्र**वरवाचकदुग्धसिन्धु-
लब्धप्रतिष्ठवरवाचक्ररत्नचन्द्रः ।
**अध्यत्मकल्पफल**दस्य चकार टीका[3]ं,
तत्राऽगमद् भवनमानकृतोऽधिकारः ।।१४।।

इति चतुर्दशोऽधिकारः ।।

१. ...णात्मा कृतसंवरः - मु० । २. भावोन्नतिं युग... मु० । २. 'वृत्तिं' मु० ।

# १५. शुभप्रवृत्तिशिक्षोपदेशाधिकारः

**[४४५] आवश्यकेष्वातनु यत्नमाप्तो-**
**दितेषु शुद्धेषु तमोऽपहेषु ।**
**न हंत्यभुक्तं हि न चाप्यशुद्धं,**
**वैद्योक्तमप्यौषधमामयान् यत् ।।१५.१।।**

**धनवि.**—अनन्तरद्वारे मिथ्यात्वादिसंवरोऽशुभव्यापारनिवृत्तिलक्षणः प्रतिपादितः, तेन तत्प्रतिपक्षशुभव्यापारप्रवृत्तिद्वारं दर्शयन्नाह, यद्वाऽनन्तरद्वारे मिथ्यात्वादिसंवर उपदिष्टः, स च शुभप्रवृत्त्यधीन इति तद्द्वारं दर्शयन्नाह —

**अथ शुभप्रवृत्तिशिक्षोपदेशः**-इति सुगमम्; तत्र शुभप्रवृत्तौ प्रथमं प्रतिदिनानुष्ठेय-षडावश्यकप्रवृत्तिमुपदिशति —

**'आवश्यकेषु'** इति, **आप्तोदितेषु**-भगवत्प्रतिपादितेषु **शुद्धेषु**-निर्दोषेषु-सामायिकादिविषयकदोषरहितेषु, **तमोऽपहेषु**-पुराकृतपापहरेषु, **आवश्यकेषु**- १. सामायिक २. चतुर्विंशतिस्तव ३. वन्दनक ४. प्रतिक्रमण ५. कायोत्सर्ग ६. प्रत्याख्यानाख्येषु नित्यकर्त्तव्येषु, **यत्नं**-प्रमादराहित्यलक्षणं प्रयत्नम्, **आतनु**-आ-समन्तात् कुर्वित्यर्थः; **हि** इति निश्चितं, **यद्**-यस्माद् **वैद्योक्तमपि**-धन्वंतरिप्रभृत्युक्तम**प्यौषधं**-भेषजम्-**अभुक्तम्**-अनास्वादितम्, **आमयान्**-रोगान् **न हन्ति**-नापनयतीति, च पुनर्-**अशुद्धं**-सदोषं वैद्योक्तमप्यौषधमामयान् न हन्तीत्यर्थः, अत्रावश्यकमुपमेयमौषधमुपमानं, भगवानुपमेयो, वैद्य उपमानम्, आवश्यकप्रयत्नकरण-मुपमेयमौषधभक्षणमुपमानम्, आवश्यके दोषा उपमेयमौषधे योगवैपरीत्यादयो दोषा उपमानमिति दृष्टान्त-दार्ष्टान्तिकयोजना ।

तत्र दोषस्वरूपं चेदं, तत्र सामायिकदोषाः —

**[४४६]** १.पल्हत्थी २.अथिरासण ३.दिसिपरिवत्ती य ४.कज्ज ५.वट्ठंभं ।
६.अइअंगुवंगगोवण ७.आलस ८.करडुक्क ९.मल १०.कंडू ।। [ ]।।

**[४४७]** ११.विस्सामण १२.तह उंघण इय बारसदोसवज्जियं जस्स ।
कायसमिईविसुद्धं एगविहं तस्स सामइयं ।। [ ]।।

**[४४८]** १.कुवयण २.सहसक्कारो ३.लोभण ४.अहछंदवयण ५.संखेवा ।
६.कलहं ७.विगहो ८.हासो ९.तुरिओ १०.गमणागमणवादी।। [ ]।।

**[४४९]** वज्जेइ दोसदसयं वयणभवं जो नरो स सामइओ ।
तस्स तणु-वयणसुद्धं दुविहं सामाइयं होइ ।। [ ]।।

**[४५०]** १.अविवेओ २.जसकित्ती ३.लाहत्थी ४.गव्व ५.भय ६.नियाणत्थी ।
७.संसय ८.रोस ९.अविणओ १०.तन्निवयो[1] दस य माणसिया।। [ ]।।

**[४५१]** बत्तीसदोससुद्धं तणु-वयमण-सुद्धिसंभवं तिविहं ।
जस्स हवइ सामइयं तस्स वसे सव्वसुहलच्छी ।। [ ]।।

एते द्वात्रिंशद्[दोषाः]**जीर्णकुलक**प्रतिपादिताः ।

वन्दनके द्वात्रिंशद्दोषाः-"दोस अणाढिअथड्ढिअ" इत्यादि [गुरु] भाष्य [२३] गाथोक्ता भाष्यव्याख्यानतो व्याख्येयाः । कायोत्सर्गावश्यकदोषाश्चैकोनविंशतिः "घोडगलयखंभाइ" इत्यादि[चैत्यवंदन]भाष्य[५६]गाथोक्तास्तत एव सविस्तरमवसेया इति ।।१५.१।।

**रत्न.**—अथ शुभप्रवृत्तिशिक्षोपदेशाख्यः पञ्चदशोऽधिकारो विवरीतुं प्रारभ्यते, तत्राऽऽवश्यकं कर्त्तव्यत्वात् प्रथममावश्यकोपदेशमाह, अत्र यतियोग्यं यतिना ज्ञेयं, श्राद्धयोग्यं श्राद्धेनाऽपीति, तेन द्वयोरपि सम्बोधनमध्याहार्यम् —

**आवश्यकेषु**..इति. व्याख्या-हे यते ! हे आर्हत ! त्वमावश्यकेषु-अवश्यकर्तव्येषु प्रतिक्रमण-सामायिक-पौषधोपवासा-ऽऽलोचनाग्रहणादिषु यत्नम्-उद्यममातनु-कुर्वित्यर्थः, किंलक्षणेषु ? - आप्तोदितेषु-सर्वज्ञोदितेषु, अत एव शुद्धेषु-निर्मलेषु, निर्मलत्वादेव तमांसि-पापानि, अपघ्नन्तीति तेषु, तत्र दृष्टान्तमाह-हि-

---

१. 'भंतिचयो' - मु० ।

निश्चितं वैद्योक्तमप्यौषधं यद्-यतो हेतोरामयान्-रोगान् न हन्ति-नापनयति, किंलक्षणम् ? - अभुक्तं सत्, न चाप्यशुद्धम् अपक्वहरितालरसायनादि, अत्रोपनयः सुगमत्वात् स्वयमभ्यूह्यः ।।१५.१।।

**[४५२] तपांसि तन्याद् विविधानि नित्यं,**
**मुखे कटून्यायतिसुन्दराणि ।**
**निघ्नन्ति तान्येव कुकर्मराशिं,**
**रसायनानीव दुरामयान् यत् ।।१५.२।।**

**धनवि.**—कर्मक्षपणहेतुत्वसाधर्म्येणावश्यकप्रभृत्युपदेशानन्तरं तपःप्रवृत्त्युपदेशमादिशति —

**मुखे**-करणकालस्यादौ **कटूनि**-क्षुत्-पिपासा-ऽऽदिसहनजनित-दुःखोत्पादकत्वेन कटुकरसानि, **आयतिसुन्दराणि**-आयतौ-करण-कालादुत्तरकाले तपोभिर्जनितशुभकर्मानुभवकाले सुन्दराणि-आनन्ददायकानि **विविधानि**-नानाप्रकाराणि, **तपांसि**-तपःकर्माणि नमस्कारसहितादि-षाण्मासिकतपःपर्यन्तानि **नित्यम्**-अनवरतं, **तन्यात्**-कुर्यादिति; **यद्**-यस्मात्, **तान्येव** तपांसि, **कुकर्मराशिं**-अशुभकर्मसमूहं **निघ्नन्ति**-नितरां विनाशयन्ति, अत्र दृष्टान्तमाह-**इव**-यथा **रसायनानि**-पारदप्रभृतीनि तथाविधभेषजानि **दुरामयान्**-कुष्ठप्रभृतिदुष्टरोगान् निघ्नन्ति, अत्र रसायनस्य तपःकर्मणश्चोपमानोपमेयभावः कुकर्मराशेर्दुरामयस्यापि चोपमानोपमेयभाव इति ।।१५.२।।

**रत्न.**—आवश्यकेषु तप आयातीति तपउपदेशमाह —

**तपांसि तन्यात्**..इति. व्याख्या-यतिरार्हतो वा विविधानि-विचित्राणि षष्ठाऽष्टमा-ऽर्द्धमास-मासक्षपण-कनकावलि-मुक्तावलि-गुणरत्न-संवत्सरा-ऽऽचामाम्लवर्द्धमान-घनर्षितपःप्रभृतीनि तपांसि तन्यात्-कुर्याद्, धातूनामनेकार्थत्वात्, तनिः अपि करणार्थं ब्रूते, अथवा विस्तारयेदिति च, किंलक्षणानि ? - कटूनीव कटूनि-तीक्ष्णानि, कस्मिन् ? - मुखे आदौ, प्रथमतः क्रियमाणानि कष्टदायित्वात्

कटूनीत्युपचारात्, पुनः किंलक्षणानि ? - आयतौ-उत्तरकाले स्वर्गादिसुखदायित्वात् सुन्दराणि-मनोहराणि, यद्-यस्मात् कारणात् तान्येव तपांसि कुकर्मणां-ज्ञानावरणीयादीनां राशिं पुञ्जं निघ्नन्ति, इव यथा रसायनानि-राजवैद्यैर्ज्वालितसुवर्णादिधातुसाधितानि विविधानि, मुखे-आनने दीयमानानि कटूनि-दुरास्वादानि परमायतौ सुन्दराणि दुरामयान्-दुष्टरोगान् राजयक्ष्मप्रभृतीन् घ्नन्तीति ।।१५.२।।

**[४५३] विशुद्धशीलाङ्गसहस्रधारी,**
**भवानिशं निर्मितयोगसिद्धिः ।**
**सहोपसर्गांस्तनुनिर्ममः सन्,**
**भजस्व गुप्तीः समितीश्च सम्यग् ।।१५.३।।**

**धनवि.**—अथ ब्रह्मचर्यादिविषयां शुभप्रवृत्तिमुपदिशन्नाह —

'विशुद्ध' इति, **निर्मितयोगसिद्धिः सन्, अनिशं**-निरन्तरं विशुद्धशीलाङ्गसहस्रधारी त्वं **भव,** अत्र **विशुद्धशीलाङ्गसहस्रधारी**-विशुद्धं-निरतिचारं च तच्छीलं च-आचारो ब्रह्मचर्यरूपः तस्या-ऽङ्गानि कारणानि "जे नो करंति मणसो" इत्यादीनि तेषां सहस्रं धारयतीति तथा; **निर्मित-योगसिद्धिः**-निर्मिता-निष्ठां नीता, योगस्य-मनो-वाक्-कायैकाग्र्यस्य ज्ञान-दर्शन-चारित्रसंनिपातलक्षणस्य वा योगानां वा-प्राणायामादीनां सिद्धिः-निष्पत्तिर्येन स तथा, च पुनस, **तनुनिर्ममः सन्**-शरीरममतारहितः **सन्, उपसर्गान्**-क्षुत्-पिपासादीन् **सह**-क्षमस्व;, **च** पुनः, **सम्यग्**-यथागमोक्तरीत्या **गुप्तीः**-मनोगुप्त्यादिकाः, **समितीः**-ईर्यासमित्यादिका **भजस्व**-सेवस्व ।।१५.३।।

**रत्न.**—अथ तपःकारी शीलवान् भवतीति शीलोपदेशमाह —

**विशुद्धशीलाङ्ग**..इति. व्याख्या-हे यते ! - हे आर्हत ! शीलस्य-सदाचारस्याङ्गानीव शीलाङ्गानि विशुद्धानि च तानि शीलाङ्गानि च विशुद्धशीलाङ्गानि, तेषां सहस्राण्यष्टा-दशप्रमाणानि धरसी(ती)त्येवंशीलो

विशुद्धशीलाङ्गसहस्रधारी भव,

**[४५४]** जे नो करंति मणसा निज्जियआहार-सन्न-सोइंदी ।
पुढवीकायारंभं खंतिजुआ ते मुणी वंदे ।।[ ]।।

इत्यादिगाथोक्ताऽष्टादशसहस्रगाथाप्रमाणस्वाध्यायधारको भवतीति तात्पर्यार्थः, दुष्टमनो-वचः-काययोगानां निवृत्तिकारणत्वाच्छीलाङ्गत्वं चैषामिति, कथम् ? - अनिशं-निरन्तरं, किंलक्षणः ? - निर्मिता मनो-वचः-कायानां सिद्धिः-साधनं येन सः, निर्मितदुष्टमनो-वचः-काययोगनिवृत्तिक इत्यर्थः, अथवा निर्मिता योगानामष्टाङ्गानां सिद्धिर्येन स इत्यपि व्याख्याप्रपञ्चः, अन्यच्चोपसर्गान्-देवादिकृतान् यतिषु गजसुकुमालर्षि-चिलातीपुत्र-मेतार्यमुनिप्रभृतिवद्, गृहस्थेषु कामदेवादिवत्, सहस्व-क्षमस्व, परं किंलक्षणः सन् ? - तनौ-शरीरे निर्ममः सन्, तनुनिर्ममत्वे सत्येवोपसर्गसहनं भवतीति, तथा गुप्तीस्तिस्रो मनो-वचः-कायानां भजस्व, च पुनः समितीः पञ्चेर्याभाषैषणादाननिक्षेपपारिष्ठापनिकाः प्रति भजस्व, श्राद्धास्यापि कृतपौषधस्य कृतसामायिकस्य चोपसर्गसहनं गुप्ति-समित्याराधनं च भवतीति न काऽपि विप्रतिपत्तिः ।।१५.३।।

**[४५५] स्वाध्याययोगेषु दधस्व यत्नं,**
**मध्यस्थवृत्त्याऽनुसरा-ऽऽगमार्थान् ।**
**अगारवो[1] भैक्षमटा-ऽविषादी,**
**हेतौ विशुद्धे वशितेन्द्रियौघः ।।१५.४।।**

**धनवि.**–अथानन्तरोक्तप्रवृत्तौ कारणभूतां प्रवृत्तिमुपदिशति –

'स्वाध्याय' इति, त्वं **स्वाध्याय-योगेषु यत्नं**-प्रयत्नं **दधस्व**-कुरुष्वेत्यर्थः, अत्र स्वाध्यायश्च-वाचनादिकः पञ्चप्रकारः, योगाश्च-उद्देश-समुद्देशा-ऽनुज्ञादिरूपानुष्ठानविशेषास्तेषु; च पुनर्-**मध्यस्थवृत्त्या**-राग-द्वेषराहित्येन, **आगमार्थान्**-सिद्धान्तोक्तभावान्, **अनुसर**-अनुगच्छ, आगमार्थानुसारेण विचरेति भावः, च-पुनस्,-त्वम्-**अगारवः**

१. अगौरवो० मु० ।

सन्-ऋद्ध्यादिगारवरहितः सन् **भैक्षं**-भिक्षाकर्म कुर्वन्निति शेषः, **अट**-भ्रमेत्यर्थः, **विशुद्धे**-निर्दोषे **हेतौ**-मोक्षकारणे ज्ञान-दर्शन-चारित्रलक्षणे, **अविषादी**-श्रमरहितः सन्, पुनः किंविशिष्टः? - **वशितेन्द्रियौघः**-जितेन्द्रियसमूहः सन्, अथवा लाभेऽगारवः सन्नलाभेऽविषादी सन् भैक्षं-गौचरचर्यामट, विशुद्धे हेतो समग्रभोगसामग्र्यां सत्यां वशितेन्द्रियौघः सन्नित्यर्थः ।।१५.४।।

**रत्न.**-शीलवान् स्वाध्यायादिना मनो वशीकरोतीति स्वाध्यायाद्युपदेशमाह–

**स्वाध्यायोगेषु**..इति. व्याख्या-हे यते ! त्वं **स्वाध्यायानां**[1] पठितागमप्रभृतिशास्त्र-प्रतिदिनस्मरणलक्षणानां, **योजनानि-करणानि योगा**स्तेषु, अथवा **स्वाध्यायैः** कृत्वा मनो-वचः-कायलक्षणेषु योगेषु यत्नं दधस्व उद्यमं कुरु, स्वाध्यायैः कृत्वा मनो-वचनः-कायान् संवृणु इत्यर्थः, तथा आगमार्थान्-अर्हत्प्रवचनाभिधेयानि मध्यस्थवृत्त्या-स्वकदाग्रहा-ऽननुसारेण यथार्थाननुसर-कथय, तथा कुरुष्वापीत्यनेन स्वमतकदाग्रहग्रस्तो जिनवचनमन्यथा मा वदेति सूचितं, तथा अगारव-ऋद्धि-रस-सात-गारवत्रयरहितः सन्, भिक्षाणां समूहो भैक्षं, तत् प्रति अट-गृहस्थगृहेषु याहीति, परं किंलक्षणः ? - अविषादी-अप्राप्तौ कुत्सितप्राप्तौ वा विषादरहितः, क्वचिद् **अगौरवो भैक्षमट** इतिपाठे गौरवमभ्युत्थानादि, न विद्यते गौरवं यस्य सः **अगौरवो भैक्षमट**, भिक्षायै गतो मा बहुमानं वाञ्छेत्यर्थः, त्वं किलक्षणः ? - इत्यादिहेतौ इन्द्रियजयकारणे विशुद्धे-निर्मले सति वशीकृत इन्द्रियाणां श्रोत्रादीनामोघः-समूहो येन स इति ।।१५.४।।

**[४५६] ददस्व धर्मार्थितयैव धर्म्यान्,**
**सदोपदेशान् स्वपरादिसाम्यात् ।**
**जगद्धितैषी नवभिश्च कल्पैर्-**
**ग्रामे कुले वा विहराप्रमत्तः ।।१५.५।।**

---

१. धनवि.-टीकायां अत्र द्वन्द्वः, तेन आगमपठनविधिरुक्ता, रत्नवि.-टीकायां तु षष्ठी, तेन स्वाध्यायं कुरु इत्युपदेशः, तथा तृतीया, तेन तु स्वाध्यायस्य फलं - मनो-वचन-काय-संवरणं भवति-इति संदर्शितम् ।

**धनवि.**–पुनः शुभप्रवृत्तिमुपदिशति –

'ददस्व' इति, हे मुने ! त्वं **धर्मार्थितयैव स्व-परादिसाम्यात्** धर्म्यान् धर्मेणोपेतान् निष्पापान्, **उपदेशान्**-हितशिक्षावचनानि, **ददस्व**-देहि, तत्र धर्मः-पुण्यं स एवार्थो यस्य स धर्मार्थी, तस्य भावो धर्मार्थिता, तया **धर्मार्थितया,** अत्र **एव**कारेण न तु वस्त्रा-ऽऽहाराद्यर्थितया इत्यन्ययोगव्यवच्छेदः, **स्व-परादिसाम्यान्**-स्वश्च-आत्मा सुहृद्वा परश्च-आत्मव्यतिरिक्तः शत्रुर्वा, स्व-परौ तावादी येषां ते स्व-परादयः तेषां साम्यं-समभावः प्रतिपाद्यं येषु, तान् स्व-परादिसाम्यान्, समतारसप्रतिपादकानित्यर्थः, **आदि**पदाद्- १. अहि-हार २. कुसुमशय्या-शिलातल ३. मणि-लोष्ठ ४. तृण-स्त्रैणा-ऽऽदिपरिग्रहः, **स्व-परादिसाम्यात्** इतिपञ्चम्यन्तपाठे तु स्वपरप्रमुखश्रोतृषु राग-द्वेषराहित्येन समताभावादित्यर्थः; च पुनर्,-**जगद्धितैषी**-जगतां हितं-पथ्यमिच्छतीति, तथा सन्, **अप्रमत्तः**-प्रमादरहितः सन्, **ग्रामे**-वृत्त्यावृते उपलक्षणत्वाज्जनपद-नगरा-ऽऽकरादौ वा-अथवा शक्त्यभावे **कुले**-उग्रकुल-राजन्यकुल-क्षत्रियकुललक्षणे 'भिक्खमाणो कुले कुले' **इत्युत्तराध्ययन[ ]वचनाद्** गृहे गृहे, उच्चनीयलक्षणेऽजुगुप्सिते वा, **नवभिः कल्पैः**-नवसङ्ख्योपेतैः कल्पैः-साध्वाचारैः ऋतुबद्धकालेऽष्टौ मासकल्पाः चतुर्मासककाले एकश्चतुर्मासककल्पः एवं प्रकारै**र्विहर**-विचर, एवं विहारे च भगवदाज्ञाऽऽराधिता स्याद्, आज्ञा चैवं 'मोत्तूण मासकप्पं अन्नो सुत्तंमि नत्थि उ विहारो [ ] त्ति[1]' कदाचित् संयमबाधकारिदुर्भिक्षग्लन्यादिकारणवशाद् द्रव्यतो मासकल्पातिक्रमे भावतो वसति पाटकपरावर्त्तनेनापि चायमवश्यं विधेय एव, यदुक्तम् –

**[४५७]** "[2]कालाइदोसओ पुण न दव्वओ एस कीरए नियमा ।
भावेण उ कायव्वो संथारगवच्चयाईहि ।। [ ]।।"

इति ।।१५.५।।

---

१. मुक्त्वा मासकल्पं अन्यः सूत्रे नास्ति तु विहार इति ।

२. कालादिदोषतः पुनर्न द्रव्यत एष क्रियते । नियमात् भावेन तु संस्तारकव्यत्ययादिभिः कर्तव्यः ।।१।।

**रत्न.**—अथ स्वाध्यायकारी सदुपदेशवान् भवतीति सदुपदेशविषये उपदिशति—

**ददस्व..** इति. व्याख्या-हे यते ! त्वं, धर्म एवार्थः-प्रयोजनमस्यास्तीति धर्मार्थी तस्य भावो धर्मार्थिता, तया एव, न तु स्वार्थनिष्ठत्वेन, सदा धर्म्यान्-धर्मसंबंधिन उपदेशान् ददस्व-देहि, कस्मात् ? — स्वश्च परे च स्व-परे, ते आदौ येषां ते स्व-परादयः, तेषु साम्यं-समत्वं तस्माद्, असौ स्वो-मदीयो मदाज्ञाकारी, अत[1] एव धर्मोपदेशं ददामि, एते परे-मिथ्यादृष्टयः अभक्ताश्चेति किं धर्मोपदेशदानेन ? अथवाऽस्य रुचितकथने प्रीतिरिति रुचितमेव वदामीति, राग-द्वेषौ मुक्त्वेत्यर्थः, आदिशब्देनेभ्याऽनिभ्य-दात्रदातृप्रभृतिग्रहणं । तथा त्वं जगतामिति 'तात्स्थ्यात् तद्व्यपदेश' इति न्यायाज्जगद्वासिलोकानां हितैषी-हितस्पृहः सन्, नवभिः कल्पैरप्रमत्तः-अप्रमादी सन्, विहर-विहारं कुरु, एकत्र मा वसेत्यर्थः, कस्मिन् ? - ग्रामे वा पुनः कुले-ग्रामैकदेशे एककुलनिवासस्थानरूपे, ग्रामान्तरादौ विहारकरणासामर्थ्ये सति, अथवा दुष्काल-[2]विड्वरादौ विहारयोग्य-देशाभावे सतीति ज्ञेयं, मार्गशीर्षाद्या-ऽऽषाढपर्यन्ता अष्टौ मासा अष्टौ कल्पाः, श्रावण-भाद्रपदा-श्विन-कार्तिकाश्चत्वारो मासा एक एव कल्पः, तथैवाज्ञप्तत्वात् तीर्थकृद्भिरिति नव कल्पाः, इदमौत्सर्गिकं वचनम्, अपवादतः षण्मासानेकस्मिन्नेव ग्रामादौ स्थेयमित्याज्ञप्तत्वादिति ।।१५.५।।

**[४५८] कृता-ऽकृतं स्वस्य तपो-जपादि,**
**शक्तीरशक्तीः सुकृतेतरे च ।**
**सदा समीक्षस्व हृदाऽथ साध्ये,**
**यतस्व हेयं त्यज चाव्ययार्थी ।।१५.६।।**

**धनवि.**—अथ शुभप्रवृत्तिमशुभनिवृत्तिं चोपदिशन्नाह —

'कृताऽकृतम्' इति, हे आत्मन् ! त्वं **स्वस्य**-निजस्य **कृता-ऽकृतं तपो-जपादि हृदा**-हृदयेन **समीक्षस्व**-'इदं तपो मया कृतम्, इदं न कृतम्, अयं जपः

१. अत एवं - मु० । २. ज्वरादौ मु० ।

कृतोऽयं च न कृत' इति पर्यालोचय; अत्र तपश्च द्वादशभेदं, जपश्च नमस्कारादिमन्त्रजापः, तपो-जपौ तौ आदौ-प्रथमं यस्य सुकृतस्य तत्-तपो-जपादि, **कृतं** च-निर्मितम्, **अकृतं** च-अनिर्मितं कृताकृतमिति, **च** पुनः, स्वस्य **सुकृतेतरे**-सुकृतं च-पुण्यम्, इतरच्च-पापं, समाहारद्वन्द्वे सुकृतेतरत्-पुण्यपापं तस्मिन्, **शक्तीः**,-सामर्थ्यानि, **अशक्तीः**,-असामर्थ्यानि, **हृदा**-मनसा **सदा**-सर्वकालं समीक्षस्व-इदं सुखसाध्यं तपो-जपादि सुकृतं शक्यम्, इदं च कष्टसाध्यं तपो-जपादि सुकृतमशक्यमिदं चाल्पप्रमादसेवनलक्षणं पापं शक्यम्, इदं च नृपाङ्गनाद्यासेवनलक्षणं पापमशक्यम्, इति सम्यग् विलोकयेत्यर्थः; **अथ**-समीक्षणानन्तरम्, **अव्ययार्थी**-मोक्षार्थी सन्, शक्त्यविषयस्य सुकृतस्यासाधकत्वेन **साध्ये**-शक्तिगोचरे सुकृते **यतस्व**-यत्नं कुरुष्व; **च** पुनर्हेयं-शक्यमशक्यं च पापम्, **अव्ययार्थी** सन् त्रिधा **त्यज** परिहर-मुञ्चेत्यर्थः ।।१५.६।।

**रत्न.**—अथ सदुपदेशवान् कृता-ऽकृततपःप्रभृतिविचारको भवति, तत्रार्थे आह —

**कृता-ऽकृतम्**-इति. व्याख्या-हे यते ! - हे आर्हत ! त्वं स्वस्य-आत्मनस्तपोजपादि कर्म कृतं चाकृतं च कृताकृतं, समीक्ष्य-विचार्य, 'इदं मया तपः कृतम् ? इदं च न कृतं, तथा अयं जपः कृतो न कृतश्च'इति समीक्ष्येत्यर्थः, आदिशब्देन क्रियानुष्ठानादीनां ग्रहणं, तथा शक्तीरशक्तीश्च समीक्ष्य, 'सांप्रतं ममास्मिन् तपसि जपे वा शक्तयः सन्ति ? उत न सन्तीति च', ताः प्रति समीक्ष्य, तथा सुकृतं, सुकृतादितरद्-असुकृतं, पुण्य-पापं च, ते उभे अपि प्रति समीक्ष्य, 'अस्मिन् कृते सुकृतं भावि ? उत चास्मिन् कृतेऽसुकृतं भावि' ? इत्यपि समीक्ष्येत्यर्थः, कथं ? - सदा-निरन्तरं, केन ? - स्वहृदा-स्वहृदयेन, **उत्तमानां गुरूपदेशो बीजप्राय एव भवेत्, तद्विस्तरस्तु स्वहृदयविचारणजलसेकाद् भवति,** अथैतत् सर्वं समीक्ष्य साध्ये-स्वस्य साधनयोग्ये, यतस्व-उद्यमं कुरु, च पुनर्हेयं-त्याज्यं सुकृतेतरदित्यर्थः त्यज-मुञ्च, किं लक्षणः ? - अव्ययस्य-मोक्षस्यार्थी सन्, एतत् सर्वं विचारपूर्वकं कुर्वित्यर्थः ।।१५.६।।

**[४५९] परस्य पीडापरिवर्जनात् ते,**
**त्रिधा त्रियोग्यप्यमला सदाऽस्तु ।**
**साम्यैकलीनं गतदुर्विकल्पं,**
**मनो वचश्चाप्यनघप्रवृत्ति ।।१५.७।।**

**धनवि.**–अथ 'परपीडावर्जनाद् योगत्रयस्य शुद्धिर्भवती'ति दर्शयन्नुपदिशति–

'परस्य पीडा' इति, **परस्य**-स्वव्यतिरिक्तस्य प्राणिनः, **त्रिधा पीडापरिवर्जनात्**-करण-कारणा-ऽनुमतिलक्षणप्रकारत्रयेण बाधानिषेधात् **ते**-तव, **त्रियोग्यपि**-मनो-वचः-कायलक्षणा योगत्रय्यपि, **सदा**-सर्वकालम् **अमला**-निष्पापा, **अस्तु**-भवतु; अत्र यत इत्यध्याहार्यम्, तेन यतः कारणात्, त्रिधा परस्य पीडावर्जनात् तव **मनोऽपि साम्यैकलीनं**-केवलसमताभावभावितं **गतदुर्विकल्पं**-नष्टदुष्टचिन्तासंतानं च, भवतीति योगः, च पुनः, परस्य पीडापरिवर्जनात्, तव च **वचोऽपि**-वचनमपि, **अनघप्रवृत्ति**-निरवद्यव्यापारं, भवतीति योगः । ननु योगत्रयस्य शुद्ध्यधिकारे प्रकृते मनोयोग-वाग्योगयोः शुद्धिरत्रोक्ता कथं न काययोगस्य शुद्धिरिति चेत् ? न, काययोगशुद्धेरितरापेक्षया सुखसाध्यत्वादिति ।।१५.७।।

**रत्न.**–अथ सद्विचारवान् त्रियोगीं निर्मलां धत्ते इत्यर्थे आह –

**परस्य पीडा**..इति. व्याख्या-हे आत्मन् ! ते-तव, परस्य-स्वस्माद् भिन्नस्य पीडापरिवर्जनात् मनो-वचः-कायरूपाणां योगानां समाहारस्-त्रियोगी अप्यमला-विमला विशुद्धाऽस्तु, पापपङ्करहितेत्यर्थः । कथं ? - त्रिधा करण-कारणा-ऽनुमतिभिः, कथं ? - निरन्तरं, अथ मनो-वचसोर्दुर्निवारत्वेन विशेषतः पृथक् निर्दिशन्नाह-मनो वचश्चापि अनघा प्रवृत्तिर्यस्य तद्, अनघप्रवृत्त्यस्तु, किंलक्षणं? - गता दुर्विकल्पा-दुष्टचिन्तनानि दुष्टजल्पनानि वा यस्मात् तद्, ईदृशी एव मनो-वचसी अनघप्रवृत्तिनी स्त इति द्वे अपि समर्थविशेषणे इति, अथवा 'साम्यैकलीनं गतदुर्विकल्पमस्तु'इति मनस एव विशेषणं, वचश्चाप्यनघप्रवृत्ति [इति] वचस एव विशेषणमित्यपि व्याख्यानं कार्यम् ।।१५.७।।

**[४६०] मैत्रीं प्रमोदं करुणां च सम्यग्,**
**मध्यस्थतां चानय सात्म्यमात्मन् ! ।**
**सद्भावनास्वात्मलयं प्रयत्नात्,**
**कृताविरामं रमयस्व चेतः ।।१५.८।।**

**धनवि.**–अथानन्तरोक्ताया दुःसाध्याया मनःशुद्धेरुपायं दर्शयन्नुपदिशति –

'मैत्री' इति, हे **आत्मन् ! मैत्रीं, च** पुनः, **प्रमोदं च** पुनः, **करुणां च** पुनः, **मध्यस्थतां सम्यग्**-गुरूक्तयुक्त्या शास्त्रोक्तयुक्त्या वा, **सात्म्यम्**-आत्मना सहैकीभावम्, **आनय**-प्रापय; मैत्री-प्रमोद-कारुण्य-माध्यस्थ्यलक्षणम्

**[४६१]** "मा कार्षीत् कोऽपि पापानि, मा च भूत् कोऽपि दुःखितः"

इत्यादि [ ] श्लोकैः पूर्वद्वारे प्रतिपादितं, कियदिति शेषं सविस्तरं **योगशास्त्र**वृत्तेरवसेयम् । **च** पुनर्,-**आत्मलयं**-संप्राप्ततन्मयस्वभावं यथा स्यात् तथा **कृताविरामं**-निरन्तरं यथा स्यात् तथा **सद्भावनासु**-द्वादशसु सुप्रसिद्धासु **चेतो**-मानसं **प्रयत्नाद्**-उद्यमात् प्रमादराहित्याद् **रमयस्व**-क्रीडाविषयं कुरुष्व ।।१५.८।।

**रत्न.**–अथ त्रियोगीनैर्मल्यं मैत्र्यादिभजनेन भवतीत्याह –

**मैत्रीं प्रमोदम्**..इति. व्याख्या-हे आत्मन् ! मैत्रीं-परहितचिन्तालक्षणाम्, **आनय,** स्वस्मिन्नित्यध्याहार्यं स्वायत्तां कुर्वित्यर्थः, तथैव प्रमोदं-परसुखं दृष्ट्वा संतोषकरणरूपं, तथा करुणां-परदुःखनिवारणलक्षणां[1] च पुनर्मध्यस्थतां-परदोषोपेक्षणस्वरूपाम्, **आनय**, कथं ? - सम्यक्, त्रिधा मनो-वचः-कायशुद्ध्या, च पुनर्हे आत्मन् ! एवं चतुर्भिर्मैत्री-प्रमोद-करुणा-मध्यस्थताकरणलक्षणहेतुभिः **साम्यं**[2]-समत्वमानय, रागद्वेषाऽनुपेतत्व-मित्यर्थः, तथा साम्यकरणेनैव सद्भावनासु चेतः-चित्तं रमयस्व, किंलक्षणम् ? - आप्तो लय-एकाग्र्यं येन तत्, कस्मात् ? - प्रयत्नाद्-उद्यमात् तथाविधवीर्यस्फोरणादित्यर्थः कथं ? - कृताविरामं-कृताऽनुपरमं यथा स्थात् तथा अविश्रान्तमित्यर्थः, अथवा सद्भावनासु सु-सुष्ठु आप्तः-प्राप्तो लयो येन

१. रूपां. मु० । २. 'साम्यं' इति पदमिदं मूलत्वेनापि गृहीतम् ।

तत् **सद्भावनास्वाप्तलयम्**' इत्यखण्डं [पदम्] ।।१५.८।।

**[४६२] कुर्या न कुत्रापि ममत्वभावं,**
**न च प्रभो ! रत्यरती कषायान् ।**
**इहापि सौख्यं लभसेऽप्यनीहो,**
**ह्यनुत्तरामर्त्यसुखाभमात्मन् ! ।।१५.९।।**

**धनवि.**–अथानन्तरोक्तमनःशुद्धिकरणोपायं तत्फलं च दर्शयन्नुपदिशति –

'कुर्या' इति, हे **प्रभो !** - हे समर्थ ! **कुत्रापि**-शय्योपधिपुस्तकादिवस्तुनि, **ममत्वभावं**-ममेदमिति बुद्धिलक्षणां ममतां, **न कुर्या**-मा विदध्याः, **च** पुनर्, **रत्यरती** न कुर्याः, तत्र रतिश्च-सुन्दरवस्तुष्वासक्तिलक्षणा, इष्टविषयेषु मोहनीयोदयाच्चित्ताभिरतिर्वा, अरतिश्च-असुन्दरवस्तुनि प्रद्वेषलक्षणा, अनिष्टविषयेष्वरतिमोहनीयोदयाच्चित्तोद्वेगो वा, च पुनः, **कषायान्**-क्रोधादीन् न कुर्याः; **हि**-यतः कारणाद्, हे **आत्मन् ! इहापि**-मर्त्यलोकेऽपि, **अनुत्तरामर्त्यसुखाभम्**-अनुत्तरविमानवासिसुरानुभवयोग्यसुखसदृशं **सौख्यं**-सुखम्, **अनीहो**-निःस्पृहः सन् **लभसे**-अधिगच्छसि; ममतादिदोषरहितस्य साधोरिहापि सर्वातिशायि सुखं भवतीति भावः, यदुक्तम् - "नैवास्ति राजराजस्य" इत्यादिनेति ।।१५.९।।

**रत्न.**–अथ मैत्र्यादि तु ममत्वत्यागेन भवतीत्याह –

**कुर्या न कुत्रापि..इति.** व्याख्या-हे आत्मन् ! हे प्रभो ! - हे समर्थ ! त्वं, कुत्रापि वस्तुनि ममत्वस्य भावो-भावनं चिन्तनमित्यर्थः, तं न कुर्याः, न विदध्याः, च पुनः, रतिः-रागः अरतिः-तदितरा, ते उभे अपि न कुर्याः, शुभे वस्तुनि रतिम्, अशुभे वस्तुन्यरतिमित्यर्थः, तथा कषायांश्चाप्येवमकुर्वन् त्वमिहापि-इह लोकेऽपि, अनुत्तराणां- १. विजय २. वैजयन्त ३. जयन्ता ४. ऽपराजित ५. सर्वार्थसिद्धानां पञ्चानाममर्त्याः-देवास्तेषां सुखं तेना-ऽऽभं-सदृशं सौख्यं, हि यस्मात् कारणाल्लभसेऽपि-प्राप्नोषि । अपि, अपिः संभावनायां, त्वं कीदृशः? - न विद्यते ईहा वाञ्छा अवन्तीसुकुमालस्येव नलिनीगुल्मविमान इव कस्मिन्

वस्तुनि यस्य सः अनुत्तरविमानामराणां सर्वेषां [1]समानत्वात् सुखमप्यनुत्तरं, ततस्तत्सुखस्य ग्रहणमिति ।।१५.९।।

**[४६३] इति यतिवरशिक्षां, योऽवधार्य व्रतस्थश्-**
**चरणकरणयोगानेकचित्तः श्रयेत ।**
**सपदि भवमहाब्धिं क्लेशराशिं च तीर्त्त्वा,**
**विलसति शिवसौख्याऽऽनन्त्यसायुज्यमाप्य ।।१५.१०।।**

**धनवि.**–अथ शुभप्रवृत्तिशिक्षोपदेशमुपसंहरन्नाह –

'इति यतिवर' इति, **यो व्रतस्थो**-यः साधुरिति-अमुना प्रकारेणोक्तां **यतिवरशिक्षाम्,** यतिवरा-मुनिवराः, तीर्थकरा गणधराः पूर्वाचार्या वा, तेषां शिक्षां-हितोक्तिम्, **अवधार्य एकचित्तः**-तदेकाग्रमनाः सन्, **चरणकरणयोगान्**-चरणसप्तति-करणसप्ततिलक्षणान् योगान्-संयमव्यापारान् **श्रयेत**-सेवेत,

तत्र चरणसप्ततिः – [संबोधप्रकरणे]

**[४६४]** '५ वय. १० समणधम्म. १७ संजम. १० वेयावच्चं. ९ च बंभगुत्तीओ.। ३ नाणाइतियं. १२ तव. ४ कोहनिग्गहाइ. चरणमेयं ।। [७३६]।।' इतिरूपा

करणसप्ततिश्च –

**[४६५]** '४पिंडविसोही. ५समिई. १२भावण. १२पडिमा. ५य इंदियनिरोहो.। २५पडिलेहण. ३गुत्तीओ. ४अभिग्गहा. चेव करणं तु ।। [७३७]।।'इतिरूपा

स साधुः **सपदि**-शीघ्रं **क्लेशराशिं भवमहाब्धिं**-संसारमहासमुद्रं **तीर्त्त्वा**-निस्तीर्य **च** पुनः, **शिवसौख्याऽऽनन्त्यसायुज्यमाप्य**-प्राप्य **विलसति**-सौख्यमनुभवतीत्यर्थः, अत्र **क्लेशानां**-जन्म-जरा-मरण-क्षुत्-पिपासा-परिभवादिलक्षणानां राशिः-समूहो यत्र स तथा तं क्लेशराशिमिति भवमहाब्धिविशेषणं, किञ्च-शिवसौख्यस्य-मोक्षसुखस्य आनन्त्यम्-अविनाशिता, तया सह सायुज्यं-साहित्यं, यदुक्तम्, **अभिधानचिन्तामणौ** 'ब्रह्मसायुज्यम्'[८२१] इति, अस्य व्याख्याने "सह युग्-

१. साम्यभावात् इत्यर्थः ।

योगोऽस्येति सयुग् तस्य भावः सायुज्यं" शिवसौख्याऽऽनन्त्यसायुज्यमिति ।।१५.१०।।

इतिश्रीतपागच्छे० महोपाध्यायश्री**धनविजय**गणिविरचितायामध्यात्मकल्पद्रुम-टीकायां शुभप्रवृत्तिशिक्षोपदेशनाम्नी पञ्चदशी पदपद्धतिः ।।१५।।

**रत्न.**—अथ पञ्चदशाधिकारस्योपसंहारवाक्यमाह —

**इति यतिवरशिक्षाम्**..इति. व्याख्या-इति-अमुना प्रकारेण यो व्रतस्थो-यतिर्यतिवराणां साधुमुख्यानां शिक्षामवधार्य-चित्ते धृत्वा, चरणकरणसप्ततिगाथोक्तान् चरणकरणयोगान् श्रयेत, किंलक्षणः ? - एकस्मिन् ध्यातव्ये पदार्थे चित्तं यस्य स एकचित्तः-अव्यग्रमना इत्यर्थः, **स**[1] यतिः शीघ्रं भवमहाब्धिं-संसारसमुद्रं तीर्त्वा, शिवस्य-मोक्षस्य सौख्यानामानन्त्यम्-अनन्तत्वं तेन सह युग्-योगोऽस्यास्तीति सयुग् योगो, सयुजो भावः सायुज्यम्, आप्य-प्राप्य विलसति-विलासं करोति, अनन्तसुखमनुभवतीत्यर्थः, भवमहाब्धिं किंलक्षणं ? - क्लेशानां कष्टानां राशिरिव क्लेशराशिः, क्लेशानां राशिर्यत्रेति वा तम्, अत्र यतिवरेत्युक्तेऽप्युपलक्षणात्-'श्राद्धवर'इत्यपि ग्राह्यम्, कियद्भिर्गुणैर्यतिसमानत्वाद् भावयतित्वाद् वेति ।।१५.१०।।

**[४६६]** श्री**शान्तिचन्द्र**वरवाचकदुग्धसिन्धु-
लब्धप्रतिष्ठवरवाचक**रत्नचन्द्रः**[2] ।
**अध्यात्मकल्पतरु**शास्त्रनिबंधमेनं,
चक्रेऽगमद् विवृतपञ्चदशोऽधिकारः ।।१५।।

इति पञ्चदशोऽधिकारः ।।



१. स इति पदं, प्रतौ मूलत्वेनापि गृहीतम् । २. अध्यात्मकल्पफलदस्य चकार वृत्तिं, चक्रेऽगमद् विवृतपञ्चदशोऽधिकारः ।।१५।। - मु० ।

# १६. साम्यसर्वस्वाधिकारः

**[४६७] एवं सदाऽभ्यासवशेन सात्म्यं,**
**नयस्व साम्यं परमार्थवेदिन् ! ।**
**यतः करस्थाः शिवसंपदस्ते,**
**भवन्ति सद्यो भवभीतिभेत्तुः ।।१६.१।।**

**धनवि.**–अथानन्तरोक्ता शुभप्रवृत्तिः साम्याधीनेति साम्यरहस्यद्वारं प्रतिपादयन्नाह-

यद् वाऽनन्तरोक्तानि पञ्चदश द्वाराणि साम्यकारणान्युपदिष्टानीति साम्यरहस्य-द्वारं प्रतिपादयन्नाह-, अथवा साम्यमय**मध्यात्मकल्पद्रुमा**भिधानशास्त्रमुपसंजिहीर्षुः साम्यरहस्यद्वारं प्रतिपादयन्नाह **अथ ग्रन्थोपसंहाराय साम्यसर्वस्व**मिति स्पष्टम्, अत्र प्रतिपाद्यत इति शेषः; ।

अत्र प्रतिज्ञातमेव प्रथममुपदिशति –

'एवम्' इति, हे **परमार्थवेदिन् !** - हे तात्त्विकपदार्थज्ञ ! **एवम्**-अमुना पञ्चदशद्वारोक्तप्रकारेण **सदा**-सर्वकालम्, **अभ्यासवशेन**-पुनः पुनः करणलक्षणाभ्यासा-यत्ततायोगेन, **साम्यं**-समतां **सात्म्यं**-स्वात्मप्रकृत्या सहैकीभावं, **नयस्व**-प्रापयस्व; **यतः** साम्यैकभावात् **सद्यः**-शीघ्रं **भवभीतिभेत्तुः**-संसारभयभेदकस्य **ते**-तव **शिवसंपदो**-मोक्षश्रियः **करस्था**-हस्तप्राप्ता **भवन्ती**ति ।।१६.१।।

**रत्न.**–अथ ग्रन्थोपसंहाराय साम्यरहस्यमिति षोडशोऽधिकारो विवरीतुं प्रक्रम्यते, अत्र सर्वा शुभा प्रवृत्तिरभ्यासवशत आयातीति निरूपयति –

**एवं सदाऽभ्यासवशेन..**इति. व्याख्या-परमार्थं-रहस्यं वेत्सी(ती)ति परमार्थवेदी, तस्य संबोधनं क्रियते-हे परमार्थवेदिन् ! त्वमेवम्-अमुना सकलग्रन्थोक्तप्रकारेण साम्यं-समत्वं **प्रति**, सह-आत्मना-स्वरूपेण वर्त्तते यत्, तत् सात्म, सात्मनो भावः सात्म्यं-स्वरूपत्वं नय, यादृक् साम्यं कथितमस्ति तादृगेव नयस्व-प्राप्नुहि, केन ? - सदा-निरन्तरमभ्यासवशेन, यतः साम्यात्, ते-तव करस्थाः शिवसंपदो

भवन्ति-हस्तशायिन्यो मोक्षश्रियः स्युरित्यर्थः, कथं ? - सद्यः-शीघ्रं, ते किं कर्तुः ? - भवस्य-संसारस्य भीतिं-भयं भिनत्सी(त्ती)ति भवभीतिभेत्ता तस्य ।।१६.१।।

**[४६८] त्वमेव दुःखं नरकस्त्वमेव,**
**त्वमेव शर्मापि शिवं त्वमेव ।**
**त्वमेव कर्माणि मनस्त्वमेव,**
**जहीह्यविद्यामवधेहि चात्मन् ! ।।१६.२।।**

**धनवि.**–अथ साम्यबीजमविद्यात्यागमुपदिशन्नाह –

'त्वमेव' इति, हे **आत्मन! दुःखं**-प्रतिकूलवेद्यं **त्वमेवा**सि दुःखसाधनोपाय-प्रेरकत्वात्, **च** पुनर्, **नरको**-निरयनाम्नी दुर्गतिः, **त्वमेवासि** नरकगतिनामकर्मार्जकत्वात्, च पुनः, **शर्मापि**-सुखमपि **त्वमेवा**सि सुखसाधनोपायप्रेरकत्वात्, च पुनः, **शिवं त्वमेवा**सि सकलकर्मराहित्येन जायमानत्वात्, च पुनः, **कर्माणि**-शुभाशुभरूपाणि **त्वमेवा**सि शुभाशुभकर्मार्जकत्वात्, च पुनर्, **मनः**-शुभाशुभकर्मबन्धकश्चेतो-व्यापार-स्त्वमेवासि मनोव्यापारकत्वात्, अत्र **'अत'** इत्यध्याहार्यम्, तेनातः कारणाद्-**अविद्याम्**-अनन्तरोक्तार्थवैपरीत्यलक्षणं मिथ्याज्ञानं, 'ममायं सुखदो, ममायं दुःखद' इत्यादिरूपां मिथ्यावासनां वा **जहीहि**-त्यज, च पुनर्-**अवधेहि**-यथा सुखं भवति दुःखं च **न** भवति तथा सावधानो भव; अत्र वृत्ते प्रतिपादितार्थस्य संवादकगाथा –

**[४६९]** अप्पा नई वेअरणी, अप्पा मे कूडसामली ।
अप्पा कामदुधा धेणू, अप्पा मे नंदणं वण।। [उत्तराध्ययने २०.३६]।।

इत्यादिकाऽवसेया इति । नन्वात्मनो दुःख-नरकादिरूपताऽत्र कथं दर्शितेति चेत् ? - न, धर्म-धर्मिणोरभेदात् संवृतत्वा-ऽसंवृतत्वपर्यायभेदेऽपि पर्याय-पर्यायिणोरभेदाच्च ।।१६.२।।

**रत्न.**–अथ सर्वत्रात्मनः प्राधान्यं निरूपयन्नात्मानं सावधानताविषये उपदिशति–

**त्वमेव दुःखम्**..इति. व्याख्या-हे आत्मन् ! स्वस्य दुःखकारणे कर्मणि प्रवृत्तत्वात्, त्वमेवासीति सर्वत्र सम्बन्धनीयम्, अथवा दुःखानां भोक्तृत्वात् त्वमेव दुःखं, यथेदं भोगिगृहं दातृगृहं, परं गृहं भोगि दातृ च कथं भवति ?, भोगी दाता च गृह्येव भवति, परम्, **आश्रये आश्रयिण उपचारात्** इत्यादयः प्रयोगा अविप्रतिपन्नाः, तथैवायं प्रयोगोऽपि, तथा त्वमेव नरको-नरकगतिकारणे कर्मणि प्रवृत्तत्वाद्, अथवा नरकदुःखानां भोक्तृत्वाद्, यथा गृहं स्त्री इतिवत्, तथा त्वमेव शर्मापि-सुखमपि, सुखप्राप्तिकारणे कर्मणि प्रवृत्तत्वाद्, अथवा सुखानां भोक्तृत्वात्, तथा त्वमेव शिवं-मोक्षः, मोक्षकारणे चारित्रादौ प्रवृत्तत्वेन, यदा तदा वा मोक्षाश्रयितया भावित्वेना-भेदोपचारात्, तथा त्वमेव कर्माणि कर्मा-ऽऽत्मनोर्लोहा-ऽग्निवदभेदतया मिलितत्वात् सकलकर्मभोक्तृत्वाद् वाऽभेदोपचारात्, तथा मनः-चेतस्त्वमेव मनसः प्रवर्त्तन-निवर्त्तनयोरीशत्वेनाभेदोपचारात्, तेन कारणेन हे आत्मन् ! **अवज्ञाम्**[1]-**अनादरम्**-अर्थाद्-धर्मकर्मणि कल्ये परुत् परारिवर्षे वा करिष्येऽहमिति धर्मकर्मेतिरूपां जहाहि, च पुनरवधेहि-सावधानमना भव, धर्मकर्मणि पटुर्भवेतिभाव ।।१६.२।।

**[४७०] निःसङ्गतामेहि सदा तदात्म-**
**न्नर्थेष्वशेषष्वपि साम्यभावात् ।**
**अवेहि विद्वन् ! ममैतव मूलं,**
**शुचां सुखानां समतैव चेति ।।१६.३।।**

**धनवि.**—साम्यकारणमविद्यात्यागमुपदिश्य साम्यकार्यं सङ्गत्यागमुपदिशन्नाह—

'निःसङ्गता' इति, हे **आत्मन् !** यतः कारणात्, अनन्तरोपदेशे सर्वं त्वमेवासीति प्रतिपादितम्, तत्-तस्मात् कारणात् **सदा**-सर्वकालम्, **अशेषेषु**-समस्तेषु, **अप्यर्थेषु**-सुख-दुःखजनकेषु **साम्यभावात्**-समतापरिणामात्, **निःसङ्गतां-**

१. टीकापाठान्तरः - अविद्याऽवज्ञयोः को विशेषः ? अविद्या तु सदुपदेशस्य विरुद्धो भावः, अवज्ञा च - सदुपदेशाचरणे प्रमादशैथिल्यं - इति प्रतिभाति । अत्र विद्या तु सम्यग् ज्ञानं, तत्र च सम्यक् कार्यकरणं अनवज्ञा - ज्ञानवच्चरणमिति दृष्ट्यातयो मुक्तिसाधनतया एकीभाव इत्यपि ज्ञेयम् ।

नवविधपरिग्रहे ममताराहित्यम्, **एहि**-आ समंतादेहि "गत्यर्थाः प्राप्त्यर्था"[ ] इति वचनात् प्राप्नुहीत्यर्थः; हे **विद्वन्!** - हे धीमन् ! त्वम्, **इति** वक्ष्यमाणम् **अवेहि**-जानीहि, इतीति किमित्याह-**शुचां**-शोकानां **मूलं**-मूलकारणं **ममतैव**-निःसङ्गताऽभाव एव भवति, **सुखानां**-सकलसौख्यानां **मूलं**-प्रधानकारणं **समतैव**-साम्यमेव भवतीति ।।१६.३।।

**रत्न.**–अथ सर्वत्र निस्सङ्गतायाः प्राधान्यमुपदिशति –

**निस्सङ्गतामेहि**..इति. व्याख्या-हे आत्मन् ! तत्-तस्माद्धेतोः, त्वं सदा निस्सङ्गतां-स्त्री-धन-गृहादिसङ्गराहित्यमेहि-प्राप्नुहि, कस्मात् ? - साम्यस्य भावो-भावनं चिन्तनं तस्मात्, केषु ? - अशेषेष्वप्यर्थेषु, सर्वेषां पदार्थानामनित्यत्वादित्यर्थः, हे विद्वन्! - पण्डित ! शुचां-शोकानां मूलं-कारणं ममता एव वर्त्तते, सर्वेषां सुखानां मूलं समता-साम्यं वर्त्तते इति चावेहि, इदमेव ज्ञात्वा निस्सङ्गतामेहीति पूर्वार्धसङ्गतिरिति ।।१६.३।।

**[४७१] स्त्रीषु धूलिषु निजे च परे वा,**
**संपदि प्रसरदापदि चात्मन् !**
**तत् त्वमेहि समतां ममतामुग्-**
**येन शाश्वतसुखाऽद्वयमेषि ।।१६.४।।**

**धनवि.**–अनन्तरं सात्म्यतः सकलपदार्थविषयिणी समता निर्ममता चोपदिष्टा, अथ च विशेषविषयिणीं समतां चोपदिशति –

'स्त्रीषु' इति, हे **आत्मन्! तत्**-तस्मात् **स्त्रीषु**-ललनासु, **धूलिषु**-मार्गपतितरेणुषु, **च** पुनर्, **निजे**-स्वजने, **परे** च-परजने वैरिणि वा, **च** पुनः, **संपदि**-राज्यादिसमृद्धौ **प्रसरदापदि** च-निःस्वतादि-लक्षणायामागच्छद्विपत्तौ **ममतामुग्**-इष्टानिष्टवस्तुनि ममत्वत्यजनशीलः सन् **त्व समतां**-साम्यमेहि-प्राप्नुहीति, **येन** समताकरणेन **शाश्वतसुखाद्वयं**-शाश्वतसुखेन-मोक्षसुखेन सहाऽद्वयम्-ऐक्यम्, **एषि**-अधिगच्छसीत्यर्थः ।।१६.४।।

**रत्न.**–निस्सङ्गता तु ममत्वमोचनेन भवतीत्याह –

**स्त्रीषु धूलिषु..**इति. व्याख्या-हे आत्मन् ! त्वं **तत्त्वं-सारं**[1] समतां-साम्यमेहि-प्राप्नुहि, कासु ? - स्त्रीषु, तथा धूलिषु, पुनः कस्मिन् ? - निजे-स्वजने पुत्रादौ तथा परे-अन्यस्मिन् वैर्यादौ, तथा कस्यां ? - संपदि सुवर्ण-मणि-माणिक्य-गृहादिकायां, पुनः कस्यां ? - प्रसरन्ती या आपद्-विपत् तस्यामपि, त्वं किंलक्षणो ? - ममतां-ममत्वं मुञ्चसी(ती)ति ममतामुग्, इदमेव सर्वेषु पदार्थेषु स्त्र्यादिषु समताकरणे समर्थं विशेषमिति, येन समताप्रापणेन शाश्वतसुखस्य-मोक्षसुखस्याद्वयम्-ऐक्यमेषि-प्राप्नोषीति, अत्र यथा धूलिषु रागं न चिन्तयसि तथा स्त्रीष्वपि मा चिन्तय, यथा च निजेषु द्वेषं न चिन्तयसि तथा परेष्वपि मा चिन्तय, यथा संपद्यागतायां मुदं वहसि, तथाऽऽपदि प्रसृतायां मम पूर्वकर्मक्षयो भवतीति दुःखितो मा भवेतिलक्षणां समतां तत्त्वमेहीति भावः ।।१६.४।।

**[४७२] तमेव सेवस्व गुरुं प्रयत्ना-**
**दधीष्व शास्त्राण्यपि तानि विद्वन् ! ।**
**तदेव तत्त्वं परिभावयात्मन् !,**
**येभ्यो भवेत् साम्यसुधोपभोगः ।।१६.५।।**

**धनवि.**–अथ साम्यस्यैव सकलकमनीयपदार्थसार्थसारतां दर्शयन्नुपदिशति– 'तमेव' इति, हे **विद्वन् !** - धीमन् ! **तमेव गुरुं**-धर्मोपदेष्टारं **प्रयत्नात् सेवस्व**-भजस्व, **च** पुनः प्रयत्नाच्छास्त्राण्यपि-ग्रन्थानपि **तान्यधीष्व**-पठ, च पुन**स्तदेव तत्त्वं**-परमार्थसद्वस्तु ध्येयमित्यर्थो **विपरिभावय**-विचिन्तय ध्यानविषयं कुरु, **येभ्यो**-गुरु-शास्त्राध्ययन-तत्त्वचिन्तनेभ्यः **साम्यसुधोपभोगः**-समताऽमृतास्वादो **भवेत्**-स्यादिति; अत्रार्थे **संवादः**-

**[४९२]** "दृढतामुपैति वैराग्यवासना येन येन भावेन ।
तस्मिंस्तस्मिन् कार्यः काय-मनो-वाग्भिरभ्यासः ।। [१६]।।"

१. धनवि.-टीकायां 'तत् त्वं' इति द्विपदी व्याख्या. अत्र तु 'त्वं' पदमध्याहृत्य 'तत्त्वं' इति एकपदम् व्याख्यातम् ।

इति प्रशमरतिप्रकरणे इति ।।१६.५।।

**रत्न.**–अथ सद्गुरुसेवया सर्वं शुभं प्राप्यत इति तत्रार्थे आत्मानमुपदिशति–

**तमेव सेवस्व**..इति. व्याख्या-हे आत्मन् ! प्रयत्नाद् गुरुं तमेव सेवस्व, प्रयत्नादिति सर्वत्र योज्यं, हे विद्वन् ! आगमान्-शास्त्राण्यपि तानि, अधीष्व-पठ, तथा तदेव तत्त्वं परिभावय-चिन्तय, येभ्यो-गुरुसेवा-शास्त्राध्ययन-तत्त्वपरिभावनेभ्यः साम्यमेव सुधा-अमृतं, तस्या उपभोगो भवेत्, कुगुरुसेवन-कुशास्त्राध्ययन-कुतत्त्वपरिभावनैः संसारमूलकारणैश्च न किमपीति तत्त्वम् ।।१६.५।।

**[४७३] समग्रसच्छास्त्रमहार्णवेभ्यः,**
**समुद्धृतः साम्यसुधारसोऽयम् ।**
**निपीयतां हे विबुधा ! [१]लभेध्व-**
**मिहापि मुक्तेः सुखवर्णिकां यत् ।।१६.६।।**

**धनवि.**–अथैनं ग्रन्थमुपसंहरन् ग्रन्थश्रवणफलमुपदर्शयति –

'समग्र' इति, हे **विबुधा !** - पण्डिताः ! तस्मात् कारणाद् भवद्भिर्, **अयम्**-अध्यात्मकल्पद्रुमाभिधाने ग्रन्थे स्थितः, **समग्रसच्छास्त्रमहार्णवेभ्यः**-सकलधर्मशास्त्र-महासमुद्रेभ्यः, **समुद्धृतः**-सम्यक् प्रकारेणोद्धारविषयीकृतः सङ्गृहीत इतियावत् **साम्यसुधारसः**-समतामृतनिर्यासो **निपीयतां**-श्रूयतामिति, आदरेण श्रवणं पानमुच्यते; **यद्**-यस्मात् कारणात् **इहापि**-मनुष्यभवे स्थितोऽपि **मुक्तेः**-मोक्षस्य **सुखवर्णिकां**-सौख्यस्य वर्णिका-तत्स्वरूपसूचक-स्तदेकदेशः, तां लभेध्वं-प्राप्नुयात इति ।।१६.६।।

**रत्न.**–अथैतद्गन्थस्य शुभोत्पत्तिस्थानकथनेनोपदेयतामाह –

**समग्रसच्छास्त्र**..इति. व्याख्या-हे विबुधा ! हे पण्डिता ! अयं ग्रन्थः साम्यमेव सुधारसो यत्र सः, अथवा साम्यमेव सुधारसस्तन्मयः साम्यसुधारसो निपीयताम्-अत्यादरेण श्रूयतां, युष्माभिरिति कर्तृपदं, किंलक्षणः ? - समुद्धृतः-कर्षितः, केभ्यः ? - समग्राणि-समस्तानि सन्ति-शोभनानि शास्त्राणि-धर्मशास्त्राणी-

१. मुद्रिते कुत्रापि 'लभध्वम्' इति ।

त्यर्थः तान्येव महासमुद्रास्तेभ्यः, तान् निर्मथ्येत्यर्थः, यद्-यस्मात् कारणाद् यूयमिहापि मुक्तेः सुखवर्णिकां लभेध्वम्, अपरोऽपि सुधारसो विबुधैः-देवैर्निपीयते महार्णवसमुद्धृतश्च भवति, तं स विबुधाः पीत्वा इहापि देवभवेऽपि मुक्तिसुखवर्णिकां लभन्त इति साम्यस्य सुधारसोपमान-मन्वर्थमिति ।।१६.६।।

**[४७४] शान्तरसभावनात्मा-**
**मुनिसुन्दरसूरिभिः कृतो ग्रन्थः ।**
**ब्रह्मस्पृहयाऽध्येयः-**
**स्वपरहितोऽध्यात्मकल्पतरुरेषः ।।१६.७।।**

**धनवि.**—अथ ग्रन्थकारस्तच्छिष्यो वा ग्रन्थकारनामविषयप्रयोजनानि सूचयन्नेतद्-ग्रंथाध्ययनं कर्त्तव्यमित्युपदिशन्नाह —

'शान्तरसभावना' इति, **एषः**-अनन्तरमुक्तः, **शान्तरसभावनात्मा**-नवमरस-भावनस्वरूपो **मुनिसुन्दरसूरिभिः**-संतिकरस्तोत्र-गुर्वावलीप्रभृत्यनेकग्रन्थग्रथनानै-पुण्यद्वादशकरैः श्रीतपगच्छप्रकाशनदिनकरैः श्री**सोमसुन्दर**सूरिपट्टधरैः श्री**मुनिसुन्दर**-सूरिगणधरैः **कृतो**-निर्मितः **स्वपरहितः**-स्वस्य-ग्रन्थकर्तुः परस्य च-ग्रन्थश्रोतुर्हितः-सदैव सुन्दरपरिणामो**ऽध्यात्मकल्पतरुः**-अध्यात्मकल्पद्रुमनामा **ग्रन्थः**-शास्त्रं **ब्रह्मस्पृहया**-मुक्तिकामनया**ऽध्येयः**-पठनीयः, अत्र **मुनिसुन्दरसूरि**भिरित्यनेन ग्रन्थकारनाम सूचितं, शान्तरसभावनेत्यनेन विषयः सूचितः, ब्रह्मस्पृहयेत्यनेन प्रयोजनं सूचितमिति ।।१६.७।।

**रत्न.**—अथास्य ग्रन्थस्य सान्वर्थनामकथनपूर्वकमध्ययने प्रवर्त्तयन्नाह —

**शान्तरस-भावना**...इति- व्याख्या-**अध्यात्मकल्पद्रुम**नामैष ग्रन्थो विबुधैः-पण्डितैरध्येयः-पठनीयोऽथवा ध्येयः-चिन्तनीयः, कया ? - ब्रह्मणः-प्रथमपक्षे ज्ञानस्य, अपरस्मिन् पक्षे मुक्तेः स्पृहया-वाञ्छया, किंलक्षणः ? - शान्तरसस्य भावनमेवात्मा-स्वरूपं यस्य सः, पुनः किंलक्षणः ? - कृतो-निर्मितः, कैः ? - **मुनिसुन्दरसूरिभिः**, पुनः किंलक्षणः ? - स्वस्य-ग्रन्थकर्तुः परेषां च-शिष्यादीनां हितो-हितकृद्, अध्यात्म-शास्त्रत्वादुभयेषामपि हितकृदित्यर्थः ।।१६.७।।

**[४७५] इममिति मतिमानधीत्य चित्ते,**
**रमयति यो विरमत्ययं भवाद् द्राग् ।**
**स च नियतमतो रमेत चास्मिन्,**
**सह भववैरिजयश्रिया शिवश्रीः ।।१६.८।।**

**धनवि.**—अथ ग्रन्थकारः स्वकृतग्रन्थस्याव्युच्छित्तिनिमित्तं प्रान्तमङ्गलाचरण-करणव्याजेन स्वप्रतिज्ञात**जयश्री**ङ्कमुपदर्शयन्नेतद्ग्रन्थाध्ययने एतद्ग्रन्थोक्ताचरणे च फलमाह, अथवा पूर्वपद्ये पठनफलमुपदर्शितमथ च पठनानन्तरं तत्रैव मनोरमणे फलं दर्शयति —

'इममिति' इति, **यो मतिमान्**-बुद्धिमान् पुमान्, **इमम्**-अनन्तरोक्तं श्रुतिप्रत्यक्षमध्यात्मकल्पद्रुमाभिधं ग्रन्थम्, **अधीत्य**-अध्ययनविषयीकृत्य, **इति**-ग्रन्थोक्ताचरणप्रकारेण, इमम् एव ग्रन्थं **चित्ते**-मनसि **रमयति**-पुनःपुनरनुभवति, **सोऽयम्**-अध्ययनानन्तरं पुनःपुनरनुभविता पुमान्, **भवात्**-संसारात्, **द्राग्**-शीघ्रं **विरमति**-निवर्त्तते; **अतः**-अस्माद् भवविरमणात्, **अस्मिन्**-ग्रन्थाध्ययनानुभवितरि पुंसि च, **भववैरिजयश्रिया सह शिवश्रीः** मोक्षलक्ष्मीः कल्याणकमला वा **रमेत**-क्रीडां कुर्यात्; अत्र भवः-संसारः, स एव वैरी-शत्रुः, तस्य जयश्रीः-विजयलक्ष्मीः, तया भववैरिजयश्रिया; अत्र **जयश्री** इत्यनेन ग्रन्थस्यास्य **जयश्री**ङ्कता दर्शिता, तद्दर्शनेन चैतद्ग्रन्थकारस्य स्वप्रतिज्ञानिर्वाहोऽपि समर्थितो भवतीति ।।१६.८।।

इति नवमश्रीशान्तरसभावनात्मस्वरूपोऽध्यात्मकल्पद्रुमग्रन्थो **जयश्रीङ्कः श्रीमुनिसुन्दरसूरिभिः** कृतः समाप्तः । श्रियेऽस्तु शुभं भवतु ।

इति श्रीतपागच्छनायकभट्टारकश्री**मुनिसुन्दर**सूरिनिर्मितस्य तत्पट्टपरम्पराप्रभावक-पातसाहश्री**अकब्बर**प्रतिबोधकभट्टारकश्री**हीरविजय**सूरिश्री**विजयसेन**सूरिभावितार्थस्य षोडशसाखस्या-**ऽध्यात्मकल्पद्रुम**स्या-**ऽधिरोहिणीटीका**यां सकलशास्त्रारविन्दप्रद्योतन-महोपाध्यायश्री**कल्याणविजयगणि**शिष्योपाध्यायश्री**धनविजयगणि**विरचितायां

**साम्यरहस्य**नाम्नी षोडशी पदपद्धतिरिति ।।१६।।

**रत्न.**–अथास्य ग्रन्थस्योपसंहारवाक्यमाह-**इमम्**..इति. व्याख्या-इति-अमुना प्रकारेणोक्तमिममध्यात्मकल्पतरुनामानं यो मतिमानधीत्य चित्ते रमयति-क्रीडयति वारंवारं परावर्त्तनेनेति, सोऽयं मतिमान् भवान्नियतं-निश्चितं द्राक्-शीघ्रं विरमति-निवर्त्तते, संसाराद् विरक्तो भवति, अतः-अस्मात् कारणाद्-अस्मिन् मतिमति पुंसि शिवश्रीः-मोक्षलक्ष्मी रमेत, कया कृत्वा ? - सहभवा-सहजाता अर्थादात्मना सहेति, ये वैरिणः-क्रोध-मान-माया-लोभ-राग-द्वेषाख्याः षट्, तेषां जयश्रिया-जयलक्ष्म्या, तेषां जयेनैव शिवश्रीप्राप्तिरिति, अथवा भवः-संसारः स एव वैरी, तस्य जयश्रिया सहास्मिन् शिवश्री रमेतेत्यपि व्याख्यानमिति । मङ्गलम् ।।१६.८।। इति षोडशोऽधिकारः, तत्समाप्तौचाध्यात्मद्रुमनामा ग्रन्थः संपूर्णः । **लिखितश्च सवृत्तिकः-उपाध्यायश्रीरत्नचन्द्रगणिभिः**, स्वशिष्य पं. मतिचन्द्रगणि-पठनार्थे, श्रीगन्धारबन्दिरे द्वितीयाषाढशुदि प्रतिपदि, पुष्ये

**[४७६]** सूर्या-चन्द्रमसौ यावत् यावत् सप्तधरा धराः ।
यावत् तपागणस्तावदयं जयतु पुस्तकः ।।१।।

**[४७७] श्रीशान्तिचन्द्र**वरवाचकदुग्धसिन्धु-
लब्धप्रतिष्ठवरवाचकरत्नचन्द्रः ।
**अध्यात्म-कल्पफल**दस्य चकार टीकां,
तत्राधिकार इति षोडश एष सार्थः ।।१६।।

इति नवमश्रीशान्तरसभावनाऽऽध्यात्मकल्पद्रुमोऽयंग्रन्थो **'जयश्यङ्कः, श्रीमुनि-सुन्दरसूरि**भिर्विरचितः, श्रीतपागच्छनायक-परमभट्टारकप्रभुश्रीसोमसुन्दरसूरिप्रसादेन, विवृतश्च महोपाध्याय श्री**रत्नचन्द्र**गणिभिः, श्रीतपागच्छनायक-परमगुरुभट्टारक-श्रीविजय**देवसूरि**प्रसादेन ।।

**इति नवमशान्तरसभावनात्माध्यात्मकल्पद्रुमनामाऽयं ग्रन्थः संपूर्णः श्रीमुनिसुन्दर-सूरिभिर्विरचितः, चिरं जयतु, रञ्जयतु लोकम् ।।**

# धनविजयटीकाप्रशस्तिः

[४७८] श्रीहीरविजयसूरीश्वरशिष्यै रामविजयविबुधवरैः ।
श्रीसुमतिविजयवाचकशिष्यैरपि सूरविजयज्ञैः ।।१।।

[४७९] संभूय शोधिताऽसावध्यात्मसुरद्रुमस्य पदघटना ।
निर्दोषैर्दोषज्ञैर्निर्दोषा खलु विधेयेति ।।२।।[१]

# रत्नचन्द्रटीका प्रतपुष्पिका

रत्नटी.-इति नवमशान्तरसभावनात्माऽध्यात्मकल्पद्रुमोऽयंग्रन्थः जयश्यङ्कः **श्रीमुनिसुन्दरसूरिभिः** समर्थितः, श्रीतपागच्छ-नायकपरमगुरुभट्टारकप्रभु**श्रीसोमसुन्दर-सूरि**प्रसादेन, विवृतश्च महोपाध्यायश्री-सकलचन्द्रगणिशिष्योत्तमउपाध्याय-श्रीशान्तिचन्द्रगणिशिष्यरत्नउपाध्याय-**श्रीरत्नचन्द्रगणिभिः** श्रीतपागच्छनायक-प्रवर्द्धमानसागरकुमतनिवारणजगदुपकारकृद्-भट्टारकप्रभुयुगप्रधानसमानश्री ५ **विजयदेव**सूरिसूरिदेवानां प्रसादेन दीक्षागुरुविद्यागुरु-श्रीजम्बूद्वीपप्रज्ञप्तिसूत्र-प्रमेयरत्नमञ्जूषा-वृत्तिकारकमहोपाध्यायश्रीशान्तिचन्द्रगणिप्रसादेन ।। एवं मुद्रितपुस्तके पाठः-

१. धन टी. - प्रतस्य पुष्पिका - संवत् १९२६ रा ना वर्षे माघमासे कृष्णपक्षे, तिथौ ३ तृतीयां, सौम्य वासरे मुंबई मध्ये, ब्राह्मण सिरोहिया चतुर्भुजेण लिखितम्, मुनिश्री वृद्धिविजय आत्मार्थे लखावितम्

# रत्नचन्द्रगणिटीकाप्रशस्तिः

**[४८०]** श्री**वीर**पट्टाम्बुजभास्कराभः, श्रीमत्**सुधर्मा** गणभृद् बभूव ।
अद्यापि वाणी प्रसरीसरीति, यस्य प्रभोः पण्डितवक्त्रवासा ।।१।।

**[४८१]** बभूव तत्पट्टपरम्परायां, सूरि**र्जगच्चन्द्र** इति प्रसिद्धः ।
लेभे **तपागच्छ** इति प्रसिद्धिं, यस्माद् गणोऽयं प्रथितावदातः ।।२।।

**[४८२]** परम्परायामपि तस्य जातः, साधुक्रियामार्गविकासभास्वान् ।
**आनन्द**पूर्वो **विमला**ग्रसूरिर्जगज्जनानन्दकरः प्रतीतः ।।३।।

**[४८३]** तस्यापि पट्टे **विजयाग्रदान**सूरिर्बभूव प्रबलप्रतापः ।
राशिं गुणानां किल यस्य वारां-राशेः समानीकुरुते कवीन्द्रः ।।४।।

**[४८४]** बभूव सूरिः किल तस्य पट्टे, **श्रीहीर**पूर्वो **विजयो**ऽर्जितश्रीः ।
[1]लेभे प्रतिष्ठां किल भूयसीं यो नरेन्द्रदेवेन्द्रकृतामजस्रम् ।।५।।

**[४८५]** तस्यापि पट्टेऽजनि सूरिराजः, **सेनोत्तरश्रीविजयो** यशस्वी ।
ततार जैनागमवारिराशिं, नावा स्वबुद्ध्योत्तमभाग्यभाग् यः[2] ।।६।।

**[४८६]** विजयते किल तत्पदसेवया, सुलभसूरिपदः प्रणयी गुरौ ।
**विजयदेव**गुरुर्गरिमाम्बुधिस्तपगणे गगने किमु चन्द्रमाः ? ।।७।।

**[४८७]** श्री**आनन्दविमल**गुरुशिष्याः **श्रीसहजकुशल**नामानः[3] ।
लुंपाकमतमपास्याङ्गजमलमिव निर्मला जाताः ।।८।।

**[४८८]** तेषां शिष्यमुख्या वाचकवर**सकलचन्द्र**नामानः ।
चन्द्रा इव वचनसुधां ववृषुर्ये विबुधवरपेयाम् ।।९।।

**[४८९]** **श्रीशान्तिचन्द्रा** वरवाचकेन्द्रास्तेषां च शिष्या बहुशिष्यमुख्याः ।
बभूवुरुद्दामगुणैरुपेताः, प्रभावकाः श्रीजिनशासनस्य ।।१०।।

---

१. प्राप प्रतिष्ठामसां स सूरि-र्न..मु० । २. भागधेयः मु० । ३. ०लविबुधवराः - मु० ।

**[४९०]** श्रीमज्**जम्बूद्वीपप्रज्ञप्ते**र्वृत्तिसूत्रणे चतुराः ।
येषां बुद्धिं सुरगुरुरपीहते विश्वगेयशुभयशसाम्[१] ।।११।। "इति गीत्यार्या"

**[४९१]** तेषां गुरूणां गुणसागराणां, प्रसादलेशं समवाप्य चक्रे ।
अध्यात्मकल्पद्रुमवृत्तिमेनां, परोपकृद् वाचक**रत्नचन्द्रः** ।।१२।।

**[४९२]** श्रीविद्यमानगच्छाधिराजवर**विजयदेव**सूरीणाम् ।
प्राप्यानुज्ञां तपगणगगनाङ्गणभास्करश्रीणाम् ।।१३।।

**[४९३]** युग-मुनि-रस-शशिवर्षे मासीषे विजयदशमिकादिवसे ।
शुक्लेऽध्यात्मसुरद्रुमवृत्तिश्चक्रे मया ललिता ।।१४।। (युग्मम्)

**[४९४]** अध्यात्मशास्त्रे विवृतिं विवृण्वता, यदर्जितं पुण्यमनन्यचेतसा ।
सङ्घेषु कल्याणपरम्परा परा, प्रवर्त्ततां तेन दिने दिनेऽधिका ।।१५।।

**[४९५]** मात्सर्यमुत्सार्य कृतज्ञलोकैः, संशोधनीया परिवाचनीया ।
धर्मोपदेशेन च लेखनीया, वृत्तिः किलैषा च प्रवर्त्तनीया ।।१६।।

**[४९६]** अनुष्टुभां सहस्रे द्वे, तथोपरि चतुःशती ।
एकोनषष्ट्यभ्यधिका, वर्द्धते वर्णयामलम् ।।१७।।

ग्रन्थाग्र २४५९, श्लोकाः अक्षर २.

इत्यध्यात्मकल्पद्रुमवृत्तिः **अध्यात्मकल्पलता**नाम्नी चिरं जयतु[२] ।

[३]मुद्रितप्रतौ त्वित्थं पुष्पिका -

---

१. श्रुत. मु० । २. नाम्नी संपूर्णा - मु० । ३. संवत् १६७४ वर्षे आश्विनमासि शुक्लदशम्यां **श्रीसूरतबंदरे** उपाध्यायश्रीरत्नचन्द्रगणिभिर**ध्यात्मकल्पलता** विरचिता ।। **श्रीप्रद्युम्नचरित्र** १ श्रीसम्यक्त्वसप्तति**सम्यक्त्वरत्नप्रकाश**नामबालावबोध २ **श्रीसमवसरणस्तवबालावबोध** ३ **श्रीहितोपदेश** ४ भ्रातृभिः सह **श्रीभक्तामरस्तव** १ श्रीकल्याणमन्दिरस्तव २ श्रीदेवाप्रभोस्तव ३ श्रीधर्मस्तव २ श्रीऋषभवीरस्तव ५ श्रीकृपारसकोष ६ श्रीनैषधमहाकाव्य ७ श्रीरघुवंशमहाकाव्य ८ वृत्तिभगिनीभिः सह रममाणा श्रीअध्यात्मकल्पद्रुम-वृत्तिर**ध्यात्मकल्पलता**नाम्नी विबुधपाणिगृहीता बहुसंतानपरंपरावती चिरं जयतु ।।

संवत् १६७८ वर्षे आषाढ शुक्लप्रति दिने, पुष्ये, श्रीगन्धारबन्दिरे चतुर्मासकं स्थितैः, उपाध्यायश्री **रत्नचन्द्रगणिभिः स्वोपज्ञा स्वयं लिखिता**, चिरं जयतु वाच्यमाना । १. श्रीप्रद्युम्नचरित्र, २. श्रीसम्यक्त्वसप्ततिका प्रकरण(स्य) सम्यक्त्व-रतिप्रकाशनबालावबोधाख्यां, ३. भातृभ्यां श्रीभक्तामरस्तव-श्रीकल्याणमन्दिरस्तव, ४. श्रीदेवा प्रभो ! स्तव, ६. श्रीमन्धर्मस्तव, ७. श्रीऋषभ-वीरस्तव, ८. श्रीकृपारत्नकोश, ९. श्रीनैषधमहाकाव्य, १०. श्रीरघुवंश-महाकाव्यानां वृत्तिभगिनीभिः सह रममाणा चिरं जयतु श्री अध्यात्मकल्पद्रुमवृत्तिः श्रीअध्यात्मकल्पलता नाम्नी-समीहितं सुखं ददातु, श्रीविजयदेवसूरिराज्ये-तेषां आज्ञाप्रसादं प्राप्य विरचिता । श्रियेऽस्तु ।

**[४९७]** सूर्याचन्द्रमसौ यावत् यावत् सप्तधरा-(धरा)
यावत् तपागणसूतावदयं जयतु पुस्तकः ।।

पं. मतिचन्द्रगणि पठनार्थम्



# परिशिष्ट-१

## *श्री अध्यात्मकल्पद्रुम ग्रंथ मूळ श्लोकोनी भाषामां चोपाई[1]

પરમ પુરુષ પરમેસર રૂપ, આદિ પુરુષ નઉ અકલ સરૂપ;
સામી અસરણ સરણ કહાય, સકલ સુરાસુર સેવે પાય. ॥

પ્રણમી તાસ ચરણ અરવિંદ, ખરતર ગચ્છપતિ શ્રી **જિણચંદ;**
સંભારી શ્રી સદ્‌ગુરુ નામ, ભાષા લિખું સંસ્કૃત ઠામ. ॥

**અધ્યાતમ કલ્પદ્રુમ** લહ્યઉ, શ્રી **મુનિસુંદરસૂરે** કહ્યઉ;
પરમારથ ઉપદેશન કરી, નવમ શાંતરસપતિ અણુસરી. ॥

અંતર અરિ જીપી **જયસિરિ,** શાંત રસે શ્રી વીરે વરી;
નિરવૃતિકારી તે પરિણામ, ચરમ કરણમાં આવ્યા તામ. ૧

સકલ મંગલનિધિરૂપી હિયે, આવ્યે નિરુપમ સુખ પામીએ;
શિવસુખ તરત લહીજે જિણે, ભાવઉ ભવિક શાંત રસ તિણે. ૨

સમતામાંહિ રહે લયલીન, ન રહે સ્ત્રી સુત ધન અધીન;
દેહી મમત ને વિષય કષાય, ન કરે રહે શ્રુતહ ચિત્ત લહાય. ૩

વૈરાગી વળી શુદ્ધ ધ્રમ દેવ, ગુરુ ધ્રમ જાણ કરે વ્રત સેવ;
સંવરરૂપી શુભ ચલગતી, સેવો સમતારસ શિવમતી. ૪

એહ કહ્યા સોળહ અધિકાર, સંગ્રહ એણે શાસ્ત્ર મઝાર;
પહિલું તિહાં સમતા ઉપદેશ, વચન કરી ભાખું લવલેશ. ॥

### સામ્યોપદેશ કથન.

ચિત્તબાલ મત મૂંકિ તું, ભાવન બીજ અનૂપ;
જિણ તુજે દુરધ્યાન સુર, ન છલઈ[2] છલના રૂપ. ૫

---

* વિવેચક : મોતીચંદ ગિરધરલાલ કાપડિયા સાતમી આવૃત્તિ, વિ.૨૦૪૨, પ્રકાશક : શ્રી મહાવીર જૈન વિદ્યાલય-મુંબઈમાંથી આભાર પૂર્વક અહીં પ્રકટ કરીએ છીએ. ૧. આ ચોપાઇનું પુસ્તક રા. રા. કેશવલાલ પ્રેમચંદ તરફથી અમદાવાદ ડેલાના ભંડારમાંથી મળી આવ્યું છે, પરંતુ તે બહુ મોડું મળ્યું તેથી પાછળ દાખલ કર્યું છે. વાંચનારની સગવડ માટે દરેક શ્લોકના વિવેચનને અંતે જે ચાલુ નંબર મૂક્યો છે, તે જ નંબર ચોપાઈને પણ આપ્યો છે. આથી સંસ્કૃત શ્લોક સાથે મુકાબલો કરવામાં બહુ સગવડ થવા સંભવ છે. પછીની આવૃત્તિમાં પણ આ જ ગોઠવણ વધારે અનુકૂળ છે એમ ધારીને ફેરફાર કરવામાં આવ્યો નથી. એ જ ગોઠવણ ચાલુ છે. ૨. જયશ્રી.
x આંકડા આ ગ્રંથના સોળ વિભાગ (અધિકાર) બતાવે છે. + છળે.

**सदेशता कथन.**

જે સગલું ઇંદ્રિયસુખ થાય, નર સુર ઇંદ તણઇ સુખ માય;
બિંદુપરે સમતા પૂરેસરે, તે જાણી આદર ચિત્ત ધરે. ૬

**समताश्रय फळ कथन.**

અદીઠ વિવિધ કરમ [1]પરકાર, જાણી સહુ જન વચન વિકાર;
પરણતિ રાખી ઉદાસ ભાવ, મુનિ આસરે અદુઃખ સુખ ઠાવ. ૭

**समताश्रय सुख कथन.**

સરવ જંતુ ઉપરિ ક્ષણ એક, જઉં[2] મન મૈત્રી આણે છેક;
તે સુખ પરમ રૂપ ભોગવે, જે ઇહ પરભવ ન થયો કબે. ૮

**समताश्रित जीव लक्षण कथन.**

જેહ નઈ મિત્ર, ન શત્રુ ન કોઇ, નિજ પર ભાવ ન હોવે સોઈ;
ઇંદ્રિયાર્થ ન રમે ચિત્ત જાસ, યોગી મુક્તકષાયાવાસ. ૯

**समता कारण कथन.**

મૈત્રી કરી જીઉ જગજંતસું, પ્રમોદ ધરિ જીવ ગુણવંતસું;
કરુણા ભવપીડિત જનસંગ, નિરગુણ પરિ[3] ધરિ ઉદાસ રંગ. ૧૦

***मैत्री स्वरूप कथन.**

મૈત્રી પરહિતચિંતા જેહ, પરદુઃખવારણ કરુણા તેહ;
પ્રમોદ પરસુખ સંતોષસું, ઉપેક્ષા તે મધ્યગ દોષસું. ૧૨

**मैत्री लक्षण कथन.**

ધરિવું જે મ કરઉ[4] કો પાપ, વળી ન લહઉ કોઈ દુઃખતાપ;
મુંકાવો ભવથી જગજંત, મતિ એ મૈત્રી કહિયે તંત. ૧૩

---

૧. પ્રકાર. ૨. જ્યારે. ૩. પરે, ઉપર. ૪. ૧૧ મા શ્લોકની ચોપાઈ લખી નથી તેથી તે સંખ્યા પડી રહે છે; અથવા ૧૧-૧૨ નો બારમી ગાથામાં સમાવેશ થાય છે. ૫. કરવું.

### પ્રમોદ લક્ષણ કથન.

સકલ દોષના ફેડણહાર, વસ્તુ તત્ત્વના દેખણહાર;
ગુણવંતનું એ કરિઉ પક્ષ, જીઉ તું લહિ તે મુદિતા લક્ષ. ૧૪

### કરુણા લક્ષણ.

દીન હીન દુખિયા ભયભીત, યાચમાન જીવિત નિજ ચીત;
તસ ઉપકારતણી જે બુદ્ધિ, લહિ તે જઉ તું કરુણા શુદ્ધિ. ૧૫

### મધ્યસ્થતા લક્ષણ.

જોવું ક્રૂર કર્મ તેહવું, વળી સુરગુરુ નિંદા જેહવું;
નિજ પરસંસક ઉપરિ તિમઈ, લહિ જીઉ તે મધ્યસ્થાઈ મઈ. ૧૬

### સમતા સુખ કથન.

સકલ ચેતનાચેતન વિષે, સ્પર્શ, રૂપ, રવ, ગંધ, રસ લખે;
સામ્યભાવ જોઈશ જો ચિત્ત, તો તુઝ કરગત શિવસુખ તત્ત. ૧૭

### આતમ મદવારણ કથન.

સ્યાં ગુણ તુઝ જિણ વાંછે સ્તુતિ, સ્યું કરતઉ[1] મદભર અદભૂતિ;
નરકભીતિ કિણ સુકૃતે ગઈ, સ્યું જીતૂં યમ તેં મન જઈ. ૧૮

### વેત્તૃત્વ કથન.

ગુણ લેવઈ જે ગુણિયલ [2]તણઈ, પરનિંદા આતમને ભણૈ;
મન સમભાવે રાખે વલી, બીજે વ્યત્યયે વેત્તા રલી. ૧૯

### યથાર્થ વેત્તા કથન.

નવિ જાણે શત્રુ નઈ મિત્ર, નૈવ હિતાહિત નિજ પર ચિત્ત;
સુખ વાંછે જીઉ કરઈ [3]દુઃખધેષ, ઈષ્ટ લહિસિ કિમ નિયાણહરેષ. ૨૦

---

૧. કર્યું, કર્તવ્ય બજાવ્યું. ૨. તણા. ૩. દ્વેષ.

### વેત્તાફળ કથન.

સુકૃત જાણી સર્વ પરિણામ, રમણીએ રહે ચિરથિતિ ઠામ;
અન્ય ભવે તુ અનંત સુખ લહઈ, તઉ કિમ વ્રતથી નાઠઉ વહઈ. ૨૧

### સ્વપર વિભાગ કથન.

નિજ પર કીધું જેહ વિભાગ, રાગાદિકે તેહજ અરિ લાગ;
ચઉગતિ દુઃખ કારણથી તનઈ, જાણઈ નહી અરિકૃત્રિમ મનૈ. ૨૨

### વસ્તુ અનિત્યે સામ્ય કથન.

અનાદિ આતમ નિજપર આદિ, કો નઈ પિણ નહિ ભાવ અનાદિ;
રિપુ મિત્ર વલિ થિર નહી દેહ, તઉ સરિખું ન લહે કિમ એહ ? ૨૩

### અનિત્ય દૃઢાવ કથન.

પંડિતને તતથી લેપ નહી, માતપિતા સુત સ્ત્રી સુખ ગહી;
ન હુવે સુખકર લેપથી અન્ન, ગત આકાર સકલગત તન્ન. ૨૪

### સામ્યૈ અલ્પતા કથન.

કામી હુવે સહુ સંજ્ઞાવંત, ધની મનુષ્ય કે કર્મી તંત;
ધર્મી કે જૈની કે યતી, શિવવંછક કે એ શિવમતી. ૨૫

### સર્વ સ્વારથ કથન.

નેહી તિતલઇ નિજનિજ [1]વિષઈ, પોતીકો સ્વારથ જ્યાં લખઈ;
જોઈ એહવી સ્વારથ રીતિ, એ ઉપરિ કુણ રાખે પ્રીતિ ? ૨૬

### રાગદ્વેષ નિષ્ફલતા.

પામ્યું સ્વપન ઇંદ્રજાલાદિકઈ, જે રતિ અરતિ નિફલ બે બકઈ;
તિણપરિ લખિ એ સહુ ભવ વિષઈ, ચિંતવવું આતમને સખૈ. ૨૭

---

૧. વિષે.

### બિશ્લોકૈઃ પરવશ કથન.

એ મુજ માતપિતા એ મુજ, સજ્જન બંધવ એહ અગુજ;
એ ધન ઉપરિ મમતા [૧]રહઈ, નિજ યમવશતા કાં નવિ લહઈ ? ૨૮

ન ધન, ન પરિજન સજ્જન ન કોઈ, પરિચિત મંત્ર ન દેવ ન સોઈ;
યમથી કોઈ ન [૨]રાખઈ તુજ, જાણી મૂઢ [૩]હિવે તો બુજ. ૨૯

### ધને મૂઢતા કથન.

તેણે જો ભવસુખ ન ગહે, સાધનરૂપ ધનાદિક વહે;
મુઝે વિષયવિકારે મને, પ્રીતિ ન ચાહે સમતત્તને. ૩૦

### શત્રુ કુટંબપણ બોધ.

કરે કષાય મલિન સ્યું ચિત્ત, કો ઉપરિ અરિબુદ્ધે અત્ત;
તે તુજ માતપિતાદિકપણે, ઈષ્ટ થયાં બહુ [૪]ભવભ્રમણે. ૩૧

### કુટંબે શત્રુબોધ.

જ્યાં શોચે કિહાં ગયાં મુજ એહ, નેહાલુ આતમહ સનેહ;
તિણે હણ્યો તુંહિ જ પૂરવઈ, હણણ હણાવણ તે ભવભવઈ. ૩૨

### અસમર્થ કથન.

ન શકે તું રાખી તેહને, તે પિણ રાખણ તુઝ દેહને;
નિફળ[૫] મમત કરે સ્યું એસું, પગ પગ મૂરખ સ્યું ચિંતેસું ? ૩૩

### રાગદ્વેષ નિરાસ કથન.

સચેતની પુદ્ગલિયા જીવ, અન્ય પદારથ અણુગ [૬]સદીવ;
ધરે અનંત પરિણામ સભાવ, તહાં કુણ રાગદ્વેષનો દાવ ? ૩૪

સમતામાંહિ મગનપણે, એહ રચ્યઉ અધિકાર;
[૭]હિવ અનુક્રમિ બીજો લિખું, લલના મુગતાચાર ॥

### ઇતિ પ્રથમઃ સમતાધિકારઃ

૧. રહે. ૨. રાખે. ૩. હવે. ૪. ભવોભવે. ૫. નિષ્ફલ. ૬. સદૈવ, હમેશા. ૭. હવે.

મોહે સ્યું સ્ત્રીજન [1]ઉપરઇ, પુણ્યાતમ પ્રીતે રતિ ધરૈ;
ન લખે કાં પડતાં ભવદધઈ, સ્ત્રી તે શુદ્ધ શિલા ગલ બધઈ. ૩૫

ચરમ અસથિ મજ્જ આંતર વસા, અસ્થિ માંસ અમેધ્યાદિક કસા;
અશુચિ પિંડગત સ્ત્રી આકાર, દેખી રમે સ્યું આતમસાર. ૩૬

દેખિ દૂરસ્થ અમેધ્ય [2]અલપ્પ, સૂગ કરૈ તૂં નાસાકલપ્પ;
તિણે ભરઇ સ્ત્રી ડીલે મૂઢ, સ્યું અભિલાષ કરે અવગૂઢ. ૩૭

માંસ અસ્ત્ર અમેધ્યે ભરી, સ્ત્રી દેહી દેખે સ્યે કરી;
ઈહ ભવ સુત ધન ચિંતા તાપ, થાયે પરભવ દુરગતિ પાપ. ૩૮

મુંઝે સ્યું દેખી સ્ત્રીઅંગ, ચિત્ત પ્રસન્ને પેસ નિસંગ;
લખ ક્ષણ વિરમ અશુચિ એ ગાત, કરતો શૌચ અશૌચ હ ઘાત. ૩૯

મોહાયે સ્યું સ્ત્રી મુખનેત્ર, દેખી અંગોપાંગ વિચિત્ર;
દેખે નહીં નરકગતિ રૂપ, મોહ તે મહાકદર્થન રૂપ. ૪૦

અમેધ્ય ભટ્ટી નઈ [3]બહુરંધ, નીકલતા મલ કૃમિચય બંધ;
માયિણ ચપલ કુડકોથળી, દુરગતિણી સુગતૈ સ્યું રળી. ૪૧

જેહ નિભૂંઈ[4] વિષકંદલી, અદરી વાધિણિ નિનમી વળી;
વ્યાધિ અકારણ મૃત્યુ એ કરે, અણવાદલી વજ્રશનિ પરે ॥
સાહસ બંધુ સનેહ વિઘાત, મૃષા પ્રમુખ સંતાપહ ઘાત;
ઈણ પરિ એ પ્રતખ[5] રાક્ષસી, સુણી ભવિયણ દૂરે રહ્યઉ વસી. ૪૨

અસ્ત્રી વિરમણ રૂપ એ, લિખ્યું દુતીય અધિકાર;
તીજો સુત મમતા રહિત, જાણૌ હૃદય મઝાર. ॥

**-: इति द्वितीयः स्त्रीममत्वमोचनाधिकारः :-**

જીવ મ કુઇસુ સુતાસુત દેખ, હરખે આકુલ ચિત્ત વિશેષ;
મોહે નરકબંદિ મેલવા, મેલ્યા એહ નિઝડના લવા. ૪૩

---

૧. ઉપરે. ૨. અલ્પ. ૩. રંધ્ર, દ્વાર. ૪. જમીન વગરની, નિર્ભૂમિ. ૫. પ્રત્યક્ષ, ઉઘાડી.

આભવ જીવ ભવાંતર તિમી[૧], ન લખે શાલ મૂક્યા જે ઈમી;
દેવે કરી ચલાચલ પીડ, હણે સદા તમ સમાધિ કીડ. ૪૪

કૃમિ વિચિત્ર સ્ત્રી કુખે હવે, અસ્રક્ સુકર ધાતુ પ્રભવે;
દંપતિ રાગ દ્વેષ તે વિષે, ન હુવે તો સ્યો સુત પરમુખે ? ૪૫

આપદ રાખણ સમરથ નહીં, સુત સંબંધ પિતાદિક મહી;
ઉપકારે દીસે સંદેહ, સુતપર નેહ મ કરિ જીઉં એહ. ૪૬

સુતમમતામોચન પ્રગટ, એહ તૃતીય અધિકાર;
ધનની મમતા મૂકવા, ચોથો સુણિ અધિકાર. ॥

**-: इति तृतीयः पुत्रममत्वमोचनाधिकारः :-**

સુખબુદ્ધે લખમી[૨] મેલતો, રહે જીઉ તું મમતા છતો;
અધિકારી એ પાપહ વેત, સંસારે નાખે તું ચેત. ૪૭

લછમીએ દુસમણભોગ હવે, ઉંદર સરપ ગતિ વળિ હવે;
મરણાપદ રાખે નહીં કિમ, રાખે સ્યું જિઉ મોહ એહ મઈ. ૪૮

મમતા માત્ર હુવે મનસુખ, ધન અલપ કાલે તો લખ;
આરંભાદિકથી અતિ દુઃખ, દુરગતિરૂપી દારૂણ રૂખ. ૪૯

આતમસાધન એ છે દ્રવ્ય, ધર્મ થવે પિણ[૩] નહીં અતિ ભવ્ય;
પુણ્યાતમ નિઃસંગહ યોગ, તદ્ભવ મુક્તિ સ્ત્રી હુવે ભોગ. ૫૦

ક્ષેત્ર વસ્તુ ધન ધાન્યહ તેહ, મેલી રાખે પ્રાણી જેહ;
ક્લેશ પાપ નરકગતિ હવે, ગુણ નહિ કોઈ ધરમને ઠવે. ૫૧

બૂડે આરંભે ભવમાંહ, રાજા પ્રમુખ છલે વળિ તાંહ;
ચિંતાકારક ને ભ્રમ હરે, પરિગ્રહ છંડવઈ[૪] કારજ સરે. ૫૨

વાવે નહી જો ધન શુભ ખેત, જાવું પરભવ સ્યું તે લેત;
તેહ ઉપાર્જ્યું કરી અતિ પાપ, જીઉ કિમ તો જાયે દુઃખતાપ ? ૫૩

---

૧. તેમ. ૨. લક્ષ્મી, દોલત ૩. પણ. ૪. છાંડવાથી.

પરિગ્રહ મમતા મુગત એ, ચઉથું[1] ઈહાં અધિકાર;
હિવ અનુક્રમિ પંચમ લિખું, દેહ મમત પરિહાર. ॥

**-: ઇતિ ચતુર્થો ધનમમત્વમોચનાધિકારઃ :-**

પાપ ચિંતવે પોષે દેહ, કિમ તુજ થશે સહાયી તેહ ?
ઈમ જો ઉત્તર સુખ ચિંતવે, એ જગ વંચે ધૂરત રવે. ૫૪

કારાગારથકી નીસરે, જડ પિણ ભેદી નઈ બહુ પરે;
પડ્યું અધિક તેથી તનુ બંદિ, જીઉ ક્રમયતન કરે સ્યે છંદિ. ૫૫

જો પરભવ દુઃખ વંછે ચિત્ત, તો ન કરે કિમ પુણ્ય પવિત્ર ?
રાખી ન શકે ભવભય કોઈ, પુણ્ય વિના જઉ વજ્જિ[2] હોઈ. ૫૬

કરે પાપ મુંઝી ઈણ દેહ, ભવદુઃખ જાલ ન જાણે જેહ;
અગનિ લોહાશ્રય સહે ઘન સહી, વ્યોમ અનાશ્રય બાધા નહીં. ૫૭

કાયનામ અનુચર એ દુષ્ટ, કર્મગુણે બાંધી તુજ પુષ્ટ;
છલનું દેઈ સંયમ લાંછ, જિણ તુજ જીવ ન આવે આંછ. ૫૮

શુચિપણું અશુચિપણું લહે જિહાં, કૃમિ જાલે આકુળ વપુ ઈહાં;
તરત ભસ્મભાવીથી જીવ લે નહીં કાં આતમહિત નીવ. ૫૯

તપ જપ સંયમ પરઉપકાર, દેહે એ ફલ લ્યે નહિ સાર;
બહુ ભાટકે અલ્પ દિનગેહ, મૂરખ તૂં સ્યું તિહાં ફલ લેહ. ૬૦

માટીરૂપ ઈણે વિણસતે, નિંદાવંત રોગઘર છતે;
દેહે આતમહિત જો નહિ, મૂરખ યતન કરે સ્યો તહીં. ૬૧

દેહ મમત રહિત ઈહાં, એ પંચમ અધિકાર;
વિષય પ્રમાદ નિવારવા, સુણિ વળી વિકથા વાર. ॥

**-: ઇતિ પંચમો દેહમમત્વમોચનાધિકારઃ :-**

---

૧. ચોથું ૨. ઇંદ્ર.

તુચ્છ સુખદાયક ઇંદ્રિય વિષે, સ્યું મુંઝે આતમ ઇણ વિષે;
મેલ્હે એ ભવભયવનમાંહ[૧], જીઉ નઇ સુલભ નહી શિવ તાંહ. ૬૨

પડતે શુભ પરિણતિ અતિ અસુભ, રચ્યો વિષય સુખમાં સ્યું મુઝ ?
જડ પિણ રહે હિતાહિત લખી, ન લખે[૨] તૂં કાં પંડિત પખી. ૬૩

ઇંદ્રિયસુખ તે તો જિમ બિંદ, અતીંદ્રિય સુખ તે શિવગતિ કંદ;
પંડિત દુકું પરસ્પર દેખી, આણે દૃષ્ટિ એક પરિશેષ. ૬૪

દેહી નરક દુઃખ કિમ ભોગવે ? શાસ્ત્ર સુણીને લહિ જીઉ હવે;
જેહ નિવર્ત્યો તૃષ્ણા વિષે, સુણી પાપભય સગલા[૩] લખે. ૬૫

નરક વેદના ને ગર્ભવાસ, દેખીને શ્રુતલોચન[૪] ભાસ;
મન ન લગે જ્યું વિષય કષાય, તો પંડિત વળી ચીતવિ તાય. ૬૬

જિમ પશુને વળી જિમ ચોરને, વધ કરતાં મૃતિ હુવે થિર મને;
હલકે હલકે તિમ સરવને, તો સ્યું આતમ વિષયાજને. ૬૭

બીહે જીઉ જો દુઃખની રાશ, મન વશ ઇંદ્રિય વિષયાવાસ;
ઇંદ્રિય સુખ તે નાશે તુરત, તસ નાસ્યે નિશ્ચય દુઃખ ઝત. ૬૮

યમ સ્યું મુયો[૫] દુરામય[૬] ગયા, નરક જડાણા સ્યું કાં થયા ?
સ્યું નિશ્ચલ આયુસ ધન દેહ, કૌતુક વિષયે મુંઝયો જેહ. ૬૯

મુંઝે સ્યું જીઉ વિષય પ્રમાદ, ભ્રમગત સુખ ઉત્તર દુઃખખાદ;
સુખ જે ઇંદ્રિય લિપ્સા મુક્ત, નિરુપમને આયતિ શિવ યુક્ત. ૭૦

વિષય પ્રમાદ નિવારવા, એ છઠ્ઠો અધિકાર,
જિણ કષાય ઉપજે નહીં, સો સુણિ[૭] સમમ સાર. ॥

**-: इति षष्ठो विषयप्रमादत्यागाधिकारः :-**

સહી સહીસ જીવ પીડા ઘણી, દ્વેષ વશે નરકાદિક તણી;
સ્યું તું મુગ્ધ કહ્યે કુવચને, ક્રોધે નિજ સુકૃતધન હને. ૭૧

૧. માં. ૨. જાણે ૩. સર્વે. ૪. જ્ઞાનચક્ષુ. ૫. મરી ગયો. ૬. વ્યાધિઓ. ૭. સાંભળો.

માનહીન વચને જો માન, ન હુવૈ તો તપ આખે માન;
કુવચન માને હુવે તપનાસ, દુઃખ લહે આતમ નરકાવાસ. ૭૨

વૈરાદિકનો લાભાલાભ, આતમ જાણો આ ભવગાભ;
માન રાખ ભાવે[૧] તપ રાખ, નિહાચે[૨] ઈહાં દુદું ગતિ સાખ. ૭૩

સુણિ કુવચન જે હરષિત થાય, પાહણ કે જસ રોમ હરખાય;
જે મરણાંતે ન ધરે દોષ, જીઉ જાણે એ શિવગતિ પોષ. ૭૪

સ્યું ગુણ તુજઝ કષાયે કદા, કીધું છે જિણ સેવઈ સદા;
સ્યું દેખે નહિ એહનું દોસ, તાપ ઈહાં, પરભવ દુખકોસ. ૭૫

સ્યું તુજ સુખ કષાયે કર્યો, કષાયનાસથી સ્યું સુખ [૩]ઘિટયો;
એ બેમાં ઉત્તર ફલ દેણ, જાણી જીઉ ભજ તે અભેણ. ૭૬

તપપ્રવૃત્તિ તો જીઉ સુખસાધ્ય, જિમ તિમ માનમુગતિસુ અબાધ્ય;
પહિલી પ્રવૃત્તિ ન દ્યે સુખ કઈ, બાહુબલિને બીજે શિવ દઈ. ૭૭

વિચાર કરી ઈમ તજવું માન, દુર્લભ તપ રાખવું નિદાન;
પંડિત હરખે મન ધરિ ક્ષમા, માન મત્સર હ્વે મૂરખ ગમા. ૭૮

થોડે પરાભવ પિણ તું કુપે, પાપ ચિંતવઈ નિજ ગુણ લુપે;
ન લખે નરક તિરશ્ચી ગતિ, વારવાર થાસ્યે દુઃખતતિ. ૭૯

ધરે પુણ્યાતમ અપકારિએ, ક્રોધ તેહ ધરિ અરિષટકીયે;
તે ભવબાહિજ દૃષ્ટિ પીડ, અંતર અરિને ભવ ભવ ઈડ. ૮૦

ભણે ક્રિયા તપ શમમાં રહે, માયા સહિત ધરમ નઈ કહે;
ન લહે તે ફલ આતમ દેહ, ક્લિેસ રૂપ ભવાંતર છેહ. ૮૧

વહે લોભ આતમ સુખ ભણી, સેવા લ્યે જ્ઞાનાદિક તણી;
દુખ લેવા નઈ ઈહ પરવહે, વાંછા તઉ ધરિ દુહું પરિગ્રહે. ૮૨

---

૧. અથવા, ઇચ્છે તો. ૨. નિશ્ચયે, જરૂર. ૩. ઘટ્યો, ઓછું થયું.

કરીસ જઉ પરભવ હિત કાંઇ, કાંઈક કરિ સુકૃત કિહિ ઠાંઇ;
વળી તે મદ મત્સરેં ન હાર, માનાદિકે નરકગતિ ધાર. ૮૩

પહિલે પાપ સંસારે પડ્યો, હવે કિસું ગુણિયલ મદ જડ્યો;
નવિ જાણે સ્યું ભવજલનિધે, પાડે યંત્રી સાંકલ મધે. ૮૪

કષ્ટે તુજ ધરમ લવ મિલ્યો, યુગપત જાઇ કષાયે ભિલ્યો;
અતિયત્ને સુ લહ્યું ધન લેસુ, મૂરખ કિમ હારે ફુંકેસુ. ૮૫

મિત્ર તેહ શત્રુ હવે તરત, ધરમ મલિન યશ અપયશ ઝત;
ન ધરે નેહ બંધવ માબાપ, ઈહ પરભવસુ કષાયે તાપ. ૮૬

રૂપ લાભ કુલ વિક્રમપણે, વિદ્યા તપ દત પ્રભુતા ભણે;
સું મદ વહે ન જાણે મૂઢ, તે અનંત નિજલાઘવ વૂઢ. ૮૭

વિણ કષાય ન વધે ભવરાશ, ભવ ભવમાંહે એ મહાપાસ;
એ કષાય ભવતરુના મૂલ, તે છંડ્યા આતમ શિવતૂલ. ૮૮

દેખી નરક તિર્યગ્ વેદના, શ્રુત નજરે ધ્રમ દુર્લભ મના;
કૌતુક તે હરખે જે વિષે, વિફલ ચેતન એ જીઉ નવિ લખે. ૮૯

ચોરે તિમ રાજન અનુચરે, દુષ્ટ પ્રમાદ તુજ ગુણધન હરે;
ન લખે કાં લુંટાતું ફરે. .....(?) ૯૦

મૃત્યુથકી રાખ્યો નહીં કોઇ, રોગભીતિ ન ગમાડી જોઇ;
ન કર્યો સુખિયો ધરમે જગત્, તો સ્યો ગુણમદ પ્રભુતા કરત. ૯૧

કર્યો કષાય નિવારવા, એ સપ્તમ અધિકાર;
શાસ્ત્રહ આગમ આસરી, ઉપદેશ વેહવાર. ॥

**-: इति सप्तमः कषायनिग्रहाधिकारः :-**

વહે હિયે તુજ સિલા સમાન, આગમ રસ નવિ પેસે કાંન;
જે ઈહ નવી જીવદયાલીન, થયો નહી ધ્રમ[1] ભુવન અધીન. ૯૨

---

૧. ધર્મ.

જસ પ્રમાદ ન ગયો આગમે, સુણવે કિમ તે શિવસુખ પમે ?
રસાયને ન ગયાં જસ રોગ, નિહુચે[1] દુર્લભ જીવિત ભોગ. ૯૩

ભણણહારનો આગમ વૃથા, મૂકી નહીં[2] પ્રમાદહ કથા;
પડતા દીપક નહિ પતંગ, આખ્યાનો તિંહાં સ્યો ગુણ તંગ ? ૯૪

હરખે તરક વાદ જય કેઈ, કવ્યાદિક રચનાયે કેઈ;
જ્યોતિષ નિમિત્તશાસ્ત્ર બહુ પરે, તે સહુ મૂરખ જડગુણ ધરે. ૯૫

હરકે સ્યું પંડિતને નામ, ક્ષયોપશમ જનરંજક પામ;
કાંઈક ભણ એહવું જિણ થાય, જીઉ તાહરું વાધે ગુણમાંય. ૯૬

ધિગ ભણવે જિણ રંજે લોક, ન ધરે પરહિત સંયમ થોક;
નિકેવલ ઉદરંભર થયો, ભણવો ગયો, સંયમ વળી ગયો. ૯૭

ધન તે ન ભણ્યા પિણ[3] શુભકૃત્ય, શુદ્ધાશય શુદ્ધ વચનાધિત્ય;
જે આગમપાઠી આલસૂ, ઈહ પરહિત ન કરે ક્રમવસૂ. ૯૮

ધન તે મુગધ કથિત જિનમાગ, રાગે લ્યે સંયમ મહાભાગ;
સ્યું ભણીયે વ્યસની કલેસિયે, જે દુક્રિય પરમાદી થિયે. ૯૯

અક્રિય ભણવે ફલ નહિ તંત, સુખને વાંછે જીઉં ભવપ્રત;
ક્રિયા સહિત ન ભણે ફલ તેમ, ખર ન લહે ચંદન શ્રમ જેમ. ૧૦૦

[4]આગમ ઉપદેશે કરી, ભાખ્યું એ અધિકાર;
હિવ ચૌગતિ ઉપદેશ ગત, લિખું નવમ અધિકાર.

મૃત્યુ હુવે જસ અણુ દુરગંધ, સાગર પિણ ખૂટે અનુબંધ;
કઠિન ફરસ કરવતથી ઘણો, દુઃખ અનંત શીત તપ તણો. ૧૦૧

દેવતાકૃત તીવર[5] વેદના, કંદ પુકાર નિરંતર ઘના;
ભાવી નરકે ન બિહે કાંઈ, કુમતિ જે હરખે વિષયાંઈ. ૧૦૨

---

૧. જરૂર, નિશ્ચયે. ૨. પ્રમાદની. ૩. પણ. ૪. શ્રી રંગવિજય અહીં આઠમો અધિકાર પૂર્ણ કરે છે. શ્રી ધનવિજયગણિ ૧૦૭ મા શ્લોકે તે પૂરો કરે છે. ૫. તીવ્ર,

બંધ વહન તાડન છે સદા, ભૂખ તૃષા દુષ્ટ વ્રણ કદા;
શીત તાપ નિજ પર ભય બહુ, તિર્યંગ ગતિ દારુણ દુઃખ સહુ. ૧૦૩

વૃથા દાસપમ અભિભવ દોષ, ગર્ભસ્થિતિ દુર્ગતિ ભય પોષ;
એહવા દેવગતે પિણ અસુખ, સુખ તે પિણ પરિણામે દુઃખ. ૧૦૪

ઇષ્ટવિરહ અભિભવ ભય સાત, રોગ શોગ દુઃખ દે નિજ જાત;
નિહચે[1] એહ મનુષગતિ વિરસ, ચિદાનંદ ગુણ સધીય સરસ. ૧૦૫

એ ચૌ ગતિ દુખિણી જિય જાણી, અનંત કાળનો અતિ ભય આણી;
જિન પ્રવચન ભાવી નિજ હીયે, કરી તિમ જિમ એ તુજ નવિ લિયે. ૧૦૬

આતમ છે તૂં અતિ સાહસી, સુણિ ભાવી ચઉગતિ દુઃખ કસી;
દેખી પિણ[2] ન બીહે બહુ પરે, તસ વિચ્છેદ ઉદ્યમ નવિ કરે. ૧૦૭

**-: इति इष्टमो चतुर्गत्याश्रित्योपदेशान्तरगतः शास्त्रगुणाख्याधिकारः :-**

કુકરમ જાલે ગુણ કુવિલપ, તુજ બાંધી નરકાગતિ તલપ;
મછની પરે પચાસ્યે[3] મન્ન, માછીગર જીઉ, વિસસ ન ધન્ન. ૧૦૮

સુણી મન તૂં મુજ ચિરતન મીત, કાં કુવિકલ્પે દ્યે ભવભીત ?
કર જોડ્યાં હિવ[4] ભજ સતત કલપ, સફલ મિત્રાઈ કરી સવિ કલપ. ૧૦૯

શિવસુખ નર કર બિઘડી માંહ, આપે વશ્ય અવશ્ય થઈ આંહ;
પ્રયતન કરી સદા જીવને, વશ હુઇ મન હું કહું ઇમ તને. ૧૧૦

સુખદુઃખ નવિ દ્યે કોઈ દેવ, કાળ મિત્ર તિમ અરિ નિતમેવ;
એ મન હુવે સકલ જીવને, બહુ સંસાર ભમાવણ મને. ૧૧૧

આતમ એ મન વશ જસ થયો, કામ કિસું યસ નિયમે ભર્યો;
કુવિકલપ જસ મન થિર નહિ, યમ નિયમાદિ કરે સ્યું ગ્રહી ? ૧૧૨

અરચા તપ શ્રુત દત ને ધ્યાન, નિફલ વિણ જીતે મન માન;
કષાય ચિંતા વિણ મન રહે, અધિકો યોગ ભોગગુણ લહે. ૧૧૩

---

૧. નિશ્ચયે. ૨. પણ. ૩. રાંધશે. ૪. હવે.

જપ શિવ ન દ્યે ન દ્યે શિવ તપ, સંયમ દમ નવિ માન તરૂ;
પવનાદિક સાધન સવિ વૃથા, મન વશ કર્યે સર્વ ફલ તથા. ૧૧૪

લાભી સકલ ધરમ જિન કહ્યો, વાહન સમ છોડી જે વહ્યો;
મનપિશાચ ગહિલો તે ઈહાં, મૂરખ પડે ભવોદધિ જિહાં. ૧૧૫

હાહા મન દુર્જયી અમિત્ર, કરે વચન કાયા રિપુ સત્ર;
તીને રિપે હણાણો જીવ, વહે વહે આપદા સદીવ. ૧૧૬

મન દુસમણ સ્યો મુઝ અપરાધ, નાખે જિણે દુરગતે અગાધ;
લખે ઈમ મુઝ છોહી શિવ જશ્યે, તોહી તુઝ પદ અસંખ હશ્યે. ૧૧૭

કાનકુહી કુતરીની પરે, સભાવિષ્ટ કુષ્ટી અનુસરે;
શ્વપચ પરે સદ્‌ગતિ મંદિરે, મનહત પ્રાણી પેસરણ કરે. ૧૧૮

તપજપ પ્રમુખ સફલ નહીં ધરમ, કુવિકલ્પે તહ ચિત્ત મરમ;
ભર્યો ખાનપાને પિણ ગેહ, ભૂખ તૃષા સહે રોગી દેહ. ૧૧૯

કષ્ટરહિત સાધ્યું મન વસે, અધિક પુણ્ય ઉપાર્જન લસે;
વંચાણું મનવશ વિણ પુન્ય, હત તત્ ફલ સૌ થઈ અધન્ય. ૧૨૦

વિણ કુવિકલ્પે નિઃકારણે, શાસ્ત્રી ભણીય હણ્યું મન ઘણે;
પાપી તે બાંધી નરકાયુ ગઈ, નિહચઈ[1] મરી નરકહી જઈ. ૧૨૧

જો ગહે તતે[2] ચિત્ત સમાધિ, યોગ નિદાન અધિક તપ સાધી;
શિવસુખ વેલી તણો તપમૂળ, તિણ ભજીયે સમાધિ કૂલ. ૧૨૨

સઝાયે જોગે તિમ ચરણ, ક્રિયા વ્યાપારે ભારન કરણ;
પંડિત મન રુંધઈ સત અસત, પ્રવૃત્તિ ત્રિયોગી મેલી તત. ૧૨૩

મનવચનમાં ભારન પરીણામ, સિંહ સમાન રહ્યાં તિણ ઠામ;
દુષ્ટ ધ્યાન શુકલ જાગતાં, નવિ પેસે ભાવન તાકતાં. ૧૨૪

---

૧. નિશ્ચયે, જરૂર. ૨. તત્ત્વે,

એ સદ્‌ગુરુ ઉપદેશમય, લીખ્યો નવમ અધિકાર;
હિવ ભાખે વૈરાગમે, શ્રી મુનિસુંદર સાર. ॥

**-: ઇતિ નવમશ્ચિત્તદમનાધિકારઃ :-**

શું જીઉ મદે હસે જે અરથ, વાંછી કામ ખેલે શું નિરર્થ;
ઘોર નરક ખાડે પેસવા, ઇચ્છી લખે ન રતિ રક્ષહવા[૧]. ૧૨૫

તુઝ લવાદિ કુહાડા [૨]ઘાઉ, છેદે નહિ જિવિત તરુ [૩]જાઉ;
તાઉ જીઉ યતના કરી તિણે, છેધે કિહાં લખવું ગિણે ? ૧૨૬

તું મૂરખ, જ્ઞાની, તું જીવ, અવંછક વંછક સુખ દુઃખ નીવ;
દાતા ભોક્તા તું તેહનો, ઉજમે કાં નહી હેતમાં ઘનો ? ૧૨૭

કુણ તુઝ જીઉ ચિર જનરંજને, ગુણ પરમારથ લખ તું મને;
રંજ વિશદ ચરિતે ભવસમુદ્ર, પડતાં તુઝને પાલણ મુદ્ર. ૧૨૮

પંડિત હું, રાજા હું વળી, દાતા અદ્‌ભૂત ગુણીઓ બળી;
વાંછે એ મદથી પરિતોષ, ન લખે કાં પરભવ લઘુ પોષ. ૧૨૯

સાધન બાધન જાણે સરવ, [૪]ધ્રમના લખે નિજવશ ધરવ;
ઇહ પરભવ જીઉ કરિ તે યતન, લખે નહીં કન ભુગતે તન. ૧૩૦

ધ્રમ અવસર લહ્યો બહુ પુદ્‌ગલે, અનંત દુઃખ સહતાં જીઉ દલે;
વલી તુઝ દુરલભ જિન ધ્રમ ઇમ, આદરવા વિણ દુઃખક્ષય કિમ. ૧૩૧

ગુણથુતિ વાંછે, વલી નિર્ગુણી, વિણુ પુણ્યે વાંછે સુખ ચુણી;
અષ્ટ યોગ વિણ વાંછે સિદ્ધિ, નવો વાયુ તુઝ આતમબુદ્ધિ. ૧૩૨

પડા પગપર અભિભવ જીઉ દેખી, ઇરષે કાં તેથી સવિશેષ;
અપુણ્ય આતમ ન લખે કાંઇ, વિસ્તારે કાં જીઉ અઘ ઠાંઇ ! ૧૩૩

કાં પીડી નિરદય લઘુ જીવ, વાંછે પ્રમોદથી કમનીવ;
એક વાર પીડે એક જંત, તે તઉ પીડે વાર અનંત. ૧૩૪

---

૧. બચાવવા, રક્ષવા ૨. ઘાત, ઘા ૩. જ્યાં સુધીમાં. ૪. ધર્મના.

રહ્યો મૃત્યુમુખ પિણ જિમ ભેક[1], ભક્ષણ કરે જંતુ નિચ્છેક;
તિમ તું પણ મૃતિ મુહમેં રહ્યો, જીઉ પીડે સ્યું જીવ ઉમહ્યો. ૧૩૫

આપણપૌ તું વંચી ઈહાં, કલ્પી થોડું સુખભર જિહાં;
વરતે છે સ્યું જીઉ પરભવે, નરક દુઃખ સાગર નહીં વહે. ૧૩૬

અજ કોડીને પાણી બિંદ, અંબ વણિકત્રય ભિક્ષુક રૂંદ;
ઈણ પરિ હાર્યું મનુષ્યજનમ, શોચસ પરમાદે દુખ ગરમ. ૧૩૭

મૃગ ભમરઉ પંખી ને મીન, હાથી પ્રમુખ પ્રમાદે લીન;
શોચે જિમ નિજ દુઃખ મૃતિ બંધ, ન લખે તું ચિરભાવી અંધ. ૧૩૮

પડ્યો દુઃકે કરી પહેલાં પાપ, વળી મૂરખ તસ કરે કલાપ;
પડતો અતિ કર્દમ જલપૂર, માથે શિલા ધરે થઈ સૂર. ૧૩૯

વાર વાર તુઝ કહીયે જીવ, બીહે દુઃખે ગહે સુખનીવ;
તો તું કર હવે વાંછિત કાંઈ, સમજ સમજ એ અવસર જાઈ. ૧૪૦

ધન શરીર સુખ બંધવ પ્રાણ, છોડી છોડી લ્યે જિનધ્રમ સાણ;
હવે ધરમે વાંછવા ભવભવે, પિણ[2] વળી ઈણે દુલ્લભ ધ્રમ હવે. ૧૪૧

જિમ દુઃખ બહુ સહે અકામ, કરી કરુણાએ સહીસ કામ;
થોડે સકામ પણ પરભવે, સુખ અત્યંત ઘણા દુઃખ જવે. ૧૪૨

ધીઠો રહે પાપ ક્રમ [3]વિશે, સુખ વાંછે સુવિનાશ ન લખે;
ચિંતવતો તે સુખ વિણસતે, બીહે કાં નહી દુરગતિ લતે. ૧૪૩

કર્મ કરે રે જિય તું તેહ, હુસ્યે અત્યંત વિપદ[4] તિણ રેહ;
તેહનું બીહ ધરે નહીં [5]હિયે, જિહાં અત્યાકુલતા ભાવીયે. ૧૪૪

પાલ્યાં જે સંઘાતે વધ્યા, નેહાલુ થાનકમાં સધ્યા;
તે પિણ યમે ગ્રહ્યા નિરદયી, લખિ પિણ કાં હિત ન કરે અઈ. ૧૪૫

---

૧. દેડકો. ૨. પણ. ૩. માં, વિષે. ૪. આપદા. ૫. હૈયે.

ધન બંધવ સુત જસ ચીંતવ્યે, જિણે કલેશ પામ્યે તું હવ્યે;
કુણ ગુણ તસ ઈહ પરભવમાંહ, આયું કિતો જિણ વિલપે તાંહ. ૧૪૬

સ્યું મુંઝે ગતરૂપે ભિન્ન, સકલ પરિગ્રહ બંધવતન્ન;
શોચી નિજહિતકારી યોગ, પરભવપથિ કરી અવસર ભોગ. ૧૪૭

સુખસું બેસે સુખસું સુવે, જીમે, રમે, ખેલે, વળી જુવે;
નવિ જાણે આગળી ભ્રમ વિના, સ્યું હુઈસ્યે આતમ તુંજના[1]. ૧૪૮

શીત તાપ માખી તૃણ ફરસ, લિગરેક કષ્ટે ઝમકે નિરસ;
તિણથી ઈણ કરમે બહુ મેલ, ન લહે નરકવેદના હેલ. ૧૪૯

ક્રોધે કિહાં, પ્રમાદે કિહાં, કદાગ્રહે કિહાં, મદસું કિહાં;
મલિન કરે આતમને જીવ, ધિગ તુઝ ન ડરે નરક હરીવ. ૧૫૦

વૈરાગે ભવિ બુઝવા, કર્યો દસમ અધિકાર;
હવે શુદ્ધ ધરમતણો, લિખું કહ્યો તિમ સાર. ॥

**-: ઇતિ દશમો વૈરાગ્યાધિકારઃ :-**

રે જીવ ધરમે હવે ભવનાશ, મેલું કરે મૂરખ કાં તાસ;
મદ મત્સર [2]માયાયઈ કરી, ઓસડ [3]મિલ્યું ન હવે ગુણ પરી. ૧૫૧

શિથિલાઈ હઠ મત્સર ક્રોધ, પશ્ચાતાપ કપટ છલ રોધ;
કુગુરુ કુસંગતિ, માન પ્રમાદ, સુકૃત મલિનકરણ ઈણવાદ. ૧૫૨

વલ્લભ જિમ તુઝ તિણ ગુણશંસ, મત્સરી ધરિ તિમ પર પરશંસ;
નિજ પ્રશંસ પરને નવિ વહે, ઈષ્ટ દાન, વિણ કિમ તે લહે ? ૧૫૩

જિન ગુણ લેતાં હરખે ઘણું, પરભવ તિણગુણ રહિતપણું;
લેતાં દોષ ધરે નહીં તાપ, તો પરભવ ગુણ થિરતા વ્યાપ. ૧૫૪

હરખે નિજ ગુણ પરિ પરક, તિમ જો વૈરી ઉપરી વહ્યે;
નિજ ગર્હાયે જિમ ઉપતાપ, તિમ રિપુને જાણ્યા ગુણ ચાપ. ૧૫૫

---

૧. તને. ૨. માયાએ. ૩. મિશ્ર કહેલું.

જમ નિજ ગર્હા તવના પણે, આતમ તાપ હરખ તું જણે;
તિમ પરને ચિંતવિ ચિહુ વિષે, ઉદાસથી હુવે વેત્તા પખે. ૧૫૬

સ્તવવાથી ન હુવે કો ગુણી, પરભવ હિત નહીં ખ્યાતે ઘણી;
એ અપગુણ ઉત્તર જાણતો, વૃથા માનગહિલો કાં હતો ? ૧૫૭

કુણ કુણ ન કરે જન બહિમુખી, પ્રમાદ મત્સર કુબોધ મુખી;
મેલું એ દાનાદિક ધરમ, અણુ પિણ કર સુધ સુકૃત કરમ. ૧૫૮

છાનું પુન્ય ધરે જિમ શોભ, પરગટ કરતાં તિમ નહીં થોભ;
લાજ સહિત જિમ મહિલાતણા, વસ્ત્ર છન્ન ઉરથલ ગુણ ઘણા. ૧૫૯

સુકૃત ગુણ સુણવે દેખવે, આતમ તુઝ કોઇ ગુણ નહીં હવે;
ફલે નહીં ધરતીથી પ્રગટ, મૂળ કર્યાં તરુ પડે નિપટ. ૧૬૦

તપકિરિયા દાને પૂજણે, શિવ ન જાઉ ગુણમત્સરપણે;
અપથ્ય કર્યે ન હુવે નિરોગ, રસાયને પિણ આતુર[૧] લોગ. ૧૬૧

મંતર [૨]યંતર રતન પ્રમુખ, થોડા પિણ શુદ્ધ તો ફલ મુખ;
દાન પૂજ પોસહ ગુણ કરે, શુદ્ધપણે, [૩]ઈમથાં ગિરપરે. ૧૬૨

દીવો નાન્હો જિમ તમ હણે, અમૃત લવ પિણ રૂજને લણે;
અગની કણ પિણ દહે તૃણ રાશ, ધર્મલેશ તિમ હવે ભવનાશ. ૧૬૩

વિના ભાવ ઉપયોગે કરી, આવશ્યક કિરિયા આદરી;
દેહ કષ્ટ, ફલ ન લહે કાંઈ, આતમ લખિ કરી ભાવ મિલાઈ. ૧૬૪

શુદ્ધ ધરમ ઉપદેશ એ, ભાખ્યું ઈણ અધિકાર;
દેવ ધરમ ગુરુ જાણવા, સુણ દ્વાદશમ વિચાર. ॥

**-: इत्येकादशमो धर्मशुद्ध्यधिकारः :-**

સરવ તત્ત્વમાં ગુરુ પરધાન, જે ભાખે હત ધરમ નિદાન;
અણપરખી તેહને આસરે, મૂરખ ભ્રમ [૪]નિફલહી કરે. ૧૬૫

૧. માંદો. ૨. યંત્ર. ૩. અશુદ્ધ. ૪. નિષ્ફળ.

અવિધ ધરમથી પ્રાણી અહીં, શિવ ન લહે, જસ ગુરુ શુદ્ધ નહીં;
રોગ ન જાય રસાયન કરી, અજાણ વૈદ બતાયે જરી. ૧૬૬

તારક બુદ્ધે જે આસર્યો, જેહને, તેહ બૂડવા પડ્યો;
તરે તેહ કેમ વિષમ પ્રવાહ, કુગુરુ પસાય પડે ભવમાંહ. ૧૬૭

ગજ રથ વાહન વૃષભ તુરગ, પદાતિ[૧] રાખે નિજ પર મગ;
પંડિત તિમ સેવે શિવ ભણી, શુધ ગુરુદેવ ધરમ ગુણધણી. ૧૬૮

કુગુરુ કહ્યે કૃત ધરમઉદમ[૨], ફલે રહિત હવે એહ મરમ;
મૂકી દૃષ્ટિરાગ તે ભવિક, ગુરુ શુદ્ધ કરે હિતાર્થી હુઇક. ૧૬૯

મૂક્યા શિવપથ વાહણ[૩] ભણી, શ્રી મહાવીરે જે ગુણધણી;
લૂંટણહારા તેહ જ થયા, કલિયુગમાં તુઝ શાસન મયા. ॥

રાખી તેહ યતીનું નામ, મુસે[૪] ધરમધન જનનું આમ;
નીરાજકે[૫] પુકારું કિસું, કોટવાલ નવિ ચોરાં જિસું. ૧૭૦

અશુદ્ધ દેવગુરુ ધરમે મદે, દૃષ્ટિરાગ ધિગ અઉગણ પદે;
શોચિસિ પરભવ તું તે ફલે, રોગી કુપથભક્ષ્યે જિમ કલે. ૧૭૧

સીંચ્યો નીંબ અંબફલ ન દ્યે, [૬]વાંઝ ગાય દ્યે દૂધ ન વદ્ય;
નાપે ધન દુષ્ટ નૃપસેવ, નાપે કુગુરુ ધરમ શિલમેવ. ૧૭૨

કુલ વળી જાતિ પિતા ને માત, વિદ્યાબંધવ ગુરુ નિજ જાત;
ન હુવે જિયને કો હિતભણી, સુખ આપે ગુરુસુર ધ્રમ ધણી. ૧૭૩

તત્વે માત પિતા ગુરુ જેહ, બોધી જોડે શુદ્ધ ધ્રમ જેહ;
નાંખે ભવમાં તે સમ કોઇ, વૈરી નહી રહે ધ્રમ લોઇ. ૧૭૪

દેવ પૂજ ગુરુસેવા લાજ, પિતર ભગતિ ને સુકૃત સાજ;
વ્યવહાર શુદ્ધ ને પરઉપકાર, ઇહ પરભવ જીઉ સંપદકાર. ૧૭૫

---

૧. પાયદળ લશ્કર. ૨. ઉદ્યમ. ૩. લઈ જવા. ૪. ચોરે. ૫. ધણીધોરી વગરનું રાજ્ય. ૬. વાંઝણી, વંધ્યા.

જિન અભગતિ મુનિની [1]અવગન્યા, કર્મ અયોગ્ય અધરમ દ્વન્યા;
પરવંચન માબાપ અવગણન, કરે પુરુષને વિપદા મલિન. ૧૭૬

ભગતે પૂજિસ નહી જિન સુણી, ભણી ગુરુધ્રમ મકરિશિ વિરમણી;
સનિમિત્ત અનિમિત્ત મેલી પાપ, કિણ હેતે વાંછે શિવમાપ. ૧૭૭

ચઉપદ જાતે સિંહ જિમ ભિલ્યો, કોઇ સુગુરુ તારે મુઝ મિલ્યો;
કોઇક તે બોળે ભવકૂપ, શ્યાલ સમાન અણમિલ્યો ભૂપ. ૧૭૮

ભર્યે તલાવે [2]તીસીયો સદા, ભૂખ્યો મૂઢ ભર્યે ઘર તદા;
દરિદ્રી તે કલ્પદ્રુમ છતે, જે પ્રમાદી ગુરુયોગ હતે. ૧૭૯

ન ધરમચિંત ન ગુરુદેવ ભગત, વૈરાગ્ય લેવા નહીં જસ ચિત્ત;
તેહનો જનમ પશુની પરે, નિષ્ફળરૂપ થયો બહુપરે. ૧૮૦

ન દેવકામ ન સંઘકામ, જસ ધન ખરચાણો નહીં આમ;
તસ ધન ઉપાર્જવે ભવકૂપે, પડતાં સ્યું આલંબણ હુયે. ૧૮૧

કહ્યો દેવગુરુ ધર્મમય, દ્વાદશમો અધિકાર;
હિવ[3] મુનીપર શિષ્યાપણે, લિખું યથા અચાર. ॥

**-: ઇતિ દ્વાદશમો ગુરુશુદ્ધ્યધિકારઃ :-**

ભવભયવારક મુનિવર નમું, જસ મન વિષય કષાયે ગમું;
રાગદ્વેષ રહિત પરિણામ, રમે ભાવન સંજમને ઠામ. ૧૮૨

પરમાદે ન કરિસિ[3] સિઝાય, સમિતિ ગુપ્તિ ન ધરીસ ચિત્તલાય;
શરીરમોહે ન [4]કરિસિ તપ, કરિસ કષાય બાંધિસ તો અપ. ૧૮૩

પરીસહ ન સહિસ તિમ ઉપસર્ગ, ધરીશ નહીં શીલંગ રથવર્ગ;
તો મુંકાતો પિણ ભવપાર, મુનિ કિમ [5]તુરિસ વેષે ધાર. ૧૮૪

આજીવિકાયે એ જે વેષ, ધરે ચરિત્ર ન પાલે લેશ;
લખિતો ન બીહે લેત જગત, મૃત્યુ નરક, વેષે ન લહત. ૧૮૫

---

૧. અવજ્ઞા, અવગણના ૨. તરસ્યો. ૩. હવે. ૪. કરીશ. ૫. તરીશ.

ચરણ વિના યતિ વેષે મદે, જીય વાંછે પૂજોપધિ હૃદે;
વંચી મુગધ નરકભવ જઈશ, અજગલ પાલી ન્યાય વહીશ. ૧૮૬

આતમ ન થયો સંયમતપે, પ્રતિગ્રહ ભાર મૂલ પિણ કપે;
સ્યું તુઝ દુરગતિ પડતાં શરણ, જીઉ થાશે પરભવ તુઝ કવણ. ૧૮૭

સ્યું જન સત્કારે પૂજણે, અરે મુગ્ધ ! તુસે વિણ ગુણે;
બોધિબીજ તરુને એ પરશુ, પ્રમાદરૂપ ભવમાંહિ કરશું. ૧૮૮

નમે ભવિક તુઝ ગુણ આસરી, આપે ઉપધિ વસતિ બહુપરી;
વેષ ધરી મુનિ તું ગુણ વિના, ઠગની ગતિ ભાવી તુઝ મના. ૧૮૯

ખાવણ પીવણની નહિ ચિંત, ન રાજભય જાણે સિદ્ધંત;
તો પિણ શુદ્ધ ચરણમેં યતન, ન કરે મુનિ, તો નરકમાં પતન. ૧૯૦

શાસ્ત્ર જાણ પિણ લેઈ વિરતિ, ન રહે સ્ત્રીસુત બંધે રહિત;
પ્રાણી તિણે પ્રમાદે કરી, લુંટાઇ પરભવ નિજ સિરી. ૧૯૧

ન કરું હું ઈમ નિત્ય ઉચરે, સાવદ્ય સરવ તેહ વલિ કરે;
નિત[1] જૂઠે વચને મન રંજિ, પાપે જાણ નરકગતિ ગંજિ. ૧૯૨

વેષે તુઝ આપે એ લોક, ઉપદેશે વંચ્યા બહુ થોક;
સુયે સુખે રહે ભોગવે, જાણીશ તે ફલ તું પરભવે. ૧૯૩

આજીવિકા પ્રમુખ દુઃખભર્યા, કષ્ટે કેઇ રહે શ્રમ વર્યા;
તેથી પિણ નિરદય તું ઈષ્ટ, વાંછે પિણ[2] નહીં નિયમ વિશિષ્ટ. ૧૯૪

પોતે તરતો સે ગુણવંત, આરાધ્યો તારે ભવિજંત;
તુઝ નિગુણને જે આસરે, કેહવું છેહ ભગતિફલ વરે. ૧૯૫

નિજ પરમાદે પોતે પડે, તે કિમ તારે પરને તડે;
નિજકાજે ભવિને વંચતો, નિજપર પાપે ખાયે ખતો. ૧૯૬

---

૧. નિત્ય, દરરોજ. ૨. પણ.

લ્યે શય્યા પુસ્તક આહાર, પર પાસે એ તપ આચાર;
પ્રમાદથી પરભવ મેં કિસી, ઋણ ઋણીયાની તુઝ ગતિ થશી. ૧૯૭

મુનિવર મુજઝ નહીં કા સિદ્ધિ, કિરિયા તપયોગે ગુણબુદ્ધિ;
તો પિણ તું કાં માને ભર્યો, સ્તુતિ વાંછે સ્યું દુઃખે પર્યો. ૧૯૮

નિર્ભાગી આતમ ગુણહીન સ્તુતિ વાંછે અણહુંતઈ દીણ;
રીસી[૧] પરથી લાભે તાપ, ઈહભવ પરભવ કુગતિ પાપ. ૧૯૯

ગુણહીણો જન નમનાદિકે, સુખ વાંછે હરખભર થકે;
મહિષ વૃષભ ખર જનમની પરે, ગુણ વિણ તુંઝ તિણ મૂલ ન સરે. ૨૦૦

મુનિ જો ઉજ્જમે ગુણ વિષે, વંદન સેવ કરાવે મિષે;
નંદાઈસ પરભવ ગતિ ગયો, હસી તિણે તું અભિભવ લયો. ૨૦૧

દાન માન થુતિ વંદન કર્યે, હરખે માયા રંજે પર્યે;
નવિ જાણે જો સુકૃત નામ, કુણ તું તિણ લૂટ્યો તુઝ ગામ ? ૨૦૨

મુગધ કહ્યે ન હુવે તું ગુણી, કર્યે દાન પૂજાવિધિ ઘણી;
ગુણવિણ ન હુવે તુઝ [૨]ભવનાસ, સ્યું સ્તવનાયે લ્યે ગુણગ્રાસ. ૨૦૩

ભણી શાસ્ત્ર સત્ અસત્ વિચિત્ર, આલાપે માયાયે તત્ર;
જે જનને રંજે ઈહભવે, કુણ તે તું કુણ મુનિ પરભવે. ૨૦૪

ઘર પરમુખ પરિગ્રહ મુનિ છાંડી, ધર્મોપગરણ છલ તે માંડી;
કરે શય્યાદિક ઉપગ્રહપણે, નિશ્ચે વિષનામાંતર જણે. ૨૦૫

કરે ધરમ સાધન પરિગ્રહે, તુસે નામે મુરખ કિહે;
નવિ જાણે સોનાને ભાર, નાવ ન બૂડે [૩]પારાવાર. ૨૦૬

પાપકષાય કરમ ભાજને, મુનિ હુવે પિણ ઈહાં ધ્રમસાધને;
રસાયને પિણ સુખ તેહને, ન હુવે અસાધ્ય રૂજ જેહને. ૨૦૭

જિને કહ્યા મુનિ સંયમરખા જે તે વસ્ત્ર [૪]પાતર પરમુખા;
મોહ્યા તેણે હવે ભવપીડવે, નિજશસ્ત્રે રિયે નહ દુખ હવે. ૨૦૮

૧. રીસ, ઈર્ષા. ૨. સંસારનો નાશ, અંત. ૩. દરિયે. ૪. પાત્ર.

સંયમ છલથી પર અભિભવે, ત્યારે પુસ્તક પ્રમુખે રવે;
વૃષભ ઉંટ મહિષાદિક રૂપ, ધરી વહિસ તું ભાર અનૂપ. ૨૦૯

વસ્ત્ર પાત્ર તનુ પુસ્તક લોભ, કરવે ન હવે સંયમસોભ;
લોભે પડવું ભવનિધિમાંહિ, સંયમ શોભે શિવગતિ છાંહિ. ॥

એક વસ્ત્ર પાત્રાદિક શોભ, બીજા સંયમપાલણ શોભ;
પહેલી ભવ દે, બીજી મુગતિ, શુદ્ધ જાણી તું એકજ ગ્રહતિ. ૨૧૦

શીત તપાદિક થોડું લહે, તે પિ પરીસહ તું નવિ સહે;
તો કિમ નરક ગરભ દુખખાણ, સહીસ ભવાંતરી કેમ અજાણ ? ૨૧૧

મુનિ સ્યું વિણસિત વપુ મૃત્પિંડ, પીડી ઘાલી તપ વિરતિ કરંડ;
જાણે જો ભવભય દુખરાશ, તો આતમ કર શિવસુખવાસ. ૨૧૨

ઈહાં કષ્ટ જે ચારિત વિષે, પરભવ તિરયગ નારગ શિખે;
સપ્રતિપક્ષપણું બે માંહિ, વિશેષ નિજરે લ્યે ઈક ચાહિ. ૨૧૩

પ્રમાદ સુખ તે ઈહાં બિંદનો, દિવ શિવસુખ પરભવ સમુદનો;
એ બેમાં પખ લેવા વૈર, વિશેષ નિજરે ઈક લ્યે સૈર. ૨૧૪

પરવશતા ચારિત્રમાં ઈહાં, તિર્યગ સ્ત્રી ગ્રભ[1] નરકસુ કિહાં;
તેમાં વૈર પખાપખ ભાવ, વિશેષ જાણી લ્યે ઈક દાવ. ૨૧૫

સહિ તપ સંયમ પરવશપણો, નિજ વસ સહિવે હુવે ગુણ ઘણો;
પરવશ અતિ દુખ સહિવે કિમો, તુઝ ગુણ થાસ્યે ચીંતવિ ઈસો. ૨૧૬

થોડે સમતા પરવશગુણે, મુનિ જે કષ્ટે ઘાતે ઈણે;
જો ક્ષય હુવે દુર્ગતિ ગ્રભવાસ, તો કિમ તું વાંછે નહી તાસ. ૨૧૭

તજ વાંછા દિવ શિવસુખતણી, નરકાદિક દુઃખ લખ તિમ સુણી;
સુખ થોડે વિષયાદિકતણે, સંતોષાઈસ માં દુઃખ ઘણે. ૨૧૮

સહુ ચિંતા નાઠે જે ઈહાં, રાગીને સુખ હવે પિણ કિહાં ?
પરભવ શિવસુખ લેખે પડે, સ્યું તો પ્રમદે ચારિતતડે. ૨૧૯

---

૧. ગર્ભ.

અતિતપ ધ્યાન પરીસહ જેહ, ન સધે જો અસમર્થે તેહ;
તો સ્યું સુમતિ ગુપતિ ભાવના, ન ધારે જીવ શિવારથમના. ૨૨૦

અનિત્ય પ્રમુખ ભાવન નિતમેવ, યતતો સંયમ ગ્રહિ નિતમેવ;
આયુસ યમ આવે સુ નજીક, પ્રમદે કાં ન લહે ભવભીક ? ૨૨૧

તુઝ મન હણ્યું કુવિકલપનાદ, પાપ વચનમેં શરીર પ્રમાદ;
તો પિણ લબધિ સિદ્ધિ વાંછતો, મનોરથે ભંગાણો મતો. ૨૨૨

તુઝ મન વશતો સુખ દુઃખ મેલ, મન મિલતે આતમ તહાં કેલ;
પ્રમાદ ચોરે મિલતો વાર, કરી સીલાંગ સજનની સાર. ૨૨૩

પ્રમાદથી ભવસમુદે તુઝ, પડવો વળી પરમત્સર ઝુઝ;
દીસે તેં ગલ બાંધી શિલા, જલપર આવવો તઉ [1]મુસકલા. ૨૨૪

મહાતપી કે સહે ઉદીર, ઉગ્ર તપાદિક નિર્જરા હીર;
થોડે કષ્ટ પ્રસંગે થયો, તે પિણ અણવાંછે મુનિ નયો. ૨૨૫

દાન માન નતિ પ્રમુખે જેહ, નવિ હરખે વિપરીતે તેહ;
લાભાલાભ પરીસહ સહી, યતી તે, બીજો વિટમહી. ૨૨૬

મમત્વ ધરતો શ્રાવક વિષે, તદીય તાપે તપીઓ થશે;
નિજ મન અણસંવરતો સદા, ભમણહાર ભવતાપે મુદા. ૨૨૭

નિજ ઘર છંડ્યું પરઘરચિંત, તામે કુણ ગુણ તાપ મહંત;
આજીવિકા વેષે તુજ ચલે, દુરગતિ કાં નવિ શોચે કલે. ૨૨૮

કરીશ ન પાપ ઈસું ભાખતો, કરતો પિણ દેહે લ્યે ખતો;
શય્યાદિકે પ્રેરતો લોગ, મન વચને સ્યો છે મુનિયોગ. ૨૨૯

કિસું મમત્વે મોટિમપણે, સાવદ્ય વંછવે પિણ નિજ જણે;
સોનામે પાલિ નવિ પેટ, મારી હણે પ્રાણને નેટ ? ૨૩૦

તજ પદવી કો ગુરુ પરસાદ, પામી વેષ ભણી ગ્રથનાદ;
મુખરાઈથી વશી કરી લોગ, લખે ઈંદ્ર પદ દુરગતિ જોગ. ૨૩૧

---

૧. મુશ્કેલ.

પામી પિણ ચારિત એ દુલભ[1], વિષય પ્રમાદ રચ્યો જયું કલભ;
ભવકૂપે પડતો તું મુનિ, અનંત કાળે લેસી દુઃખખની. ૨૩૨

કષ્ટે બોધિ રતન એ લહ્યો, યુગસમિલા દૃષ્ટાંતે ગહ્યો;
કરી કરી અંતરંગ રિપુ વશે, અણથાતો નિજ હિત જો કસે. ૨૩૩

દુસમણ એ તુઝ વિષય પ્રમાદ, અણગોપ્યા મનવચનદેહાદ;
એહ અસંયમ સતરે વલી, એથી બીહતો ચલિ[2] ક્રમગલી. ૨૩૪

પામી ગુરુ છંડી નિજ ગેહ, ભણી શાસ્ત્ર તતવાચક જેહ;
નિજ નિરવાહ ચિંતાથી ટલ્યો, તો મુનિ હિવ યતને કાં ગલ્યો. ૨૩૫

સંયમયોગ વિરાધનપણે, રહ્યો પડિસ ભવરાશે ઘણે;
શાસ્ત્ર શિષ્ય પુસ્તક ને ઉપધિ, નિજ જન નહીં કોઇ શરણે સમધિ. ૨૩૬

ક્ષણ પિણ જેહનો સુખ સુરભવે, પલ્ય કોડી બાણું ઉપજવે;
સાધિક કાં તો સંયમ હરે, અને પ્રમાદ થકો કાં ફરે. ૨૩૭

જન પૂજે જેહને નામ, શુદ્ધ મને હુવે અતિ સુખ ઠામ;
સંયમ વિષે [3]જીઉ કરિ યતન, જાણીએ ઉત્તમ ફળ રતન. ૨૩૮

વિરતિરૂપ અધિકાર એ, કહ્યો તેરમે થાન;
હિવ સંવર કરિવા ભણી, લિખીયે તાસ નિદાન.

**-: इति त्रयोदशो यतिशिक्षाधिकारः :-**

અવિરતિ યોગ પ્રમાદ મિથ્યાત, આતમ નિત સંવર કરી જાત;
ભવરૂપી એ અણસંવર્યા, મુગતિતણા સુખ દે સંવર્યા. ૨૩૯

મન સંવર કરી હે પંડિત, સ્યું ન લખે અણસંવર રીત;
તરત હિ જાયે તંદુલી મત્સ, સાતમી પૃથિવીમાં બીભત્સ. ૨૪૦

પ્રસન્નચંદ રાજઋષિ[4] જેહ, મન મોકળે સંવરવે તેહ;
નરકના દલ પિણ વલિ શિવદલ, ક્ષણ એકમાં મેલ્યા નિરમલ. ૨૪૧

---

૧. દુર્લભ. ૨. ચાલ. ૩. જીવ. ૪. રાજર્ષિ.

મન અણલાધે જે જોઈએ, ધ્યાન ન એકેંદ્રિયાદિથીએ;
ધરમ શુક્લમાં મન થિર કર્યું, મનસંવર તે તેણે વર્યું. ૨૪૨

સકારણ નિકારણ જેહ, મન શુભ ધ્યાને યંત્રી લેહ;
દુર્વિકલપથી વિરમ્યા યતી, પારંગામી તેહજ સતી. ૨૪૩

વચન અલાધે બહુલા જીવ, મૌન કરે નહિ કુણ કુણ કીવ;
નિરવદ્ય વચન અછે જેહમેં, વચન ગુપતિ તે કહી તેહમેં. ૨૪૪

આતમ કહી તું નિરવદ્ય વચન, સુણ સાવદ્ય વચને દુઃખવસન;
પામ્યા ઘણા નરક અતિ ઘોર, વસુરાજાદિ વચનના ચોર. ૨૪૫

દુર્વચને ઈહભવ હવે વૈર, પરભવ નરક તણી દુઃખ સૈર;
અગનિદગ્ધ[1] ઊગે વળી વૃક્ષ, નવિ જીવે કરી કુવચન પક્ષ. ૨૪૬

ભગવંત તે એહિજ કારણે, દીક્ષાથી જાં કેવળપણે;
ન હુવે તાં નવિ બોલે વચન, પાપ ડરે જ્ઞાનાદિક [2]છતન. ૨૪૭

કરુણાયે સંવર નિજ અંગ, [3]કુર્મા જ્ઞાત સુણીને ચંગ;
આશ્રવ સંવરથી જિમ તિણે, લાધ્યું સુખ દુઃખ તિમ નિજ ગિણે. ૨૪૮

કાય રૂંધવે કુણ કુણ નહિ, તરુ [4]થાંભાદિક નિજ ગુણ રહી;
કરે ક્રિયા જે શિવગતિ હેત, કાય ગુપત તે કહીયે ચેત. ૨૪૯

શ્રુત સંયમ આદરમાં રહી, શબ્દોને કુણ છોડે નહિ;
ઈષ્ટ અનિષ્ટપણે એ વિષે, રાગ દ્વેષ તજે મુનિ ઈષે. ૨૫૦

કે સંયમમાત્રે [5]આખિને, રૂપ પ્રતે ન તજે પ્રતિદિને;
ઈષ્ટ અનિષ્ટપણે એ વિષે, રાગ દ્વેષ તજે મુનિ ઈષે. ૨૫૧

નાસા સંયમમાત્રે કરી, કુણ કુણ ન તજે ગંધને ધરી;
ઈષ્ટ અનિષ્ટપણે એ વિષે, રાગ દ્વેષ તજે મુનિ ઈષે. ૨૫૨

---

૧. અગ્નિદગ્ધ-અગ્નિના બળેલ. ૨. છતાં. ૩. કાચબાં. ૪. થાંભલો, સ્તંભ. ૫. આંખોને.

જિહ્વા સંયમમાત્રે વળી, રસાંપ્રતે કુણ ન તજે રલી;
તજ મન સાથે ઇષ્ટ અનિષ્ટ, જો વંછે તું તપફલ શિષ્ટ. ૨૫૩

શરીર સંયમરૂપે ઇહાં, સ્પર્શ પ્રતે કુણ ન તજે કિહાં;
ઇષ્ટ અનિષ્ટપણે એ વિષે, રાગ દ્વેષ તજે મુનિ ઇષે. ૨૫૪

રે વપુ[1] સંયમમત્રે રલી, કુણ કુણ બ્રહ્મ ન જાણે વળી;
મન સંયમવે તું અવધાર, પંડિત જો તે ફલ મન ધાર. ૨૫૫

વિષય ઇંદ્રિય સંયોગ અભાવ, થકી ન કો સંયમનો દાવ;
રાગ દ્વેષ વિણ જસ મનયોગ, તે સંયમધારી મૃત્યુલોગ. ૨૫૬

સંવર પંડિત સરવ કષાય, જે સેવ્યેસુ નરકગતિ થાય;
પામ્યા મહાતપી પિણ ઇણે, કુરૂડ વુરુડ મુખ દુરગતિ તિણે. ૨૫૭

તપ યમ પ્રમુખ નહીં જેહને, અવિતથ વચને ન બોલે મને;
જેહને છે તપ નિયમસુ કાંઈ, તે ત્રિણ યોગ સંવરે આંઈ. ૨૫૮

થાતું સકલ સંવરને વિષે, શિવસંપદ કારણ જો રખે;
તજી કષાયાદિક કુવિકલપ, કરી મન સંવર તું બુધ જલપ. ૨૫૯

તે ઈમ આતમ હવે સંવરી, સદા સુખે સ્રવ સંગ પરિહરી;
નિઃસંગભાવપણે, સંવરે, તે બે શિવપદ યુગપદ વરે. ૨૬૦

સંવર ગુણ વિસ્તારતા, એ અવદમ અધિકાર;
શુભચલગતિમાંહે હિવઈ, લિખિશ વચન તે ધાર. ॥

**-: इति चतुर्दशो मिथ्यात्वनिरोधाधिकारः :-**

કરી જીઉ યતન આવશ્યક વિષે, જિનભાષિત શુદ્ધ તમપહશિષે;
ઓસડ ન હણે રોગ અશુદ્ધ, અણખાધો, વૈદે કહ્યો શુદ્ધ. ૨૬૧

તપ કરી દુહુ વિધિ જીવ નિતપ્રતે, મુખ કટુ પિણ ઉત્તર સુખ છતે;
કુકરમરાશિ પ્રતે તો હણે, જેમ રસાયણ રૂજને લણે. ૨૬૨

---

૧. શરીર.

ધરી શીલંગરથ સહસ વિશુદ્ધ, કરી યોગસિદ્ધિ નિરંતર બુદ્ધ;
નિરમમ પણ ઉપસર્ગ નિજ સહી, સુમતિ ગુપતિ ભજ નિશ્ચલ રહી. ૨૬૩

સઝાય યોગે કરી જીઉ યતન, આગમ ગ્રહી, જીઉ મધ્યમ મગન;
વિષાદ ગારવ પિણ લ્યે ભીખ, ઇંદ્રિય વશ કરી એ તુઝ શીખ. ૨૬૪

દે પ્રમાર્થે પ્રમ ઉપદેશ, ન ધરી નિજપરભાવ વિશેષ;
જગ હિતુયે નવ કલ્પાચાર, ગામ પુરે ચલી પ્રમાદ વાર. ૨૬૫

કૃત અકૃત નિજ તપ જપ પ્રમુખ, શક્તિ અશક્તિ સુકૃત અઘદુઃખ;
સહુ વિચારીને નિજ હૃદે, હેય ઉપાદેય વળી કરી જૂદે. ૨૬૬

પરની પીડાને [1]વરજવે, ત્રિવિધ યોગ તુઝ નિરમલ હવે;
સમતા માંહે તિમ મન રાખ, વચન મલિનતા તજી શુદ્ધ ભાખ. ૨૬૭

મૈત્રી કરુણા ને [2]પરમોદ, ઉપેક્ષ આણ જીઉ સામ્યવિનોદ;
યતને રૂડી ભાવન ભાય, આતમ [3]નિહચલપણે રમાય. ૨૬૮

ન કરી કીહાંઇ મમતા ભાવ, કષાય ને રતિ અરતિ ન લાવ;
ઇહ સુખ નિઃસ્પૃહપણે લહીશ, પરભવ અનુત્તર સુખ પામીશ. ૨૬૯

જાણી યતિ વૃતિ વ્રતિની એ સીખ, ચરણકરણ ધરી શુદ્ધ ચિત ભીખ;
તો તું તરત ભવોદધિ તરી, વિલસે સારી શિવસુખસિરી. ૨૭૦

ભાખ્યો સારી ચાલમાં, એ પન્નરમ અધિકાર;
હિવ સમતારૂપી સરસ, લિખું શાસ્ત્ર અનુસાર. ॥

**-: इति पंचदशो शुभवृत्तिशिक्षाधिकारः :-**

ઇમ શુદ્ધ અભ્યાસેં નિજ ચિત્ત, રહિ પરમારથમાં સમચિત;
શિવસંપદ જિમ તુઝ કર થકા, હુવઈ તરત ભાવી શિવસકા. ૨૭૧

તુંહિજ દુઃખ તુંહિજ નરકમાં, તુંહિજ સુખ, તુંહિજ શિવગમાં;
તુંહિજ કમ તુંહિજ મનપણે, તજ અવજ્ઞા આતમ ઇમ ભણે. ૨૭૨

---

૧. તજવે, વર્જવે. ૨. પ્રમોદ (ભાવના) બીજી. ૩. નિશ્ચલપણે.

આતમ નિજ આદર નિસ્સંગ, સરવ અરથમાં સમતા સંગ;
આતમ લખિએ સમતા મૂળ, શુદ્ધ સુખ તે સમતા અનુકૂળ. ૨૭૩

સ્ત્રીમાં ધૂલિ નિજપરમાંહ, સંપદ આપદ આતમ આંહ;
તત્વે સમતા મમતા વિના, જે ચાહે તે સુખીઆ ઘના. ૭૭૪

યતને તેહજ તું ગુરુ સેવ, પંડિત તે ભણ શાસ્ત્ર સુલેવ;
આતમ તેહિજ તત[1] પરિભાવ, સમતા સુધા હુવે જે દાવ. ૨૭૫

સકલ શાસ્ત્ર જોઇ ઉધરી, મેલ્યો એ સમતામૃત કરી;
પીઓ એ લાભી પંડિતાં, એ શિવસુખ આવે છે કિનાં. ૨૭૬

આતમ શાંત સુધારસ ભર્યો, શ્રીમુનિસુંદરસૂરિ તિણ કર્યો;
અધ્યાતમ ભાવે ધ્યાઇવો, પરહિત કલ્પતરુ ભાઇવો. ૨૭૭

એ બુદ્ધિવંત ભણી ચિત્તમાંહિ, તરત રમાડી વિરમી તાંહ;
ઇહભવ તે પામી જયસિરી, પરભવ સહજે લ્યે શિવપુરી. ૨૭૮

શાંત સુધારસ પૂરમે, ભાખ્યો એ અધિકાર;
સોલેહી પૂરા ઇહાં, લિખીયા શાસ્ત્ર વિચાર. ૧

ચિદાનંદ ભગવાન તું, પરમાતમ ગુણવંત;
અક્ષયનિધિ નિજ સમરતો, પાસે બોધી મહંત. ૨

અમૂરતી ને મૂરતી, થાયે પંચ પ્રકાર;
તેમાં ચરમ કરણ વસે, અંતર કરણ પસાર. ૩

દોઇ ઘડી હવે ઉપશમી, તે વળી આદિ કષાય;
કરવે પડતાં પામીયે, ગુણ સાસદન ભાય. ૪

તીન મોહની નઇ વલી, ધુરલા ચ્યાર કષાય;
[2]પ્રકરતિ સાતે ક્ષય કર્યા, ક્ષાયિક ભાવે પ્રાય. ૫

---

૧. તત્ત્વ. ૨. પ્રકૃતિ.

એ મિથ્યાત સભાવથી, તીને બોધિ અરૂપ;
જો હવે ચરમ કરણપણે, તીને પુંજસરૂપ. ૬

શુદ્ધ [૧]અધશુદ્ધ અતિશુદ્ધમાં, પહિલઇ પુંજે આય;
રહતાં હવે ક્ષય ઉપશમી, ચરમ સમય શુદ્ધ પાય. ૭

વેદક બોધિપણું લહે, નિરમલ દલ ઇહાં હોય;
તિણ રૂપી કહિયે બિને, આતમ નિજ ગુણ જોઇ. ૮

બોધ લહીજે કો ઇહાં, નવિ લખીસ્યે એ શાસ્ત્ર;
ફોરવવા તપ જપ [૨]સકતિ, ભજસ્યે તે ભવપાત્ર. ૯

લિખ્યો શાસ્ત્ર ભાષાપણે, સમઝે સગલા લોગ;
ઇમ નિરવિજયતણે વચન, ધરમારથ ઉપયોગ. ૧૦

દેખી દેખી વચન તે, લિખીયા મતિ અનુસાર;
પંડિત દેખી સોધજ્યો, દે દૃષ્ટિ ઉપકાર. ૧૧

સંવત સતર સત્યોત્તર, માસ શુક્લ વૈશાખ;
રવિવારે પાંચમી દિને, પૂર્ણ થયો અભિલાષ. ૧૨

ખરતર ગછમાંહે સરસ, આચારજ ગણધાર;
શ્રી જિણચંદ સૂરિસવર, સૌમ્યગુણે સિરદાર. ૧૩

તાસ સીસ ગુરુ ચરણરજ, સમ તે રંગવિલાસ;
નિજ પર આતમહિત ભણી, કીનો આદરિ જાસ. ૧૪

[૩]ભણિજ્યો ગુણજ્યો વાંચજ્યો, એ અધ્યાતમ રાસ;
જિમ જિમ મનમાં ભાવસ્યો, તિમ તિમ [૪]થસ્યે પ્રકાસ. ૧૫

**અધ્યાત્મ કલ્પદ્રુમ ગ્રંથની ગુજરાતી ચોપાઇ. સમાપ્ત**



૧. અર્ધશુદ્ધિ. ૨. શક્તિ. ૩. ભણજો. ૪. થશે.

# परिशिष्ट-२

## અધ્યાત્મકલ્પદ્રુમના મૂળ શ્લોકોનો અકારાદિક્રમ


| श्लोकस्यादिवाक्यम् | श्लोकांक | छंद | पृष्ठ |
|---|---|---|---|
| अकारणं यस्य च दुर्विकल्पैः | ९.१४ | उपजाति | १५३ |
| अकृच्छ्रसाध्यं मनसो वशीकृतात् | ९.१३ | वंशस्थ | १५२ |
| अङ्गेषु येषु परिमुह्यसि कामिनीनां | २.५ | वसन्ततिलका | ५२ |
| अणीयसा साम्यनियन्त्रणाभुवा | १३.३६ | वंशस्थ | २६३ |
| अत एव जिना दीक्षा- | १४.९ | अनुष्टुप् | ३०४ |
| अत्यल्पकल्पितसुखाय किमिन्द्रियार्थैः | ६.१ | वसन्ततिलका | ८३ |
| अदृष्टवैचित्र्यवशाज्जगज्जने | १.३ | वंशस्थ | २२ |
| अधीतिनोऽर्चादिकृते जिनागमे | ८.१.३ | वंशस्थ | १२२ |
| अधीतिमात्रेण फलन्ति नागमाः | ८.१.९ | वंशस्थ | १२९ |
| अधीत्यनुष्ठानतपःशमाद्यान् | ७.११ | उपजाति | १०४ |
| अध्येषि शास्त्रं सदसद्विचित्रा- | १३.२३ | उपजाति | २५० |
| अनादिरात्मा न निजः परो वा | १.१९ | उपजाति | ३४ |
| अनित्यताद्या भज भावनाः सदा | १३.४० | वंशस्थ | २६७ |
| अपास्ताशेषदोषाणां | १.१० | अनुष्टुप् | २७ |
| अमेध्यभस्त्रा बहुरन्ध्रनिर्यन्- | २.७ | उपजाति | ५४ |
| अमेध्यमांसास्रवसात्मकानि | २.४ | उपजाति | ५१ |
| आच्छादितानि सुकृतानि यथा दधन्ते | ११.९ | वसन्ततिलका | २०३ |
| आजीविकादिविविधार्तिभृशानिशार्ताः | १३.१३ | वसन्ततिलका | २४० |
| आजीविकार्थमिह यद्यतिवेषमेषः | १३.४ | वसन्ततिलका | २३० |
| आजीवितं जीव ! भवान्तरेऽपि वा | ३.२ | वंशस्थ | ६० |
| आत्मन् ! परस्त्वमसि साहसिकः श्रुताक्षैः | ८.२.७ | वसन्ततिलका | १३८ |
| आत्मानमल्पैरिह वञ्चयित्वा | १०.१२ | उपजाति | १७१ |
| आपातरम्ये परिणामदुःखे | ६.२ | उपजाति | ८५ |
| आरम्भैर्भरितो निमज्जति यतः | ४.६ | शार्दूलवि० | ६९ |
| आराधितो वा गुणवान्स्वयं तरन् | १३.१४ | उपजाति | २४१ |

| श्लोकस्यादिवाक्यम् | श्लोकांक | छंद | पृष्ठ |
|---|---|---|---|
| आलम्बनं तव लवादिकुठारघाताच्- | १०.२ | वसन्ततिलका | १५९ |
| आवश्यकेष्वातनु यत्नमासो- | १५.१ | उपजाति | ३१७ |
| इति चतुर्गतिदुःखततीः कृतिन् | ८.२.६ | द्रुतविलम्बित | १३७ |
| इति यतिवरशिक्षां योऽवधार्य व्रतस्थः | १५.१० | मालिनी | ३२९ |
| इममिति मतिमानधीत्य चित्ते | १६.८ | पुष्पिताग्रा | ३३८ |
| इहामुत्र च वैराग्य - | १४.८ | अनुष्टुप् | ३०३ |
| उच्चारयस्यनुदिनं न करोमि सर्वं | १३.११ | वसन्ततिलका | २३८ |
| उरभ्रकाकिण्युदबिन्दुकाम्र- | १०.१३ | उपजाति | १७२ |
| एवं सदाऽभ्यासवशेन सात्म्यं | १६.१ | उपजाति | ३३१ |
| एष मे जनयिता जननीयं | १.२४ | स्वागता | ४१ |
| कथमपि समवाप्य बोधिरत्नं | १३.५२ | पुष्पिताग्रा | २७९ |
| कथं महत्त्वाय ममत्वतो वा | १३.४९ | उपजाति | २७६ |
| करोषि यत् प्रेत्यहिताय किञ्चित् | ७.१३ | उपजाति | १०६ |
| कर्माणि रे जीव ! करोषि तानि | १०.२० | इन्द्रवज्रा | १८८ |
| कषायान् संवृणु प्राज्ञ ! | १४.१९ | अनुष्टुप् | ३१२ |
| कष्टेन धर्मो लवशो मिलत्ययं | ७.१५ | वंशस्थ | १०९ |
| कस्ते निरञ्जन ! चिरं जनरञ्जनेन | १०.४ | वसन्ततिलका | १६१ |
| कायस्तम्भान्न के के स्युः | १४.११ | अनुष्टुप् | ३०६ |
| कारागृहाद् बहुविधाशुचितादिदुःखाद् | ५.२ | वसन्ततिलका | ७४ |
| किमर्दयन्निर्दयमङ्गिनो लघून् | १०.१० | वंशस्थ | १६९ |
| किमु मुह्यसि गत्वरैः पृथक् | १०.१३ | गीति | १९१ |
| किं कषायकलुषं कुरुषे स्वं | १.२७ | स्वागता | ४३ |
| किं जीव ! माद्यसि हसस्ययमीहसेऽर्थान् | १०.१ | वसन्ततिलका | १५८ |
| किं मोदसे पण्डितनाममात्रात् | ८.१.५ | उपजाति | १२५ |
| किं लोकसत्कृति-नमस्करणा-र्चनाद्यैः | १३.७ | वसन्ततिलका | २३४ |
| कुकर्मजालैः कुविकल्पसूत्रजैः | ९.१ | वंशस्थ | १४० |
| कुक्षौ युवत्याः कृमयो विचित्रा | ३.३ | उपजाति | ६१ |
| कुर्यान्न कुत्रापि ममत्वभावं | १५.९ | इन्द्रवज्रा | ३२८ |
| कुर्वे न सावद्यमिति प्रतिज्ञां | १३.४८ | उपजाति | २७५ |

| श्लोकस्यादिवाक्यम् | श्लोकांक | छंद | पृष्ठ |
|---|---|---|---|
| कुलं न जातिः पितरौ गणो वा | १२.९ | उपजाति | २१८ |
| कृताकृतं स्वस्य तपोजपादि | १५.६ | उपजाति | ३२४ |
| कृती हि सर्वं परिणामरम्यं | १.१७ | उपजाति | १३२ |
| कृपया संवृणु स्वाङ्गं | १४.१० | अनुष्टुप् | ३०५ |
| के गुणास्तव यतः स्तुतिमिच्छ- | १.१४ | स्वागता | २९ |
| को गुणस्तव कदा च कषायैर्- | ७.५ | स्वागता | ९८ |
| क्रूरकर्मसु निःशङ्कं | १.१२ | अनुष्टुप् | २८ |
| क्वचित् कषायैः क्वचन प्रमादैः | १०.२६ | उपजाति | १९४ |
| क्षेत्रवास्तुधनधान्यगवाश्वैः | ४.५ | स्वागता | ६८ |
| क्षेत्रेषु नो वपसि यत्सदपि स्वमेतद् | ४.७ | वसन्ततिलका | ७० |
| गजाश्वपोतीक्षथान् यथेष्ट- | १२.४ | उपेन्द्रवज्रा | २१३ |
| गर्भवासनरकादिवेदनाः | ६.५ | रथोद्धता | ८८ |
| गुणस्तवैर्यो गुणिनां परेषाम् | १.१५ | उपजाति | ३० |
| गुणस्तुतीर्वाञ्छसि निर्गुणोऽपि | १०.८ | उपजाति | १६७ |
| गुणांस्तवाश्रित्य नमन्त्यमी जना | १३.८ | वंशस्थ | २३५ |
| गुणेषु नोद्यच्छसि चेन्मुने ! ततः | १३.२० | वंशस्थ | २४७ |
| गुणैर्विहीनोऽपि जनानतिस्तुति- | १३.१९ | वंशस्थ | २४६ |
| गुरूनवाप्याप्यपहाय गेहम् | १३.५४ | उपजाति | २८२ |
| गृह्णासि शय्याऽऽहृतिपुस्तकोपधीन् | १३.१६ | उपजाति | २४३ |
| घ्राणसंयममात्रेण | १४.१३ | अनुष्टुप् | ३०८ |
| चक्षुःसंयममात्रात् के | १४.१४ | अनुष्टुप् | ३०८ |
| चतुष्पदैः सिंह इव स्वजात्यैः | १२.१४ | उपेन्द्रवज्रा | २२२ |
| चर्मास्थिमज्जान्त्रवसास्रमांसा- | २.२ | इन्द्रवज्रा | ४९ |
| चित्तबालक ! मा त्याक्षीः | १.१ | अनुष्टुप् | १९ |
| चेतनेतरगतेष्वखिलेषु | १.१३ | स्वागता | २८ |
| चेतोऽर्थये मयि चिरत्नसख ! प्रसीद | ९.२ | वसन्ततिलका | १४१ |
| चेद् वाञ्छसीदमवितुं परलोकदुःख- | ५.३ | वसन्ततिलका | ७५ |
| चौरैस्तथा कर्मकरैर्गृहीते | ७.२० | उपजाति | ११६ |
| जनेषु गृह्णत्सु गुणान् प्रमोदसे | ११.४ | वंशस्थ | १९९ |

| श्लोकस्यादिवाक्यम् | श्लोकांक | छंद | पृष्ठ |
|---|---|---|---|
| जपो न मुक्त्यै न तपो द्विभेदं | ९.७ | उपजाति | १४६ |
| जयश्रीरान्तरारीणां | १ | अनुष्टुप् | ११ |
| जानन्ति कामान्निखिलाः ससंज्ञाः | १.२१ | इन्द्रवज्रा | ३६ |
| जिनेष्वभक्तिर्-यमिनामवज्ञा | १२.१२ | उपजाति | २२० |
| जिह्वासंयममात्रेण | १४.१५ | अनुष्टुप् | ३०९ |
| जानेऽस्ति संयम-तपोभिरमीभिरात्मन् | १३.६ | वसन्ततिलका | २३३ |
| तत्त्वेषु सर्वेषु गुरुः प्रधानं | १२.१ | उपजाति | २१० |
| तदेवमात्मा कृतसंवरः स्यात् | १४.२२ | उपजाति | ३१५ |
| तपः-क्रिया-ऽऽवश्यक-दान-पूजनैः | ११.११ | वंशस्थ | २०५ |
| तपांसि तन्याद् विविधानि नित्यं | १५.२ | उपजाति | ३१९ |
| तपो-जपाद्याः स्वफलाय धर्मोः | ९.१२ | उपजाति | १५१ |
| तमेव सेवस्व गुरुं प्रयत्ना | १६.५ | उपजाति | ३३५ |
| तीव्रा व्यथाः सुरकृता विविधाश्च यत्रा- | ८.२.२ | वसन्ततिलका | १३१ |
| ते तीर्णा भववारिर्धिं मुनिवराः | १३.१ | शार्दूलवि० | २२७ |
| तैर्भवेऽपि यदहो सुखमिच्छन् | १.२६ | स्वागता | ४२ |
| त्यक्त्वा गृहं स्वं परगेहचिन्ता- | १३.४७ | उपजाति | २७४ |
| त्यज स्पृहां स्वः-शिवशर्मलाभे | १३.३७ | उपजाति | २६४ |
| त्राणाशक्तेरापदि | ३.४ | आर्या | ६२ |
| त्रातुं न शक्या भवदुःखतो ये | १.२९ | उपजाति | १४५ |
| त्वचः संयममात्रेण | १४.१६ | अनुष्टुप् | ३१० |
| त्वमेव दुःखं नरकस्त्वमेव | १६.२ | इन्द्रवज्रा | ३३२ |
| त्वमेव मोग्धा मतिमांस्त्वमात्मन् | १०.३ | उपजाति | १६० |
| ददस्व धर्मार्थितयैव धर्म्यान् | १५.५ | उपजाति | ३२२ |
| दधद् गृहस्थेषु ममत्वबुद्धिं | १३.४६ | उपजाति | २७३ |
| दाक्षिण्य-लज्जे गुरु-देवपूजा | १२.११ | उपजाति | २२० |
| दानमाननुतिवन्दनापरैः | १३.२१ | रथोद्धता | २४८ |
| दानश्रुतध्यानतपोऽर्चनादि | ९.६ | उपजाति | १४५ |
| दीनेष्वार्तेषु भीतेषु | १.११ | अनुष्टुप् | २८ |
| दीपो यथाऽल्पोऽपि तमांसि हन्ति | ११.१३ | उपजाति | २०७ |

| श्लोकस्यादिवाक्यम् | श्लोकांक | छंद | पृष्ठ |
|---|---|---|---|
| दुष्टः कर्मविपाकभूपतिवशः | ५.५ | शार्दूलवि० | ७७ |
| दुःखं यथा बहुविधं सहसेऽप्यकामः | १०.१८ | वसन्ततिलका | १८६ |
| देहे विमुह्य कुरुषे किमघं न वेत्सि | ५.४ | वसन्ततिलका | ७६ |
| द्रव्यस्तवात्मा धनसाधनो न | ४.४ | इन्द्रवज्रा | ६७ |
| द्विषस्त्विमे ते विषयप्रमादाः | १३.५३ | उपेन्द्रवज्रा | २८१ |
| दुर्गन्धतो यदणुतोऽपि पुरस्य मृत्यु- | ८.२.१ | शार्दूलवि० | १३१ |
| धत्से कृतिन् ! यद्यपकारकेषु | ७.१० | उपजाति | १०३ |
| धनाङ्गसौख्यस्वजनानसूनपि | १०.१७ | वंशस्थ | १८५ |
| धन्यः स मुग्धमतिरप्युदितार्हदाज्ञा- | ८.१.८ | वसन्ततिलका | १२८ |
| धन्याः केऽप्यनधीतिनोऽपि सदनु- | ८.१.७ | शार्दूलवि० | १२७ |
| धर्मस्यावसरोऽस्ति पुद्गलपरा- | १०.७ | शार्दूलवि० | १६५ |
| धिगागमैर्माद्यसि रञ्जयन् जनान् | ८.१.६ | उपजाति | १२६ |
| ध्रुवः प्रमादैर्भववारिधौ मुने ! | १३.४३ | वंशस्थ | २७० |
| न काऽपि सिद्धिर्न च तेऽतिशायि | १३.१७ | उपजाति | २४४ |
| न देवकार्ये न च सङ्घकार्ये | १२.१७ | उपजाति | २२५ |
| न धर्मचिन्ता गुरुदेवभक्तिः | १२.१६ | उपजाति | २२४ |
| न यस्य मित्रं न च कोऽपि शत्रुः | १.५ | उपेन्द्रवज्रा | २४ |
| न वेत्सि शत्रून् सुहृदश्च नैव | १.१६ | उपेन्द्रवज्रा | ३१ |
| नाजीविका-प्रणयिनी-तनयादिचिन्ता | १३.९ | वसन्ततिलका | २३६ |
| नाम्नाऽपि वस्येति जनेऽसि पूज्यः | १३.५७ | उपजाति | २८५ |
| नाम्रं सुसिक्तोऽपि ददाति निम्बकः | १२.८ | इन्द्रवज्रा | २१७ |
| निजः परो वेति कृतो विभागो | १.१८ | उपजाति | ३३ |
| नियन्त्रणा या चरणेऽत्र तिर्यक्- | १३.३४ | उपजाति | २६१ |
| निरवद्यं वचो ब्रूहि | १४.७ | अनुष्टुप् | २९६ |
| निर्भूमिर्विकन्दली गतदरी | २.८ | शार्दूलवि० | ५६ |
| निःसङ्गतामेहि सदा तदात्मन् | १६.३ | उपजाति | ३३३ |
| नो धनैः परिजनैः स्वजनैर्वा | १.२५ | स्वागता | ४१ |
| न्यस्ता मुक्तिपथस्य वाहकतया | १२.६ | शार्दूलवि० | २१५ |
| पतङ्गभृङ्गैणखगाहिमीन- | १०.१४ | उपजाति | १८० |

| श्लोकस्यादिवाक्यम् | श्लोकांक | छंद | पृष्ठ |
|---|---|---|---|
| पदे पदे जीव ! पराभिभूतीः | १०.९ | उपजाति | १६८ |
| परस्य पीडापरिवर्जनात् ते | १५.७ | उपजाति | ३२६ |
| परहितचिन्ता मैत्री | १.८ | आर्या | २७ |
| पराभिभूतौ यदि मानमुक्तिः | ७.२ | उपजाति | ९६ |
| पराभिभूत्याऽल्पिकयाऽपि कुप्य- | ७.९ | उपजाति | १०२ |
| परिग्रहं चेद् व्यजहा गृहादेः | १३.२४ | उपेन्द्रवज्रा | २५१ |
| परिग्रहात् स्वीकृतधर्मसाधना- | १३.२५ | वंशस्थ | २५२ |
| परिषहान् नो सहसे न चोप- | १३.३ | उपजाति | २२८ |
| परोपकारोऽस्ति तपो जपो वा | ५.७ | उपजाति | ८० |
| पुनः पुनर्जीव तवोपदिश्यते | १०.१६ | वंशस्थ | १८५ |
| पुराऽपि पापैः पतितोऽसि दुःख- | १०.१५ | उपजाति | १८४ |
| पुराऽपि पापैः पतितोऽसि संसृतौ | ७.१४ | वंशस्थ | १०८ |
| पुष्णासि यं देहमधान्यचिन्तयं- | ५.१ | वंशस्थ | ७३ |
| पूतिश्रुतिः श्वेव रतेर्विदूरे | ९.११ | इन्द्रवज्रा | १५० |
| पूर्णे तटाके तृषितः सदैव | १२.१५ | उपजाति | २२४ |
| प्रगल्भसे कर्मसु पापकेष्वरे ! | १०.१९ | वंशस्थ | १८७ |
| प्रमोदसे स्वस्य यथाऽन्यनिर्मितैः | ११.५ | वंशस्थ | २०० |
| प्रसन्नचन्द्रराजर्षेर्- | १४.३ | अनुष्टुप् | २८९ |
| प्राप्यापि चारित्रमिदं दुरापं | १३.५१ | उपजाति | २७८ |
| फलाद् वृथा स्युः कुगुरूपदेशतः | १२.५ | वंशस्थ | २१४ |
| बन्धोऽनिशं वाहन-ताडनानि | ८.२.३ | उपजाति | १३४ |
| बस्तिसंयममात्रेण | १४.१७ | अनुष्टुप् | ३१० |
| बिभेषि जन्तो ! यदि दुःखराशेः | ६.७ | उपजाति | ९० |
| भक्त्यैव नार्चसि जिनं सुगुरोश्च धर्म | १२.१३ | वसन्ततिलका | २२१ |
| भजस्व मैत्रीं जगदङ्गिसशिषु | १.६ | वंशस्थ | २५ |
| भवी न धर्मैरविधिप्रयुक्तैर्- | १२.२ | उपजाति | २११ |
| भवेत् समग्रेष्वपि संवरेषु | १४.२१ | उपजाति | ३१५ |
| भवेद् गुणी मुग्धकृतैर्न हि स्तवैः | १३.२२ | उपजाति | २४९ |
| भवेद् भवापायविनाशनाय यः | ११.१ | वंशस्थ | १९६ |

| श्लोकस्यादिवाक्यम् | श्लोकांक | छंद | पृष्ठ |
|---|---|---|---|
| भवेन्न कोऽपि स्तुतिमात्रतो गुणी | ११.७ | उपजाति | २०१ |
| भावनापरिणामेषु | ९.१७ | अनुष्टुप् | १५६ |
| भावोपयोगशून्याः | ११.१४ | आर्या | २०८ |
| भुङ्क्ते कथं नारक-तिर्यगादि- | ६.४ | उपजाति | ८७ |
| मनः संवृणु हे विद्वन् ! | ४.२ | अनुष्टुप् | २८८ |
| मनोऽप्रवृत्तिमात्रेण | १४.४ | अनुष्टुप् | २९३ |
| मनोवशस्ते सुखदुःखसङ्गमो | १३.४२ | वंशस्थ | २६९ |
| मन्त्रप्रभा-रत्न-रसायनादि- | ११.१२ | उपजाति | २०६ |
| ममत्वमात्रेण मनःप्रसाद- | ४.३ | उपजाति | ६६ |
| महर्षयः केऽपि सहन्त्युदीर्याऽ- | १३.४४ | उपजाति | २७१ |
| महातपो-ध्यान-परीषहादि | १३.३९ | उपजाति | २६६ |
| मा कार्षीत् कोऽपि पापानि | १.९ | अनुष्टुप् | २७ |
| माता पिता स्वः सुगुरुश्च तत्त्वात् | १२.१० | उपजाति | २१९ |
| माद्यस्यशुद्धैर् गुरु-देव-धर्मैर्- | १२.७ | उपजाति | २१६ |
| मा भूरपत्यान्यवलोकमानो | ३.१ | उपजाति | ५९ |
| मिथ्यात्व-योगा-ऽविरति-प्रमादान् | १४.१ | उपजाति | २८७ |
| मुधान्यदास्याभिभवाभ्यसूया- | ८.२.४ | उपजाति | १३५ |
| मुने ! न किं नश्वरमस्वदेह- | १३.३१ | उपजाति | २५८ |
| मुह्यसि प्रणयचारुगिरासु | २.१ | स्वागता | ४८ |
| मृतः किमु प्रेतपतिर्दुरामयाः | ६.८ | वंशस्थ | ९१ |
| मृत्पिण्डरूपेण विनश्वरेण | ५.८ | उपजाति | ८१ |
| मृत्योः कोऽपि न रक्षितो न जगतो | ७.२१ | शार्दूलवि० | ११७ |
| मैत्री परस्मिन् हितधीः समग्रे | १.७ | उपजाति | २६ |
| मैत्रीं प्रमोदं करुणां च सम्यक् | १५.८ | उपजाति | ३२७ |
| मोदन्ते बहुतर्कतर्कणचणाः | ८.१.४ | शार्दूलवि० | १२३ |
| यत् कषायजनितं तव सौख्यं | ७.६ | स्वागता | ९९ |
| यतः शुचीन्यप्यशुचीभवन्ति | ५.६ | उपजाति | ७९ |
| यथा तवेष्टा स्वगुणप्रशंसा | ११.३ | उपजाति | १९८ |
| यथा विदां लेप्यमया न तत्त्वात् | १.२० | उपजाति | ३५ |

| श्लोकस्यादिवाक्यम् | श्लोकांक | छंद | पृष्ठ |
|---|---|---|---|
| यथा सर्पमुखस्थोऽपि | १०.११ | अनुष्टुप् | १७० |
| यदत्र कष्टं चरणस्य पालने | १३.३२ | वंशस्थ | २५९ |
| यदिन्द्रियार्थैरिह शर्म बिन्दवद् | ६.३ | वंशस्थ | ८६ |
| यदिन्द्रियार्थैः सकलैः सुखं स्याद् | १.२ | उपजाति | २० |
| यस्य क्षणोऽपि सुरधामसुखानि पल्य- | १३.५६ | वसन्ततिलका | २८४ |
| यस्यागमाम्भोदरसैर् न धौतः | ८.१.२ | उपजाति | १२१ |
| यस्यास्ति किञ्चिन्न तपो-यमादि | १४.२० | इन्द्रवज्रा | ३१४ |
| यानि द्विषामप्युपकारकाणि | ४.२ | इन्द्रवज्रा | ६५ |
| यांश्च शोचसि गताः किमिमे मे | १.२८ | स्वागता | ४४ |
| याः सुखोपकृतकृत्त्वधिया त्वं | ४.१ | रथोद्धता | ६४ |
| ये पालिता वृद्धिमिताः सहैव | १०.२१ | उपजाति | १८९ |
| येंऽहःकषायकलिकर्मनिबन्धभाजनं | १३.२६ | मृदङ्ग | २५३ |
| यैः क्लिश्यसे त्वं धनबन्ध्वपत्य- | १०.२२ | उपजाति | १९० |
| योगस्य हेतुर्मनसः समाधिः | ९.१५ | उपजाति | १५४ |
| यो दान-मान-स्तुति-वन्दनाभिः | १३.४५ | इन्द्रवंशा | २७२ |
| रक्षार्थं खलु संयमस्य गदिताः | १३.२७ | शार्दूलवि० | २५४ |
| रङ्कः कोऽपि जनाभिभूतिपदवीं | १३.५० | शार्दूलवि० | २७७ |
| रूप-लाभ-कुल-विक्रम-विद्या- | ७.१७ | स्वागता | १११ |
| रे चित्तवैरि ! तव किं नु मयाऽपराद्धं | ९.१० | वसन्ततिलका | १४९ |
| रे जीव ! सेहिथ सहिष्यसि च व्यथास्ताः | ७.१ | वसन्ततिलका | ९५ |
| लब्ध्वाऽपि धर्मं सकलं जिनोदितं | ९.८ | वंशस्थ | १४७ |
| वचोऽप्रवृत्तिमात्रेण | १४.६ | अनुष्टुप् | २९५ |
| वध्यस्य चौरस्य यथा पशोर्वा | ६.६ | उपजाति | ८९ |
| वशं मनो यस्य समाहितं स्यात् | ९.५ | उपजाति | १४३ |
| वस्त्र-पात्र-तनु-पुस्तकादिनः | १३.२९ | रथोद्धता | २५६ |
| विद्वानहं सकललब्धिरहं नृपोऽहं | १०.५ | वसन्ततिलका | १६२ |
| विना कषायान्न भवार्त्तिराशिः | ७.१८ | उपजाति | ११२ |
| विमुह्यसि स्मेरदृशः सुमुख्याः | २.६ | उपजाति | ५३ |
| विमोह्यसे किं विषयप्रसादैः | ६.९ | उपजाति | ९२ |

| श्लोकस्यादिवाक्यम् | श्लोकांक | छंद | पृष्ठ |
|---|---|---|---|
| विराधितैः संयमसर्वयोगैः | १३.५५ | उपजाति | २८३ |
| विलोक्य दूरस्थममेध्यमल्पं | २.३ | उपजाति | ५० |
| विशुद्धशीलाङ्गसहस्रधारी | १५.३ | इन्द्रवज्रा | ३२० |
| विश्वजन्तुषु यदि क्षणमेकम् | १.४ | स्वागता | २३ |
| विषयेन्द्रियसंयोगात्- | १४.१८ | अनुष्टुप् | ३११ |
| वेत्सि स्वरूपफलसाधनबाधनानि | १०.६ | वसन्ततिलका | १६३ |
| वेषेण माद्यसि यतेश्चरणं विनात्मन् ! | १३.५ | वसन्ततिलका | २३१ |
| वेषोपदेशाद्युपधिप्रतारिताः | ११.१२ | उपजाति | २३९ |
| वैराग्यशुद्धधर्मा | ५ | आर्या | १५ |
| वैरादि चात्रेति विचार्य लाभा- | ७.३ | उपजाति | ९६ |
| शत्रूभवन्ति सुहृदः कलुषीभवन्ति | ७.१६ | वसन्ततिलका | ११० |
| शमत्र यद् बिन्दुरिव प्रमादजं | १३.३३ | वंशस्थ | २६० |
| शान्तरसभावनात्मा | १६.७ | गीति | ३३७ |
| शास्त्रज्ञोऽपि धृतव्रतोऽपि गृहिणी- | १३.१० | शार्दूलवि० | २३७ |
| शिलातलाभे हृदि ते वहन्ति | ८.१.१ | उपेन्द्रवज्रा | १२० |
| शीतातपाद्यान् न मनागपीह | १३.३० | उपजाति | २५८ |
| शीतात् तापान्मक्षिकाकर्त्तृणादि- | १०.२५ | शालिनी | १९३ |
| श्रुतिसंयममात्रेण | १४.१२ | अनुष्टुप् | ३०७ |
| श्रुत्वाऽऽक्रोशान् यो मुदा पूरितः स्यात् | ७.४ | शालिनी | ९७ |
| शैथिल्य-मात्सर्य-कदाग्रह-क्रुधो- | ११.२ | उपजाति | १९७ |
| समग्रचिन्तार्त्तिहृतेरिहापि | १३.३८ | उपजाति | २६५ |
| समग्रसच्छास्त्रमहार्णवेभ्यः | १६.६ | इन्द्रवज्रा | ३३६ |
| सचेतनाः पुद्गलपिण्डजीवा | १.३० | उपजाति | ४६ |
| सप्तभीत्यभिभवेष्टविप्लवा- | ८.२.५ | स्वागता | १३६ |
| समतैकलीनचित्तो | ०.४ | आर्या | १५ |
| समाश्रितस्तारकबुद्धितो यो | १२.३ | उपजाति | २१२ |
| समीक्ष्य तिर्यङ्-नरकादिवेदना | ७.१९ | वंशस्थ | ११३ |
| सम्यग् विचार्येति विहाय मानं | ७.८ | उपजाति | १०१ |
| सर्वमङ्गलनिधौ हृदि यस्मिन् | २ | स्वागता | १३ |

| श्लोकस्यादिवाक्यम् | श्लोकांक | छंद | पृष्ठ |
|---|---|---|---|
| सह तपो-यम-संयमयन्त्रणां | १३.३५ | द्रुतविलम्बित | २६२ |
| संयमोपकरणच्छलात् परान् | १३.२८ | रथोद्धता | २५५ |
| सार्थं निरर्थकं वा यद् | १४.५ | अनुष्टुप् | २९४ |
| सुखमास्से सुखं शेषे | १०.२४ | अनुष्टुप् | १९२ |
| सुखाय दुःखाय च नैव देवाः | ९.४ | उपजाति | १४२ |
| सुखाय धत्से यदि लोभमात्मनो | ७.१२ | उपजाति | १०५ |
| सुखेन साध्या तपसां प्रवृत्तिः | ७.७ | उपजाति | १०० |
| सुदुर्जयं हि रिपुवत्यदो मनो | ९.९ | वंशस्थ | १४८ |
| सृजन्ति के के न बहिर्मुखा जनाः | ११.८ | वंशस्थ | २०२ |
| स्तवैर्यथा स्वस्य विगर्हणैश्च | ११.६ | उपेन्द्रवज्रा | २०० |
| स्तुतैः श्रुतैर्वाप्यपरैर्निरीक्षितैः | ११.१० | वंशस्थ | २०४ |
| स्त्रीषु धूलिषु निजे च परे वा | १६.४ | स्वागता | ३३४ |
| स्निह्यन्ति तावद्धि निजा निजेषु | १.२२ | उपजाति | ३९ |
| स्वप्नेन्द्रजालादिषु यद्वदाप्तैः | १.२३ | उपजाति | ४० |
| स्वयं प्रमादैर्निपतन् भवाम्बुधौ | १३.१५ | वंशस्थ | २४२ |
| स्वर्गापवर्गौ नरकं तथान्तः | ९.३ | उपजाति | १४२ |
| स्वाध्याययोगैश्चरणक्रियासु | ९.१६ | उपजाति | १५५ |
| स्वाध्यायमाधित्ससि नो प्रमादैः | १३.२ | उपजाति | २२८ |
| स्वाध्याययोगेषु दधस्व यत्नं | १५.४ | उपजाति | ३२१ |
| हतं मनस्ते कुविकल्पजालैः | १३.४१ | उपजाति | २६८ |
| हीनोऽप्यरे भाग्यगुणैर्मुधात्मन् ! | १३.१८ | उपजाति | २४५ |

# સંપાદિત સાહિત્ય

૧. ચાલો જીવન શુદ્ધિ કરીએ...
૨. શ્રી ભદ્રંકર જિન-ગુણ સ્તવન મંજૂષા
૩. ભક્તિ કરતાં છૂટે મારા પ્રાણ
૪. ઘરઘરનું ઘરેણું
૫. આરાધો નવપદ, પામો પરમપદ
૬. મહોત્સવનું સભારણું
૭. સમાધિ સરિતામાં સ્નાન કરો
૮. પ્યારા મારા પારસનાથ
૯. શ્રીમેરૂવિજય ગણિ રચિત ચતુર્વિંશતિ-જિનાન્દ-સ્તુતયઃ સ્વોપજ્ઞવિવરણયુતાઃ
૧૦. સર્વજિનસ્તુતયશ્ચ લઘુચૈત્યવંદનચતુર્વિંશતિકા
૧૧. શ્રી સમ્યક્ દેવતત્વ
૧૨. શ્રી સમ્યક્ ગુરુતત્વ
૧૩. શ્રી સમ્યક્ ધર્મતત્વ
૧૪. આચારોપદેશગ્રંથ
૧૫. નવસ્મરણાદિ ભાગ-૧
૧૬. શ્રમણ ક્રિયાના સૂત્રો ભાગ-૨
૧૭. દશવૈકાલિક-યતિશિક્ષા અધિકાર આદિ ભાગ-૩
૧૮. ૪ પ્રકરણ ૩ ભાષ્ય - ૬ કર્મગ્રંથ ભાગ-૪
૧૯. તત્વાર્થ-જ્ઞાનસાર-યોગસાર ભાગ-૫
૨૦. શાન્તસુધારસ-યોગશાસ્ત્ર ભાગ-૬
૨૧. વીતરાગસ્તોત્ર-વૈરાગ્યશતક-ઇન્દ્રિય-પરાજય-શતક-સંબોધસત્તરી-સિંદૂરપ્રકર ભાગ-૭
૨૨. બૃહત્ સંગ્રહણી-લઘુક્ષેત્રસમાસ-પ્રશમરતિ ભાગ-૮
૨૩. ૧૨૫-૧૫૦-૩૫૦ ગાથાના સ્તવનો ભાગ-૯
૨૪. સમકિતની-આઠ દૃષ્ટિની-અઢાર પાપ-સ્થાનકની સજ્ઝાયો નિશ્ચય વ્યવહાર ગર્ભિત સ્તવનો ભાગ-૧૦
૨૫. શ્રી ગચ્છાચાર પયન્ના (મૂળશ્લોક-સં.છાયા + શ્લોકાર્થ)
૨૬. પૌષધ કરીએ પાપ પરિહરીએ
૨૭. શ્રી ઉત્તરાધ્યયનસૂત્ર અધ્યયન ૧ થી ૧૩ (મૂળશ્લોક+સં.છાયા) ભાગ-૧
૨૮. શ્રી ઉત્તરાધ્યયનસૂત્ર અધ્યયન ૧૪ થી ૨૨ (મૂળશ્લોક+સં.છાયા) ભાગ-૨
૨૯. શ્રી ઉત્તરાધ્યયનસૂત્ર અધ્યયન ૨૩ થી ૩૧ (મૂળશ્લોક+સં.છાયા) ભાગ-૩
૩૦. શ્રી ઉત્તરાધ્યયનસૂત્ર અધ્યયન ૩૨ થી ૩૬ (મૂળશ્લોક+સં.છાયા) ભાગ-૪
૩૧. શ્રી સ્થૂલભદ્રચરિત્ર (પૂ. જયાનંદસૂ. મ.સા.)
૩૨. શ્રી ગચ્છાચાર પ્રકરીર્ણકમ્ (શ્રી વાનરર્ષિ ટીકા)
૩૩. શ્રી ગચ્છાચાર પ્રકીર્ણકમ્ (શ્રી વિજયવિમલ ગણિ ટીકા)
૩૪. શ્રી કલ્પસૂત્ર
❖ જૈનત્વ સંસ્કાર જાગરણ નિયમાવલી (પાઠશાળા માટે)
૩૫. બાંધી તુજ શું પ્રીત (ગુજ.)
૩૬. શ્રેયસ્કરી જિન સ્તુતિ ચતુર્વિંશી (તત્ત્વપ્રભા વિવરણોપેતા) (સં.)
૩૭. શ્રી દશવૈકાલિકસૂત્ર (મૂળશ્લોક+સં.છાયા)
૩૮. શ્રી શીલદૂતમ્ કાવ્ય (ટીકા સાથે)
૩૯. આરાધો શત્રુંજયગિરિ પામો સિદ્ધિપુરિ
૪૦. શ્રી દશવૈકાલિકસૂત્રમ્ (ટીકાત્રિકયુતમ્)




: પ્રકાશક :

**પૂ. આ. શ્રી જિનપ્રભસૂરિ ગ્રંથમાલા**

**ખાનપુર, અમદાવાદ**

૪૧

BHARAT GRAPHICS - Ahmedabad-1
Ph. : 079-22134176, M : 9925020106